।। लघुशब्देन्दुशेखरः ।।

(अव्ययीभावान्तः)

।। कारकान्तश्रैधरीटीकायुतः ।।

योजनानिदेशकः प्रधानसम्पादकश्च

डॉ० गयाचरण त्रिपाठी

(आचार्यः)

सम्पादक :

डॉ० रामनारायण मिश्रः

राष्ट्रिय संस्कृत संस्थानम् (मानित विश्वविद्यालयः)

गङ्गानाथझा परिसरः प्रयागस्थः

प्रयाग - २११००२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२००३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

।। लघुशब्देन्दुशेखरः ।।

(अव्ययीभावान्तः)

।। कारकान्तश्रैधरीटीकायुतः ।।

●

योजनानिदेशकः प्रधानसम्पादकश्च

डॉ० गयाचरण त्रिपाठी

(आचार्यः)

●

संम्पादक :

डॉ० रामनारायण मिश्रः

राष्ट्रिय संस्कृत संस्थानम् (मानित विश्वविद्यालयः)

गङ्गानाथझा परिसरः प्रयागस्थः

प्रयाग - २११००२

२००३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशक -

डॉ० गयाचरण त्रिपाठी, डी० लिट्०
प्राचार्य
गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ
चन्द्रशेखर आजाद पार्क
इलाहाबाद - २

पुनर्मुद्रणादिकाः सर्वेऽधिकाराः संस्थानेन स्वायत्तीकृताः

प्रथम संस्करण - २००३

मूल्यम् -

अक्षरसंयोजना -
राजेश शर्मा

मुद्रक :
सूर्या प्रिन्टर्स एण्ड स्टेसनर्स
७ बी लाजपत राय रोड, नया कटरा
इलाहाबाद
फोन : २६४०३६६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राष्ट्रीय-संस्कृत-संस्थानम्
(केन्द्रीय-शिक्षामन्त्रालयस्याङ्गभूतम्)
देहली

●

गङ्गानाथझा-केन्द्रीय-संस्कृत-विद्यापीठ-ग्रन्थमाला

प्रधानसम्पादकः

डॉ० गयाचरण त्रिपाठी

पञ्चचत्वारिंशं प्रसूनम्

●

जगन्नाथविरचितम्

।। लघुशब्देन्दुशेखरः ।।

सम्पादकः

डॉ० रामनारायण मिश्रः

●

गङ्गानाथझा-केन्द्रीय-संस्कृत-विद्यापीठम्

प्रयागः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

RASHTRIYA SANSKRIT SANSTHAN
(Under the auspices of the Ministry of H.R.D.)
New Delhi

●

Ganganatha Jha Kendriya Sanskrit Vidyapitha
TEXT SERIES

Chief Editor
Prof. G.C. Tripathi
Principal

●

Vol. No. 58

LAGHUS'ABDENDUS'EKHARA

Critically edited by
Dr. Ram Narayan Mishra
(A work of Rāmānuja Vedānta)

●

Ganganatha Jha Kendriya Sanskrit Vidyapeetha
Chandrashekhar Azad Park
Allahabad-211 002
CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूज्यगुरुचरणेभ्यो
वैकुण्ठवासिश्रीरामवदनशुक्लवर्य्येभ्यः
सादरं समर्प्यते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्देन्दु शेखर – श्रैधरी टीका

शब्देन्दु शेखर श्रैधरी टीका शोधपत्रादि सहिता

शोधकार्य कर्ता –

डॉ० रामनारायण मिश्रः, उपाचार्यः

गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठ आजाद पार्क, इलाहाबाद

।।शब्देन्दु शेखरस्य श्रैधरी टीकानुस्मृतिः।।

श्रीधरं श्रीहरिन्नत्वा श्रीकरग्रहपूजितम्।

शब्देन्दु शैखरीं टीकां श्रैधरीं सूक्तिमाश्रये।।१।।

शब्देन्दुशेखरोद्भाव्याः टीका नैकाः प्रकाशिताः।

शब्दागमे प्रसाद्यन्ते नाना प्रतिभयुक्तिकाः।।२।।

तास्वपि प्रतीकानां स्थलानां गूढ पङ्क्तयः।

श्रैधर्य्या सुप्रबोध्यन्ते शेखरोक्तिमनीषिताः।।३।।

टीकेयं वहुसन्दर्भा कारकान्त विनिर्मिता।

आपा वैष्णवदेवेन लिखिता मातृकामता।।४।।

टीका कर्ताकथं ज्ञेयश्श्रीधरः कोऽपि तादृशः?।

यादृशश्श्रीधरोधीमान् भागवतमर्म बोधकः।।५।।

किन्नामध्येय कर्त्तास्ति श्रीधरोऽन्यबुधोऽथवा।

क्वजनिर्जनकश्चापि विद्यावंशस्तथार्हता?।।६।।

नालेखि तेन टीकायामुक्ततत्त्वमिवार्थकम्।

तेन किञ्चित्स्वतस्तथ्ये न युक्तिः कापिशिष्यते।।७।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बहु ग्रन्थ कृता कीर्तिर्नाम जन्म प्रथानुगा।

सृज्यते नापि हृद्या प्रायो विज्ञजनैः कथम?।।८।।

विद्यावतंशवंशानां संशयोऽत्र प्रवर्तते।

निर्णायकमतं किञ्चिदिष्यते सर्ववृत्तिकम्।।९।।

ग्रन्थारम्भ पथे कापि नामजन्मकुलादिषु।

प्रमाणानुगमायुक्तिः साधयत्यर्थ भावनाम्।।१०।।

यस्येयं कृति रासन्ना शेषरोक्ति विमर्शिनी।

वन्द्यस्स शाब्दिकैरद्य शब्दसागर रत्नधीः।।११।।

संज्ञाप्रकरणारभ्य कारकान्त सदुक्तिषु

वैलक्षण्य पथोपेता श्रैधरीतिप्रभासते।।१२।।

नान्यटीका गतार्थेयं सर्वांशेष्वपि युक्तितः।

अस्पृष्टस्थल सामर्थ्यं विभर्तीति प्रसङ्गतः।।१३।।

तस्मान्महत्त्वमस्यापि प्रवासीवाप्रकाशनात्।

निगूढमिव सत्तथ्यं ग्रन्थस्यात्र विचारतः।।१४।।

अतस्तदर्थ सोपाना श्रीधरस्य विचारणा।

प्राकाश्यमाना सिद्धान्ता कौमुदीव विभास्यति।।१५।।

शब्देन्दु शेखरे वीजं शब्दरत्नमयं यथा।

शेखरार्थसुटीकासु श्रैधरीयंन्निगद्यते।।१६।।

संज्ञासंज्ञिविमर्शाय पञ्चसन्धि विधानतः।

षड्लिङ्गाव्ययसाधुत्व स्त्रीप्रत्यय विभक्तिकम्।।१७।।

सरहस्य प्रकाशाय श्रैधरी सर्वभागतः।

वादोपवादनियता निरताऽबुधबोधने।।१८।।

सोऽर्थो हृद्यमहोद्गारो लक्ष्यतेव्यज्यतेऽपिवा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नागोजिभट्टपादानां श्रीधरोक्ति प्रसादतः।।१६।।

विद्वन्मानसमोदाय लाभाय (सेवायै) प्रतिभायुषाम्।

छात्राणां मति मुग्धानां श्रैधरी न विशिष्यते?।।२०।।

श्रैधरीयं टीकापि मर्मबोधाय शेखर पङ्क्तीनाम्।

प्रकाशितासु टीकासु समभिनन्दितास्याच्छाब्दिकैः।।२१।।

गतार्था ताभिर्नेयमवश्यमनुपदभमिमतं विज्ञाप्य।

साभिनवदृष्टि कलाभिश्शेखरोत्कर्ष विचाराय।।२२।।

साभिमतां विद्वान्सो नागोक्तिं तां विचाराय सहसा।

ध्यात्वाऽऽनन्दमुग्धा न भवेयुश्श्रैधरीवाचा?।।२३।।

काचन दीपशिखेव प्रभासयन्ती शब्दगह्वरन्तद्

नयतियदर्थ सतीर्थं यात्रीव तटं नदी वरस्य।।२४।।

कारकान्त भागेन हि सकलार्थ साधनपरा शेखरे।

स्वक्षादलितविपक्षा प्रतिभाति न शेखर सेतुरिव?।।२५।।

तत्त्वान्वेषण लक्ष्या शिक्षाऽवेक्षा सासूत्रार्थानाम्।

श्रीधरोक्तिस्सुबद्धा न सनध्दावादविवादाय?।।२६।।

सत्यमेषाभणितिः सुफणिभाषित भाष्याब्धेस्तरणाय।

नागेशीयविचारोविहितोऽस्यामित्युडुपइवास्तु।।२७।।

सरल प्रतीक भावा ग्रन्थ गौरवाय गुम्फिताः सम्यक्।

नयन्त्वाह्लादपरतां शेखराध्ययनरतानधुना।।२८।।

सच्छास्त्र मतासूक्तिश्शब्दरत्न प्रसादप्रसाराय

शेखरेन्दु कलाधरा विजयतेऽर्थ भासयन्तीव।।२९।।

सर्वपक्ष पदजातैर्वाक्यैरनुबन्धचतुष्कसुवोधः।

शब्देन्दुशेखरगतश्श्रीधरोक्तोस्तु सुविनोदाय।।३०।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्रसंगविधि नीता व्याख्या गीता च गुरु प्रसाद इव।

चरितार्थयति चरित्रं विदुषां सदाशरणागताय।।३१।।

सम्पादितेयं कृतिश्शेखर मूलयुता यदाभवित्री।

सिद्धार्थ कौमुदीव न श्रैधरी तदास्तुताबुधैः।।३२।।

भाषाभाव सरलापि या श्रीधरोक्ति श्श्रीधरगीतेव।

युक्ति प्रमाण बहुला न सा प्रतिभोन्मेषिणी जयतु।।३३।।

विद्द्भिस्सुख बोध्या शेखरोक्ति र्भासितामदधीना।

साकापि प्रतिभा वा स्याच्छब्देन्दुप्रसादाय हि।।३५।।

प्रकीर्णापूर्णगतिका या सरलतया शेखर ज्ञानाय।

सुटीका स्वादरतीव भवतुसदा विदुषां समाजे।।३५।।

प्रत्याहारेत्संज्ञा सवर्ण पदसंयोगसंहिताद्या।

पदसाधुत्व विमर्शा कृतार्था श्रैधरी विजयताम्।।३६।।

सूत्र सगर्भाव्याख्या विधिनियमाधिकारातिदेशानाम्।

नवाभिनवतानियता न विदुषां विद्या विनोदाय?।।३७।।

पदार्थ रक्षाकल्पा या नाल्पाति विस्तार पंक्तीनाम्।

व्याख्या निदान भूता सा कापि न शेखरोदयाय?।।३८।।

ज्योत्स्नाचिदिस्थमाला दीपिकान्विता सभैरवीत्याद्या।

टीका यदर्थ कलिता तदर्थ विलक्षणा श्रैधरी।।३९।।

सपदकृत्यव्याख्यानमवश्यम्मतं शास्त्रोपकाराय।

परमेतट्टीकासुप्रायो दृष्टि गोचरी भवति?।।४०।।

नार्थः कोऽपिश्लाध्यो यद्यभिमतप्रकाशनाक्षमोवै।

सोऽर्थः सत्यं हृद्यो यो ग्रन्थाभिनिवेशिदृष्टः।।४१।।

सर्वाऽगम्याटीका टीकाकृद्भिरपि नानवद्या वा।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वक्तुं विबुधैरधुना न पार्यतेऽभिनिविष्टैस्सद्यः।।४२।।

विद्याऽविद्येशाखे श्रुतिसम्मते प्रवृत्ति निवृत्तीति।

ग्रन्थोध्दारपरेस्तः किम्बा सिद्धान्त विचाराय?।।४३।।

रुदन्त्युपनिषदः सर्वाः सर्वा वयमित्येव सहान्यैस्तैः

शास्त्रैस्तर्कसहायैर्न नीता विपदमुदासीनाः?।।४४।।

वेदांग प्रमुखेवै शब्दान्वाख्यानन‌ये मीमांसा

दोषोद्धारविचारो मतस्सूत्रार्थ प्रसाराय।।४५।।

हृद्याऽऽवेद्यारेखा लेखा समस्त शेखर टीकानाम्।

भाव्याऽभिज्ञैरक्ष्या साङ्गता दक्षिणेव विदिता।।४६।।

व्याख्योपकारार्थ्या विहिंता विदुषाकेनापि वा मता

मर्मतल स्पर्शिनीव नागेशोक्तिप्रचूराणाम्।।४७।।

स्थल विशेष निहितार्थ सहजतया श्रैधरी या व्याख्यापि।

कामप्यभिनवतां तां मतिमाश्रयन्ती जयतितराम।।४८।।

निश्शेषाभिनिवेशः टीकाकर्तुरयं प्रयासोऽर्थोऽपि

विज्ञेयोविद्वद्भिः प्रसन्नैः प्राकाश्य ग्रन्थे।।४६।।

सु सम्पादन विधिर्वा नाज्ञेन सर्वथाविवादमुक्तः।

शोध पत्रप्रथावापिन वैदुष्यपूर्णतां नीता।।५०।।

सृष्ट्वाऽऽभरणाभोगं योगशास्त्र पथप्रवृत्तिकानाम्।

पदार्थसरलीकरणं भवति मन्दधियां प्रबोधाय।।५१।।

शास्त्रार्थ प्रवाहेऽत्र शेखरोक्तिविमर्शन परायणस्य हि

श्रैधर्य्यां यथास्थलमीष्टा।।५२।।

सन्धिरार्षोनित्याऽपि विवक्षाधीनावाप्रयोक्तॄणाम्।

स्थान्यादेशविवादोवाचकत्व प्रसंग नियतः।।५३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदुषां दयानुदानं प्रबलवलं सम्पादकानामपि हि।

भवतु प्रमोद कल्पं स्खलनंदृष्ट्वारभसानापि।।५४।।

शुभामातृका निखिला सन्तापहरीश्रैधरीशेखरे

शास्त्राभ्यासरतानां चन्द्रिकेवाभासकरीत्यपि।।५५।।

भाष्याभास दिशा या प्रस्तुतिः सच्छास्त्रबोधाभिमता

शब्दागमपथनीता टीकासर्वापिविशिष्यते।।५६।।

काचिदन्यामान्यापि नवनयपथानुगतावदान्यावा

सुकृतावीक्षादीक्षा न सहृदयशिक्षावधानाय?।।५७।।

सत्यमेतदखिलं वै बुद्धिकल्पनाप्रासूतं ज्ञानम्।

प्रभवति सदर्थ पथ्यं सदा व्युत्पत्ति वैचित्र्याय।।५८।।

रक्ष्या सर्वा टीका लघुगुरुभूतापि विवुधैस्सयुक्त्या।

स्यादेवन्नवियोगः स्वेष्ठ जन इवेह शास्त्राणाम्।।५९।।

सर्वत्वेतन्निखिलं संज्ञासन्धिकारकातन्तविभातम्।

सुस्पष्टमभिधास्यति श्रैधरी सतां सुविमर्शाय।।६०।।

विषयोऽतीवगभीरः श्रैधर्य्याः व्याख्यानुरोधिगम्यः

भाषा तथापि सरला शेखरोत्कर्षसुबोधाय।।६१।।

श्रद्धावन्तोविज्ञाः शेखराध्ययनाध्यापनरता ये

शब्दब्रह्मणिलीनाः धन्यास्ते जयन्ति जीवन मुक्ताः।।६२।।

पाणिनीयहृद्यर्थाः शब्दागमप्रवेशोपायास्ते

विद्वद्भिरनुभूताश्च यैरिह परमोत्कर्ष मताः।।६३।।

रक्ष्योनिधिर्विधिज्ञैः शास्त्रेरुचिं विवर्धयद्भिस्स्वतः।

सफलं जन्मविधातुं सोऽपि लोकहितायसुधर्मः।।६४।।

मातृकानुलेखोवा न केवलं पाठभेदविज्ञानम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृत्वा कोऽपि कृतार्थः शोधकार्यप्रसक्तोजयति।।६५।।

विषयस्फूर्ति समीक्षा सदाशिक्षाग्रेसराणां विहिता

स्वान्तःसुखाय सहजाऽभिनवदृष्टिप्रबोधाय।।६६।।

अनुकार्यानुकरणयोः भेदाभेद पक्ष विचारविधया

नित्यः कार्य्यश्शब्दः शास्त्रप्रवृत्तिपरौविहितौ।।६७।।

शब्दसाधुत्वमयता शब्दब्रह्मप्रकाशननियतापि

शब्देन्दुदर्शनपराश्रैधरी प्रभासचन्द्रिकेव।।६८।।

व्याख्या विधानसरणिः श्रैधरीकौमुदीवार्थपरार्था

वेद्याविद्याविज्ञैरनुभूतिपथ प्रयासरतैः।।६९।।

शब्दार्थ प्रतिपत्तौ संस्काराहितविद्याविनोदोपि

श्रैधर्य्याः सम्बन्धे स्वयमेवहिप्राप्स्यते बुधैः।।७०।।

भागवते यथावीक्ष्य टीकानैकास्तदर्थपरायणाः

श्रीधरीवात्रापतिताः प्रमोदं श्रैधर्य्यापिदधतु।।७१।।

स्थान्यादेशविचारे प्रकृति प्रत्ययोद्देश्य विधिविमर्शे

पदसाधुत्वविधानेष्वपि श्रैधरीयं विजयताम्।।७२।।

संज्ञापरिभाषयोर्हि विधिशास्त्राधिकारानुमतयोरपि

कार्योपकारभावस्तयोश्श्रैधर्या विशिष्यते।।७३।।

शेखरोक्तिप्रसंगे श्रैधरीत्यपिगुरुतांगताप्रथिता

टीकास्वन्यतमावै वैशिष्ट्यवरणप्रसादाय।।७४।।

सामान्यपरिष्कारोऽपि शेखरेन्दु कलाशोध परायणः।

रोहिणीवास्यामतः सम्बन्धेनस्वतः स्तुतोपि।।७५।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

।। आमुखम् ।।

व्याकरणानुसंशा = (संक्षिप्त शोध पत्रात्मकरूपा)

सम्पूर्णे संस्कृत वाङ्मये छन्दसांप्रधानं प्रथमं मुखस्थानीयमङ्गं व्याकरणमम्युपगम्यत इति राद्धान्तः। एतद्विषये परमाचार्य प्रवरैश्च श्रीरघुनाथशर्ममहोदयैर्वाक्यपदीये ब्रह्मकाण्डेऽम्बा कर्त्रीति टीकायां प्रामाण्यग्रहानुरोधि सूक्तिरियमौपनिषत्सम्बन्धिनी समवतारिता। तद्यथाआपः पवित्रं परमं पृथिव्याम् अपांपवित्रं परमं च मन्त्राः। तेषाँच सामर्ग्यजुषां पवित्रं महर्षयोव्याकरणं निराहुः।। व्याकरणस्य प्रासंगिकत्वं हि वेदस्य च व्याकरणकोशयोरतीवसुसामञ्जस्येन सहैव सुसंघटते। यतोहि व्याकरणसम्बन्धिनियम निर्धारकं प्रतिपादकञ्च प्राथम्येन प्रतिशाख्यमेवाङ्गीक्रियतेनात्र कश्चन सन्देहः। किं नाम प्रातिशाख्यमिति संगतिलाभायप्रथमं प्रातिशाख्य विषयेऽपि कश्चनन्नल्पीयानावश्यकोविचारः कर्त्तव्य एवेति तदुच्यते – वेदानां भिन्न-भिन्न शाखासु तथा सम्प्रदायेषु च प्रचलितरूपाणां लक्षणादीनाञ्च नियमबध्दवर्णनपरायणान् ग्रन्थानेव प्रातिशाख्य पदेन वोधयन्ति विद्वान्सः। तच्च प्रातिशाख्यमिदानीं षडेवोपलम्यत् इत्यपि भाषन्ते।

तेषु प्रथमं प्रातिशाख्यं पार्षद सूत्र रूपेणापि स्मर्यते। प्रातिशाख्यमिदं महर्षि शौनककृतं मन्यते। छन्दोबद्धमिदं प्रातिशाख्यमित्यपि सत्तथ्यम्। द्वितीयस्य प्रातिशाख्यस्य शुक्ल यजुषो रचनाकारश्च कात्यायन मुनिरिति विपश्चितान्नियतधारणा। तृतीयस्य सामवेदस्य प्रातिशाख्यं महर्षि पुष्य रचितम्मन्यन्ते। अस्य प्रतिशाख्यस्य प्रसिद्धिः पुष्य सूत्र नाम्नापि समुद्गीर्यते। तुरीया चतुर्थीसूत्र रचना अथर्ववेदीय प्रातिशाख्यस्य कीर्त्यते। अस्यप्रतिशाख्यस्य सम्पादनं विश्वबन्धु शास्त्रिणाकृतम्।

पञ्चमपि प्रातिशाख्यमथर्ववेदस्यैव चतुरध्यायी नामकग्रन्थनाम्ना प्रशस्तम्। यस्य सम्पादनं हि अमेरिकायाः संस्कृतविद्वान् ह्विटमहोदयः कृतवानिति मन्यते।

षष्ठं प्रातिशाख्यं कृष्णयजुर्वेदीयं तैत्तिरीय प्रतिशाख्यनाम्नाऽभिहितं विद्यते। परमस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्विंशति संख्याकाध्यायात्मकस्य रचयितुः परिचयो ज्ञानम्वा न भवति। प्रातिशाख्य ग्रन्थानां प्रमुखमुद्देश्यं स्व स्व शाखानां विलक्षणता विचक्षणता प्रयोज्य प्रकाशनम्। तथा संहिता पाठः, पदपाठः क्रमपाठः, जटापाठादिकञ्चेति सम्यगधीत्य वेदपाठ सुरक्षैव परमंलक्ष्यम्। अत्रैतद्वैशिष्ट्यमपि विद्योततएव यत्संस्कृत साहित्ये प्रायः सर्वप्राचीनतम ग्रन्थेषु प्रक्षेपः परिवर्तनं परिवर्धनञ्चाभवद् यथाकालम् किन्तु वेद मन्त्रेषु कदापि क्वचिदपि न प्रक्षेपः परिवर्तनं परिवर्धनम्वासमभूत, तेनैवास्य वेदस्य वेदता पवित्रासुविदिता प्रसंशिता चकास्ति।

इदमप्यत्र सत्यं यत् प्रातिशाख्येषु यद्यपि वर्णसमाम्नायः संधिः, स्वरविचारः, संहितापाठः, उच्चारणविधिश्च वर्णितः, तथा विषयेष्वेषु प्राचीन कालेलिखितानामनेक ग्रन्थानां समुल्लेखः समुपलभ्यते तथाप्येतदपि सत्यं सम्यगवधारणीयं विद्यतेयत् सन्धीनां शिक्षायाः प्रत्याहाराणाम् तथासूत्राणां यादृशी वैज्ञानिकी सुसंघटिता रचना समपेक्षिताप्रतिभातिस्म तथान प्राति-शाख्येषु तत्कर्तृभिः समुपस्थापिता। वेदानां गम्भीर भावानामव बोधाय सम्यगध्ययनाय आत्मबोधाय शब्दव्युत्पत्तेः शब्द रचनायाः साधुत्वस्यच निवर्चन शैल्याश्च प्रतिपादन समानां ग्रन्थानां तदानीमपि सर्वथा अभावः समदृश्यत एव।

प्रातिशाख्यग्रन्थानामेवंविधावश्यकतापूर्त्यै निरुक्तशास्त्रस्य रचना समजायत। क्षेत्रेऽस्मिन् आग्रायणः, औदुम्बुरायणः, औपमन्यवः, शाकपूर्णि प्रभृतयोऽनेकेशाब्दिकाः भूरिश्रमंविधाय कार्यं कृतवन्तस्तथापि तेषान्ते ग्रन्थाः सम्प्रति नोपलब्धाः /

सन्तीत्यपि तथ्यमामनन्ति विपश्चितः।।

एतद्धि सर्वमुक्तन्तथ्यं प्रकृतवर्णनीयविषयबीजभूतमित्यवधार्यैव प्रादर्शि, वस्तुतो यास्कमुनिकृतोनिरुक्तग्रन्थोऽपि परमं महात्म्यं सम्भजते, यत्र सम्यग् भाषा सम्बन्धिमौलिक सिद्धान्तानां सुविवेचनमुपलभ्यते, ऋग्वेदीय शताधिक मन्त्राणां सम्यगभिमतार्थस्य सुस्पष्टतयानिर्धारणं देवता स्वरूप निरूपणञ्चकृतम्। अयञ्चग्रन्थो यद्यपि वेदार्थज्ञानाय सत्य मनुपमस्तथापि सम्पूर्ण वैदिक साहित्य मर्म प्रकाशने न सर्वथा सर्वांशतः पूर्णताम्भजत इत्यपि सत्यम्।

इत्थमत्र विचारणायां विनिवेद्यते यत् पद साधुत्वापरपर्यायस्य शब्दान्वाख्यानस्य वैदिकलौकिकोभयस्य परमामावश्यकतामनुभूयैव महर्षि पाणिनिमुनिरष्टाध्यायीं प्रणीतवानिति मन्ये। येन सम्यक्तया भाषा सम्बन्धिरूपप्रयोगाणां लौकिकानां वैदिकानामपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वा विस्तृत व्याख्यातत्राष्टाध्याय्यामुपलभ्यतेऽत्र न किञ्चित्तिरोहितमतिशयोक्ति कम्वा। परमार्थत एतस्यापि सीमा लौकिक भाषांयावदेवाधिक्येन व्यवहारपथे समायाति।

यद्यपि वैदिक प्रक्रिया स्वर वैदिक प्रक्रिया पराण्यपिसूत्राण्याधिक्येनोपलभ्यन्ते तथापि लोकव्यवहारे महीयान्सो बुधा न यथालक्ष्य मधिकृत्य महत्त्वमाटीकन्ते। एतदपि सत्यमेव पाणिनीय व्याकरणे स्वरवैदिक प्रक्रियोर्विद्यमानयोरपि वेदस्य सर्वाङ्गपूर्णव्याकरणं न वक्तुं शाक्यत् इत्यपि सत्यम्।

परं सत्स्वन्येषु सत्तथ्येषु भाषाज्ञानाय व्याकरणं (प्रक्रियात्मकम्) कोशसाहाय्येन, शाब्दवोधश्च व्याकरणाधीन एवेति नात्र विवादः। वैदिकशब्दानां निर्वचनं व्याख्यानञ्च निधण्टुग्रन्थे निरुक्ते च भवति, आंशिक रूपेण ब्राह्मण ग्रन्थाः सूत्र ग्रन्थाश्च कोषाश्रिताः सन्ति।

एतदवश्यमत्र सर्वैरवधारणीयं यत् सर्वशास्त्रोपकारकं प्रमुखमङ्गं व्याकरणमेव वेदानाम्। तस्मादेव व्याकरणं शास्त्रत्वेनापि तदर्थाय तदर्थप्रति भावनायवा वेदानां श्रेणी मपि भजते, यतस्मग्रवेद मन्त्रार्थ व्यक्तीकरणाय कुञ्चिकाभूतं सदुपादानतांगतञ्चाभिमन्यते व्याकरणशास्त्रमिति। येन वेदमन्त्राः सुरक्षिताः स्युरिति। संस्कृत वाङ्मयस्यशब्दराशिभण्डारः स्वस्व व्युत्पत्यनुरूपः सत्यमेवार्थ सापेक्ष्य शब्दानां व्युत्पत्ति समुद्देश्येनैव व्याकरणशास्त्रस्य प्रणयनं नैके परमाचार्याः कृतवन्तः प्राचीना आर्वाचीना वेति सर्व विदितं विदित वेदितव्यमत्र। व्याक्रियन्ते व्युत्पाद्यन्ते निष्कृष्य सर्वविकारेभ्यः दूरीकृत्य शुद्धी = पवित्री क्रियन्तेऽपशब्देभ्योहि साधु शब्दत्वेन येन तदेव व्याकरण मितिकरणव्युत्पत्त्या सम्पूर्ण संस्कृत साहित्यं भागद्वये विभक्तं वैदिकं लौकिकञ्चेति रीत्या। यद्यप्येतदपिवास्तविकं यल्लौकिक साहित्याधारभूमिरेव वैदिक साहित्यम् 'तथापि द्वयोरपि स्वीया मौलिकतापि विलक्षणं वैशिष्ट्यं ख्यापयति।

तद् यथा लौकिक संस्कृत शब्दोत्पत्ते रनेकव्याकरणानि 'इन्द्र-चान्द्र-काशकृत्स्नप्रभृतीनि ततः पूर्ववर्ति परवर्तिन्यपिव्याकरणानि तथैव वैदिकशब्दनिष्पत्तये पृथक् पृथग्ग्रन्थनिर्माणमभवत्। अतस्सुविदितमेव यत् सम्प्रति लौकिकं परं प्रामाणिकं पाणिनीयं व्याकरणं प्रशस्तमष्टाध्यायी रूपं सर्वोत्कृष्टमपि सर्वथा सर्वमूर्धन्यमिति न क्षेषाञ्चित्तिरोहितम्। अष्टाध्यायाः सर्वांगीणता सार्वभौमिकता सर्वव्याकरणापेक्षया प्रक्रियोपादेयताऽतिशयितावा सुप्र संशिता सम्प्रकाशते सर्वत्रापि। यद्यपि वैदिकशब्दव्युत्पत्तये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथा वैदिकशब्दार्थ बोधाय ये विशिष्टाग्रन्थविरचितास्ते प्रतिशाख्य रूपाः सन्ति। प्रातिशाख्य ग्रन्थानां मूल सूत्राणि ब्राह्मणग्रन्थेषु कल्पसूत्रेषु च विद्यमानानिसन्ति। येन प्रातिशाख्यकारा वैयाकरणाः स्वग्रन्थनिर्माणप्रेरणां वैदिक साहित्यस्य प्राचीन ग्रन्थरलत एव प्राप्तवन्तः। तथाप्यत्र विचार आवश्यक एव। इत्थमत्र सम्यकत्या लौकिक वैदिक व्याकरणयोस्तुलनाक्रियते चेत् तदा पाणिनीयाष्टाध्याय्याँ शब्दरचना (साधुत्व) विषये शब्दान्वाख्याने यथा सूक्ष्मेक्षिकतया गभीरा समुदारा साङ्गोपाङ्गप्रक्रिया समुपलभ्यते तथा न प्रातिशाख्येषु प्रायः। न वाऽष्टाध्यायी समाना मौलिकता लोकप्रियता वा प्रातिशाख्यविषयाणाम्।

वर्णसमाम्नाय;, पद विभाग; सन्धिविच्छेद;, स्वरविचारः, संहितापाठः उच्चारणभेदः विधिश्चापि सर्वमेतत्सर्वविमृष्टपदवीमानीतमपि नाष्टाध्यायीवत् प्राशस्ततां भजंते प्रातिशाख्य विषयाः।निरुक्ताध्ययनायापि व्याकरणमतीवाश्यकमिति। निरुक्तं वेदार्थ ज्ञानाय सत्यमुपयोगितां भजतिपरन्तत्रव्याकरणशास्त्र विकासस्य प्राचीन सूत्रतया न तदुपयोगिता हीयते। अत एव यास्कमुनीरव्रवीत् यद् वैयाकरणाय न निरुक्तमिति।

विचारोऽत्र सम्प्रति पाणिनीय व्याकरणस्य विश्वस्मिन् परमाश्वयकता सुरक्षा चाध्ययनाध्यापन मुखेन वेदवेदांगानां शास्त्राणाञ्च सर्वोपकारयेति सर्वविदितं तथ्यम्। पाणिनीयमुनि कृताष्टाध्यायी विषये गभीरार्थवती लोकभणितिरियं यत्

अष्टाध्यायी जगन्माताऽमरकोशोजगत् पिता, इति अनन्तेऽपारे संस्कृत साहित्य संसारे साधुशब्दवोधनेन संस्कृतज्ञानेन सहृदयान् संस्कृतभाषा संरक्षण संबर्धन परायणान् साधुशब्दसुधाधाराः पाययन्तीव समग्रदेशीय भाषाश्च, पुत्रीरिव परिपोषयन्तीव च पाणिनीयाष्टाध्यायी जगन्मातावेति न मनागपि सन्देहः। प्राचीन समयेऽष्टाध्याय्याः पठन पाठन-परम्परा सूत्रक्रमानुसारमेवासीत्। शनैश्शनैः कालान्तरे प्रयोग साधुत्वज्ञानेकाठिन्यमनुभूय मध्यवर्तिभिः श्रीशेष कृष्ण प्रभृतिभिर्विद्द् वरेण्यैः प्रक्रिया ग्रन्था विरचिताः तत्रापि तथापेक्षित सारल्यताऽभावमवधार्यैवशब्द शास्त्रोदधि पारंगतेन श्रीमद् भट्टोजिदीक्षितेन वैयाकरण सिद्धान्तकौमुदीनामा महान् प्रक्रियाग्रन्थोव्यरचि। परमत्रैतदपिसत्यं यत् पाणिनीयाष्टाध्यायाः सूत्रक्रमोन सुरक्षितः तथापि प्रायस्तृतीय चतुर्थपञ्चमाध्येषुप्राचूर्येण कृदन्तस्त्रीप्रत्यय तद्धितप्रकरणेषु षष्ठाध्याये स्वरप्रकरणे सन्धि प्रकरणेच द्वितीयाध्याये समासप्रकरणेच प्रथमाध्याये संज्ञापरिभाषा प्रकरणे कारक प्रकरणे च यथासम्भवं सूत्रक्रमः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुरक्षित इति वक्तुं शक्यत एव। सूत्रक्रम भंगोऽत्यल्पः सन्नपि प्रयोगसाधुत्व सारल्य-सौविध्याधाने नेतिभूषण मेव न दूषण मित्यपितथ्यम्। वैयाकरण सिद्धान्त कौमुद्याः प्रणयनं भट्टोजिदीक्षितपादेन कृतमत्र वस्तुतोऽवरोहणक्रमेण वर्तते-ग्रन्थनिर्माणविधिरारोहणावरोहणक्रमद्वयेनापि प्रावर्ततेति शुभाय।

वाक्योदाहरण मर्म प्रकाशनाय चरमंसिद्धान्तं वाक्यस्फोटं सन्धि प्रकरणं स्मारयति। वाक्येऽपि वाक्यार्थ निरुपिता शक्तिरम्युपगम्यत् एव शाब्दिकैः यद्येवं न स्वीक्रियते चेत्तर्हि कृत्तद्धितसमासश्चेति सूत्रे समासग्रहणस्य नियामकत्वं भाष्योक्तं कथं संगच्छेत्।

एवमेव स्वंरूपं शब्दस्याशब्दसंज्ञेति सूत्रस्यापिसार्थक्यं भज्येत्, यतोहि वचोऽशब्द संज्ञायामिति सूत्रानुसारवाक्यमिति शब्दस्य संज्ञा। तद्धिवाक्यं शब्दात्मकमेव येन स्वस्यार्थस्य रूपस्य च (शब्द स्वरूपानुपूर्व्याश्च) संज्ञा = नामबोधकं भवतीति स्वं रूपं शब्दस्येति सूत्रं बोधयति। वाक्य लक्षणान्तु नैकविधम् तद् यथा एक तिङ् वाक्यम् सर्वं वाक्यं क्रिययापरिसमाप्यते, इति स्वरूपलक्षणम्, सुपतिङन्तचयोवाक्यम् क्रिया वा कारकान्विता, इति-अमरकोशकारप्रभृतिभिः प्रोक्तम्। पदसमूहो वाक्यमर्थसमाप्तौ समर्थमितिन्याय भाष्यकाराः प्रतिपादयन्ति। आख्यातं सविशेषणं वाक्यमिति महाभाष्यसम्मतम्। अस्तु इत्थमत्र सन्धि प्रकरणानन्तरं वाक्यान्तर्गतस्य पदस्य सुप्तिङन्तान्यतरस्य स्मृतौतत्र सुबन्ताख्ये पदे स्वादयः प्रत्ययाः प्रातिपदिकरूपा प्रकृतिश्चेति सर्वं स्मृति पथमारोहति।

तत्रापि कृत्तद्धित समासभेदतश्च प्रातिपदिकानित्रिविधानि, ततोऽव्युत्पन्नानिडित्थादीनि, सुब्विधौ उद्देश्यभूतं प्रातिपदिक सामान्यं स्त्री प्रत्ययञ्च षड्लिंग प्रकरणादौ संसाध्य विज्ञाप्य वा समासरूपं तद्धितान्त रूपञ्च प्रातिपदिकं सम्यग् व्याख्याय कृदन्तरूपं प्रतिपदिकञ्च व्याख्यातुं तद् विग्रहरूपेणैव तिङन्त प्रकरण मारब्धवान् श्री भट्टोजिदीक्षित पादः। एवम्भूताया अष्टाध्यायाः व्याख्यान पराया वैयाकरणसिद्धान्तकौमुद्याः श्रीमता भट्टोजिदीक्षितेन विरचिताटीका प्रौढमनोरमाविषये प्रसिद्धिरेषा–

न कौमुदी भाति मनोरमां विना

न कौमुदी भाति मनोरमां विना

न कौमुदी भाति मनोरमां विना इति।

अन्यापि टीका तत्त्वबोधिनी श्री ज्ञानेन्द्र स्वामिनारक्षिता प्रसंशिता प्रामाण्यं भजमाना

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैयाकरणसिद्धान्त कौमुदी व्याख्यानानां विभिन्नानां शिरोमौलिभूता विद्वद्भिरादृता, पुनश्च वासुदेवे नाभ्यङ्करोपाह्वेन विनिर्मिता वालमनोरमा टीकापि सुख्यातिं गता। परन्त्वत्र सर्वतन्त्र स्वतन्त्र शाब्दिक धूरन्धरेणश्री नागेशोपाध्यायेन नागोजीभट्टपरमाचार्येण विरचिता शब्देन्दु शेखर नाम्नीटीका पूर्वोक्तसमग्रटीकानां खण्डन मण्डन मर्मतया सर्वां अपि टीका अतिशय्य विद्योतते तराम्। एषैव टीका वृहच्छब्देन्दु शेखर लघुशब्देन्दुशेखर नामभ्याँ व्याख्यान विकास संकोचविधया परमार्थ प्रतिपादनक्षमा शाब्दिक समाजे विराजते। एषैवटीका वस्तुतः सर्वविध सिद्धान्तार्थान् प्रकाशयन्ती सूत्राणां प्रक्रियानिर्वहतां वैयाकरणानां हृदय हारायमाणाऽभवत्। शब्देन्दु शेखरस्य हिवह्व्यस्टीकाः प्रकाशमागताः षष्टि सप्ततिसंख्यातोऽधिकाश्चेति समन्वेषकैः प्रबोधिताः, यथाऽभिनवचन्द्रिका, चिदिस्थमाला, ज्योत्सना, सदाशिव भट्टी, चन्द्रकला, वरवर्णिनी, गुरुप्रसाद प्रभृतयोऽसमुपलब्धा एव। न पदान्त सूत्र पर्यन्त भासते। अस्तु शेखरस्य तासु प्रकाशित टीकासु स्वनामधन्याश्रैधरी टीकापि केनचित कृता श्रीधरेण वाकृता नाद्यापि प्रकाशनतामागता न वा तस्मिस्सर्वांशेषु फ्लतः गतार्था। श्रैधर्य्यामस्यामपि शाब्दिकानां महदुपकाराय वैयाकरण सिद्धान्त निकषतया शब्देन्दुशेखररत्नपरीक्षणायहृद्याविचारा यथाप्रतीकमुपहाराय चकल्प्यन्ते। शब्देन्दु शेखर प्रतीक पुटकांकित पाणिनीयाभिमत नागेश भट्ट परिभाषितार्थ प्रकाशनाय श्रैधरी टीका सदोपास्या भवित्रीति विज्ञाय तदर्थं टीकाया अस्यापि प्रकाशन प्रकाशोऽपेक्षित एवेति मन्ये। अस्यां टीकायां किं वैशिष्ट्य्मिति सर्वं यथास्थलं सम्पादनक्रमे रेखाङ्कितमिवापूर्वम नुपमञ्च ज्ञास्यन्त्येव विद्वान्सो नितराम्।

यद्यपि श्रैधरी टीकायाश्चर्चा कैश्चिदपि प्रख्यात टीकाकारैस्व टीकायाँ न चर्चिता दृश्यते तथापि महामहोपाध्याय तातोपनामक सुब्रह्मण्यशास्त्रिणाविरचित गुरुप्रसाद टीकायाँ नैकत्र सादरं चर्चा विहितादृष्टिपथायते। इत्थं श्री सुब्रह्मशास्त्रि कृतगुरुप्रसादीय टीकाधिकृत प्रसंगेनास्याश्श्रैधर्य्यामहत्त्वं वैशिष्ट्यञ्चातीवामोदावहाय विदुषांस्यादिति निश्चयः। एतदपि तत्थ्यमत्र विचारणाकामायाति यत् श्री गुरु प्रसाद टीकायां सत्स्वपि विविधव्याख्यानेषु चिदिस्थमालाऽभि नवचन्द्रिका प्रभृतिकेषु खण्डन-मण्डन प्रसंगे मीमांसवत् श्रैधर्य्याः सम्यक् स्मरणं कृतं गुरुप्रसाद टीकायां टीकाकरेण।

वस्तुतश्श्रैधरी टीका शब्देन्दुशेखरस्य महत्त्वपूर्ण प्रतीकमाटीकते वैशिष्ट्य मुद्रयाव्याख्यानसन्दर्भे। येन वैयाकरणाध्यापकाश्छात्राश्चसमेऽनायासेन प्रत्येकं प्रतीकस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रायोऽभिप्रायः शब्देन्दु शेखरस्यावबोधनाय सुस्पष्टीकृत इतिमन्वताम्। क्वचित्समासेन क्वचिद्विस्तारेण प्रतीक व्याख्यानं प्रस्तूय सरहस्यं हृद्यं भावमभि भासयन्ती श्रैधरी भागवतमहापुराणस्य भगवद्गीतायाविष्णुसहस्त्रनाम्नश्चेत्यादि श्रीधरीटीकेव संस्तूयते समभिनन्द्यते चेत्तदा न कोऽपि वाचोऽतिशयः। यथा ह्येषाहि – आचार्यस्य शैली लक्ष्यते 'इति शेखर प्रतीक मुररीकृत्य श्रैधर्य्यां प्रोक्तम् – अनुवाद्येषूच्चारणार्थवर्ण घटित समुदायस्य तदरहिते लक्षणेति।

उच्चारणार्थानामित्संज्ञालोपाभ्यामेव निवृत्तिरितितु विधेय विषय एवेति तत्त्वम्। एतेन रप्रत्याहार-खण्डन परेण पूर्व ग्रन्थो न 'दिव औत्' सूत्रस्थेनोत्तर ग्रन्थेन च विरोधादिदमसंगतमित्यपास्तमिति दिशा विचारित मेव, विचारितोवा सम्यक्। एवं हि प्रतियोगिज्ञाने अभावपद बोध्याभावज्ञानस्य कारणत्वाभावेऽपि निषेध ज्ञानस्य कारणताऽस्त्येवेत्यत् आह प्रतियोगिज्ञानं विनेति प्रतीकमग्रिमभिसमन्वंयन्ती श्रैधरी प्रसंशार्हा। एवञ्चापवादवचन सामर्थ्यादुत्सर्गशास्त्रेऽपवादशास्त्रोद्देश्यतावच्छेदकानाक्रान्तस्योद्देश्यस्य ग्रहणे नाप्युपपत्तौ श्रृंग ग्राहिक यैव तत्तच्छास्त्रं प्रत्यसि द्धत्व कल्पने गौरवमिति तदाशयात् ''इति व्याख्यानम त्रापवादस्य सिद्धत्वेतु पदान्तस्येत्यस्य सिद्धत्वात् वार्तिकानुत्थान मिति प्रश्ने सुस्पष्टम्। अथ चात्र प्रतिपादितंयत् यदि तु साक्षाद् विधि भूतोत्सर्ग शास्त्रे संकोचकल्पनपेक्षयाऽपवादशास्त्रेऽनुवृत्ताति देशभूत पूर्वत्रासिद्धमिति शास्त्रीय पूर्व शब्दे एवोत्सर्ग सूत्र भिन्नस्य ग्रहणमिति संकोचः। एवञ्चैक दैव पूर्वत्रेत्यस्य वाक्यार्थो न तु श्रृंग ग्राहिकयैव तत्तच्छास्त्रं प्रत्यसिद्धत्वं स्वस्यपूर्वं प्रवृत्तिरित्येवापवादेनोत्सर्गस्य बाध इति स्वीक्रियते। तदा ततो लाघवमिति द्वित्वे परसवर्णस्येति वचनं न कर्त्तव्यमिति महदेव लाधवम्। अतएवापवादोनासिद्धो वचनप्रामाण्यादिति प्रकृत सूत्रभाष्योक्तं संगच्छते। एतत्सर्वं ध्वनयता श्रृंग ग्राहि कयैवत्वित्यरुचिबोधकस्तु शब्दमूलकृता प्रयुक्त इति दिक् इति सम्यगुपपाद्य श्रैधरी टीकाकारः महत्वं प्रकाशितवान।।

अत्रश्रैधर्यानुसारेण शब्देन्दुशेखरस्थ मंगलश्लोकघटकपातञ्जल इति प्रतीको विचार्यते – तद्यथा– पतञ्जलिना निर्वृते योगशास्त्रे इत्यर्थः अन्त्रत्रान्यः कश्चनापि पदार्थः प्राधान्यम्युपगच्छति, तत्र कारणञ्चेदमेव यन्महाभाष्य गूढार्थ ज्ञानाय भगवत्पतञ्जलिकृत या वद् ग्रन्थार्थ परिज्ञानमधीनतया पातञ्जलयोगपरिश्रमोऽपिपरमावश्यक एव संसूचयतामेवेय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुक्तिः पातञ्जल इति सुसंगच्छत इति टीकारकाराकूतम्। यद्यत्र महत्त्वविशेषणेनैवेतर भाष्यव्यावृतौ तदितरं विशेषणमव्यावर्तकमिति न वक्तुं शक्यते यतश्शारीरिकभाष्यस्यापि परमपुरुषार्थ मोक्षाख्य साधनप्रतिपादकतया महत्त्वेन तद्विशेषणेनैतद् व्यावृत्तेरयोगात् तदर्थ मेवतत्सार्थक्यात्। तेन पातञ्जले 'इति विशेषणं योगशास्त्र परकमम्युपेत्य वर्तत एव। अतः परमार्थतो योगशास्त्रेकृतभूरिपरिश्रमोनागेशोऽवश्यमेवव्याकरणहाभाष्ये प्रभूत व्याकरणसिद्धान्त रत्नावधारणे = परिज्ञाने कृतीति न सन्देहः। योगबलमन्तरापातञ्जलमहाभाष्यस्याशयंमवबोधनाय न कोपि साफल्यमधिगच्छेत्।

एवञ्च उपदिश्यतेऽनेनेतिकरणव्युत्पत्तिरित्सं ज्ञायामुपदेशशब्दस्येति स्वमते 'इत्संज्ञायांः प्राप्तावपि उच्चारणसामर्थ्याल्लोपाभावे कल्पनीये प्रधानशास्त्रस्य साक्षाद् बाध कल्पनापेक्षया तदुपयोगिनीत्संज्ञैव वाध्यत इत्याशयंनागोजिभट्टस्य प्रकाशयन्श्रैधरी टीकाकारोऽवश्यं विशिष्यते टीकाकारेष्वन्येषु।

अनुकरणत्वेनेति प्रतीकमादाय अनुकार्यानुकरणयोरभेद विवक्षापक्षमाश्रित्य सादृश्यज्ञानाधीनोपस्थिति जनकतयाऽर्थवत्वा भावेनाप्राति पदिकत्वान्न विभक्त्युत्पत्तिरिति बोध्यमित्याशयकं तथ्यं श्रैधरी कारस्य।

पुनश्चानुवृत्युपस्थितस्यैव शाब्दबोधेऽन्वयप्रतियोगित्वादनुकरणे सर्वत्र भेदविवक्षैव युक्तेत्येत आह श्रैधरीटीकाकारः।

यतोऽस्याशयो भेद विवक्षायामेवानुकार्यानुकरणयोः शक्ति लक्षणान्यतराधीनोपस्थिति जनकत्वेनार्थवत्वात्प्रतिपदिकत्वेन विभक्तत्युत्पत्तिः सुलभा तदा सौत्रात्वाच्चेति समाहितं सम्यक्। सौत्रत्वाच्छन्दोवत्सूत्राण्यतिदेशात् सुपां सुलुगिति लुगितिभावः इति दिशा वर्णसमाम्नाये न विभक्ति दर्शनमित्यपि सदाशयस्तस्य। लुक् पक्षेऽपि तथ्यमिदमपि यत् तत्र लुकाऽनुत्पत्तिरेवान्वाख्यायत इतितात्पर्यमपितस्य। यदिवर्ण समाम्नाये सन्धिकार्यकथा नेति समाक्षिप्यते तदपि न समीचीन मित्यत्रापि श्रैधरीटीकायां विशेषः तथाहि – अच् निष्ठाशक्ति रकारादिचान्त समुदायान्तः पति वर्णरूपार्थ निरूपिता विद्यते यदि सन्धिः क्रियेच्चेतदा गृहीताऽच् पद् शक्तिविरुद्धयेत्। तत्र च तद्विरोधाभावादिति प्रतीकमधिकृत्याभिमाष्यते श्रैधरी कारेण यत् सन्धौ सत्याँ गृहीत शक्तिनाशाभावादित्यर्थः। तत्रापि पुनरपि न चाविवक्षाकृतरूपाकाराश्रय श्रय शक्तिसतद् रूपनाशक संधिकार्यस्य निमित्तमस्त्येवोप जीव्यविरोध इति वाच्यम्। एवञ्च सतितत्राद्गुणप्रभृतीनां वैयर्थ्यता प्रतिपद्येत। अत्रहि श्रैधरी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टीकाकारस्याशयमित्यपि प्रतिपादयितुं शक्यः यत् 'आदिरन्त्येनेत्येनाविकृताकारत्वादिना कथमपि शक्तिर्नबोध्यते किन्तु तत्राकारादिचकारान्त समुदायघटक बोध्यतावच्छेदकधर्मोपलक्षितात्वादिना तथाचा विवेचकत्वस्य शक्यतावच्छेदक कोटावप्रवेशेन तस्योपजीव्यत्वाऽभावेन तद्विरोधस्याकिञ्चित्करत्वादिति। अत्रैव रत्नकोशकारस्याप्याशयः प्रतिलक्ष्यते यथा यत्वविकृताकारादिश्रवणमुपजीव्यजातिशक्तिग्रहस्त्योजीव्याविकृताकारादि श्रवणं न विहन्तीति। तथा चेदं दूषणं निमित्तादपराध्देषोर्धानुष्कस्येव बल्गितमनुकरोतीतिदममुक्तमित्यपि केचनाचार्या समामनन्ति। यदप्यविकृताकारादिष्विति सति सप्तमी ज्ञायमानेष्विति परमार्थः। एवञ्च ज्ञायमानेषु तेषु सत्स्वेव गृहीताजातिपद शक्तिरित्यर्थः।

अर्थादजादिपदशक्तिग्रहंप्रति अविकृताकारादिश्रावण प्रत्यक्षत्वेन कारणता, पश्चात्सन्धौ सञ्जातायां चाविकृताकारादि श्रावणं न भविष्यति श्रावण प्रत्यक्षविषयतातेषु कथमपि न सम्भवासेत्स्यतीतिथ्यम्। तस्मादेवोपजीव्य विरोधः सुस्पष्ट एव। एतदेवाकलप्य न चेत्यादि श्रवणं भवतीत्येतेन ध्वनितमिति फलति प्रायोवहूनां टीकाकाराणां मते तदपि न समीचीनं प्रतिभाति, यतः शक्ति ग्रहेऽविकृताकारत्वादिश्रावणत्वेन कारणताया अभावात्। वृत्तिनियामकत्वं संज्ञासूत्रत्वम् 'इति रीत्या शक्तिज्ञानस्यादिरन्त्येनेति सूत्रजन्यबोधेन तत्र च पदज्ञानविधयाऽकारादि बोधजनकत्वेन तात्पर्य विषयीभूत समुदायज्ञानस्यैव कारणत्वात्। यद्येवं न स्वीक्रियेच्चेतरर्हि स्वादिसूत्रेऽपि सन्ध्यभावप्रसंगापत्तिः।

ननु शक्ति निश्चयमुपजीव्य प्रसक्तं प्रवृत्तम्बा सन्धिकार्यं तन्निश्चयविरोधि संशयजनकमित्येवोपजीव्य विरोध इति भावः। अताह न चेत्यादि, तस्मादेवात्र श्रैधर्यां वृत्ति परिच्छेदकत्वेन = शक्ति = उद्बोधकत्वेनेत्यर्थः प्रकाशितः।

इत्सदृशेनेति – उपदिश्यतेऽनेनेति करणव्युत्पत्तिरित्संज्ञायामुपदेशवदस्येति स्वमते इत्संज्ञायां प्राप्तावपि उच्चारण सामर्थ्याल्लोपाभावे कल्पनीये प्रधानशास्त्रस्य साक्षाद्बाधकल्प नापेक्षयातदुपयोगिनी त्सं ज्ञा एव बाध्यत इत्याशये नैवमुक्तमिति भावः विचारोऽयं श्रैधरीटीकायां प्राशस्त्यं भजते।

पाणिनीयव्याकरणस्यव्याकरणान्तरापेक्षया प्राशस्त्यलाभार्थमेतन्मूलभूत सुनिश्चितमेव चतुर्दशसूत्र्यां श्रुतित्वं व्यवस्थापयन् सम्यक् व्याहरति नन्वित्यादिनेति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्दशसूत्र्याःकृते वर्णसमाम्नाय – आम्नायशब्दयोः प्रयोगोदृष्टान्तार्थमेव। आम्नायसमाम्नाययोश्शब्दयोर्वेदेष्वेव प्रयुक्त्वात्। तेनैवेति माहेश्वराणि = महेश्वरादागतानि न तु तेन कृतानि। आगतानीत्यनेना पौरुषेयत्वमेव प्रतिपादितं भवति। यदि चात्र महेश्वरकर्तृत्वं कृतित्वम्वावा स्वीक्रियेत्तदा न समीचीनं स्यात् अतस्तदावर्णसमाम्नायस्य श्रुतित्वं विघटितं स्यादित्यवधारणात्।

पुरुष सूक्ते वेदानां ऋच्वः सामानि यज्ञिरेत्यादिनेश्वरकर्तृकश्रुतेः सामञ्जस्येनप्रामाण्यावधानात्। शास्त्रयोनित्वादिति सूत्रस्य तदभिप्रायकतयापि भगवाच्छां शंकराचार्य पादैर्व्याख्यात्वाच्च। तथाप्यत्रानादित्वप्रतिपादक मतान्तरसाधारणयैवमुक्तं श्रुतिमूलकत्वादिति। श्रौतशब्दानां सामस्त्येन पूर्णतः साधुत्वबोध कत्वाच्चेत्यपि तत्र तत्र तात्पर्यमवतिष्ठते श्रैधरी टीकाकारस्याभिमतेन। अत्रापाततः परस्परविरुद्धश्रुति वचनेनापौरुषेय पौरुषेयत्व प्रतिपादन मपि सुविचार्यव्याख्येयमेवास्ति। यस्मादीश्वराद् ऋच्वः सामानि यज्ञिरेत्यादि भावस्तु न पुरुष कर्तृत्वंदृढ़यति यतस्तत्र तत एवममिव्यक्ति भूतानि प्रकटीभूतानि यानिपूर्व पूर्व कल्पे तिरोहितान्यासन्निति समधि= गमात्। शास्त्रयोनित्वादिवचनमपि नापौरुषेय विरुद्धानि यतस्तस्यापि = शास्त्रस्ययोनिमिति शास्त्रयोनिः तस्याभावः शास्त्रयोनित्वन्तस्माच्छास्त्रयोनित्वादिति वचनस्य सम्यक्तयार्थप्रसंगः निखिल ब्रह्माण्डं प्रति ब्रह्मणोबीजत्वं मूलत्वम्वासर्वमतं तदन्तर्भूतशास्त्रस्यापितथावेदानाञ्चापि यथाकालं तदिच्छयैवाभिर्भाव तिरोभावरूपतया नामरूपात्मक जगत्सन्दर्भे तत्रतत्रेश्वरकर्तृत्वंबा प्रतीयते मात्रं यद्धिव्यवहारिकमौपचारिकं भाक्तम्बा न पारमार्थिकं वक्तुंशक्यम्। तस्यनिःश्वसित मेतदिति वचनेन वेदानां ब्रह्मणोनिःश्वास भूतत्वात् नतत्रतस्यकर्तृर्वमध्यवस्यति कोपि सचेता।

अथचात्र सन्दर्भ इति परेषां केषाञ्चिल्लौकिकमात्रविषयत्वं केषाञ्चिद वैदिकैकदेशमात्रविषयकत्वमेवेति न च तानि पाणिनीयवल्लोकवेद साधारण्ये नोपकारध्वणीति तत्त्वम्। एददेव भगवतामहाभाष्य कारेणापि ध्वनितम् लौकिकानां वैदिकानाञ्चेति प्रवदता पश्पशाह्निके।

श्रैधरटीका कारोऽप्यस्यैव वेदांगत्वमिति प्रतीकमुररीकृत्य पाणिनीय व्याकरणस्यैव वेदांगत्वमित्यपि सम्यक् परीक्षितमेव। चतुर्दशसूत्र्यावेदत्वे महेश्वरात् पाणिनिना लाभे चेत्यर्थ इति प्रोवाच्। यत्रैवकारो भवेत् ततोऽन्यत्र नियम् इति व्युत्पत्त्या एवकारो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याकरणान्तरव्यवच्छेदकः वेदांगतया व्याकरणान्तरस्य सम्बन्धाभाव बोधक इति विचारणायां वस्तुतः पाणिनीयव्याकरणस्य वर्णसमाम्नाय मूलकतया वेदांगत्व प्रतिपादने प्राशस्त्यमेव स्यान्नतु स्वेतरव्याकरणस्य सर्वथाव्यवच्छेद एवेतियतः पाणिनिनापिस्वव्याकरणे पूर्व वर्तिनां व्याकरणसिद्धान्तानां वैयाकरणनाञ्चादरतः सम्यक् स्मरणात्।।

परेतु श्रुति मूलकत्वेनैव वेदांगत्व हेतु प्रतिपादने श्रुतिमूलकत्वस्य वेदांगत्वं मन्वादि स्मृतीनामपि तदापत्तौ वेदस्य षडङ्गत्वानुपपत्तिः तथाचैतत्प्रणयनात्प्राग्वेदानां पञ्चागत्वापत्तिश्चापि। तस्मादेवं सर्वत्रसामञ्जस्येन चिन्त्यमित्याहुस्तन्न समीचीनं यतस्साकल्येन श्रौतशब्दसाधुत्वस्यैव तच्छास्त्र मात्रबोधितत्त्वस्य प्रागुपदर्शितया पाणिनीय व्याकरणस्यैव वेदांगत्वमौचित्यमास्ते। एतदपि सत्यं यन्नहि किञ्चिदंशविकल्मंगं भवितुमर्हति। मन्वादि स्मृतीनां वेदार्थस्मारक त्वेऽपि वेदोपयोगित्वाभावात्शिक्षाद्यन्यतम्त्वस्य निवेशाद्वा न तासामंगत्वमिति नांगाधिक्य प्रसंगप्रसरः। पाणिनीय व्याकारणतः पूर्वव्याकरणानामपि सादितया सर्व्वव्याकरण प्रणयनप्राक्कालस्यापि समुचितत्वेन तदानीं पञ्चांगत्वापत्तेः सर्व मतेऽपि पतित्वात्तुल्यतामेवासादयति प्रसंगेऽस्मिन्। अपि च चतुर्दशसूत्र्या; श्रुतित्वेनानादितया तत्र पणिनीयव्याकरणस्य बीजवटन्यायेन सत्वान्न पूर्वोक्त दोष प्रसंगः।

इन्द्रादिव्याकरणानां श्रुतौ प्राशस्त्यबोधनेऽपि श्रुति मूलकत्वाभावात् (वर्णसमाम्नायमूलकत्वाभावाद्वा) तेषां यथा कथञ्चिदपि अनादित्वस्य वक्तुमशक्यत्वात् विशेषस्त्वसम्भवादेव न तथाङ्गीकारः। ज्योतिश्शास्त्रे श्रुति मूलकत्वाभावेऽपि साध्याधिकरणेव्यापकतया सर्वत्र हेतुसत्वस्यानपेक्षाणाच्च। पाणिनीयव्याकरणवर्णसमाम्नाय श्रुति मूलकत्वेन साक्षाद्वेदांगत्वप्रतिपत्तौ न कश्चनापि विवादावसरः प्रतिभाति। एतद्विचार्यैव वेदांगत्वप्रस्थान विधौ पूर्णं प्राशस्त्यं सर्वापेक्षयात्रयुक्ति प्रमाणाम्यां साधितयाऽस्यैवेत्युक्तिः वेदांगत्वविषये प्रतिष्ठाम्भजते। अत्र केनचिदित्थमपिशंक्यते यत् पूर्वोक्तं तथ्यंन वस्तुतो वेदत्वमपि शंक्यते यत् पूर्वोक्तं तथ्यंन वस्तुतोवेदत्वसाधकं वर्णसमाम्नायस्य तदाश्रुति मूल कत्वेन पाणिनीयव्याकरणस्यैव वेदांगत्व मिति युक्तिरुक्तिश्चापि विरुद्धेस्याता-भिति न कथमप्योचित्यन्तथोक्ते; यतोऽक्षरसमाम्नायस्य श्रुतित्वाभावे सनकाद्युद्धरणेच्छया शिवसूत्रजालस्यात्र नृत्तावसाने नटराजराजोननाद ढक्वांनवपञ्चवारम् उद्धर्तुकामः सनकादिसिद्धान् एतद् विमर्शेशिवसूत्र जालम्।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति सूक्तिमनुसृत्य तथाविधयत्ने नन्दिकेश्वरस्य किमुत्तरं भवीदांत? अतश्श्रोतव्यश्श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिरित्यादिवचनानुसारेण वर्णसमाम्नायस्य श्रुतित्वे न कोपि विवादः।

तदैव भगवतोभाष्यकारस्यपतञ्जलेरियमुक्तिरपि सुसंगच्छते यत् सामर्थ्य योगात्पश्यामि नह्यत्र शास्त्रे किञ्चिदनर्थकं स्यादिति वेदवदेव सर्ववर्ण सार्थकतां साधयति विशेषतः। तस्मादेवात्रेममाशयं हृदिनिधाय शब्देन्दुशेखरकारो व्याहरति नन्वेवमिति नन्वेवमपि तत्त्प्रत्याख्यानासंगतिर्वृद्धिसूत्रस्थ भाष्य विरोधात् अत आह बृद्धिसूत्रस्थ इति। अत एव चतुर्दशसूत्र्या वेदत्वादेवेति सर्वं सुसामञ्जस्यमुपस्थापयति। इदमपि श्रैधरी टीकाकारः प्रकाशयति यत् अन्त्यंवर्णचतुर्दशमिति = अर्शआद्यजन्तमित्युक्त्वा तेनैव अइउणित्यादीनां वेदत्वेनैवेति तदाशयं जानन्तु सुधियः। पूर्वोक्तस्य वेदत्वादेव।

अत्र संज्ञाप्रकरणे लण् सूत्रेऽकारश्चेत्यत्र लकारस्यानुनासिकत्वेनेत्संज्ञां परिकल्प्य रप्रत्याहारसिद्धिःकृता प्राचीनैः यद्धि नवीनैर्नाङ्गी क्रियते। अत्र विषये नैकमत्यं प्रतिभाति विभिन्न टीकाकाराणाम्। श्रैधरी टीका कारस्तु प्रथममेव लेत्यत्रोच्चारणन्तु रप्रत्याहारानित्यत्व मेव ज्ञापकमस्तु रषाम्यामित्यादावपीत्यत आह इति प्रोवाच। तेन प्रतीयते यत् प्राचीन मतानुसारेण श्रैधरी टीकाकार मते रप्रत्याहार एवोचितः तदैव तस्यानित्यत्वज्ञापनसंकेत; साधुसंगच्छते। रप्रत्याहार साधनाय लण् सूत्रघटक लकाराकारस्येत्संज्ञायां सत्यां बहुष्विकोयणचीत्यादौ तथा संयोगादेरातो धातोर्यण्वतः ओःपुयण्यपर, उदात्तस्वरितोयर्णः स्त्रित इत्यादिषु सर्वत्र य प्रत्याहारेणैव व्यव हरेत् न तु यण्पदेनेति, नवीन मतेनाक्षेप समाधानं कुर्वन् प्रभाषते टीकाकारो यदण घटित सूत्रेऽर्धमात्रागौरवेण र प्रत्याहार एव नान्य इति ज्ञापयति तेन ङेर्यः योऽचि, अयोपधादित्यादौ न य प्रत्याहार इति दोषो भवति अत आह किञ्चेति श्रैधरी टीकाकारस्यसर्वटीकाकारापेक्षायाऽत्रत्यं वैशिष्ट्यं यदन्यत्र टीकासु पक्षद्वयं प्रश्न समाधानदिशा प्रतिपादनं तदत्र हि मुक्तमुक्त विमर्शनधिया प्राचीन मतानुसारं रप्रत्याहाराङ्गीकार एव श्रैधरीटीकाकारस्य सिद्धान्त पक्षोव्यवस्थितोदृश्यते।

स्वीकृतेरप्रत्याहारेलण् सूत्रघटकाकारस्येत्संज्ञा निमित्तकतया आचारादप्रधानत्वाल्लोपश्च बलवत्तरः इति भाष्योक्ततृतीय हेतोरव्यापकत्वापत्ति दोष प्रसंगेच श्रैधरीटीकाकारस्यायमाशयोयत् अव्यापकत्वापत्तिरिति पक्षतावच्छेदकावच्छिन्न वृत्तित्वरूप व्यापकत्वाभावापत्ति रित्यर्थः सुस्पष्टः समीचीनश्च। जातिपक्षे च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अवात्तामित्यादिसिद्धिरितितात्पर्यम्। व्यक्तिपक्षेऽपि मामाँस्त्रायस्वेत्यत्र न दोषः। यतोऽणुदित्सूत्रज्ञाप्यलक्ष्यतावच्छेदक ज्ञानोत्तरमकारस्य स्ववाच्ये लक्षणायाः सत्वेनाणुदित्सूत्रस्य च सवर्ण संज्ञासापेक्षत्वेन सवर्णसंज्ञायाश्च नाज्झलाविवितिनिषेधसापेक्षत्वेन निषेधस्यचाच् संज्ञा सापेक्षत्वेनान्तरंगत्वात् प्रागेवाकारस्येत्संज्ञालोपाम्यामपहारात् इति रहस्यमुपपादयन्नसौ टीकाकारोविशिष्यते।

नैतवताऽलं श्रैधरीकारविचाराणायामपितु नचेत्संज्ञायामपि तथा ज्ञानं विलम्बापेक्षा गुणा अभेदका इत्येव गतार्थत्वादित्युक्त्वापि टीकाकारः परंसिद्धान्तमुपस्थापितवान्। अनुनासिकपक्षे इति प्रतीकेऽपि अनुनासिकत्वसमानधिकरणाकारत्व जातिनिर्दिश्यत इति मतेनेदमिति प्रोक्तवान्। इतोऽप्यधिकं तथ्यमत्रत्यं विमृश्य प्रकापथमानयति श्रैधरी कारः। यथाव्याप्यजातिनिर्देशे प्रमाणाभावादत्र पक्षे व्यक्तिपक्षे च सोऽस्तीत्यादाविति दूषणमुद्घाट्यच आदिना जाति पक्षे समाधानं देवायान्ति शप्याशामित्यादीनां व्यक्तिपक्षे समस्यते देवायत्र राज्याशमित्यादीनां संग्रहः कृतः सम्यक् पक्षः सैद्धान्तिक उपस्थापित एव। न केवलं प्राचीन मतमेव श्रैधरीकारः रप्रत्याहारविषयं पुष्णाति किन्तु नवीनमतमपि रप्रत्याहार विषयकं सम्यगविचारयति।

अतएवेति प्रतीकमाश्रित्य लणित्याकारस्यानुनासिकत्वाभावादेव प्रसंगाद्द्वितीय हेतुमुपपादयति तत्र प्राधान्यमित्यादिवचनेन। तत्र द्वितीयहेतो र्व्यापकत्वं शंकते न चेतइत्यादिना श्रैधरीकारोऽपि। तत्र द्वितीयो हेतुरत्र भाष्य कारस्याप्रधानत्वादेव अप्रधानस्याकारस्य लण् घटकस्य कथमपि न प्रत्याहार विषयत्वं सम्भवमित्येवाशयः। यद्यत्राकारेऽजनुनासिकत्वास्वीकारस्तदापि तृतीय हेतोर्व्यापकत्वं दुर्वारम्। प्रथम हलन्त्य सूत्रेण लकारस्येत्संज्ञायायौं हल् प्रत्याहर्वत् झलादिप्रत्याहाराणामपि तत्समयेप्रवृत्त्या झभञिति ञकारे निरुक्तहेतोरभावात् तन्न शंक्यम् यतो यदनुबन्धायादृशप्रत्याहारबोध्यत्वेन विवक्षितास्तादृश प्रत्याहार ज्ञानविशिष्ट लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्व प्रकारक ज्ञान विषयत्वस्य हेतुत्वात्। ज्ञानवैशिष्ट्यञ्च स्वप्रयोजकज्ञानप्रयोज्यत्व स्वप्रयोज्यज्ञानप्रयोज्यत्वाभाववत्वोमय सम्बन्धेन। तथा च झल् प्रत्याहार ज्ञानप्रयोजकं यल्लकार धर्मिकेत्व ज्ञानमादिरन्त्येनेत्यद् वाक्यार्थज्ञानेच तत्प्रयोज्यत्वस्य झलादि प्रत्याहार प्रयोज्य लक्ष्यसाधुत्व ज्ञान प्रयोज्यत्वाभाववत्वस्य च अकारादिधर्मिक लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वप्रकारक ज्ञाने सत्वेनतदज् विषयत्वहेतो स्तत्रसत्त्वात् न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्र व्यापकताविरहः। लक्षणघटकाकारधर्मिक लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्व ज्ञाने हल् प्रत्याहारज्ञान प्रयोज्यत्वं यदच् प्रत्याहारज्ञानं तत्प्रयोज्यत्वस्यैव सत्त्वेनद्वितीय सम्बन्धाभावेनाव्यापकत्वकथनसमन्वयश्चेति श्रैधरी टीकाकारस्येति प्रतीयत एवेति परमरहस्य मनुसन्ध्येयं विज्ञैरप्यवश्यमित्येव वैशिष्ट्यमत्र।

वस्तुतस्तु – आदिरत्येनेत्येतच्छास्त्रस्य संग्राहकत्वेपि तत्प्रत्याहारविषयकतयोपह्नुतेषु = आवृत्योपस्थितेषु तत्तद् विशेष वाक्येषु आर्दिह काररन्त्येनलकारस्येत्येतत्संज्ञकेनेत्यादिवाक्ये नैवान्योन्याश्रयवारणार्थमावृत्तस्य हलन्त्यमित्यस्यैक वाक्यता स्वीक्रियते न त्वादिर्झकारादिरन्त्येन णकारेणैतत्संज्ञकेनेत्यादिभिर्वाक्यैः।

तैस्तु द्वितीयहलन्त्यमित्यस्यैव व्यापकत्वादेकवाक्यतास्वीक्रियते लाघवानुरोधात्। न चात्र विनिगमनत्त्भाव;शंक्यः लकारस्येत्व ज्ञापनात् हल्त्वाप्रसिद्धिरिति हलन्त्यसूत्रोपक्रमभाष्येणवृत्तस्यान्योन्याश्रयदोषवारणमात्रफलकतायालाभेन तस्यैव मानत्वात्। अन्यथालकारेण यावन्तः प्रत्याहाराः तावद् विषयकाणामादिरन्त्येनेति सूत्रावृत्तीनां प्रत्येकमुमाभ्यामपि एकवाक्यता स्वीकारे गौरवंस्पष्टमेव।

यत् किञ्चित् समुदायस्माप्याद्योच्चारण विषयत्वात्तदुत्थानमिति स्वीकरोति श्रैधरीटीकाकारः। समुदाय द्वारेति प्रतीकमनुसृत्य परम्परयाऽवयवत्वानामपिकरणत्वं वार्तिक कृताश्रैधरीकारेण हलन्त्यमित्यत्रैकशेषप्रसंगे प्रतिपादितं यत् एकशेष इति तन्त्रस्योपलक्षणम् अत्रोपलक्षणन्नाम् – अविद्यमानत्वेसतीतर व्यावर्तकत्वमिति, तन्त्र न्नाम च शब्द तन्त्रमर्थतन्त्रञ्चेति, कथमत्रोप लक्षणमुच्यते श्रैधरीकारेणेति विषयेऽपि स्वयमेवोक्तम् – सहविवक्षाया अभावेनैकशेषा ऽसम्भवात्, सहविवक्षाचापि साहित्यमेव तच्चैकथधर्मावच्छिन्नस्यैकधमविच्छिन्ने एक धमविच्छिन्नान्वय संसर्ग इति।

यतोहलन्त्यमित्यत्र हल पदंहल सूत्रपरं द्वितीयञ्च हल् प्रत्याहार परं तेन हल् सूत्रान्त्यं हल् रूपान्त्यमिद् भवतीतिव्याख्येनेनैकधर्मावच्छिन्नस्यैकधर्मावच्छिन्नेऽन्वयाभावाऽभावेन साहित्या भावादेक शेषासम्भवादेव तन्त्रव्यावहार इतिच तदाशयः। शब्दतन्त्र विषयता च शब्दपर्याय प्रवृत्यसहत्व निष्ठा, अत एव विरुद्धनामार्थबोधक एक शब्दप्रयोगे शब्दतन्त्रो भवति।

अर्थतन्त्र विषयता चापि शब्दस्य पर्याय प्रवृत्ति सहत्वनिष्ठा तेनार्थतन्त्रे समाने कार्थबोधक एक शब्द प्रयोगोभवति। यथा शब्दतन्त्रो हल्-सूत्रान्त्य-हल्-रूपान्त्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विरुद्धयोर्दूयोरर्थबोधनायहलित्येक शब्द प्रयोगः। अर्थ तन्त्रे च एकेनैव घट शब्द प्रयोगेण समान नानाघट विषयको बोधः। अमुमेवार्थं भाषते यद् विरुद्धनानार्थ बोधकत्वेशब्द तन्त्र प्रसंगः समाननानार्थ विषयकत्वेऽर्थ तन्त्रः इति। हलन्त्यमित्यत्र हलपदबोध्यो हकारादिलान्त समुदायगत प्रत्येकं वर्णः हलसंज्ञकः हल् प्रत्याहार रुपोवा बोध्यते।

हलिति सूत्र रूपञ्चेति विरुद्ध नानार्थविषय बोधकता हलपद निष्ठा विद्यत एव। तेन शब्दतन्त्रमेवैक शेषपदेनोपलक्षणतया पूर्वमुक्तमन्त्र तात्पर्यं ग्राह्यमिति। यद्यपि भाष्ये हलित्यस्यैकशेष प्रदर्शनेन तन्मात्रस्यैवावृत्तिर्लभ्यते तथापितस्य समासघटकत्वेन तन्मात्रस्यावृत्तिर्वोधोपयोगिनी न सम्भवतीति सम्पूर्ण सूत्रावृत्तिरेव भाष्यतोलभ्यते 'इति तात्पर्यम्।

अत एवोक्तमत्रोच्चारयितुरेकशेष निर्देश इति, बोद्धुस्त्वावृत्त्या बोध इत्यनेनेति। एवञ्चाम् मूलकाराभिप्रेतमेव व्याख्यानं सामञ्जस्यं स्थापयतीत्यपि वक्तुं शक्यते। नत्वत्र व्याख्यातुरन्यादृशं मतमवधार्यम् तथा सति भाष्ये त्विति तु शब्दघटितं वदेदिति वोद्धयम्। तेनात्रपरेतु एतदसत् एक हलपदार्थस्य अन्त्यपदार्थ निष्ठविशेष्यता निरूपित प्रकारता श्रयत्वेऽपि द्वितीय हलपदार्थस्याधुना निष्पत्त्यभावेनातथात्वादुभयोः प्रकारतयोः युगपदसम्भवेन साहित्याभावेनैकशेषानुपपत्तेरित्येव पारमार्थिक माभाति श्रैधरीटीकाकारस्य। न वाऽत्र प्रकारता मादाय बोधेजाते पश्चाद् हल् पदार्थे ज्ञाते द्वितीये। बोध इति वाच्यम्। बोधद्वयस्यान्त्य पदावृत्तिमन्तरेणासम्भवेन प्राचीन मतादवैलक्षण्यापत्तेः। अत्रकैय टोपाध्यायस्तु एकस्य हल् पदस्यऽन्त्यपदेन्वया भावेन साहित्याभावादयुक्तम्। भाष्य प्रामाण्यात्सौत्रत्वाद्वा असहविवक्षायामपि एक शेषकल्पनाऽपे क्षया तु सूत्रा वृत्ति रेव युक्तेति वदति तदपि न सम्यक् प्रतिभाति। हलः अन्त्य इति विग्रहे सम्बन्ध सामान्यषष्ट्यासमासः। सम्बन्ध विशेषवोधस्तु पश्चान्मानसिकः। देवदत्तस्यपुत्र मित्रकल त्राणित्यादौ लोके तथादर्शनात्। हल् रूपान्त्य मिति प्रत्याहारोद्देश्यकेत्संज्ञाविषये प्रोक्त सम्बन्धषष्ठी कथंस्यादिति न शंकाकार्या राहोश्शिर इत्यत्र राहुशिरसोर भेदेऽपि कल्पितं भेदमादाय यथाभेदनिबन्धनाषष्ठी तथात्रापि सम्भवेतिपक्षं श्रैधरीकारोऽपि स्वीकरो तिप्रतीयते। श्रैधरीकारोलिखति यत् कैयटोक्त व्याख्यायाँ त्विति तुनाऽरुचिर्वोधितेति। एवमेव प्रतिप्रकरणं यथास्थलं विचारविशेषः कारकान्तं यावच्छैधरी टीकाकारेण सुविचारितोविद्योततेतरां विस्तारभयान्नात्रप्रतन्यते यत प्रकाशित टीकयैव सर्वविषय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिलक्षितत्वात्। प्रसंगतः कश्चन विचारोऽत्रापर पृष्ठे अथचात्रान्यद विचारणीयोविषयोऽधस्तादवतार्यते तद्यथा संज्ञा च परिभाषाच विधिनिर्यम एव च अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्, 'इति वचनानुसारमत्र वृद्धिरादैजित्यत् आरम्याष्टाध्यायीस्थान्तिम सूत्रं यावदेवोक्तः षड्विधि सूत्रत्वव्यवहारो युक्तो नतु वर्णसम्मानायस्यापि तस्याष्टाध्यायीस्थ सूत्रत्वाभावात् तथातस्य क्रममात्रबोधकत्वाच्च। अत आह शब्देन्दु शेखरे एषामिति वृत्ति परिच्छेदकत्वेन शक्ति ग्राहकत्वेन शक्त्युद्बोधकत्वेन वा वर्ण समाम्नायस्य क्रममस्य बोधक त्वेऽपि संज्ञा सूत्रत्व व्यवहारे न बाधकं किमिति, संज्ञायाः क्रम द्वारैवोपयोगात्। इत्येतत्सर्वं शेखर प्रतीकाशयं श्रैधरी टीका कारोऽभिमतं शब्द शास्त्रीयं प्रकाशयति। तथा चादिरन्त्येन सहेता ''इति सूत्रं प्रत्याहार विधायकत्वेन शक्त्युद्बोधकतया संज्ञासूत्रत्वव्यवहारं भजते। यतस्तत्र वृत्तिपरिच्छेदकत्वव्यवहारः कृतः यथा इकोयणचीत्यत्र इकः, यण् अचि, इति पदत्रयंविद्यते इक्पदनिष्ठा शक्तिः अइउणित्यत्रेकारादि ऋलृक् इत्यत्रत्यकान्त प्रत्येकं वर्ण निरूपिता विद्यते, एवमच पदेपिअइउण, इत्यकारादि एऔच् इति चान्त समुदायवर्ति प्रत्येकं वर्ण निरुपिता शक्तिरच् पदनिष्ठा विद्यते, एवं यणित्यत्राणि हयवरट् इत्यत्रत्य यकारादिलणित्यत्र णान्तसमुदायवर्तिप्रत्येकं य्व्रल् इति वर्ण निरूपिता शक्तिर्यण पद निष्ठा भवति, यत आदि रन्त्येन सहत इति सूत्रं शक्ति ग्राहकत्वेन संज्ञासूत्रं मन्यते 'सूत्रमिदमित्थं शक्तिनियमयति यत् 'इ कोयणचि' इति सूत्र घटकमच् पदंमकारादि चान्त समुदायवर्तिप्रत्येकं वर्णं बोधयति, अर्थात् ते वर्णा अच् पदबोध्याः इत्यर्थः समुदायेष्ववतरन्ती संज्ञा प्रत्येकं विश्राम्यतीति न्यायात्।

एवमेव, इक् पदमपि इकारादिकान्तवर्णवोध्यपरम् एवं यण् पदमपि यकारादि कान्तवर्ण बोधकपरम् परमत्रतथाविध व्याख्यानं प्रत्याहार विधायकसूत्रस्यादि रंत्येन सहेता इत्यस्य शक्तिनियामकत्वेन कथं कृतम्? यतः सूत्रमिदं हि चतुष्पदं विद्यते आदिः अन्त्येन इता सह अथवा – आदिः अन्त्येन सह इता इति रीत्याचतुष्पदकं सूत्रमिदं भवति। तत्र च भट्टोजिदीक्षितपादैः - अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञास्यात् इति वृत्तिः कृताऽर्थरूपा। तया वृत्या हि अचादिं प्रत्याहार रूप संज्ञायाः सिद्धिः केवलं वर्णसमाम्नाय एव सम्भवा, न तु पाणिनीयाष्टा ध्याय्याम्। यतः ऐ ओच् इत्यत्रान्त्येत्संत्रज्ञकोवर्णश्चकारः तत्सहित्तो ह्यादिवर्ण अइउण इत्य त्रत्याकारोगृह्यते तेनाकारादिश्चान्तः मध्यपातिनोवर्णाः इकारादि औकार पर्यन्ताः एव अच् संज्ञका वक्तुंशक्याः अर्थात् अकारस्य इकारादेश्चौकार पर्यन्त मेव संज्ञिनः येषामच् इति संज्ञाकृता न तु इकोयणचीत्यादौ पाणिनीयेषु सूत्रेसु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादिना तत्तद्वर्णा अच् पदेन वा प्रोक्ता वर्णाः वोद्धुं शक्याः यतोऽच् पदनिष्ठा शक्तिवर्णसमाम्नाय घटक वर्ण निरुपितैव न ततोवहि र्भूताष्टाध्यायीस्था। परमत्र सर्वत्राष्टाध्यायीस्थ सूत्र घटकादि अजादि हलादि पदैस्तथावर्णाः बोध्य विषया मन्यन्ते तर्हि क उपायः? अतोऽत्र शब्देन्दु शेखरकार आदिरत्येन सहेतेति सूत्रे इत् पद मित्सदृशेनेति प्रोक्तवान्। अथ वान्त्यपदमन्त्यसदृशपरम्, आदि पदञ्चाप्यादि सदृशपक्षमेव मनुते। अर्थात् पाणिनीयाष्टाध्यायी एवं सूत्रघटकानि पदानि तत्तदर्थे लाक्षणिकानि कथं संगृह्यन्तामिति? वक्तुः पाणिनिमुनेस्तात्पर्यमवधार्य तादृशतात्पर्यानुपपत्तिमूलिका लक्षणा स्वीकृता भवति सर्वत्र। तेन हि इकोयणचि प्रभृति सूत्र घटकाजादिपदव्यवहारम् आदिरन्त्येन सहेतेति सूत्रेऽन्त्यपंदमन्त्यसदृशपरम्, एवमादि पदमपिसदृशपरमिति लक्षणया अच् प्रत्याहार साधनवेलायां अन्त्येत्सदृशः इति पदेनान्त्येत्संज्ञक ऐ औचित्यत्र चकारस्तत्सदृ शश्चकार इकोयणचि सूत्रस्थाच् घटकश्चकारः एवमच् पदेऽत्रापि अइउणिस्यत्रत्याकारः तत्सदृशोऽकार इकोयणचिसूत्रस्थाच् घटकाद्य वयवोऽकारः इत्थमत्र स्वघटकानुयोगिकसादृश्यप्रतियोगिक वर्णनिष्ठान्ततानिरुपकस्य तथा स्वघटकानुयोगिकसादृश्यप्रतियोगिवर्णानिष्ठादिता निरुपकस्य समुदायस्य घटकाना मेवाच् संज्ञाभवति आदि रन्त्येनसेहता' इति सूत्रेण। अत्र स्वं पदेनाच् तद्घटकचकारः अच् घटकचकारानुयोगिक साहश्यप्रतियोगित्वेनविवक्षितोवर्ण एऔच् सूत्र घटकचकार प्रतियोगिक सादृश्यम् तन्निष्ठाऽन्त्यता। एवमेवाच् घटकाकारानुयोगिकसादृश्य प्रतियोगिकत्वेन विवक्षितोऽवर्ण अइ उणित्यत्राकार प्रतियोगिक सादृश्य तन्निष्ठादिता तयो र्निरूपकस्य समुदायस्याकारादि चान्तस्य प्रत्येकं वर्णानामच् इति संज्ञा प्रथिता। एवमेवान्यत्रोहनीयम्भवति। एतत्पर्यन्तमेवाशयः शेखरकारस्य नागोजिभट्टपादस्य यस्यसंकेत इत्सदृशेनेति प्रतीकमुद्धृत्य प्रकाशितः 'यस्य श्रैधरी टीकारोऽपि समर्थनं करोति। तथाच 'उपदेशेऽजनुनासिक इत् इति सूत्रेऽपि इत्पदेन इत्सदृशेनेतिव्याख्यान प्रसंगेऽपि साधु शेखरकारस्याशयं प्रकाशयति टीकाकारः। तथापि उपदिश्यतेऽनेनेतिकरण व्युत्पया इत्संज्ञामुपदेशशब्दस्येति स्वमते इत्संज्ञायाः प्राप्तावति उच्चारण सामर्थ्यात्लोपाभावे कल्पनीये प्रधान शास्त्रस्य साक्षाद्बाधकल्पनाऽपेक्षया तदुपयोगिनीत्संज्ञैव बाध्यते इत्याशयेनैवमुक्तमितिभावः। एतद्धि उपदेशपदव्याख्यानं सूत्रद्वये आदिरन्त्येन सहेता उपदेशेऽजनुनासिक इत, इत्यादागुपदेशपद विषयकम्।

बहुस्थलेषु समालोच्यविषयाविस्तरेण सन्त्येवात्रविस्तार भयादेव नावतार्यन्ते, ते खलु मातृकाश्श्रैधर्याः प्रकाशन प्रसंगे शब्देन्दु शेखर मूल ग्रन्थेन सह स्मृति पटले यदा समारूढ़ा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भविष्यन्ति तदैव श्रैधर्याः महत्त्व मति शयेन विद्वद् वरेण्याः प्रतिपादयन्तः सर्वत्राभिव्यापकत्वेन प्रख्यापनमपि विधास्यन्ति। शब्दा गमे पाणिनीय व्याकरणे नागोजि भट्टकृतेशब्देन्दुशेखर रूपायाःबहुभिः विशिष्ट टीकाग्रन्थैः सहश्रैधर्य्या अपि वैशिष्ट्यं सादरमुपस्थापयिष्यन्तीतिदृढोविश्वासः। य अस्याश्श्रैधर्य्याः सम्पादनं प्रकाशनञ्च शेखर मूल ग्रन्थेन सह महोपकारकं वैयाकरणानां संरक्षयिष्यतीत्यपि निश्चितम। एवं विधायाविशिष्टकृतेः कृते विद्यापीठीयाप्राचार्यवर्याः डॉ० श्री गयाचरण त्रिपाठी महोदयाः विविध शोधकार्य निर्देशन पटुतमति शयेन समाजनीयाः सुवन्दनीया यैर्हि श्रैधर्य्याः सम्पादनार्ह शोधकार्यस्यकृते श्रैधरी मातृका स्वीकृता, सत्प्रेरणा च प्रदत्ता तान्प्रतिकार्तज्ञतां वहामि सादरमूमिनन्दामिचतान्।

अतः परं शोधकार्य प्रसंगे शोधकार्य प्रक्रियापि प्रसंगतः सच्छास्त्र संरक्षणधियाचर्चाविषयीक्रियते या च चर्चा शब्देन्दु शेखर श्रैधरी टीका ग्रन्थानु वन्धिनी स्यात्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्देन्दुशेखरश्रैधरीटीका :

ग्रन्थानुबन्धः प्ररोचनाख्यः

ज्ञानानन्दमयं देवं निर्मल स्फटिकाकृति -
माधारं सर्व विद्यानां हयग्रीवमुपास्महे।।

प्रतिपाद्य विषय प्ररोचनात्पूर्वं प्रसङ्गतः प्रकाशनार्ह शोधकार्य विषयेऽपि कश्चन विचारः सादरं विनिवेद्यतेऽत्र, तथाहि कस्याश्चिदपि प्रकाशनार्हायाः शोधकार्यसंपादनविधि विषयं नीतायामातृकाया मूलरूपाया वा ग्रन्थ विशेषस्याप्रकाशितटीकायाः शोधकार्यं सम्पादन-प्रकाशनार्हं किमिति? जिज्ञासोदयस्स्वाभाविक एव। तत्र प्रायः प्रकारत्रयेण जिज्ञासानिदानं भवतीति विचार्य क्रमशोनिरुप्यते–

१. प्रथम प्रकारस्तु - अप्रकाशित मातृकायाः प्राप्तमातृकाभिः सह पाठभेदं विविच्य सुविचार्य संशोधनं कृत्वाऽपेक्षाकृत प्राप्त मातृकासु शुद्धमातृकामेव प्रथम अ-'क' वर्गीय मातृकां विगणय्य क्रमशः इ. वा.दि. मातृकानिर्धारणपूर्वकं भूमिकालेख पुरस्कृत यथामातृकायाः सम्पादनं प्रकाशनम्भवति। एतद्धि सम्पादनं सामन्यपदवीं भजति।

२. अप्रकाशितमातृकायाः लब्दमातृकाभिःसमं पाठभेदे सति भेदप्रयुक्त विचारञ्चाधिकृत्य सर्वांशतस्तथाकार्यनिर्वहणपूर्वकं सम्पूर्ण प्रकाशनार्ह मातृकायाः सम्यगध्ययनं विधाय् विषयवस्तुनश्शास्त्रिदृष्ट्या च समीक्षणपूर्वकमेव शोध पत्र निर्माण पर कर्तयाऽनुसन्धात्राप्रकाशनार्ह सम्पादनकर्त्रा तथाविधमेव शोधकार्यं विधेयं येन तत्रामुखं भूमिकामुपोद्धातादिकम्बासमवलोक्यैव विषयतत्वस्पर्शनात्पूर्वं शोधकार्यकर्तुः शास्त्रीयश्शोधश्रद्धोप कृतश्श्रमोऽपि प्रकाशित ग्रन्थानवलोकन कर्तृणां कृते प्रेरणाप्रदः शिक्षाप्रदस्तथा सम्पादित ग्रन्थ प्रतिपाद्य विषयस्यालोचना प्रत्यालोचना प्रक्रियापरत्वेन सम्यगुपयोगिता सिद्धयेत् येन हि तत्रत्य प्रकाशन प्रक्रियायाः संपूर्णोद्देश्योपदेशो वहोः कालात्प्रचलित प्रकाशन विधावापि संस्थायास्तदीयाधिकारिणः प्रशासनस्य प्रान्तीय केन्द्रियसर्वकारस्यचाभिमतसिद्धिः प्रकाशित ग्रन्थानां सम्यक् तयाप्रचार प्रसारविधौ, च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भविष्यन्ति तदैव श्रैधर्याः महत्त्व मति शयेन विद्वद् वरेण्याः प्रतिपादयन्तः सर्वत्राभिव्यापकत्वेन प्रख्यापनमपि विधास्यन्ति। शब्दा गमे पाणिनीय व्याकरणे नागोजि भट्टकृतेशब्देन्दुशेखर रूपायाःबहुभिः विशिष्ट टीकाग्रन्थैः सहश्रैधर्य्या अपि वैशिष्ट्यं सादरमुपस्थापयिष्यन्तीतिदृढोविश्वासः। य अस्याभ्श्रैधर्य्याः सम्पादनं प्रकाशनञ्च शेखर मूल ग्रन्थेन सह महोपकारकं वैयाकरणानां संरक्षयिष्यतीत्यपि निश्चितम। एवं विधायाविशिष्टकृतेः कृते विद्यापीठीयाप्राचार्यवर्याः डॉ० श्री गयाचरण त्रिपाठी महोदयाः विविध शोधकार्य निर्देशन पटुतमति शयेन समाजनीयाः सुवन्दनीया यैर्हि श्रैधर्य्याः सम्पादनार्ह शोधकार्यस्यकृते श्रैधरी मातृका स्वीकृता, सत्प्रेरणा च प्रदत्ता तान्प्रतिकार्तज्ञतां वहामि सादरमूमिनन्दामिचतान्।

अतः परं शोधकार्य प्रसंगे शोधकार्य प्रक्रियापि प्रसंगतः सच्छास्त्र संरक्षणधियाचर्चाविषयीक्रियते या च चर्चा शब्देन्दु शेखर श्रैधरी टीका ग्रन्थानु वन्धिनी स्यात्

●

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्देन्दुशेखरश्रैधरीटीका :

ग्रन्थानुबन्धः प्ररोचनाख्यः

ज्ञानानन्दमयं देवं निर्मल स्फटिकाकृति -
माधारं सर्व विद्यानां हयग्रीवमुपास्महे।।

प्रतिपाद्य विषय प्ररोचनात्पूर्वं प्रसङ्गतः प्रकाशनार्ह शोधकार्य विषयेऽपि कश्चन विचारः सादरं विनिवेद्यतेऽत्र, तथाहि कस्याश्चिदपि प्रकाशनार्हायाः शोधकार्यसंपादनविधि विषयं नीतायामातृकाया मूलरूपाया वा ग्रन्थ विशेषस्याप्रकाशितटीकायाः शोधकार्यं सम्पादन-प्रकाशनार्हं किमिति? जिज्ञासोदयस्स्वाभाविक एव। तत्र प्रायः प्रकारत्रयेण जिज्ञासानिदानं भवतीति विचार्य क्रमशोनिरुप्यते–

१. प्रथम प्रकारस्तु - अप्रकाशित मातृकायाः प्राप्तमातृकाभिः सह पाठभेदं विविच्य सुविचार्य संशोधनं कृत्वाऽपेक्षाकृत प्राप्त मातृकासु शुद्धमातृकामेव प्रथम अ-'क' वर्गीय मातृकां विगणय्य क्रमशः इ. वा.दि. मातृकानिर्धारणपूर्वकं भूमिकालेख पुरस्कृत यथामातृकायाः सम्पादनं प्रकाशनम्भवति। एतद्धि सम्पादनं सामन्यपदवीं भजति।

२. अप्रकाशितमातृकायाः लब्दमातृकाभिःसमं पाठभेदे सति भेदप्रयुक्त विचारञ्चाधिकृत्य सर्वांशतस्तथाकार्यनिर्वहणपूर्वकं सम्पूर्ण प्रकाशनार्ह मातृकायाः सम्यगध्ययनं विधाय् विषयवस्तुनश्शास्त्रिदृष्ट्या च समीक्षणपूर्वकमेव शोध पत्र निर्माण पर कर्तयाऽनुसन्धात्राप्रकाशनार्ह सम्पादनकर्त्रा तथाविधमेव शोधकार्यं विधेयं येन तत्रामुखं भूमिकामुपोद्धातादिकम्बासमवलोक्यैव विषयतत्वस्पर्शनात्पूर्वं शोधकार्यकर्तुः शास्त्रीयश्शोधश्रद्धोप कृतश्श्रमोऽपि प्रकाशित ग्रन्थानवलोकन कर्तृणां कृते प्रेरणाप्रदः शिक्षाप्रदस्तथा सम्पादित ग्रन्थ प्रतिपाद्य विषयस्यालोचना प्रत्यालोचना प्रक्रियापरत्वेन सम्यगुपयोगिता सिद्ध्येत् येन हि तत्रत्य प्रकाशन प्रक्रियायाः संपूर्णोद्दिश्योपदेशो वहोः कालात्प्रचलित प्रकाशन विधावापि संस्थायास्तदीयाधिकारिणः प्रशासनस्य प्रान्तीय केन्द्रियसर्वकारस्यचाभिमतसिद्धिः प्रकाशित ग्रन्थानां सम्यक् तयाप्रचार प्रसारविधौ, च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूयान् प्रयासोऽपि सोदारः शास्त्र रक्षादि निमित्तकः प्रसज्येत्। तदैवानुसन्धातारोऽनुदिनं लब्ध समुचित प्रेरणाः स्वत एव शास्त्राध्ययनेसंरता भवेयुः सोत्साहाः शोधकार्यतः पूर्वं शोधकार्योपयोगि योग्यतासम्पादननिधौ प्रमाण पत्र लाभायैव न परीक्षायाँ प्रविष्टाभवेयुः। किन्तु प्राचीन विदुषामिव सम्यग्ज्ञानोपार्जन वुद्ध्याध्ययन मुखाः सन्तो यत्र कुत्रापि वा गत्वा श्रद्धावधानतया गुरु शुश्रुषयाविद्ययेति वचनम्पालयन्तः सश्रममधीत्यैव परीक्षामुत्तर्तुमपि दृढ़व्रतिनोनिसर्गतो भवेयुः। तदनन्तरञ्चानुसन्धानकार्ये ऽनुसन्धान शब्दस्यार्थं चरितार्थ यन्त एव नियत विषयस्याद्यन्तमुपपत्तिपूर्वकं स्वयमधीत्य केषाचिद्विदुषां साहाय्येन वा शास्त्रीयगंभीर विषयमवगम्य शोधकार्ये कुशलास्स्युरिति, येन तदन्तरं शोध ग्रन्थ प्रकाशनोपयोगिता नैक मर्यादित दृष्ट्याअध्ययनाध्यापनविधौ सत्प्रेरणाप्रदा स्यादेव तथाप्रोक्तरीत्या प्रकाशनकार्यं शोधकार्यं सफलं लाभप्रदंजन लोकहितकरं प्रपद्येत्।

३. अप्रकाशित मातृकाणां पूर्ववत् पाठ भेद निर्धारण संशोधन प्रक्रियया सहैव शोधकार्यविधात्रा काचनव्याख्या पूर्वांशतः टीप्पणीवा यथाविशेषस्थलानां कृता भवेत् तथा तद् विषय सम्बन्धि ग्रन्थानां व्याख्यानां विषय वस्तु परकतया मौलिकाभिनिवेशानुभवः लोक शास्त्र दृष्ट्याच तत्तच्छास्त्रवतांसमाजे च तन्मूल्याङ्कन समवहित सिद्धान्तानुरूपमन्यद्वाविश्लेषणं बहुविधक्षेत्रेषु लोकप्रेरणास्त्रोत इव सम्पद्येत् यद्येवं रीत्याऽनुसन्धानं प्रथमं विचार्य प्रारब्धंस्यात्तर्हि निश्चयप्रचमेव प्रति स्पर्धया मन्दबुद्धयोऽपि प्रखरबुद्ध्यो भवेयुः। मास्तुवा प्रखरस्तीक्ष्णबुद्ध्यः प्रगतिबुद्ध्यस्तु स्युरेव, प्रगतये भूरिप्रयास रताश्चविद्या व्यसनिनां पंक्तौ प्रविष्टाः प्रति पद्येरन्। निर्जीवतां गताऽध्ययन प्रवृत्तिः सजीवतां भजेत्। हृत प्राया समुज्जवल भविष्याशा प्रस्फुरिता सचेतनतामधि गता सर्वानपि शास्त्रपथतो निवृत्तान् परिवर्त्य परिवृत्त्यच शास्त्राध्ययनरतानखिलान् सत्यमेवामरतामनुभावयन्ती वैशिष्ट्यञ्च प्रतिपाद्यन्ती स्वाध्याऽयोध्येतव्यः सत्यंवद् धर्मंचर स्वाध्यायान माप्रमद इति सूक्तिमभि रक्षयन्ती सर्वानपि शास्त्ररसिकानपरिपुष्णात्येव। येन न कापि निराशाबीजाङ्कुरप्रादुर्भावः संस्कृतसमाजेऽपि न वा तथाविधोपेक्षा यथाऽद्यक्वचित्। सरोज्ञान मस्याअस्ति सरस्वतीति नाम सफलं सबलं प्रथमं संस्कृतज्ञानामिति नातिशयोक्तिः। एव मनुसन्धानानुकारि शोध कार्यानुभागः प्रचूरभाग्यवतां प्राप्यकृती स्यादिति शम्।

प्रकृतमनुसरामः श्रीधरं श्री हरिनमस्कृत्यश्रैधरी टीका मातृका मयानुबन्धचतुष्टय निरूपणञ्चावधार्य शब्देन्दुशेखरस्य नैकविधप्रकाशित टीकाख्यान गतिनय नीतानां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टीकाविधायिनां वेदांगप्रमुखव्याकरणविषयक पाणिनीय पाथेय प्रबल मत मतान्तर निवारणपरस्य विमर्श करस्य नागोजि भट्टकृत शब्देन्दु शेखरस्य शाब्दिक समाजाद्वहिरपि महिमानं के न जानन्ति? जयन्ति शाब्दिकाः जयन्त्यष्टौशब्दिका वा इति सूक्त्यनुसारेण वैयाकरणानां तदीय कृतीनाञ्च विषये भूयाँस विचारस्सत्यं तथाप्यत्र पाणिनीय व्याकरणसम्बन्धि विचारणाधिकृता शेखर श्रेधरीटीकात्र। प्रकाशित शैखरीटीकानां सामञ्जस्यं पारस्परिकं सामान्य विशेषरुपतो वा शोध विषयः।

अत्रतु शब्देन्दु शेखरस्यश्रेधरी टीकामातृकासम्बन्धिचर्चा प्रस्तूयते कथमेतस्या मातृकाया परटीकापेक्षया माहात्म्यमित्यपि? शोधकार्ये सुस्पष्टतां भजिष्यति। सर्वतन्त्रस्वतन्त्रो नागोजिभट्टो नैकां कृति विधाय कृतीति परन्तु पणिनीयव्याकरण एव शब्देन्दुशेखरः वृहच्छन्देन्दुशेखरः, परिभाषेन्दुशेखरः, वैयाकरणलघुमंजूषा वृहद् वैयाकरण मञ्जूषा परमलघु मञ्जूषेति नागेश्योक्तिसुमूल ग्रन्थाः टीका ग्रन्था धर्मशास्त्र ग्रन्थाश्चैते तदीयं वैशिष्ट्यं वैदुष्यञ्चानुपमं ख्यापयन्त्येव। अत्रशब्देन्दुशेखरीय बहुविधाः टीकाः सन्त्येव तथाप्यत्र श्रेधरी टीकापि काममपि वैलक्षण्यतां सुमहत्ताञ्च प्रकाशयिष्यति। सौभाग्यादेव गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठे प्रयागस्थेऽप्रकाशित ग्रन्थ संग्रहालये शब्देन्दु शेखरस्य श्रेधरी टीका कारक प्रकारणान्तं यावदधि गता। यथामति यथा शक्यञ्वाध्ययनं विधायानुभूतं यदियं श्रेधरी टीका प्राकाश्यतामागतासु विभिन्न टीकासु सतीस्चपि किञ्चिद् वैशिष्ट्यमावहत्येवेति विचार्य तस्याश्शोधकार्यपूर्वकं सम्पादनमावर्श्यक परमोप योगिकरञ्चेतिधिया तदर्थं समपेक्षित प्रक्रिया सम्पादन-प्रकाशन योग्यतानुरूपप्रारम्भ स्थल वहुलेषु श्रेधरीकाराभिनिवेशोमनोगुग्धतां नयत्येव। सम्भावये यदस्याः प्रकाशने नाद्यावधि प्रकाशिता सु टीकासु शब्देन्दु शेखर ग्रन्थस्य यद् हृद्यं तत्सहितं नागोजिभट्टस्य यत्तात्पर्यं रहस्य भूतमत्यन्तं सुस्पष्टमुपयोगार्हं न स्फुटं तच्छैधरी टीकयासम्यक् पूरयिष्यते। यद्यपि प्रकाशित टीकासु परस्परं प्रायस्स्थलविशेषागतार्था इति सत्यमेव केचनांशास्तासां श्रेधर्यापि सम्यग्गतार्थाः न सन्ति तस्मादेवास्याः प्रकाशनं मूल्यमर्हति। श्रेधर्याहि सरलतया विलक्षणप्रतिभया टीकाकारेण विमर्शिताः पदार्थाः येनोपेक्षितानिबहूनिपदानि शेखरस्य टीकारैरत्र श्रेधरी कारेण विमृष्टानीति महन्महत्त्वमस्त्येवास्याम् एतत्सर्वं विदित मेव विद्यते य दधुना पाणिनीय व्याकरणमेव सर्व्याकरणापेक्षया प्राशस्त्यं भजति, पाणिनीय व्याकरणेऽनेके महावैयाकरणाः पाणिनीयाष्टाध्यायीमाधारीकृत्यैव यशोराशिमर्जितवन्तो विविध टीकाविधानतः। श्रीमद् भट्टोजि दीक्षितो हरि दीक्षितश्च बहुषु विद्वत्सु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मूर्धामिसिक्तावभूताम्। श्रीहरिदीक्षित स्यैवान्यतमशिष्यः श्री नागोजिमट्टोनव्य वैयाकरणः सर्वतन्त्रस्वतन्त्रोऽभवदिति विपश्चितामाशयः।

एतस्य संस्कृतजगति नाना ग्रन्थरत्न भूताः मूल ग्रन्थाः मौलिकाः टीका ग्रन्थाश्च परमख्यातिङ्गताः सन्ति। तेन परिभाषेन्दु शेखर-वैयाकरणवृहन्मञ्जूषा-लघुमञ्जूषा-शेषाश्च टीका ग्रन्थाश्च, महाभाष्ये उद्योत टीका काव्यप्रकाशस्योद्योत टीकादि ग्रन्थेषु शब्देन्दु शेखरो महान् ग्रन्थः, शाब्दिक परम्परासु निरुपमः प्रौढश्चास्ति। अस्यशब्देन्दु शेखरस्याद्यावधि नाना टीकाः संस्कृत भाषायामुपलम्यन्ते प्रकाशिताः। तासु टीकासु शब्देन्दुशेखरस्य यथासम्भवन्तात्पर्यं यथामति टीकाकाराः प्रचूरप्रयासेन प्रकाशितवन्तो नास्ति सन्देहः।

सौभाग्यादेव गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठे प्रयागस्थे अप्रकाशित ग्रन्थ संग्रहालये शब्देन्दु शेखरस्य श्रैधरी टीका कारक प्रकारणान्तं यावदाधिगता। यथामति यशाशक्यञ्चाध्ययनं विद्यानुभूतमिदं यदियं श्रैधरीटीकाऽद्यावधि प्रकाश्यमागतासु विभिन्नासु टीकासु सतीस्वपि किञ्चिद् वैशिष्ट्य मवश्यंविभर्तीति विचार्य तस्याश्शोधकार्य पूर्वकं सम्पादनमावश्यकमुपयोगिकरञ्चेधिया तदर्थं समपेक्षित प्रक्रिया सम्पादन-प्रकाशनयोग्यतानुरूपा प्रारम्भा। बहुत्तु स्थलेषु प्रकाशित टीकापेक्षया वैलक्षण्यं वैशिष्ट्यञ्च प्राप्य मनोमुग्धमभवत्। सम्भावये यदस्याः प्रकाशनेनाद्यावधिप्रकाशितासुटीकासु शब्देन्दुशेखर ग्रन्थस्य यद् हृद्यं तत्सहितं नागोजिभट्टस्य यत्तात्पर्यं रहस्य भूतमत्यन्तमुपयोगार्हञ्च न स्फुटं तच्छैधरी टीकया सम्पक् पूरयिष्यत् एव। यद्यपि प्रकाशितासु टीकासु परस्परं प्रायः स्थल विशेषार्था गतार्थाः सन्ति, एवं केचनांशाश्श्रैधर्य्या अपि गतार्थास्ता सु टीकासु। परन्तु ये च सामान्य-विशेषाः कतिपयेपदार्था न व्याख्या न प्रसंगे स्पृष्टाः न वा तदर्थ बोधकाश्शब्दाश्श्शब्देन्दु शेखरस्य व्याख्यातास्तेऽपि श्रैधरी टीकायां सरलतया विलक्षण प्रतिभाया टीका कारेण विमर्शिताः येनोपेक्षितान्यपि बहूनिपदानि सामान्यानि व्याख्यानृवर्गैर्न गम्भीरतया विचारपथमानीतानि। सर्वाव्यपि श्रैधर्य्याव्याख्यातानि। अस्या अप्रकाशित टीकायाः कर्ता योहि श्रीधरो कश्च न शाब्दिको मनीषी पुण्य श्लोकः कीर्तितस्तस्याभि जनविषयकोदेशकालविषयको न कोऽपि समुल्लेखः टीकायामुपलम्यते। बहुप्रयासेनापि अस्या अन्यामातृका नोपलब्धाः संग्रहालये ग्रन्थ सूचीमाध्यमेन सम्यगन्वेषणेनापि। अनेकत्र तट्टीकायाः सम्भावनां विद्यापीठतः पत्राचारेणापि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न सफलताधिगता। केवलमेका मातृका अपरा गुरुदासपुर पञ्जाबतः स्त्री प्रत्ययान्तं यावदुपलब्धा यस्या छायाचित्रं (फोटो स्टेट कापिका) प्राप्ता। तत्साहाय्येनैव द्वयोः पाठभेदं यथास्थलं संशोधनं च विधाय प्रकाशनार्हता प्रतिपादिता। पठानकोटगुरुदासपुर पञ्चाबतोलब्धश्रैधरी टीकामातृकायाः प्रारम्भे लिखितमिदं विद्यते यदयं श्रैधरी टीकाकारो न श्रीमद्‌भागवत महापुराण भाष्य टीकाकारेण श्रीधरस्वाभिना तादात्म्यं स्थापयति। अयं श्रैधरी टीकाकारोऽन्य एव कश्चन महावैयाकरणो भवेदिति। यतो देशकालतो विशेषविचारणानन्तर मेतद् ज्ञायते यच्छब्देन्दु शेखरकारस्य नागोजि भट्टस्यापेक्षया श्रीमद्‌भागवत् महापुराणादि भाष्य टीकाकारः पूर्ववर्तीति। तेनात्रैतत्थ्यमव धारणीयं भवत्येव निश्चयेन यच्छैधरी टीकाकारः कश्चनान्य एव शाब्दिकः। तत्र प्रारम्भोल्लेखे श्रैधरी टीकाकारस्य देशकालादिविषयेपि न किमप्यावेदितं विद्यते। मन्ये केनचितज्ञात कारणेन पूर्वाष्टाध्यायाः वैयाकरणसिद्धान्त कौमुद्या वा न नागोजिभट्टेन शब्देन्दुशेखरे व्याख्या कृता तथा शब्देन्दु शेख रोऽपि प्रायः सर्वदाचार्य कक्षां यावत् कारक प्रकरणान्तमव्ययी भाव समास प्रकरणान्तम्बा पठन पाठन विधौनव्यवैयाकरणैः क्रियते। तेनैव मन्ये श्रीधरी टीका कारेणापि केवलं कारक प्रकरणां यावदेव टीकाश्रैधरी नाम्नीकृताभवेदिति मन्मतम्। याविशेषता श्रैधर्य्यान्तत्तु यथाप्रसंगमुपस्थापयिष्यते। पञ्जाबतोलब्धा च मातृका स्त्रीप्रत्ययान्तं यावदेव वर्तते। इदमप्यत्रतथ्यं यत् सम्यक् सुपरिक्ष्यावधारितं यदियं मातृकापिगंगानाथ झा केन्द्रीय संस्कृत विद्यापीठीय संग्रहालयस्थ मूलमातृकावदेवाकार प्रकारेणविद्यते पत्राण्यपि तदाकाराणि सामान्यतां ख्यापयति। प्रारम्भतः प्रायोऽर्धां शभागं यावत् वर्ण पदात्मक एव पाठभेदः परिलक्षितः। न तु सम्पूर्ण मातृकायाम्। विद्यापीठीय मूलमातृका प्रारम्भे प्रथमे पृष्ठे यल्लिखितं किञ्चितपरिष्कार वस्तु तदपि पञ्जावतः प्राप्त मातृकायां नास्ति। तथा च विद्यापीठीय मातृकायां केवलं पृष्ठ संख्याऽङ्कनं केवल मेकस्मिन् भागे परं पंजाबतोलब्ध मातृकायां प्रतिपृष्ठतोऽधोऽपर पत्रेऽपि स एव पृष्ठ संख्याक्रमः अपर इति विशेषेण घटितोभेदोविशिष्यते। शब्देन्दु शेखरस्य श्रीधरादागता = श्रीधरात्मनि जाता = श्रीधरस्येयम्बा श्रैधरीति नाम्नाख्याति मागता महतीयं टीका सर्वटीकासु प्राशस्त्यम्भजत्येव नात्र संशयः। यद्यपि भूरिप्रयासेनापि श्रैधर्य्या मातृकाः प्रभूत संख्यायान्नोपलब्धापरन्तु कथमपि मातृकात्रयी दृष्टि पथमागता एका चापूर्णा कतिपयसूत्रेष्वेवैकविंशति पृष्ठात्मिका तेलुगू लिप्यां मातृका लब्धा, यस्य सं. स्कृतानुवादेन कानिचिदेव सूत्राणि व्याख्यातानि श्रैधरीनाम्नातस्या लिप्यामियं मातृका खलु यथा सूत्र व्याख्यानेन वैशिष्ट्य मादधाति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतभाषालिप्यपेक्षयातेलुगू लिपिः सुत्रार्पिता प्रतीयते, यो हि भावस्तयालिप्या बोध्यते स एव भावः संस्कृतलिप्या तदपेक्षयाधिक पृष्ठैः प्रकाश्यते।

तिसृणां मातृकाणां पर्यालोचनेनेदं तथ्यं सुस्पष्टमभव यत् सा श्रैधरी टीका मातृका गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठाया स्वेतरमातृकाऽपेक्षया विशुद्धतां नितरामावहति। तस्मादेवेयं प्रथमा 'क' मातृका त्वेनाव धारिता, अन्या मातृकारव ग रूपाच क्रमशः पञ्जाब प्रान्तीया, जम्मू प्रान्तीया च समवधारिते। तयोस्तथाविधयोर्दातारौ ना भूताम् किन्त्वेकेन महानुभावेन गुरुदास पुरस्स्थेन तस्याश्छाया चित्रम् (फोटो स्टेट कॉपी लि.) दत्तम्। जम्मू स्थेन महानुभावेनतु छायाचित्रमपि दातुं नोद्यतोऽभवत्। परत्तेन कथमपि सामातृका सम्मुख मुपस्थापिता केवलं पाठमेद ज्ञानाय। तदनुरोधमङ्गीकृत्य द्वयोर्मातृकयोः प्रतिसूत्र व्याख्यानमनुसृत्य पाठ भेदोऽधारितः। तस्या मातृकायां मातृकाद्वयी (क-ख) अपेक्षया शताधिक स्थलेषु पाठभेदं प्राप्यतदनुसारं 'क' मातृकायाः सम्यक्संशोधने प्रामाण्य ग्रहणे च सुसौविध्यमभवत्। 'ग' मातृकामामेव केवलं १३५ पञ्चमिशं दुत्तरैक शत संख्याकाः पाठ भेदा उपलब्धा 'ख' मातृकायान्तु प्रायोख 'क' मातृकेव पाठाः सन्ति। पञ्चषा एव प्रायः पाठ भेदाः सुलभाः। ख मातृका तु केवलं स्त्रीप्रत्यान्त भाग पर्यन्तैव विद्यते। 'कमातृकावत' समातृकापि कारक प्रकरणंयावत् परिपूर्णा विद्यते। परमत्र मातृकात्रयेपि टीकाकारस्य पुण्यश्लोकस्य श्रीधरस्य लेखकत्वेन येन केनापि रुपेण वांऽशतोऽपि न कांपि चर्चा चर्चिता लब्धा। ये न हि श्रैधरी टीकेयं श्रीधर कृतिरिति विचार्यापि पूर्णतः प्रामाणिकतया तस्याभिजनादि संकेतः पूर्णनाम, वंशपरम्परा क्व कीदृशः? इति सर्वं खलु बौद्धमेव श्रद्धास्पदीभूतमवतिष्ठते। कस्याञ्चिदपि मातृकायामादावन्ते मध्ये कुत्रापि न कश्चनापि तत्तद्विषयकः संकेतोलब्धः। मातृका टीका लेखकत्वेन आपा वैष्णव इति संकीर्तितः सुलभोजातः। सोऽपि कुत्रत्यः कदाऽभवदिति श्रीधर इव बौद्धो जातः।

अस्तु टीकेयं द्वाम्यां मातृकाम्यां सम्यगविशेषतः पर्यालोचितापि संशोधितासती मुद्रणार्थमर्हतामानीताः। मातृकाद्वयी प्रदातृम्यां भूयो भूयः समभिबादनमाभारञ्च ज्ञापयामि।

यद्यपि द्वा वपि मातृका दातारौ स्वनाम्नः संकेतं कर्तुं प्राकाश्य मानायां श्रैधर्य्यां न सम्यक् स्वाभिप्रायं कञ्चनापि प्रकाशितवन्तौ तथापि पञ्चावप्रान्तस्थ गुरुदासपुर जनपदीय पठानकोटवर्तिनः शाहपुरस्थस्य ठाकुरप्रसाद रसोत्रा महोदयस्य करकमलेन सुरक्षितस्याः -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रैधर्याः मातृकायाः सहयोगस्त दीयात्मजेनश्री प्रेमनाथ रसोत्रा महोदयेन कृतस्य साहायस्य गमनागमनाय मातृका स्थानं यावदपेक्षितावश्यक सौविद्ध्य प्रदान स्याभारीवर्त्तेऽहमे तदर्थञ्च सभूयोभूयो महान्तं धन्यवादं तन्मं गलाय शुभ कामनाञ्च ज्ञापयामि। जम्मू प्रान्तस्थस्योधमपुरवासि नो मातृका प्रत्यक्षीकार निमित्तभूतस्य महानुभावस्यतत्प्रार्थनानुसारं तदीयवंशपरम्परामनुरुद्ध्य नात्र तत्सम्बन्धि कश्चनापि संकेतः कर्तुं युज्यत् उचितो वा। परं हृदयेनतं प्रत्याभारम्भनसावाचा कर्मणा च ज्ञापयन् भगवनतं प्रार्थयामितन्मंगलाम् सततम्। श्रैधर्य्या वैशिष्ट्य विषये यथास्थलं बोधयिष्यएव बोधितोऽपि। अत्र श्रैधर्य्या मातृकायाः सम्पादनार्ह शोधकार्य कृते गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठीय प्राचार्य वयैः डॉ० श्री गया चरण त्रिपाठी महोदयैः परामर्श प्रेरितः - समुत्साहित इव तान्प्रत्यपि सममिनन्दन मा भारञ्च ज्ञापयामि। संग्रहालयध्यक्षस्य तदीय सहयोगिनश्च मातृकाऽन्वेषणाकार्यक्रमे लब्धसाहायेनैवायं मातृकाग्रन्थो लब्धस्त्रतदर्थं तेम्योऽपि धन्यवादं वितरामि। यदा कदा सूक्ष्माति सूक्ष्म मातृकास्थलिप्पक्षस्परिज्ञानाय कृतसहयोगिनः डॉ० किशोरनाथ झा महोदयोऽपि धन्यवादेन संस्तूयतेयेन शोधकार्ये सारल्यमभवत्। इतोऽधिकं शोधपत्रे प्रपञ्चयिष्यत् एव नात्रप्रतन्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

। ॐ। श्रीगुरुशरणम् । ॐ।

लघुशब्देन्दुशेखरः

महामहोपाध्यायपर्वतीयश्रीनित्यानन्दपन्तकृत-
'शेखरदीपक'समलङ्कृतः।

पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः।
शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः।।१।।

याचकानां कल्पतरोऽरिकक्षहुताशनात्।
श्रृंङ्गिवेरपुराधीशाद् रामतो लब्धजीविकः।।२।।

नत्वा फणीशं नागेशस्तनुतेऽर्थप्रकाशकम्।
मनोरमोमार्द्धदेहं लघुशब्देन्दुशेखरम्।।३।।

ग्रन्थसमाप्तिग्रन्थप्रचारादिप्रतिबन्धकदुरितप्रशमाय (१) समुचितऋषित्रयनमस्काररूपं मङ्गलमाचरन् शिष्यशिक्षायै (२) व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति - **मुनित्रयमिति।** कारकविभक्तेर्बलवत्त्वाद् (३) द्वितीया। **परिभाव्येति।** तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात् प्राचामुक्तीस्तिरस्कृत्येत्यर्थः, मुनित्रयोक्तीर्विचार्येत्यर्थो वा।

।। श्रीमन्महागणाधिपतयेनमः।।

दक्षिणे लक्ष्मणोयस्य वामेतु जनकात्मजा,
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्।।१।।

पातञ्जल इति, पतञ्जलिना निर्वृत्ते योगशास्त्रे इत्यर्थः। महाभाष्ये इति महाभाष्ये चेत्यर्थः। समुचित ऋषित्रयेति। व्याकरणे सम्यगुचितपाणिनिकात्यायन पञ्जजलिरूपऋषित्रयेत्यर्थः। ननु संज्ञा च परिभाषा चेत्यभियुक्तोक्ते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'परिभावस्तिरस्क्रिया' इति कोशात्तिरस्कारार्थकस्य धातोर्विचारार्थकत्वेऽपि न बाधकम्। धातूनामनेकार्थत्वात्। अत एव 'परौ भुवौऽवज्ञाने' (३।३।५५) इति सङ्गच्छते। एतेन स्वग्रन्थस्य प्राचीन ग्रन्थैरगतार्थता (१) समूलत्वञ्च ध्वनितम्। भाविनोऽपि बुद्ध्या विषयीकरणादियमिति निर्देशः। सिद्धान्तप्रकाशकत्वेनातिदुरूहग्रन्थान्तरेभ्यः सिद्धान्तज्ञाने जायमानस्य क्लेशरूपसन्तापस्य (२) शामकत्वेन च कौमुदीसादृश्यम्। (३) अनेन (४) वैयाकरणसिद्धान्ता विषयाः, (५) तज्ज्ञानं प्रयोजनं (६) तज्जिज्ञासुरधिकारीत्यादि सूचितम्।।

अइउण् (मा०सू० १) (१) एषां (२) क्रमबोधकत्वेऽपि 'आदिरन्त्येन्' (१।१।७१) इत्यनेनैकवाक्यतया (३) वृत्तिपरिच्छेदकत्वेन संज्ञासूत्रत्वम्। क्रमस्य सञ्ज्ञाद्वारैवोपयोगात्। एकवाक्यता चादिरकारादिरन्त्येनेता तत्सदृशेन णकारादिना सहोच्चार्यमाण आद्यन्ताक्षिप्तानां सञ्ज्ञेति। 'स्वौजस्' (४।१।२) इत्यादीनामप्येतदेकवाक्यतया सुबादिसञ्ज्ञासूत्रत्वं (४) स्वादिविधायकत्वञ्चेति बोद्ध्यम्। एषु (५) संहिताया अविवक्षया न संहिताकार्यम्। अनुकरणत्वेन (१) सौत्रत्वाच्च वर्णेभ्यो न विभक्त्युत्पत्तिः। कारप्रत्ययोऽपि न, (२) बाहुलकात्।

यत्तु (३) 'उपजीव्यविरोधात् सन्धिर्न। तथा हि अजादिसञ्ज्ञाग्रहकाले 'आद्गुणः' (६।१।८७) इत्यादीनामनिष्पत्त्या तदप्रवृत्तावविकृतरूपाकारादिषु गृहीताज्ञादिपदशक्तिः पश्चाद्च्प्रत्याहारे ज्ञाते उपेन्द्र इवात्रापि तत्प्रवृत्तौ विरुद्ध्येत्। न हि सन्धिकार्ये कृतेऽविकृतरूपश्रवणं भवति' इति। तन्न। पुनरच्पदस्यार्थान्तरे शक्त्यग्रहेण तद्विरोधाभावात्। न च सन्धौ सन्देहः। व्याख्यानतो निर्णयसम्भवात्।

ननु चतुर्दशसूत्र्यामक्षरसमाम्नाय इतिव्यवहारानुपपत्तिराम्नायसमाम्नायशब्दयोर्बेदे एव

सूत्रलक्षणेऽइउणित्यादीनां सूत्रत्वव्यवहारो न स्यात्तेषां क्रममात्रबोधकत्वादिइत्यत आह, एषामिति, वृत्तिपरिच्छेदकत्वेनेति। शक्त्युद्बोधकत्वेनेत्यर्थः। इत्सहशेनेति। उपदिश्यतेऽनेनेतिकरणव्युत्पत्तिरित्संज्ञायामुपदेशशब्दस्येति स्वमते इत्संज्ञायाः प्राप्तावपि उच्चारणसामर्थ्याल्लोपाभावे कल्पनीये प्रधानशास्त्रस्य साक्षाद्बाध-कल्पनापेक्षया तदुपयोगिनीत्संज्ञैव वाध्यते इत्याशयेनैवमुक्तमितिभावः। स्वौजसित्यादीनामपीति।

आदिना तिप्तस् संख्याया अवयव इत्यादीमां संग्रहः। सुबादीति अत्रादिना

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रसिद्धेरित्यत आह– **माहेश्वराणीति**। महेश्वरादागतानीत्यर्थः। महेश्वरप्रसादलब्धानीति फलितम्। एवञ्चैवमानुपूर्वीकाश्रुतिरेवैषा। **तत्प्रसादात्पाणिनिना** लब्धा। श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वम्। अत्र प्रमाणण् –

'येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तम् ....' (पा०शि० ५७)

इति शिक्षावचनम्। 'लणसूत्रे णकारविषयाचार्यप्रवृत्तिर्ज्ञापयति – व्याख्यानत इति' इत्यादावाचार्यपदेन **महेश्वरः**। अनुबन्धाश्च **महेश्वरकृता** एवेत्यनुपदं स्फुटीभविष्यति। 'ञमङणनम्' (मा०सू० ७) इत्यत्र मकारप्रत्याख्यानपरं भाष्यं तु किमदृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपीत्येवं विचारपरम्। सर्वत्र प्रत्याख्यानमेवम्परमेव। अन्यथाऽङ्गानामपि पारायणे धर्म-श्रवणेन तत्र तत्र **पाणिनिन्यासप्रत्याख्यानस्याप्यसङ्गतिः** स्यात्। तदुक्तम् 'इको यणचि' (६।१।७७) इति सूत्रे –

'सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्' इति।

किञ्चिद् दृष्टादृष्टार्थवत्, किञ्चिच्छुद्धादृष्टार्थवत्, सर्वथाऽनर्थकं न किञ्चिदिति तदर्थः। वृद्धिसूत्रस्थे-'वर्णेनाप्यनर्थकेन न भवितव्यम्' इति **भाष्यग्रन्थे**ऽनर्थकत्वं बोध्यार्थराहित्यरूपमिति न निष्प्रयोजनत्वरूपानर्थक्येन तत्र तत्र प्रत्याख्यानपरभाष्यासङ्गतिः। अत एव 'सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः' इति **भाष्यमुपादायोक्तं भर्तृहरिणा**– 'यथैवेदमव्युच्छिन्नं चन्द्रतारकादि एवमस्याक्षरसमाम्नायस्य न कश्चिद् आधुनिकः कर्त्ताऽस्ति एवमेव वेदपारम्पर्येण स्मर्यमाणः'

तिङ्मात्रजादीनां संग्रहः। अविवक्षयेति। वाक्येतु साविवक्षामपेक्षत इत्यंशस्यान्योपलक्षणत्वात्प्रत्येकं पदत्वेन सुबन्तचयरुपवाक्यत्वाद्वेत्यर्थः। अनुकरण त्वेनेति। अभेदविवक्षयाऽर्थवत्वाभावेन प्रातिपदकत्वाभावादितिभावः। अनुवृत्युत्वापस्थितस्यैव शाब्देऽन्वयप्रतियोगित्वादनुकरणे सर्वत्र भेदविव क्षैव युक्तेत्यत आह। सौत्रत्वाच्चेति। सौत्रत्वाञ्छदोवत्सूत्राणीत्यति देशात्सुपां सुलुगिति लुगिति भावः। न विभक्तयुत्पत्तिरिति। लुक्पक्षेऽपि लुगाऽनुत्पत्तिरेवान्वा ख्यायत इतिबावः। विरुध्येतेति। शक्ति रित्यादिः। यतः संधि कार्ये कृतेऽविकृत रूपश्रवणं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति। आधुनिकः शरीरी। पुष्पितत्वं तन्मूलकशब्दशास्त्रद्वारेण। शब्दप्रयोगेण च फलितत्वम्। उक्तञ्चैतच्चतुर्दशसूत्रव्याख्यायां **नन्दिकेश्वरकृतकाशिकायाम्** –

'नृत्तावसाने नटराजराजो ननाद् ढक्कां नवपञ्च वारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्।।

अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम्।

धात्वर्थं समुपादिष्टं **पाणिन्यादीष्टसिद्धये**।।' इति।

धात्वर्थं धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थम्। अत एव 'अनुबन्धकरणार्थश्च वर्णानामुपदेशः' इत्युक्तं **भाष्ये** अत्र करणशब्दप्रयोगेणानुबन्धनानां सादित्वं सूचितम्। तत्करणञ्चोपदेशकर्तृकर्तृकमेव प्रत्यासत्तेः। तेन तद्व्यतिरिक्तस्य सर्वस्यानादित्वं सूचितम्। अत्र सनकाद्युद्धरणेच्छयाऽस्य ब्रह्मोपदेशरूपत्वं सूचितम्। तच्च श्रुतित्वाभावे न सङ्गच्छते। 'श्रोतव्यः श्रुतिवाक्येभ्यः' इत्युक्तेः। ऋक्तन्त्रव्याकरणे **शाकटायनोऽपि** – 'इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽऽचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्य ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिः' इति। ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः। तत्त्वञ्च **नन्दिकेश्वरकृतकाशिकायां** स्पष्टम्। अतएव 'वृत्तिसमवायार्थो वर्णानामुपदेशः कर्त्तव्यः' इति **भाष्ये** उक्तम्। **पाणिनेर्लाघवेन** शास्त्रप्रवृत्तिफलको यः समवायो वर्णानां क्रमेण सन्निवेशस्तदर्थ इति तदर्थः। स चाणादिप्रत्याहारद्वारा शास्त्रप्रवृत्त्यर्थः। एवाञ्चायमुपदेशः पाणिनेरन्यकृत इति स्पष्टमेवोक्तम्। मन्त्रोपदेश इतिवच्चात्रोपदेशपदप्रयोगः। अत एवास्य

नभवत्यतो गृहीता शक्ति विंरुध्येतेतिभावः।

तद्विंरोधाभाभावादिति। गृहीत शक्तिनाशा भावादित्यर्थः। न चाविकृतरूपा कराश्रयश्रय शक्तिस्तद्रूप नाशक संधि कार्यस्याऽनिमित्तमित्यस्त्येवोप जीव्य विरोध इति वाच्य।। एवं सत्याद्गुण इत्यादी नां वैयर्थ्य मेवस्यात् सन्देह इति, किं ह्रस्वस्यायं निर्देश उत दीर्घस्येत्येवं सन्दे हइत्यर्थः। व्याख्यानत इति। अणु दिदिको यणचि एचोयवायाव स्ताम्यामैजिति निर्देश रूपाद्गृत्यक इतिप्रकृतिभाव रूपाच्चेत्यर्थः। अस्यैव१ वेदांगत्वमित्यर्थः। अत्रेति। चतुर्दशसूत्र्या वेदत्वे महेश्वरात्पाणिनिना लाभे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ञाने सर्ववेदपारायणजं पुण्यं फलमिति **भाष्ये** उक्तम्। व्याकरणमुपक्रम्य 'वेदानां वेदः' इति **छन्दोगश्रुतिरिप्येत्यरैवेति** दिक्।

तत्प्रयोजनमाह – **सञ्ज्ञार्थानीति**। एतच्चोपपादितम्। सञ्ज्ञाप्रणयनश्च लाघवेन शास्त्रप्रवृत्यर्थमिति बोध्यम्।

सञ्ज्ञार्थत्वोपपत्तये आह – **एषामिति**।

अकारश्चेति। तेन रप्रत्याहारसिद्धिः। अनन्त्यत्वात्पृथगुक्तिः। इदं 'तुलास्य' (१।१।६) सूत्रस्थ **कैयटानुरोधेन**।

परे त्वस्यानुनासिकत्वे 'अतो ल्रा' (७।२।२) इति सूत्रे **पाणिनिर्लकारं** नोच्चारयेत्। प्रत्याहरेणैव निर्वाहात्। किञ्चास्येत्सञ्ज्ञकत्वे बहुषु यणपदघटितसूत्रेष्वर्द्धमात्रालाघवानुरोधेन यप्रत्याहारेणैव व्यवहरेत्। किञ्चानुबन्धानामच्प्रत्याहारे ग्रहणाभावे 'आचारादप्रधानत्वाल्लोपश्च बलवन्तरः' इति **भाष्योक्तस्य** तृतीयहेतोरव्यापकत्वापत्तिः। तव लोपस्य बलवत्त्वेऽपि हलप्रत्याहारसिद्धेः प्रागच्पदार्थनिष्पत्यभावेन 'उपदेशेऽज्' (१।३।२) इत्यस्य वाक्यार्थाभावेन लणित्यकारस्येत्सञ्ज्ञालोपयोरभावेन प्रत्याहारेषु जाति ग्रहणपक्षस्यैव **भाष्यकृता** सिद्धान्तितत्वेन हलप्रत्याहारे लणित्यकारप्रवेशे 'मामाँस्त्रायस्व' इत्यत्रानुनासिकपक्षेऽनुस्वारापत्तिर्दुर्वारा, 'सोऽस्ति' इत्यादौ सुलोपाद्यापत्तिश्च। अत एव –

'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।'

इत्येन प्रत्याहारे वर्णसमाम्नाये य एतेऽक्षु अज्बोधकसूत्रेषु प्रत्याहारार्था अनुबन्धाः क्रियन्ते तेषामज्ग्रहणेन ग्रहणं कस्मान्नेत्यर्थकेनाच्प्रत्याहारे शङ्का कृता, न हलप्रत्याहारे। **भाष्ये**

चेत्यर्थः। नन्वेवं लण् सूत्रस्थ भाष्यासंगतिः।

तस्मात्वेतस्याः पाणि निकर्तृत्वं सादित्वं च प्रतीयत इत्यत आह्।

आचार्य पदेन महेश्वरः। अनुबंधाश्च महेश्वर कृता एवेशंकरतीति।

ननु महेश्वरेण कृतस्य ञमङणन मित्यत्र मकारस्य भाष्येत्र प्रत्याख्यानमसंगतमत आह। जमङणनमित्यत्रेति।

नन्वन्यत्र प्रत्याख्यानमन्यादृ शमत्रत्व न्यादृशमित्यसं गतमत आह। सर्वत्रेति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

च 'अइउण्' (मा०सू० १) इत्यादिसूत्रचतुष्टयोपादानेनैवास्य प्रवृत्तिर्दर्शिता। तत्र प्राधान्यं प्रत्याहारेषु ग्रहणार्थत्वरूपं, हल्षु च तथोपदेशस्तेषाम्, अक्षु तु स्वराणामेव तथोपदेश इति प्राधान्यात् तेषामेव सञ्ज्ञित्वमिति भाष्येस्पष्टम्। न च हशादिप्रत्याहारेट्ग्रहणस्यापत्तिरिति वाच्यम्। हकारादिषु पुनःपुनरकारोच्चारणेन उच्चारणार्थवर्णरहितहलां तद्घटितप्रत्याहारे ग्रहणाभावस्य वक्तुं शक्यत्वात्; तद्विषयप्रयोगाणामनभिधानाच्च। तस्मादस्यानुनासिकत्वमप्रामाणिकम्। 'उरण् रपरः' (१।१।५१) इत्यत्र लग्रहणं कर्तव्यमेव। ऋलृवर्णयोः सावर्ण्यवदित्याहुः।

ननु 'हय' (मा०सू ५) इत्यादावकारोच्चारणेन तस्य हल्त्वप्रसङ्गोऽत आह – **हकारादिष्विति।** 'न पुनरन्तरेणाचं व्यञ्जनास्योच्चारणमपि भवति' इति 'उच्चैरुदात्तः' (१।२।२९) इतिसूत्रस्थभाष्यात् 'एषा ह्याचार्यस्य शैली लक्ष्यते, यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति, अचोऽक्षु हलो हल्षु' इति प्रत्याहारेऽनुबन्धानामित्यत्र भाष्याच्चेति भावः।

स्यादेतत्। 'न विभक्तौ' (१।३।४) इत्यादेः सार्थक्याय 'हलन्त्यम्' (१।३।३) इत्यस्योपदेशेऽन्त्यं हल् इदित्यर्थस्यावश्यकत्वेन 'हलन्त्यम्' (१।३।३) 'आदिरन्त्येन' (१।१।७१) इत्यनयोः परस्परापेक्षत्वेना(२) ऽन्योन्याश्रयाल्लकारे इत्संज्ञामबोधयित्वा हलामित्सञ्ज्ञाबोधनं **पाणिनेरयुक्तम्।** न च 'हयवर' (मा० सू० ५) इत्यादेरावृत्त्या 'शषसर्' (मा० सू० १३) इत्यन्तं समुदायमुद्दिश्य 'हल्' (मा० सू० १४) इत्यनेन हल्सञ्ज्ञाऽपि विधेयेति वाच्यम्। दशसूत्राऽऽवृत्तौ गौरवात्।

ननु 'उपदेशे इदन्त्यम्, अच्, अनुनासिकः' इति सूत्रत्रयमस्तु, अजित्यनन्त्यार्थम्,

---

अत्रार्थे भाष्य संगतिमाह। तदुक्तमिति। नन्वेवमपितत्तत्प्रत्याख्याना संगतिर्वृद्धि सूत्रस्थ भाष्य विरोधादत आह। वृद्धिसूत्रस्थ इति। अत एव चतुर्दश सूत्र्या वेदत्वादेव। ननादेति। नादयामासेत्यर्तः। नव पंचवारमिति। नवाधिकाः पंच नवपंच नव पंचा नां वाराणां समाहारो नवपंच वारं ननादेत्येत द्योगे कालाध्व नोरत्यन्त संयोग इति द्वितीया।। विमर्शेति विचारे कृतेसतीत्यर्थः।

अयुक्तमेतत् अनुनासिकत्वा भावात्तस्य?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयेजित्यनुवृत्तिसामर्थ्यादच्चेदिद्भवति तर्ह्यनुनासिक एवेति नियमाश्रयणाद्दुप्रभृतौ न दोषः, योगविभागसामर्थ्याच्चानन्तरस्येति न्यायं बाधित्वा व्यवहितस्यापि तेन नियमः, 'मिदचोन्त्यात्' (१।१।४७) इति ज्ञापकात् न विपरीतनियमः, एवञ्च हल्ग्रहणमपि व्यर्थमन्योन्याश्रयश्च न। न च पाणिनिसूत्रभेदे पारायणादावदृष्टहानिः। तथा च तत्र तत्र भाष्यम् – इति वाच्यम्। कल्प्यमानन्यासस्य लघुत्वेऽस्यादोषत्वात्। 'सूत्रभेदं तमुपाचरन्ति यत्र तदेवाऽन्यत् सूत्रं क्रियते भूयो वा, यदि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेदः' इति, 'अच उपसर्गात्तः' (७।४।४७) इति सूत्रभाष्यात्। नासौ सूत्रभेद इत्यस्य दोषाय इति शेषः। सति सम्भवे दृष्टद्वारैवाङ्गानामदृष्टार्थत्वमिति तदाशयः। अत एव तत्र तत्र ज्ञापकपरसकलभाष्योच्छेदो नेति चेन्न। योगविभागनियमज्ञापकाश्रयणेऽतिगौरवात्। न हि वर्णाभिव्यक्तिजनककण्ठाद्यभिघातगौरवमेवादर्त्तव्यं, न तु ज्ञानजनकमनोव्यापारगौरवमिति राजाज्ञास्ति। न च सह आसमन्ताद् एति गच्छतीति सहेता मध्यमो वर्ण इत्यर्थ इति, अतो नान्योन्याश्रय इति वाच्यम्। अन्योन्याश्रयतत्परिहारादीन् बदता भाष्यकारेण 'कटी' (भ्वा० धा ३२०) 'वी' (भ्वा० धा० १०४८) इत्यत्र प्रश्लिष्टात् 'ईङ् गतौ' (दि०धा० ११४३) इत्यतश्च सह-आङ्-पूर्वात्तृजभावबोधनात्। किञ्च योगमर्यादया तत उक्तार्थालाभः। आसमन्तादित्यस्यानन्वितार्थत्वं व्यर्थत्वञ्च। रूढौ तु न मानमतः सूत्रावृत्त्या तं परिहरति – हलन्त्यमिति।

भाष्येऽप्यन्योन्याश्रयमाशङ्क्य 'हलन्त्यमित्सञ्ज्ञं भवति लकारश्चेद्भवतीति वक्तव्यम्' इत्युक्त्वा 'एकशेषनिर्देशाद्वा सिद्धम् – हल् च हल् च हल्, हलन्त्यमित्' इत्युक्तम्। तस्यायं भावः – कृतैकशेषेण हल्पदेन सम्वन्धसामान्यषष्ठ्या समासोऽन्त्यशब्दस्य च द्वन्द्वान्ते

चखारश्च दशच चतुर्दश अंत्यवर्णाश्च तुर्दशांत्य पूर्ण चतुर्दश२

वे विद्यंतेय स्मिन्न्कदंवेतदंत्य वर्ण चतुर्दशमिति

अंत्यवर्ण चतुर्दशमिति। अर्श आहाजंतमिति भावः।

अतएव। अइ उणित्यादीनां वेदत्वा देवानुबन्धानां सादित्वा देव चेत्यर्थः। अतएवेति। पूर्वोक्तस्य वेदत्वादेवेत्यर्थः। एतच्चोपपादितम्, एक वाक्यता चादिर कारादिरित्यादिनेत्यर्थः।। ननु त्मेत्यत्रोच्चारणं तु रप्रत्याहारानित्यत्व एव ज्ञापकमस्तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रूयमाणस्येवोभयत्रान्वयः। एवञ्च हल्सूत्रान्त्यं हल्रूपान्त्यं चेति बोधः। अन्त्ये 'राहोः शिरः' इतिवत् षष्ठीति। अत्रोच्चारयितुरेकशेषनिर्देशो बोद्धुस्त्वावृत्त्या बोधः। हसमीपो लकार इति हल्रूपान्त्यञ्चेति **कैयटोक्तव्याख्यायां** तु हल् इत्सञ्ज्ञं भवति हलन्त्यञ्चेदिति वदेदित्यूह्यम्।

नन्वेवमपि 'न विभक्तौ' (१।३।४) इति विभक्तिपदबोद्ध्यसुप्तिङ्बोधो 'हलन्त्यम्' (१।३।३) इति वाक्यार्थबोधोत्तरं, तद्बोधश्चापवादवाक्यार्थबोधोत्तरमित्यन्योन्याश्रयस्तदवस्थ एवेति चेत्। न, अपवादवाक्यार्थ बोधात्पूर्वं पदपदार्थोपस्थितावुत्सर्गवाक्यार्थबोधे प्रतिबन्धकाभावात्। न ह्यभावज्ञाने प्रतियोगिज्ञानस्येव प्रतियोगिज्ञानेऽभावज्ञानस्य कारणता कस्यापि सम्मता। प्रतियोगिज्ञानं विना निषेधवाक्यार्थासम्भावाच्च।

'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः' इत्यस्य त्वयं भावः – लक्षणैकचक्षुष्कः उद्देश्यतावच्छेदकावच्छिन्ने सर्वत्रोत्सर्गकृतसंस्कारबुद्धावुत्सर्गापवादयोर्विषयव्यवस्थानापत्त्या भुक्तवन्तं प्रति 'मा भुक्था' इति वाक्यस्येवापवादशास्त्रवैयर्थ्यापत्त्या चापवादशास्त्रपर्यालोचनेन तद्विषयलक्ष्यसंस्कारं निर्णीय तदविषयं तत्तल्लक्ष्यं तत्तद्विषयवाक्योपप्लवद्वारोत्सर्गेण संस्करोति, अन्यथा विकल्पापत्तिरिति। यद्यपि 'भुक्तवन्तं प्रति' इति न्यायो लुगादिना जातनिवृत्तेर्व्यभिचरितस्तथापि तत्राप्यनुत्पत्तिरेवेति न दोषः, न्यायानङ्गीकारेऽपि विकल्पापत्तेः सत्वाच्च। 'अभिनिविशन्ते' इत्यस्य बुद्ध्यारूढा भवन्तीत्यर्थः। लक्ष्यैकचक्षुष्कस्तु तच्छास्त्रपर्यालोचनं विनापि अपवादविषयं परित्यज्योत्सर्गेण लक्ष्यसंस्कारञ्जानीते, तस्यापि शास्त्रप्रक्रियास्मरणपूर्वकप्रयोगे एव धर्मोत्पत्तेः। तदुक्तम्– 'प्रकल्प्य चापवादविषयं तत उत्सर्गः प्रवर्तते' इति। प्रकल्प्य – परित्यज्य।

तत्फलं रषाभ्यादित्यादा वित्यत आह् किं चेति। बहुष्विति इकोयणचि संयोगादराते धातोर्यण्वत ओः पुयण्यपर उदात्तस्वरित योर्यणः स्वरित इत्यादिष्वित्यर्थः। ननुयण् घटित सूत्रेऽर्ध माणा गौरवेणर प्रत्याहार एव नान्य इति ज्ञाप्यते तेन ङेर्यः योचि अयोपधादित्या दौ न य प्रत्याहार इति दोषोऽत आह किं चेति। अव्यापकत्वा पत्तिरिति पक्षतावच्छेदकावच्छिन्नवृत्तित्वरूपव्याप कत्वाभावापत्तिरित्यर्थः। जातिपक्षस्यैवेति। अत एवावात्तामित्या दिसिद्धिरितिभावः। व्यक्ति पक्षेतु मामांस्त्रायस्वेत्यत्र न दोषः। अणु दित्सूत्र ज्ञाप्यलक्ष्यतावच्छेदक ज्ञानोत्तरमकारस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्तु प्रकल्प्य चेत्यस्यायमर्थः – यथा 'न सम्प्रसारणे' (६।१।३७) इति वचनात् परस्य यणः पूर्वं सम्प्रसारणं पूर्वस्य तु तन्निमित्तः प्रतिषेधः इति अभ्यस्तसञ्ज्ञासूत्रे **कैयटः**। तन्न, 'न सम्प्रसारणे' (६।१।३७) इति सूत्रस्थभाष्यविरोधात्। तत्र हि 'एतदेव ज्ञापयति परस्य न पूर्वस्येति। यद्वा 'सम्प्रसारणाश्रयस्य प्रतिषेध' इत्याद्युक्तम्। न हि न्यायेन सिद्धे एवमुक्तिरुचिता। तस्माद् न्यायस्य मदुक्त एव विषय इति बोद्ध्यम्। यदपि 'अपवादवाक्यार्थ बिना नोत्सर्गवाक्यार्थ इति तदर्थः' इति। तदपि न। उक्तयुक्तेः। 'न विभक्तौ तुस्माः' (१।३।४) इति शास्त्रे तुस्मपदार्थज्ञानमात्रेण पादीनामेव तद्विषयत्वाभावबुद्ध्या तेषु हलन्त्यसूत्रप्रवृत्त्या सुप्तिङ्रूपविभक्तिपदार्थज्ञानं सुलभमिति दिक्। अत्राप्युपदेश इति सम्बद्ध्यते। तद्बललभ्यमर्थमाह – **सूत्रे इति।**

आदिरन्त्येन (१।१।७१)। आदिरिति किम्? अन्त्यशब्देन पूर्वेषामाक्षेपादिगादिप्रत्याहेरऽकारादिग्रहणं मा भूदिति। एवमादिशब्देन परेषामाक्षेपादिणादिप्रत्याहारेषु ञादीनां ग्रहणं मा भूदित्यन्त्येनेति। आदिः अन्त्येन इत्युभयोपादाने तु न दोषः। अयमादिरन्त्यो वेत्युक्तेऽवशिष्टमपि किञ्चिदस्तीति नियमेन प्रतीतेः परस्मिन् सति यस्मात्पूर्वो नास्ति स आदिः, पूर्वस्मिन् सति यस्मात्परो नास्ति सोऽन्त्य इति अकारादिग्रहणे इकारणकारादीनामाद्यन्तत्वस्यैवानापत्तेः। अत्राद्यन्ताभ्यामवयवत्वेन बोधकाभ्यां स्वघटितः समुदाय आक्षिप्तः सञ्ज्ञी। तस्य चैकत्र लक्ष्ये प्रयोगाभावात्प्रत्येकं सञ्ज्ञित्वम्। अन्त्यस्य तु न तत्कार्यम्। तस्येत्संञ्ज्ञालोपाभ्यामपहारात्। एतत्फलितकथनमेव भाष्ये मूले च-**स्वस्य च रूपस्य इति**। स्वमित्यनुवृत्तिपरत्वेन व्याख्यानं तु हेयमेव। अनुवृत्तौ फलाभावात्। इतेति किम्? 'ञमङणन' (मा० सृ० ७) इति णकारादिभिः प्रत्याहारो भा

स्ववाच्ये लक्षणायाः सत्वेनाणुदित्यसूत्रस्य च सवर्णसंज्ञा सापेक्षत्वेन सवर्णसंज्ञायाश्च नाज्झलाविति निषेध सापेक्षत्वेन निषेधस्य चाच्संज्ञा आपेक्षत्वे नांतरंगत्वाव एवंमध्ये द्वितीयमेव युक्तं आद्यमंत्त्यचायुक्तं आद्येऽनुनासिक त्वाभावे य कारस्य अन्त्येविधित्वाभावेन लक्षणयैवोपपत्तौ इत् संज्ञायां नमूलं प्रागेवाकारस्येत्संज्ञालो पाभ्यामपहारात्। न चेत्संज्ञायामपि तथा ज्ञानं विलम्बा पेक्षा। गुणा अभेदका इत्येव गतार्थत्वात्। अनुनासिक पक्षे इति। अनुनासिकत्व समानाधिकरणकारत्वजातिनिर्दिश्यत इति मतेनइदम् वस्तुतो व्याप्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूदिति। सहग्रहणाच्च समुदाय एव सञ्ज्ञेति समुदायादेव 'इकः' इत्यादौ विभक्त्युत्पत्तिर्नादिमात्रात्। न चान्त्यस्येत्सञ्ज्ञालोपाभ्यामपहारात् 'आदिरन्त्येन्' (१।१।७१) इत्यसङ्गतम्। सूत्रेष्वित्सञ्ज्ञायामपि इगादिशब्देषु तद्भावात्। अन्त्येनेत्यस्येदन्त्यसदृशेनेत्यर्थात्, व्यक्तिपक्षे एवमेवौचित्यात्, सादृश्यमूलिकैव चात्र तत्वप्रत्यभिज्ञेत्याहुः। 'अचिश्नुधातु' (६।४।७७) इति सूत्रे (३) इण इत्येव सिद्धे य्वोरिति निर्देशादिण् परेणैवेति 'लण्' (मा०सू० ६) सूत्रे भाष्ये स्पष्टम्।

हलन्त्यम् (१।३।३)। अत्र पदद्वयं, समासेऽन्त्यशब्दस्य पूर्वनिपातापत्तेः कर्मधारययोग्यपदानां समासाभावस्य सूत्रकारशैलीसिद्धत्वाच्च। यद्यपि सर्वोऽपि हल् तं तं समुदायं प्रत्यन्त्यो भवति तथाप्यन्त्यपदोपदेशपदाभ्यां प्रत्यासत्त्या ऽज्ञातस्वस्वरूपज्ञापकोच्चारणविषयसमुदायं प्रत्यन्त्य इह गृह्यते। अत एव मकारेत्सञ्ज्ञापरित्राणार्थस्थमोरुकारश्चरितार्थः। समुदायोपदेश एव सर्वत्र ऋपितात्पर्येणावयवानां नान्तरीयकतया तेपामज्ञातस्वस्वरूपज्ञापकत्वाभावात्। **उपदेशेऽन्त्य** इति। तत्र विद्यमानमन्त्यमित्यर्थः। तेन 'अइउण्' (मा०सू० १) इत्यादौ णादीनां हल्प्रत्याहारसिद्ध्युत्तरंतत्सिद्धिः। अन्यत्र त्वन्तरङ्गत्वात्प्राय उच्चारणेनाभिव्यक्तस्य तदव्यवधानेनैवेत्सञ्ज्ञा। पदार्थोपस्थितिरनुबन्धविनिर्मुक्तस्यैव। 'उपदेशोत्तरकाला इत्सञ्ज्ञा' इति 'नाज्झलौ' (१।१।१०) इति सूत्रभाष्यात्। 'धुट्' इत्यादौ सानुबन्धाद्विभक्तिस्तु तेनैवानुबन्धविनिर्मुक्तोपस्थितेस्तस्यैवार्थवत्त्वात्सुलभा। इत्सञ्ज्ञाकार्यं तु यत्र सञ्ज्ञा तत्राऽऽनर्थक्यात् तदुपस्थाप्य एव। स्पष्टञ्चेदं 'तित्स्वरितम्' (६।१।१८५) इत्यत्र **कैयटे**। वैयाकरणे चित्स्वरस्तु न। तस्येच्चकारसदृशत्वे तत्त्वाभावात्। विभक्त्यादिसञ्ज्ञापि

जातिनिर्देशेप्रमाणाभावादत्र पक्षेव्यक्ति पक्षे च दूषणमाह सोस्तीव्यादाविति। आदि ना जाति पक्षे समाधानं देवायान्ति राय्याशमित्यादी नां व्यक्ति पक्षे समस्यते देवायम राज्याशमित्यादीनां संग्रहः। सुलोपाद्यापत्तिश्चेति। आदिना मोऽनुस्वारः हलिसर्वेषां हलोयमांयमि लोप इत्यनुस्वार यलोपादीनां संग्रहोबोध्यः। न च स इत्येतन्मात्रे हलङ्यादि लोप प्राप्तेरस्तीतिव्यर्थ मिति वाच्यम्।

एततत्तदोरित्यारंभात्सकृद् गति न्याय स्यैवाश्रयणात्। अतएव लणि त्यकारस्यानुनसिकत्वाभावादेव प्रसंगाद्द्वितीय हेतुमुपपादयंति। तत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूत्रान्तर्गतानामेवेति तत्रैव 'न विभक्तौ' (१।३।४) इत्यादीनां प्रवृत्तिः। अत एव 'इदम् इश्' (५।३।३) इत्यादाविण्त्वात्सवर्णग्रहणं प्राप्तमप्रत्यय इत्यनेन निषिद्ध्यते' इति भाष्योक्तं सङ्गच्छते। यत्तु 'अनेकाल् (१।१।५५) सूत्रे 'इशि शिद्ग्रहणाभावेऽपि शित्करणादेव सर्वादेशत्वम्' इति भाष्ये उक्तं, तस्येत्सञ्ज्ञकशकारकरणाद् भूतपूर्वनिकाल्त्वमादाय सर्वादेशत्वमित्यर्थ इति न तद्विरोधः।

अत्र केचित् – अनुबन्धा अनैकान्ताः अनवयवाः। यो ह्येकान्तः स कदाचित्तत्रोपलभ्यत एव अयन्तु न तथा, तदर्थभूते विधेये कदाऽप्यदर्शनात्। 'हलन्त्यम्' (१।३।३) इत्यत्रान्त्यशब्दः परसमीपबोधकः, 'चुटू' (१।३।७) इत्यादावादिशब्दः पूर्वसमीपबोधकः, 'अनेकाल् शित्' (१।१।५५) इत्यादौ समीपे सामीप्यमूलकावयवत्वारोपेण बहुव्रीहीः। स्पष्टञ्चेदं 'उपदेशेऽज्' (१।३।२) इति सूत्रे भाष्ये 'मपर्यन्तस्य' (७।२।९१) इति सूत्रे कैयटे च। तेन डाणलादौ इशादौ च न दोषः। अत एव 'उपदेशेऽच्' (१।३।२) इति सूत्रे उपदेशग्रहणं चरितार्थम्। तद्धि 'अभ्र आँ' अटितः' इत्यादौ 'आदितश्च' (७।२।१६) इतीट्प्रतिषेधाभावाय। अनेकान्त्वे हि तत्राप्तिरित्याहुः।

परे तु – एकान्ता एव शास्त्रे तत्रोपलम्भादन्यत्रानुपलम्भाच्च। अनवयवो हि काकादिरेकजातीयसम्बन्धेन गृहवृक्षादिषूपलभ्यते, नैवमयम्। किञ्चानवयवत्वे ण-श-क प्रत्ययादौ णादेरित्त्वानापत्तिः। प्रत्ययादित्वाभावात्। एवमन्त्यत्वाभावादिशादेः शस्येत्वानापत्तिः उक्तार्थलाक्षणिकत्वे तु लक्षणैव दोषः। किञ्च दध्नचश्चकारवैयर्थ्यापत्त्याऽवयवत्वमेव न्याय्यम्। अत एव 'वुच्छण्कठच् (४।२।८०) इतिसूत्रविहितके णित्त्वप्रयुक्तवृद्धिर्न। 'तस्य लोपः' (१।३।९) इति भाष्ये 'एकान्तत्वमेव

प्राधान्यमित्यादिना। द्वितीये हेतो रव्यापकत्वं शंकते। न चेत्यादिना समाधत्ते, हकारा दिष्विति: पुनः पुनरकारोच्चारणेनेति। एकेना कारोच्चारणेन द्वयोर्हलोरुच्चारण सम्भवेन प्रत्येकं तदुच्चारणेनेत्यर्थः। शक्यत्वादिति। प्रत्येकमकारो च्चारणेनोच्चारणार्थवर्ण राहित्य मेवाप्राधान्यं हल्षु ज्ञाप्यत इति भावः। ननुहकारादिष्वकारोच्चारण स्यकिं प्रयोजनमत आह्। न पुनरन्तरेणेति। नन्वेवमुच्चारणार्थं कृतस्यापि हल्संज्ञाकारस्य कुतो नातआह, एषाहीति, इति भाव इति। अनुवाद्येषूच्चारणार्थ वर्ण घटित समुदायस्यतद्रहितेलक्षणा।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्याय्यम्' इत्युक्तेश्च। उपदेशेऽज्' (१।३।२) इति सूत्रे उपदेशग्रहणन्तु स्पष्टार्थमेवेत्याहुः। सर्वत्रानुबन्धसहितनिर्देशे विधौ 'गुप्तिज्किद्भ्यः' (३।१।५) इत्यादौ नकारेत्संज्ञकः सो भवतीत्यादिक्रमेण बोधः। अनुवादे 'सन्यतः' (७।४।७९) इत्यादौ च नकारेत्सञ्ज्ञके सशब्दे परे इत्यादिक्रमेण बोधः। स्पष्टञ्चेदं निष्ठासञ्ज्ञासूत्रे भाष्ये। अत एव 'आटश्च' (६।१।९०) इत्योदेर्नासङ्गतिः। अन्यथा यत्राऽऽट् सूत्रे तत्र नाच्परो, नेष्यते च तत्र वृद्धिः यत्र प्रयोगे इष्यते वृद्धिस्तत्र नाऽऽडिति तदसङ्गतिः स्पष्टैव अन्त्यङ्किम्? वाचालः। हल्किम? 'चिरिणोति' इत्यादौ धातोरन्त्यस्य मा भूत्।

आद्योच्चारणमिति। आद्यमुच्चारणमित्यर्थः, भावे घञिति भावः। तच्च प्रत्यासत्त्यैतच्छास्त्रप्रवर्त्तकाचार्याणामेव। आद्यत्वञ्चाज्ञातस्वस्वरूपज्ञापकत्वम्। उपस्याद्यर्थत्वाद्दिशेरुच्चारणाक्रियत्वात्। अत एव 'एकाच उपदेशे' (७।२।१०) इति सूत्रे कैयटेनोक्तम्– 'इत्सञ्ज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यते' इति, 'आदेच' (६।१।४५) इति सूत्रेऽपि 'येषां स्वरूपज्ञापनायापूर्वमुच्चारणं तेषामेवोपदेशव्यवहारः' इति तत्र सूत्रे भाष्येऽपि 'उद्देशश्च प्रातिपदिकानां नोपदेशः' इति, प्रकृतसूत्रे भाष्येऽपि 'प्रत्यक्षमाख्यानमुपदेशः' इत्युक्तम्। तस्य चोक्त एवार्थः।

परे तु 'उपदेश इति किमर्थम्? अभ्र आँ अपः। कः पुनरुद्देशोपदेशयोर्विशेषः' इति भाष्ये उक्तम्। यदि (२) प्रत्यक्षमाख्यानमुपदेशो गुणैः प्रापणमुद्देशस्तर्हि (३) 'लृटः सद्वा' (३।३।१४) 'निष्ठा' (३।२।१०२) इति विहितानां शतृ-शानच्-क्त-क्तवतूनामवयवस्येत्सञ्ज्ञानापत्तिः। तथा 'राजसूयसूर्य' (३।१।११४) 'चित्याग्निचित्ये' (३।१।१३२) इत्यादि निपातनानुमित (४) क्यबादीनां पादेरित्त्वानापत्तिः। 'वदः सुपि'

उच्चारणार्थानामीत्संज्ञालोपाभ्यामेव निवृत्तिरितितु विधेय विषय एवेतितत्वम् एतेन र प्रत्याहार खण्डन परेण पूर्व ग्रन्थो न दिव औत्सूत्रस्थेनोत्तर ग्रन्थेन च विरोधादिदमसंग्रामित्यपास्तम्। सार्थक्यायेति। अन्यथा हल्सूत्रस्यां त्यमिदित्येवार्थो हलंत्यमित्यस्यादिति भावः। आवृत्येति' उद्देश्यविधेय लाभार्थमावृत्याश्रयणमितिभावः।

अजित्यनुवृत्ति सामर्थ्यादिति। अजननुवृत्तौ मनिनादौ मकारादेरित्वार्थ विधि रेवस्यादितिभावः। रुप्रभृताविति। रुशब्द इत्यादावित्यर्थः। अदोषत्वादिति। पूर्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(३।१।१०६) इत्यत्रोच्चारितस्तु नैतत्सम्बन्धी। अत एव 'तस्यापत्यमत इञ्' इति न्यासेऽन्यशब्दसम्बद्धापत्यार्थस्यानुक्तरूपशेषत्वमुक्तमाकरे। तस्मादत्र सूत्रे उपदेश शब्देनोद्देशस्यापि ग्रहणं वक्तव्यम्। एवम् 'अभ्र आँ अपः' इत्यादावपि प्राप्नोतीति तेषां सङ्गहोऽस्य व्यावृत्तिर्येन भवति स विशेषः क इति प्रश्नः। तत्सङ्ग्रहार्थमेव लोकव्यवहारेणापि तयोः सङ्कीर्णत्वमुपपाद्यैतव्द्यावृत्तये तत्सहङ्ग्रहाय च 'उपदेशेनेऽनुनासिक इति वक्तव्यम्। किं पुनरुपदेशनं? शास्त्रम्' इत्युक्तं वार्तिककृता। तत्र शास्त्रपदेन प्रयोगशासनाकरणभूता धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः 'हलन्त्य' (१।३।३) सूत्रे व्यवसितपदार्थत्वेन भाष्ये उक्ता गृह्यन्ते। एवञ्च तत्सङ्ग्रहः 'अभ्र आँ इत्येतव्द्यावृत्तिश्च सिद्धा। तस्य च वार्तिकस्य बाहुलकात्करणे घञा प्रत्याख्यानं भगवता कृतम्।

किञ्च 'हलन्त्य' (१।३।३) सूत्रे भावघञन्तोपदेशपदानुवृत्तौ 'भवतष्ठक्छसौ' (४।२।११५) इत्यादिविहितेष्वित्सञ्ज्ञानापत्तिः। परस्य सत्त्वेन कादेरन्त्यत्वाभावात् (१)। यदि तूपदेशे (२) प्रत्ययत्वादिविशिष्टान्त्य इत् इत्यर्थ इत्युच्यते तदोपदेश इति व्यर्थम्। अन्त्यपदसामर्थ्येनैव तल्लाभात्। अत एवात्र सूत्रे उपदेशग्रहणस्य 'अनुबन्धा अनेकान्ताः' इत्यस्थितपक्षे 'अभ्र आँ अटितः' इति प्रयोजनमुक्तं, न तूत्तरार्थमित्युक्तम्। न च करणसाधनोपदेशशब्दानुवृत्त्या सिद्धे 'हलन्त्य (१।३।३) सूत्रे 'व्यवसितान्त्यमिति वक्तव्यम्। के पुनर्व्यवसिताः? धातुप्रातिपदिकप्रत्ययनिपातागमादेशः' इतिवार्त्तिकानुत्थानमिति वाच्यम्। समुदायद्वाराऽवयवस्याप्युपदेशकरणत्वात्तदन्त्यस्यापि लोपापत्तिरित्याशयात्। भाष्यकृता चान्त्यग्रहण सामर्थ्येन प्रत्याख्यातम्। तत्रानुबन्धविशिष्टानां धातुत्वादि तु धातुत्वादियोग्यघटितत्वाद् (३) बोध्यम्। निपातानां द्योतकत्वेन ब्राह्मणवसिष्ठन्यायेन च पृथग्

पक्ष्युक्तार्थखण्डनार्थमनुपन्यसनीयत्वादित्यर्थः, ईङ्गतावित्यतश्चेति, इङिणिणांत्वसंभवः भूवादिसूत्रस्थ भाष्येणेङिकोरधिपूर्वयोरेवप्रयोग बोधनादिण एत्येधत्यूठिति बृद्धेर्जागरुकत्वादिति। समाधानस्यपसमाधान्तरादूषकत्वादाह किं चेति। एक शेषेति। तंत्रस्यो पलक्षणमिदं सहविवक्षा या अभावेनैकशेष संभवात्। कैयटोक्त व्याख्या यांत्विति, तुनाऽरुचि बोंधिता। सामीप्यं षष्ठयर्थो ना स्तीति। ननुप्रतियोगिज्ञाने अभावपदबोध्याभाव ज्ञानस्यकारणत्वा भावेऽपि निषेध ज्ञानस्य कारणताऽस्त्येवे त्येत आह, प्रति योगिज्ञानंविनेति। नन्वेवं पूर्वं ह्यपवादा इत्यनेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्रहणम्। व्यवसितत्वञ्च धातुत्वादिना परिच्छिन्नत्वादिति कैयटः। एवञ्चोदश्विदादिप्रातिपदिकान्त्यस्यापि लोपः प्राप्नोतीति 'प्रातिपदिकानां (४) प्रतिषेधो वाच्योऽकृत्तद्धितान्तानाम्' इति वार्त्तिककृताकृतम् 'कुम्भकारः' इत्यादौ अपवादविषयपरिहारेणोत्सर्गप्रवृत्तेः ★पूर्वं प्रातिपदिकत्वे णादिलोपो न स्यादिति अकृदित्यादि। तच्च फलाभावानेत्सञ्ज्ञेत्यादिना भाष्ये प्रत्याख्यातम्। अत्राद्योच्चारणार्थकोपदेशपदानुवृत्तौ त्वस्य वार्तिकस्यानुस्थानमेव स्यात्। 'उद्देशश्च प्रातिपदिकानां नोपदेशः' इति 'आदेच' (६।१।४५) इति सूत्रभाष्ये उक्तेः। एतद्भाष्यैकवाक्यतया पस्पशाह्निकान्तस्थे 'अग्रहणप्रातिपदिकानामुपदेशः कर्त्तव्यो मञ्चको मञ्जक इति मा भूत्' इति भाष्ये उपदेशशब्दो ग्रहणं कर्त्तव्यमित्यर्थकः। तञ्चानुवादरूपमेव सन्देहनिवर्त्तकमिति बोद्ध्यम्।

नन्वेवं 'तस्मिन्निति निर्दिष्टे' (१।१।६६) इति सूत्रे षष्ठीप्रकल्पकत्वं तस्येति पक्षे 'गुप्तिज्किद्भ्यः' (३।१।५) इत्यादावपि षष्ठीप्रक्लृप्त्यापत्तिः। न च सनः सनेवादेशो भविष्यतीति बाधकाभाव इति वाच्यम्। 'उपदेशे इत्युच्यमाना इत्सञ्ज्ञा न प्रकल्पेत' इत्युक्तं भाष्ये, तद्विरुद्ध्येतात्रोपदेशपदा ननुवृत्तौ, इति चेत्? न, तस्यैकदेश्युक्तित्वेनासाधकत्वात्। तथा हि-तत्र 'ङमो ह्रस्वादचि' (८।३।३२) इत्यादौ यत्र सप्तमी पञ्चमी चेत्युभयं निर्दिश्यते तत्र किं पूर्वस्य कार्यमथ परस्येति सन्देहे 'परत्वानवकाशत्वाभ्यां पञ्चमीनिर्देशो बलवान्' इति सिद्धान्तिनोक्तम्। तत एकदेशिना 'यथार्थ वा षष्ठीनिर्देशः कर्त्तव्यः' इति समाधानान्तरमुक्तम्। यथाविषयं प्रागुक्तेषु कार्यिणः षष्ठ्या निर्देष्टव्या इति तदर्थः। तेषु सप्तमीनिर्देशस्य कचित् पूर्वत्र क्वचिदुत्तरत्राऽऽवश्यकत्वेनोभयनिर्देशे गौरवेणैकदेश्युक्तिः।

विरोधोऽत आह् पूर्वंह्यपवादा इति।

वाक्योपप्लवेति। एवंच निषेध विषयेलक्षणाभावान्न विकल्प इति भावः। अन्यथेति। निषेध वाक्य पर्यालोचनयावाक्योप प्लवानंगीकार इत्यर्थः। विकल्पापत्तेः सत्त्वाच्चेति। निषेध विषयेप्युत्सर्गस्यलक्षणोपप्लवादिति भावः। बुध्यारू ढाभवन्तीति। उत्सर्गकृत लक्ष्यसंस्कारात्पूर्वमित्यर्थः। तत उत्सर्ग इति। अपवादवाक्यार्थ पर्यालोचनात्प्रागित्यर्थः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततः परेणैकदेशिना षष्ठीपदानुवृत्त्या 'तस्मिन्' (१।१।६६) इत्यादेरेव षष्ठीप्रकल्पकत्वमाश्रित्य 'यथार्थं वा षष्ठी' इत्येकदेश्युक्तिः प्रत्याख्याता। षष्ठीपदानुवृत्तौ गौरवादुभयोः प्रकल्पकत्ववारणाय परत्वानवकाशत्वयोः 'एकः पूर्वपरयोः' (६।१।८४) इति पूर्वपरग्रहणस्य युगपत्प्रकल्पकत्वाभावे ज्ञापकस्य चावश्यकत्वाच्चेयमप्येक देश्युक्ति। ततः पूर्वेणैकदेशिना तत्पक्षे 'गुप्तिज्' (३।१।५) इत्यादौ दोषः शङ्कितः। ततः षष्ठीप्रक्लृप्तिवादिनैकदेशिनोक्तम्-'स्यादेष दोषो यदीत्सञ्ज्ञा आदेशं प्रतीक्षेत। तत्र खलु कृतायामित्सञ्ज्ञायां लोपे च कृते आदेशो भविष्यति। उपदेश इति हीत्सञ्ज्ञोच्यते' इति। एवञ्च त्वदुक्तिर्व्याहते त्याशयः। तदग्रे उपदेशपदाननुवृत्तिमभिप्रेत्य 'अथवा नानुत्पन्ने सनि प्रक्लृप्त्या भवितव्यम्। यदा चोत्पन्नः सन् तदा कृतसामर्थ्या पञ्चमीति प्रक्लृप्तिर्न भविष्यति' इति समाधानान्तरं कृतम्। तत्र 'परत्वविशिष्टस्य सन उत्पादने पञ्चम्या उपक्षयात् प्रवृत्त्यन्तराभावान्नास्ति तस्याः प्रकल्पकत्वम्' इति तदर्थं कैयट आह। एवञ्च प्रकृतसूत्रस्थस्य सूत्रार्थप्रतिपिपादयिषया प्रवृत्तस्य भाष्यवार्त्तिकस्यैकदेश्युक्ततद्भाष्यबलेन प्रौढिवादत्वकल्पनं नोचितम्, लक्ष्यासिद्धेश्च। 'अइउण्' (मा० सू० १) इत्यादीनामपि क्रमबोधकत्वेनार्थवत्त्वात् प्रातिपदिकत्वम्। चक्षिङः 'चोः कुः' (८।२।३०) इत्यादेरपि प्रातिपदिकत्वम्। लोपश्चेत्यत्रापि शकारस्य स्वरूपेणार्थवत्त्वात् प्रातिपदिकत्वम्। अनुबन्धानामेकान्तत्वे तु 'लोपो यि' (६।४।११८) इत्यतो लोपग्रहणेऽ नुवर्त्तमाने पुनर्लोपग्रहणात् सर्वादेशत्वं बोद्धयम्। 'एकाच उपदेश' (७।२।१०) इत्यत्रत्यः **कैयटोऽपि** चिन्त्य एव। अन्योऽपि तज्जातीयश्चिन्त्य एव। 'एकाच उपदेशे; (७।२।१०) 'आदेच' उपदेशे' (६।१।४५) इत्यादौ तु भावसाधन एवेति सुधियो विभावयन्त्वित्याहुः।

अयमर्थ इति। इदं प्रयोजनमित्यर्थः। तन्मते उत्सर्गेण अपवाद विषयं प्रकल्प्य परिकल्प्य श्चयित्वाऽपवादेप्रवृत्ते तत अपवाद विषयादन्यत्रोत्सर्ग प्रवर्तत इत्यर्थ इति।

उपदेश इति संवध्यत इति। अन्यथाहल विलेखन इति धातोरपि लस्येत्वापत्तिरितिभावः। न चोच्चारण सामर्थ्यान् तस्योपदेश इत्यनुवृत्तावेव तात्पर्य ग्राहकत्वस्यै वौचित्यात्। ननुपूर्वणकारेणेण् प्रत्याहारेंऽत्यग्रह णाभावे ऋकारादिग्रहणं माभूदिति वक्तव्ये आदिग्रहणंमा भूदित्यसंगत मत आह्। अचिश्विति, प्राय इति। तेनोदीच्य ग्रामादित्यादौ क्वचित्समासेपिन क्षतिरिति भाव. ननुव्याप्ति न्यायेन न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ननु शास्त्रेऽनुनासिकोच्चारणाभावात् तत्त्वज्ञानं दुर्लभमत आह– **प्रतिज्ञेति।** प्रतिज्ञाविषयानुनासिक्यवन्त इत्यर्थः। पाणिनीया इत्यस्य पाणिनिप्रभृतिप्रयोक्त वर्णा इत्यर्थः। प्रतिज्ञाचायमेवमिति कथनं, वर्णानां तत्त्वज्ञापको व्यवहारश्च। ताभ्यां तज्ज्ञानं सुलभमिति भावः। प्रतिज्ञातारश्च प्रत्यासत्त्यै तच्छास्त्रकर्त्तार एवेति दिक्। **निर्देशादिति।** तेषां तत्र ग्रहणे हि नासिकादौ (१) यणापत्तिरिति भावः। न चेत्वविधानसामर्थ्याद् यणभावः सिद्धः। तस्यापि प्रत्याहारेष्वनुबन्धाग्रहणज्ञापनद्वारैव यणभावकल्पकत्वौचित्यात्। साक्षाच्छास्त्रबाधकल्पनापेक्षयाऽस्यार्थस्यौचित्यात्। निर्देशादित्यस्य तन्मूलभूतेत्वविधानसामर्थ्यादित्यर्थ इति तात्पर्यम्। आदिना 'तृषिमृषिकृषेः' (१।२।२५) 'एकः पूर्व' (६।१।८४) इत्यादिसङ्ग्रहः। ननु 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न' (का० वा०) इति वार्त्तिके प्रत्याहारशब्दस्य वर्णसमाम्नाये प्रसिद्धे प्रत्याहारेष्वितामित्यनुपपन्नमत आह–**आदिरन्त्येनेतीति।** वार्त्तिके तादर्थ्यात्ताच्छब्द्यमिति भावः।

ऊकालोऽच। (१।२।२७)। कुक्कुटरुते उकारे एकद्वित्रिमात्रत्व प्रसिद्धेरकारादयो नोक्ताः। ऊ इति (१) एकद्वित्रिमात्राणां क्रमेण प्रश्लेषनिर्देशो व्याख्यानात्। तेन स्वोच्चारणकालसदृशो लक्ष्यते। स कालो यस्येति बहुव्रीहिः। तत्फलितमाह–**उश्च ऊश्च उ३श्श्चेति।** ननु उकालो ह्रस्व इतिवाक्ये (२)ऽण्त्वात्सवर्णग्रहणे द्वित्रिमात्रयोरपि ह्रस्वसञ्ज्ञायां 'प्रदाय' प्रलूय' इत्यादौ 'ह्रस्वस्य' (६।१।७१) इति तुक् स्यादिति चेत्? न, ऊ अजित्येवाऽज्ग्रहण-सामर्थ्यादूसदृशोऽजित्यर्थे सादृश्यस्य व्याख्यानात् कालकृतस्यैव ग्रहणमिति सिद्धे अधिकं कालग्रहणमुच्चारितसम्बन्धि कालसदृशकालस्यैव सञ्ज्ञा, न तु तेन गृहीतसम्बन्धिकालसदृशकालस्यापीत्यर्थेनादोषात्। तदुक्तं भाष्ये–'यावत्तपरकरणं तावदत्र

दोषोऽत आह्। अतएवमकारेति। एवं चोकारोच्चारण सामर्थ्यात्प्रत्यासत्ति रेवाश्रीयत इत्यर्थः। नन्वेवमपितत्तत्समुदायस्योप देशत्वे उकरोच्चारणं व्यर्थमत आह्। समुदायोपदेशइति।

नन्वंत्यमुपदेशे इत्स्यादित्यर्थेऽइउणित्यादौ णादीनांहल्प्रत्याहारसिद्धेर भावादित्वं न स्यादत आह। तत्रविद्यमानमिति, प्रायः इति। अस्ये त्संज्ञेत्यत्रान्वयः। तेन न विभक्ताविति निषेधात्तत्र नेतिभावः। यत्र संज्ञातत्रेति। डःसिधुडित्यत्र सूत्रे इत्यर्थः। आनर्थक्यादिति। लोपस्तु तत्र न भवत्युच्चारण सामर्थ्यादिति भावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कालग्रहणम्' इति। न चाजिति (३)वर्णग्रहणे जाति ग्रहणस्य दुर्वारत्वात् (१) 'तितउच्छत्रम्' इत्यत्र 'दीर्घात्' (६।१।७५) 'पदान्ताद्वा' (६।१।७६) इति तुगापत्तिरिति वाच्यम्। ज्ञापकसिद्धत्वेन तस्यासार्व त्रिकत्वात् (२), अन्तरङ्गत्वेन ह्रस्वत्वनिमित्तनित्यतुक एव प्राप्तेश्च। अज्ग्रहणं 'प्रत्यक्ष्य' इत्यादौ 'ह्रस्वस्य' (६।१।७१) इति तुग्व्यावृत्त्यर्थम्।

उच्चैरु (१।२।२९) ।। नात्र श्रुतिकृतमुच्चैस्त्वमुपांशुप्रयोगेऽव्याप्तेः श्रुतिप्रकर्षस्याव्यवस्थितत्वाच्च, किन्तु स्थानकृतम्। उच्चैरित्यधिकरणशक्ति प्रधानम्। अधिकरणत्वञ्चोच्चारणं प्रति, तञ्च ताल्वादीनां सभागत्वे एवेत्या शयेनाह–**ताल्वादीति**। इदं प्राचामनुरोधेन। वर्णसमाम्नायेऽकारस्य प्राथम्यात् कण्ठादीति वक्तुमुचितम्। एवमन्यत्रापि बोद्धयम्। प्रयत्नप्रेरितो वायुर्यदोर्ध्वभागे प्रतिहतोऽचं व्यञ्जयति तदा स उदात्त इति भावः। अजिति। 'ऊकाल' (१।२।२७) इत्यतस्तदनुवर्त्तते। उदात्तत्वादीनामज्धर्मताया एव लोकप्रसिद्धत्वेन हलस्वरप्राप्तौ व्यञ्जनस्याविद्यमानत्वाच्चेदं स्वरूपकथनपरं बोध्यम्। **आये इति**। यच्छब्दः 'फिषोऽन्त' (फि० सू० १) इत्यन्तोदात्तः, जस्सुप्त्वादनुदात्तः, एकादेश उदात्तेन' (८।२।५) इत्येकार उदात्तः।

अर्वाङिति। अभिमुखवाच्यव्युत्पन्नं 'फिषोऽन्त' (फि० सू० १) इत्यन्तोदात्तम्। आद्यस्य शेषनिधातेनानुदात्तत्वम्। अर्वन्तमञ्चतीत्यर्थे कृदुत्तरपद प्रकृतिस्वरेण वाऽन्तोदात्तत्वम्।

एकस्मिन्नच्युदात्तानुदात्तयोर्धर्मिणोर्मेलनविरोधादाह–**वर्णधर्माविति**। बाहुलकादधिकरणे घञ्। अर्शाद्यजित्यन्ये इयं त्रिसूत्री स्पष्टार्था। लोकवेदयोरुदात्तादिव्यवहारस्य प्रसिद्धत्वात्।

ह्रस्वग्रहणमिति। ह्रस्वपदघटितग्रहमित्यर्थः। **अतन्त्रमिति**।

तत्तदुपस्थाप्य एवेति। एवंचेदमेकमेव सामान्या पेक्षज्ञापकं (कम्) सर्वत्रोपस्थाप्य एवेत्संज्ञाकार्य मित्यत्रार्थेनतु तत्र तत्र पृथक् ज्ञापक कल्पनाभौरवादिति भावस्तदाह। वैयाकरणे इति। व्याकरणस्य विकारो वैयाकरणोऽनुदा (त्ति) त्तादेरञेत्यर्थः। एतेनैच्चकारस्य सूत्रे इत्संज्ञायाः प्रत्याहार संपादनेन चरितार्थत्वात्तदुपस्थाप्ये इत्कार्याभावाद्वैयाकरणेचित्स्वरापादनमसंगतमित्यपास्तं। (तम्) अतएव अनुबन्धविनिर्मुक्तोपस्थितेरेव। तत्रोपलभ्यत एवेति। बोधके बोध्ये चोपलभ्यत एवेत्यर्तः। यञोऽकारो गर्गादिभ्योयञ् गार्ग्य इत्यत्र च यथोपलभ्यते इतिभावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वशास्त्रस्त्रङ्केतितिरुपेणाबोधकमित्यर्थः, किन्त्वर्धमात्रारूपार्थबोधकमिति भावः। एवञ्च दीर्घादिष्वप्यधमत्रिवोदात्ता। इत आरम्भ्य नवसूत्र्या 'अ अ' (८।४।६८) इत्यतः प्रागुत्कर्षेणास्य त्रिपाद्यामपि प्रवृत्तिः। सर्वञ्चेदं भाष्ये स्पष्टम्। 'अर्धमुदात्तम्' इति वृत्तिस्तु सत्या सत्यभामेतिवद् व्याख्येया। उत्तरार्धमित्यस्य चार्धमात्रातोऽवशिष्ट उत्तरो भाग इत्यर्थः। वेदे तु यथाप्रयोगं प्रातिशाख्यादस्माच्च व्यवस्था। **तस्य चेति।** अनुदात्तस्येत्यर्थः। **उदात्तेति।** उदात्त स्वरितयोः परत्वेसतीत्यर्थः। तयोः परत्वञ्चोपस्थितानुदात्तापेक्षयैव। **अन्यत्र** उदात्तस्वरितयोः परत्वाभावे। **प्रातिशाख्ये इति।** लोके त्वनुदात्त एवेति भावः ह्रस्वस्वरितमुदाहरति-**क्वेति।** 'किमोऽत्' (५।३।१२) इत्यत्, 'क्वाति' (७।२।१०५) इति क्वादेशे 'तित्स्वरितम् (६।१।१८५) इति स्वरितः। दीर्घं तमुदाहरति-**रथानामिति। येऽरा इति।** 'स्वरितो वाऽनुदात्ते पदादौ' (८।२।६) इत्येकारः स्वरितः 'नोदात्तस्वरितोदयम्' (१।४।६७) इति निषेधस्तु 'उदात्तादनुदात्तस्य स्वरितः' (८।४।६६) इत्यस्यैव 'अनन्तरस्य' इति न्यायात्। स्वरितपरमुदाहरति-**शतचक्रमिति।** अहेरित्यर्थेऽह्यः। वृत्रस्येत्यर्थः। 'छन्दसि वा वचनं प्राङ्णौ चङ्युपधायाः' इति वचनाद् गुणाभावः। 'उदात्तस्वरितयोः' (८।२।३) इतिस्वरितः 'उदात्तयणो हल्पूर्वात्' (६।१।१७४) इति तु न छान्दसत्वात्। यच्छब्दः 'फिषः' (फि० सू० १) इत्यन्तोदात्तः, तदेकादेशश्च वा स्वरितः। **स इति।** उदात्तादिह्रस्वादिसञ्ज्ञक इत्यर्थः।

मुख (१।१।८) उच्यतेऽसौ वचनः। बाहुलकात् कर्मणि ल्युट्। मुखसहिता नासिकेति (१) विग्रहः। तथा वचन इति, 'साधनं कृत' (भा० इ०) इति समासः, तदाह- **मुखसहितेत्यादि।** मुखेति किम् (२) यमानुस्वाराणामेव प्रसज्येत। एवञ्च 'आङोऽनुनासिकः' (६।१।१२६) इत्यत्रानुस्वारः स्यात्। नासिकेति किम्? 'शक्ता' इत्यादौ 'अनुदात्तोपदेश'

कदाप्यदर्शनादिति। एवं चैकांतत्वे उभयत्र दर्शनं हेतु स्तदभावश्चाने कांतत्त्वेहेतुरितिभावः। एकांतत्वं साधयति, एकांता एवेति। तत्रहेतु मुपपादयति। शास्त्रे तत्रोपलम्भादिति। शास्त्रेसूत्रे। तत्रतस्मिन्नवयविनि उपलम्भाद्दर्शनादित्यर्थः। हेत्वंतरेण सत्प्रतिपक्षत्वमेकांतत्व साधक हेतोर्निरकरोति, अन्यत्रानुपलम्भाच्चेति। नन्वेकांतत्वेफलाभावोऽत आह्किञ्चेति। ननूपदेशग्रहणसामर्थ्या दनेकांतत्वमेवास्त्वित्यत आह। किञ्चेति। नन्विष्टा पत्तिरत आह। अत एवेति, नन्वेकांतत्वे भाष्याद्यनुग्रहाभावोत आह्। तस्यलोप इति सूत्रेभाष्ये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(६।४।३७) इत्यादिना कलोपो मा भूत्। **अष्टादशेति।** यद्यपीदं (३) न व्यक्तिपक्षे व्यक्तीनामानन्त्यात्, तथाप्यष्टादशधर्मवत्त्वमकारजातीयादेरित्यर्थः। ह्रस्वत्वादीनां (४) तत्तत्समानाधिकरणोदात्तत्वानुनासिकत्वादीनाञ्च भेदमाश्रित्येदं बोद्धयम्। एवमग्रेऽपि। **लृवर्णस्येति।** विवृतस्येत्यर्थः। तेन 'लृति लृवा' (का० वा०) इति विधेयस्येषत्स्पृष्टस्य दीर्घत्वेऽपि न क्षतिः। **दीर्घाभावादिति।** अत एव 'तुल्यास्य' (१।१।९) सूत्रे भाष्ये 'लृति सवर्णे' (का० वा०) इत्यनेन पक्षे द्विलकारकाभावे 'अकः सवर्णे' (६।१।१०१) इति दीर्घत्वे 'होतृकारः' इति ॠकारघटितप्रयोगः सङ्गच्छते। **ह्रस्वाभावादिति।** इदम् 'एओङ्' (मा० सू० ३) इत्यादौ भाष्ये स्पष्टम्। गानरोदनादौ चतुर्मात्राऽर्धमात्रादीनामुपलम्भेऽपि शास्त्रीयकार्ये उपयोगाभावाल्लोके प्रयोगेष्वप्रयोगाच्च नोक्ताः। अत एवानुदात्ततरस्यानुक्तिः। (५) एकश्रुतेः स्वरान्तरत्वे इदमुपलक्षणम्। तस्या लोकेऽपि सत्त्वात्।

तुल्यास्य । (१।१।९) । (६) तुल्यावास्यप्रयत्नौ यस्येत्यर्थः। (१) आस्ये भवमास्यं (२) व्याख्यानात्। तच्च (३) वर्णोपयोगित्वात्स्थानमेव, प्रयत्नस्य पृथगुपादानात्। प्रकृष्टो यत्न आभ्यन्तरः। तस्य वर्णोत्पत्त्यव्यवहितप्राग्भावित्वरूपप्रकर्षवत्त्वात्। (४) जनकत्वं षष्ठ्यर्थः। तत्तत्कार्यगतभेदं स्थानेष्वारोप्य भेदघटिततुल्यत्वस्य निर्वाहः। वस्तुतः सादृश्यं (५) न भेदघटितमिति भाष्यसम्मतमिति न कश्चिद्दोषः। स्पष्टञ्चेदं भाष्ये। तदाह–**ताल्वादीति।** शिक्षायां कण्ठादीनां कण्ठत्वादिनैव स्थानोक्त्या तद्रूपेणैवाऽऽस्यशब्देन ग्रहणमिति तद्भागभेदमादाय नोदात्तादिषु सावर्ण्यभङ्ग इति बोद्धयम्। यस्यैतद्द्वयं येन यदीयेनैतद्द्वयेन तुल्यमित्यर्थः। 'यजुष्येकेषाम्' (८।३।१०४) इति निर्देशाद् (६) यावदास्यभवतुल्यत्वं ग्राह्यम्। अत एवैचोः सावर्ण्यमा शङ्क्य 'नैतौ तुल्यस्थानौ' इति भाष्ये समाहितम्। अत एव

इति। नन्वेवमुपदेशेऽजिति सूत्रे उपदेश ग्रहणं व्यर्थमत आह् स्पष्टार्थमेवेति।

अनुबन्धविनिर्मुक्तोपस्थितौवाक्यार्थमाह सर्वत्रेति। अनुवाद इतिं चा प्रमाणं स्वोक्तेऽर्थे आह। स्पष्टं चेदमिति। अतएव, टकारेत्संज्ञकाकारादित्यर्था देव। यत्राट्सूत्रेतत्र नाचार इति। आण् नद्या इति सूत्रे नाच्पर इत्यर्थः। नन्द्रा डजादीनामित्यत्राच् परोऽस्त्येवेत्यत आह्। नेष्यते चतत्रवृद्धिरिति। आडजादी नामित्युच्चारणेनेति भावः। वाचाल इति लित्वे हिलिच्चित्स्चरयोः पर्यायः स्यादिति भावः। ननुहल् ग्रहणाभावे भुजीत्यादवुच्चारण सामर्थ्या दंत्यस्य नेत्वमिति हल्ग्रहणं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वलयोर्न सावर्ण्यम्। तेन 'तद्वानासाम्' (४।४।१२५) इत्यादौ 'तोर्लि' (८।४।६०) इति न। अत एव प्रयत्नशब्देन यत्नमात्रग्रहणमिति पक्षे यत्किञ्चित्प्रयत्नभेदे यत्किञ्चित्प्रयत्नैक्यमादाय सवर्णसञ्ज्ञेत्यर्थो 'झरो झरि सवर्णे' (८।४।६५) इति सवर्णग्रहणेन ज्ञापकेन साधितो भाष्ये। तेन स्थानांशे यावत्स्थानसाम्ये इत्येव स्वारसिकोऽर्थ इति प्रतीयते। न च यावदास्यभवतुल्यत्वविवक्षणे प्रयत्नग्रहणं व्यर्थ प्रयत्नस्याप्यास्यभवत्वात्; इति वाच्यम्। ह्रस्वदीर्घयोः सावर्ण्यानापत्ते। तयोर्जनकानामास्यभवानां वायुसंयोगानामतुल्यत्वात्। तस्मादास्यभवनां कण्ठादीनामेव ग्रहणमिति बोधनाय तत्सार्थक्यात्। आस्येति किम्? तर्प्ता। 'झरो झरि' (८।४।६५) इति लोपो मा भूत्। प्रयत्नेति किम्? (१) वाक्श्चोतति। प्रेति किम्। शचयोः श्वासाघोषविवाराख्यबाह्य प्रयत्नसाम्येन (२) तत्रैव दोषात्।

कस्य किं स्थानमित्याशङ्कायामाह–**अकुहेति**। यद्यपि सर्ववर्णोच्चारणे (३) कण्ठव्यापार आवश्यकस्तथापि चकाराद्युच्चारणे ताल्वादिव्यापारोऽपि, तथाऽकारादीनामुच्चारणे तु नेति भावः। कचयोस्तु न सावर्ण्यम्। यावत्स्थानसाम्याभावात्, भिन्नस्थानकथनवैयर्थ्यापत्तेश्च। अत्र कण्ठपदं कण्ठ स्थानतत्समीपजिह्वामूलस्थानोभयपरम् (४)। तेन 'कण्ठयावहौ' (पा० शि० १७) 'जिह्वामूले तु कुः प्रोक्तः' (पा० शि० १८) इति शिक्षया न विरोधः। जिह्वामूलीयपदस्य च वर्णविशेषे रूढिरिति न व्यवहारातिप्रसङ्गः। अत एवायोगवाहेषु जिह्वामूलीयगणनं भाष्ये। तत्तद्वर्णोत्पत्तेः प्राक् तत्तस्थानादौ जिह्वा स्पर्शाद्यनुभवेन तत्तद्वर्णानां तत्तत्स्थानत्वनिर्णयेऽपि 'अकुह' इत्यादिकथनं साधारणधर्मबोधनायानुवादकं, नत्वेतदेव कण्ठादिस्थानविधायकमिति भ्रमितव्यम्। विसर्जनीयपदेनात्र साहचर्यादकाराश्रयस्य ग्रहणम्। अत एव 'अयोगवाहा विज्ञेया आश्रयस्थानभागिनः। (२२)

व्यर्थमत आह्। चिरिणे तीति धातोरंत्यस्येति। इदित्वं नुम र्थस्यादिति भावः। भुजीक्षिजीत्यादीमेकाचा मचएवाभावान्न तत्फलमितिबोध्यं। उपदेश शब्दस्या (ध्यम्) द्योच्चारणार्थकत्वे कैयट भाष्यसंमतिमाह्। अत एवेत्यारम्योक्तमित्यंतेन। प्राचीन मतमुपपाद्य दूषयति। परेत्विति। कः पुनरित्यस्य भाष्योक्तप्रश्नस्याशयं वर्णयति। यादेप्रत्यक्षमिति। ननु लट, शत्रित्यत्र न पुंसके भावेक्तइत्यत्र क्त क्तवतू इत्यत्र वदः सुपीत्य त्रोच्चारणान्नायं दोषोऽत आह। वदः सुपीति। तत्संग्रहोऽभ्र आँ अप इत्येत द्व्यावृत्तिश्चेति। उपदिश्यतेने नेत्यर्थे उपदेशकरण (त्वम्) स्योपदेशत्वं। एवंच

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति शिक्षया न विरोधः। **दन्ता इति।** दन्तसंयुक्तदेशा इत्यर्थः। अतो भग्नदन्तस्याप्युच्चारणं भवत्येव। उश्च पश्च ध्मायेते अनेन, तत्र भव इति योगेनोपध्मानीयस्यौष्ठ्यत्वमित्याह–**उपूपेति**। रूढत्वाच्च न व्यवहाराति प्रसङ्गः। **नासिका चेति।** चेन स्वस्ववर्गानुकूल ताल्वादि गृह्यते। अत एवैषां प्रातिशाख्ये नासिकायां भव इत्यर्थकनासिक्यशब्देन व्यवहारः। यत्तु–

'अनुस्वारयमानां च नासिकास्थानमिष्यते'। (पा० शि० २२)

इति शिक्षोक्तेरेषां नासिकाकरण्।

किञ्च स्थानत्वे कङ्योः सावर्ण्यानापत्तिः यावत्स्थानैक्याभावात्। यत्किञ्चित्स्थानैक्येन तत्त्वे तु ञमामपि परस्परं सावर्ण्यापत्तिरिति, तन्न, कण्ठादीनामपि करणत्वस्यैव 'अस्यन्त्यनेन वर्णान्' इति भाष्यात्प्रतीतेः। स्थानत्वव्यवहारस्तु वर्णाभिव्यक्तिजनकताल्वादौ वर्णजनकवायुसंयोगाधारे वर्णाधारत्वाऽऽरोपेण। तत्तत्स्थानजिह्वाग्रादिसम्बन्धेन वर्णोत्पत्त्या जिह्वाग्रादौ तत्सम्बन्धजनकप्रयत्नविशेषे स्पृष्टतादौ च करणत्वव्यवहारः। वर्णाभिव्यक्त्यनन्तरभावी सावर्ण्यानुपयुक्तश्च कण्ठविवरादिनिष्ठविकासादेरास्यबहिर्देशावाच्छिन्नकार्यस्य जनको यत्नो गुणशब्देनोच्यते। अकारादिनिष्ठानुनासिक्यस्य 'भेदकत्वाद् गुणस्य' इत्यादौ (१) गुणत्वेन व्यवहारस्तु कण्ठाद्यवच्छिन्नवायु संयोगेनोत्पन्नेषु नासावच्छिन्नवायुसंयोगेन तद्रूपधर्मोत्पत्त्या। एवञ्च नासिकायास्तत्र गुणजनकत्वादनुनासिकाकारादीनां नासिकास्थानं नोक्तं मूले। 'एकोऽयमात्मोदकन्नाम तस्य गुणभेदादन्यत्वं भवति अन्यदिदं शीतमन्यदिदमुष्णम्' इति दृष्टान्तपरभाष्येण तथैव प्रतीतेः। आत्माऽत्र द्रव्यम्। उदात्तत्वादीनां गुणत्वव्यवहारस्तु

संनिष्ठा निपात नैरुपस्थितेः शतृशानच्क्त क्तवतुक्यपभिः प्रयोगस्थं बोध्यंत इतितेषा (त्वम्) मुपदेशत्वं। अभ्र इत्येतत्प्रयोगस्थस्त्वनुनासिक पदेन बोध्यत इति नाकारस्योपदेशत्वमिति भावः। ननु राजसूयेत्यञ्प काराद्यश्रवणे नौपाधि को भेदो नांगी क्रियते इत्यतआह्। किंचेति। नन्वंत्य ग्रहण सामर्थ्या प्रत्ययत्वादिविशिष्टांत्य एव गृह्यत इतिचेत्तत्राहं। यदित्विति सिद्धइति। उपदेश करणस्योप देशत्वेऽर्थवत एवं संभवेन वार्तिकानुत्थानं। ममतु (नम्) यत्किंचित्समुदायस्याप्याद्योच्चारण-विषयत्वात्तदुत्थानमिति भावः। समुदाय द्वारेति। परंपरयाऽवयव त्वानामपि करणत्वं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सावर्ण्यानुपयुक्त्वाऽऽन्तरतम्यपरीक्षोपयोगित्वरूप सादृश्येनेति बोद्धव्यम्। ङादीनान्तु तद्गुणरहितस्वरूपानुपलम्भेन उभयावच्छेदेन वायुसंयोगोत्तरमेव स्वरूपोत्पत्त्या विनिगमनाविरहेणोभयोः स्थानत्वम्। 'अनुस्वारयमानाञ्च' (पा० शि० २२) इति शिक्षायां चेन ङादीनामपि सङ्ग्रह इति युक्तम्। 'अत एव कण्ठयोऽकारः' इत्याद्युक्त्वा 'नासिक्यान्नासिक्ययमा नुस्वारानिति स्थानानि' इत्युक्तं प्रातिशाख्ये। 'नासिक्याः ङञणनमाः' इति तद्व्याख्यातारः। कङ्योः सावर्ण्यन्तु भवत्येव। 'आस्ये तुल्यदेशप्रयत्नम्' (का० वा०) इति वार्त्तिके 'किमास्योपादाने प्रयोजनम्' इति प्रश्ने 'प्रयत्नविशेषणमास्योपादानम्' इत्युक्त्वा तद्व्यावर्त्यत्वेन बाह्यप्रयत्नान् प्रदर्श्य 'यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्यमेषामधिको गुणः' इति भाष्येण तस्य बाह्य प्रयत्नत्वोक्त्याऽत्र सूत्रे नासिकाया आस्यशब्देन, तत्रत्यप्रयत्नस्य च प्रयत्नशब्दे नाग्रहणबोधनात्, नासिका आस्यबाह्येति वदतां मते तद्ग्रहणाभावाच्च। अत एव बाह्यप्रयत्नानुपक्रम्य–

'अमोऽनुनासिको न ह्रौ, नादिनो हझषः स्मृताः

ईषन्नादा यणश्चैव, श्वासिनस्तु खफादयः।। (३९)

ईषच्छ्वासाँश्चरो विद्यात् (पा०शि० ४०) इत्युक्तं शिक्षायाम्।

नादेति संवारघोषयोरुपलक्षणं, श्वासेति विवाराघोषयोः, न ह्वावित्युपलक्षणम् ऐचः सर्वस्य, प्लुतलृकारस्य च, अनुनासिकस्यादर्शनादित्यलम्।

'एदैतोः' इत्यादौ लोकानुभवसिद्धानर्थानुवादके तपरशास्त्राप्रवृया प्लुतानामपि

वार्तिक कृताऽपाद्यवार्ति कंप्रणीतमिति। अतएवोपदेशनं इति वदतस्तस्य न पूर्वापरत्वोक्तया विरोध इति भावः। ननु निपाता नामनर्थ नामित्यनेनाधि परी अनर्थ का वितिज्ञापकेन च निपातानां प्रातिपदिकत्वात्तद् ग्रहणं व्यर्थमत आह्।

ब्राह्मण वशिष्ठ न्यायेन चेति। व्यवसिततत्वं चेति। परिगणितत्वं चेत्यर्थः। परिछिन्नत्वादिति। परिमाणादित्यर्थः। भाष्ये प्रातिपदिक प्रतिषेधोः (धः) कृत्तद्धित इति पठ्यते तस्यार्थः। अकृत्तद्धितेन श्रवणं यस्य तदश्र वणंतच्चतत कृत्तद्धि तमिति मध्यमपदलोपी समासः। एवं च कृत्तद्धितामां श्रवणाभावे सति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्स्थानत्वं बोध्यम्। तथा च पाणिनीयशिक्षा–

'कण्ठ्यावहाविचुयशास्तालव्या, ओष्ठजावुपू।

स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः।। (१७)

जिह्वामूले तु कुः प्रोक्तो, दन्त्योष्ठ्यो वः स्मृतो बुधैः।

एऐ तु कण्ठ्यतालव्या ओऔ कण्ठोष्ठजौ स्मृतौ।।' (१८)

अष्टो स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।

जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च।।' (१३)

'हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम्।

औरस्यं तं विजानीयात्कण्ठ्यामाहुरसंयुतम्।।' (१६) इति।

यत्तु– 'दन्तोष्ठादि समुदितं स्थानम्' इति, तन्न, शिक्षायां 'दन्त्योष्ठ्यः' कण्ठ्यतालव्यौ' इत्यादौ 'तत्र भवः' (४,३।५३) इत्यधिकारविहितयतः प्रत्येकमनुत्पत्त्यापत्तेः। दन्तोष्ठ्यमित्यादि त्वसङ्गतमेव। स्वाङ्गसमुदायस्य स्वाङ्गत्वाभाववच्छरीरावयवसमुदायस्य शरीरावयवत्वाभावात्। एतेन 'दन्तोष्ठरूपमतिरिक्तं स्थानम्' इत्यपास्तम्, अष्टौ स्थानानि' (पा० शि० १३) इति प्रतिज्ञाविरोधाच्चेति दिक्।

सूत्रे प्रशब्देन विलक्षणार्थबोधेऽपि लोके यत्नप्रयत्नयोः पर्यायतेति ध्वनयन्नाह-**प्रयत्नो द्विधेति**। क्वचिद् यत्न इत्येव पाठः। **चतुर्धेति**। यत्तु–

स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्।

प्रातिपदिकानांप्रतिषेधो वक्तव्य इति। तेन संसर्गवद्विप्रयोगस्यापीति न्यायेनाद्योच्चारण विषय समुदाय भिन्नप्रातिपदिका नामकृत्तद्धितानामित्यर्थः फलति। तत्फ (क्तम्) लितार्थ मेव वार्तिक कृतोक्तं। प्रातिपदिका नामित्यारभ्याकृ दित्यादीत्यंतेन। श्रूयमाण कृत्तद्धितांत भिन्नानां प्रातिपदिकानामोद्योच्चारण विषय समुदाय भिन्नानामित्यर्थः। तेनोदश्विदादीनां निषेधः। अइउण चोः कुश्चित्रङाङ माङित्यादीनां तदभावश्चसिद्धयति। नन्वग्रहणप्रातिपदिकानामिति पस्थशास्थभाष्येण तेषाम प्यपूर्वोच्चारणे नोपदेशत्वान्न वार्तिकानुत्थानमतआह्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तेभ्योऽपि विवृतावेङौ ताभ्यामैचो तथैव च।।' (२१)

इति शिक्षावाक्याद्विवृततरविवृततमयोः प्रतीत्या चतुर्धेत्यासङ्गतमिति, तन्न, 'नाज्झलौ' (१।१।१०) इति सूत्रभाष्यादूष्मणामीषद्विवृतत्वस्य च प्रतीत्या चतुर्धेत्यासङ्गतमिति, तन्न, 'नाज्झलौ' (१।१।१०) इति सूत्रेण विवृतत्वव्याप्यानामेषां सवर्णसञ्ज्ञानुपयुक्तत्वबोधनमित्याशयात्। भाष्यमते तु सन्तु सप्त प्रयत्नाः। एवञ्चैदैतोरोदौतोश्च न सावर्ण्यप्रसक्तिः प्रयत्नभेदादिति बोद्ध्यम्। 'नाज्झलौ' (१।१।१०) इति सूत्रमपि प्रयत्नभेदप्राप्तसावर्ण्याभावानुवादकं सत् एतस्यैव बोधकम्। अतएव भाष्ये 'तन्न वक्तव्यम्' इति नोक्तम्। स्पृष्टादीनामाभ्यन्तरत्वं त्वोष्ठप्रभृतिकाकलकपर्यन्तरूपास्यान्तर्गततत्तत्स्थानेषु जिह्वाग्रादीनां स्पर्शेषत्स्पर्शदूरावस्थान समीपावस्थानरूपाभ्यन्तरकार्यकारित्वाद्वर्णोत्पत्त्यव्यवहितप्राग्भावित्वाच्च बोध्यम्। तत्र बहूनामेकस्थानत्वेऽपि कस्यचिदुच्चारणे सम्यक्स्पर्शः कस्यचिदीषदिति शिक्षाकारोक्तिमनुभवं चानुसृत्य विवेक्तव्यम्। प्रयतनमिति नपुंसके भावे ल्युट्। प्रयत्नमित्यपपाठो नङन्तस्य पुंस्त्वात्। तथा च शिक्षा–'स्वराणामूष्मणाञ्च' (पा० शि० २१) इत्याद्यनन्तरम्–

'अचोऽस्पृष्टाः यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः।
शेषाः स्पृष्टा हलः प्रोक्ता ....' (पा० शि० ३८) इति।

अचोऽस्पृष्टाः स्पर्शाभावरूपविवृतत्ववन्तः यणस्त्वीषदिति, अनेन तेषामीषत्स्पृष्टत्वमीषद्विवृतत्वञ्च बोधितम्। नेम इत्यर्धे। तेन शलामीषद्विवृताचत्वं यणपेक्षयाऽधिकविवृतत्वं चेति बोद्ध्यम्। अत्र शिक्षोक्तव्याप्यधर्मवतां व्यापकधर्ममादाय न सावर्ण्यमिति यणां चवर्गादिभिर्न सावर्ण्यम्। तेन 'अञ्चितः' इत्यादौ न यादिः परसवर्णः।

उद्देशश्चेति। ननु पस्पशास्थ भाष्यस्य का गतिरत आह्। एतद्भाष्यैक वाक्यतयेति। करणसाधनोपदेश पदानुवृत्तौ सर्वथाननु वृत्तौ च भाष्यां तरविरोधमाह्। नन्वेवमिति। अननुवृत्ताविति। भावघजन्तोपदेशपदान नुवृत्तावित्यर्थः। क्वचित्पूर्वत्रेति। आनेमुग्घेर्ङितीत्यादावित्यर्थः। क्वचिदुत्तरत्रेति। मय उञो वोवा त्रेस्त्रय इत्यादवित्यर्थः। षष्ठी पदानुवृत्ताविति। इदमुपलक्षणं सूक्ष द्वयावृत्तेरपि। उभयोरपि पर्यायेणोभयोः प्रकल्पकत्ववारणायेत्यर्थः। ननुपरत्वानव काशत्वाभ्यामिति वदतो युग पद्बलवत्त्वाभावे एकः पूर्वपरयोरिति ज्ञाप

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विवृतमेवेति। प्रक्रियादशायां विवृतत्वं प्रतिज्ञेयमित्यर्थः। तेन दण्डाढकादौ दीर्घसिद्धिः। अन्यथा संवृतस्य ह्रस्वाकारस्य विवृतेन दीर्घेण सावर्ण्याभावात् स न स्यादिति भावः। दीर्घाकारस्य (१) विवृततरत्वन्तु पाणिनिशिक्षानुक्तत्वान्नैत-च्छास्त्रप्रक्रियोपयोगीति दिक्।

तस्य प्रयोगे संवृतत्वे मानमाह - **अ अ** (८।४।६८)। (२) प्रयत्नभेदाद्दीर्घाभावः (१)। अत्रोद्देश्ये सवर्णग्रहणं जातिनिर्देशो वा न, व्याख्यानात्।

अधिकारत्वे फलमाह–**त्रिपाद्यामपीति।** अन्यथा 'गोधुङ्मान्' इत्यत्र (२) घत्वजश्त्वानुनासिकेषु भष्भावानापत्तिरिति भावः। वस्तुतो घत्वे कृते 'झयः' (८।२।१०) इति (३) वत्वापत्तिर्दोषः। न च ततः परत्वाज्जश्त्वानुनासिकत्वयोस्तदप्राप्तिरिति वाच्यम्। 'विप्रतिषेधे परम्' (१।४।२) इत्यस्य यथोद्देशत्वेन त्रिपाद्यामप्रवृत्तेः। 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य' इत्यनेन तस्या यथोद्देशत्वस्यैव बोधनात्। अन्यथा परस्यासिद्धत्वे 'विप्रतिषेध' (१।४।२) सूत्रस्य सिद्धत्वात्परिभाषान्तराणामिवास्यापि कार्यकालपक्षे तेनाकर्षणापत्तेः। अतएव भाष्ये वत्वमेवापादितम्। अधिकारत्वादेव 'श्चुत्वं धुटि सिद्धं वाच्यम्' (का० वा०) इत्यादि चरितार्थम्। एवं च यत्रानुवृत्तिस्तस्यासिद्धत्वम्। पूर्वत्वञ्च क्वचित्सपादसप्ताध्याय्याः क्वचित्सूत्रान्तरसहितायाः। तत्रायमर्थः– 'होढः' (८।२।३१) इत्यादावस्योपस्थितौ वाक्यभेदेनान्वयः-हस्य ढो भवति, इदञ्च शास्त्रं पूर्वत्रासिद्धमिति। अतएव 'नमुने' (८।२।३) इत्यादिभिस्तन्निषेध उपपद्यते। पूर्वत्रेति सङ्ग्राहकमेव। (४) श्रृङ्ग्राहिकयैव तु तत्तच्छास्त्रं प्रति तस्यासिद्धत्वं प्रतिपाद्यते। तेनापवादस्य यं प्रत्यपवादत्वं तत्रासिद्धत्वाभावेऽप्यन्यत्रासिद्धत्वं भवत्येव। **असिद्धमिति।** सिद्धं निष्पन्नं, प्रवृत्तम्। 'सिद्धश्च' प्रत्ययविधौ' इत्यादौ तथा दर्शनात्। तद्भिन्नमसिद्धम्-अनिष्पन्नम-प्रवृत्तम्। यद्यपि लोके (१)

कस्यावश्यकत्वं। अन्य त्वम थाविरोधाभावात्परत्व मनवकाशत्वं चात्र योजकमे वस्यादत आह्। एक इति। एवं चेदंत वाव्यावश्यक मितिभावः। ननुप्रकृति पक्षे कल्पित स्यादेश्योच्चार णाभावा दुच्चारितस्य त्वपूर्वोच्चारण भावाच्चेत्संज्ञा न स्यादत आह्। तदग्रे उपदेश पदाननुवृत्ति ममिप्रेत्याथवेति। नानुत्पन्न इति। गुप्तिज् कि दित्येतद्तिरिके नानुत्पन्ने सन्निप्रक्लृप्तयान भवित त्यभित्यर्थः। नन्वे तद्बलाद्गुपादिभ्यः परः सन्ननुमीयतेऽत आह्। यदा– चोत्पन्नःसनिति। कृतसामर्थ्येति। एवं च पंचम्यंतरा भावान्नप्रकल्पनमितिभावः। तदाह। तत्र परत्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऽनाहार्यज्ञानस्यैव प्रवर्त्तकत्वं निवर्त्तकत्वञ्च दृष्टं तथाऽपीह शास्त्रप्रामाण्यादाहार्यारोपोऽपि शास्त्रप्रवृत्तावप्रवृत्तौ च नियामक इति बोध्यम्। अत्र कार्यासिद्धत्वे 'अमू' इत्याद्यसिद्धिः। 'अद् अ औ' इति स्थिते परत्वान्मुत्वे तस्य सपादसप्ताध्यायीस्थकार्यदृष्ट्यासिद्धत्वेऽपि देवदत्तहन्तृहतन्यायेनाकाराभावेन (२) पररूपाद्यनापत्तिः। अतिदेशस्याऽऽरोपरूपत्वान्निरधिष्ठानारोपासम्भवेन कार्यप्रवृत्तेरत्र पक्षे आवश्यकत्वात्। शास्त्रासिद्धत्वे तु यत्राप्यन्तरङ्गत्वात्(१) त्रैपादिकं प्रवृत्तं तत्रापि तत्तच्छास्त्रे एवाभावारोपेण तन्निवृत्तिबुद्धेरभाव आदेशबुद्ध्यभावो लक्ष्ये जातत्वबुद्ध्यभावश्च। जायमानं कार्यं त्वादेशे एव स्थानिबुद्ध्या प्रवर्त्तते। 'न हि रजतभ्रमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयति' इति न दोषः। यत्र तु सहप्रसङ्गस्तत्राप्रवृत्तिरेवाभावारोपात्। न च 'पूर्वत्र न' इत्येव सूत्रमस्त्विति वाच्यम्। पूर्वशास्त्रप्राप्तौ निषेध इत्यर्थे 'नलोपः सुप्' (८।८।२) इति सूत्रासङ्गतेः। तद्धि नियमार्थम्। त्वद्रीत्या 'राजन् अश्व' इत्यस्यां दशायां कस्यापि पूर्वशास्त्रस्याप्राप्त्यैतन्निषेधाप्रवृत्तौ नलोपे जाते 'भुक्तवन्तम्' इति न्यायेनैतदप्रवृत्तौ राजाश्वे दीर्घसिद्ध्या नियमानुपयोगात्, 'राजभ्याम्' इत्यादावपि दीर्घापत्तेश्च। 'पूर्वशास्त्रविषयसम्भावनायामित्यर्थे' 'राजभ्याम्' इत्यादौ नलोपे सुब्विधिदीर्घविषयसम्भावनया सर्वथा नलोपानापत्तेरिति (२) दिक्।

बाह्यप्रयत्न इति। कालकाधस्ताद्गलविवरसङ्कोचविकासश्वासोत्पत्तिध्वनिविशेषरूपनादतद्विशेषरूपघोषाल्पघोषप्राणाल्पत्वमहत्त्वरूपकार्यकरत्वमेषाम्। तथाहि–

'आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।। (पा० शि० ६)
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः।

विशिष्टस्येत्यारभ्य कैयट आहेत्यंतेन। (एतेनमापि पक्षेऽनुमितस्योच्चारण भावादित्संज्ञा न स्यात्। न च सन्नु च्चारित एवेति वाच्यं। तस्यानुमिताऽनुवादरूपत्वात्। अत एव कृतसामर्थ्या पंचमीत्येव भाष्ये उक्ता नतु (क्तम्) कृत्सामर्थ्यं सूत्रमित्युक्तां कैयटेपि पंचम्या उपक्षया दित्येवोक्तमि त्यपास्तम्। उपदेश पदानुवृत्तेरेवाभा वादितिदिक्। एवं चेति। उपदेशपदस्य भावघञन्त स्यानुवृत्यभावे चेत्यर्थः। ननु भवतां भाष्यैकदेश्युक्तित्व कल्पनं मम प्रौढ़ि वादित्वकल्प नमिति समानमत आह्। प्रकृतेति तद्भाष्येति। पूर्व पक्ष्युक्त

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्णान् जनयते ....' इति शिक्षायामुक्तम्। (पा० शि० ६)

आत्मा अन्तःकरणं संस्काररूपेण स्वगतानर्थान् बुद्ध्या स्ववृत्त्या समेत्य एकबुद्धिविषयान् कृत्वा तद्बोधनेच्छया मनो युक्तं करोति, तदिच्छावन्मनः कायाग्निं जाठरमग्निमभिहन्ति, स कायाग्निः, सोदीर्णः स मारुतः उदीर्णः उर्ध्वंप्रेरित इत्यादिस्तदर्थः। एवञ्च शब्दप्रयोगेच्छयोत्पन्नयत्नाभिहताग्निना नाभिप्रदेशात्प्रेरितो वायुर्वेगान्मूर्धपर्यन्तङ्गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य उक्तयत्नसहायेन तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तस्थानान्याहत्य वर्णानभिव्यनक्ति। ततो यत्नविशेषेण गलविवरविकासादीन् करोति, तत्र ये तत्तत्स्थानाभिघातका यत्नास्ते आस्यान्तर्गततत्तत्कार्यकारित्वादाभ्यन्तरा इत्युच्यन्ते। गलविवरविकासादिकाराश्चास्यबहिर्भूतदेशे कार्यकरत्वाद् बाह्या इति। मात्राकालिकत्वादिरूपह्रस्वत्वादिकन्तु वाय्वल्पत्वमहत्त्वकृतमिति नाभिप्रदेशात्प्रेरकयत्न एव कश्चिविलक्षणोऽल्पं वायुं प्रेरयति कश्चदधिकमिति तस्य वायुप्रेरणारूपङ्कार्यमास्यबाह्यदेशमिति तदपि बाह्यमेव। अतएव 'अइउण्' (मा. सू. १) सूत्रे भाष्ये ह्रस्वत्वादिजनकयत्नस्यास्यविशेषणेन सवर्णसूत्रेऽग्रहणमित्युक्तम्। यद्यप्येक एव यत्नः सर्वकार्यजनको वर्णनाशकश्चेति 'परः सन्निकर्षः' (१।४।१०६) इति सूत्रे भाष्ये उक्तं तथापि तत्तत्कार्येणोपाधिना एकस्मिन्नपि भेदमारोप्य तथा व्यवहार इति बोद्ध्यम्। उदात्तादिजनकयत्नस्याभ्यन्तरकार्यकत्वेऽपि उदात्तादिशब्दैर्विना बोधितानां तेषां 'अनङ्ङदात्त' इत्यनेनाविवक्षाबोधनात्। सवर्णसंज्ञानुपयुक्तत्वान्तरतम्यपरीक्षोपयुक्तत्वरूपसादृश्येन बाह्येषु गणनम्। इदं ह्रस्वत्वादेरानुनासिक्यस्य चोपलक्षणम्।

शर इति। शषसाः। अनुप्रदानं बाह्यप्रयत्नः। विवृण्वते इति। तदभिव्यक्त्युत्तरज्जायमाने

भाष्येत्यर्थः। नोचितमिति। सूत्रार्थ प्रतिपादथिषयाप्रवृत्तस्यैव प्राबल्या दितिभावः।

लक्ष्येति लृटःसद्वेत्यादिलक्ष्येत्यर्थः। नन्वनुबन्धानामे कांतत्वेत्विति। एवं च तत्र पक्षेशकारएव नास्तीति भावः। अयमेवभिति। अदडादेशेऽनुनासि कोपधत्वं क्रियत इत्यादीत्यर्थः। व्यवहार इति। स्वतन्त्रः कर्त्रेत्यादिनिर्देशोऽनङोन काराकारस्या नुनासिक त्वे प्रमाणभिति भावः। यणापत्तिरिति। यस्येविचेति लोपस्तु न शंक्यः यचिभमित्यत्र य साहच यदिजपि हल्त्वाच्चोभय धर्मानाक्रान्त एव गृह्यते इति ककारे भत्वाभावात्। नन्वेवमपीकः सवर्णे इति शाकल्येन प्रकृति भावापत्तिरिति चेन्न न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कण्ठविवरविकासे तेषां कर्तृत्वविवक्षा बोध्या। विवार एषां प्रयत्न इति भावः।

अन्येत्विति। वर्गतृतीयचतुर्थपञ्चमास्तद्यमा हकारानुस्वारौ यरलवा इत्यर्थः। नादभागिनः तत्प्रयत्नकाः। यद्यपि खयादिषु घोषाघोषान्यतरप्रयत्नमात्रेणापि प्रक्रियांशनिर्वाहस्तथापि शिक्षानुरोधेनान्येषामुक्तिः। अल्पासवः-अल्पप्राणाः। यत एतदुच्चारणोत्तरं प्राणानामल्पत्वमिव भवति।

वर्गेष्विति। विद्यमानानामिति शेषः। **चतुर्णामिति।** निर्धारणे षष्ठी। अन्यतमादिति शेषः। **पूर्वसदृश इति।** सादृश्यं यत्नकृतम्। अत एवायोगवाहेषु यमानां गणनं भाष्ये 'चत्वारश्च यमाः स्मृताः' (पा० शि० ४) इति पाणिनिशिक्षा च सङ्गच्छते। अयञ्च वेदे एव; तदाह– **प्रातिशाख्ये इति। अन्येषामिति।** अचाम्, उक्तान्यहलाञ्चेत्यर्थः। **यरलवाश्चेति।** चेनाचामपि ग्रहणम्। 'सुपां सुलुक्' (७।१।३९) इति सूत्रे 'इकारस्यांतर्यतो दकारः' इति भाष्यात् घोषसंवारनादाल्पप्राणत्वमचाम्। अन्यथा तदौ पर्ययेण स्याताम्। अल्पप्राणत्वानङ्गीकारे दधौ पर्यायेण स्याताम्। अचां घोषत्वं 'परः सन्निकर्षः' (१।४।१०९) इति सूत्रे भाष्येऽपि स्पष्टम्। अन्ये इति। द्वितीयचतुर्थौ तद्यमौ, सषसहा अयोगवाहाश्चेत्यर्थः। जिह्वामूलीययमादीनां स्थानबाह्यप्रयत्नकथनं तु स्वरूपनिर्णयाय न तु सावर्ण्यान्तरतम्यपरीक्षादावुपयोगीति बोध्यम्।

अनुपयुक्ता इति। 'तुल्यास्य' (१।१।९) सूत्रे प्रशब्दग्रहणात्। उपयुक्तत्वे हि शछयोरपि सावर्ण्यं स्यादिति भावः। आन्तरतयपरीक्षा च घोषवत इत्यादिना तत्र तत्र स्फुटीभविष्यति। स्पर्शाः तत्पदव्यवहार्याः। अन्तस्थशब्द आदन्तः स्पर्शोष्मणोरन्तर्मध्ये तिष्ठन्तीति तदर्थः। ऊष्माण इति। ऊष्मा वायुस्तत्प्रधाना इत्यर्थः। एवं सोष्माण इत्यस्य वायुना सह वर्त्तन्त इत्यर्थ

समा से इति निषेधादिति भावः। व्याख्यानादिति। संज्ञात्रय करण रूपादतोदीर्घ इति विभाषापृष्टेति है हे प्रयोग इति च ज्ञापक रूपाच्चेत्यर्थः। सादृश्यस्य व्याख्यानादिति। अन्यासंभवरूपाद्व्याख्यानात्सादृश्यस्य कालकृत स्थैवग्रहणमिति भावः। नन्वेकद्वित्रि मात्रा वैशिष्ट्येनापि सादृश्य ग्रहण संभवः। एवं चत्लृकारस्यैचश्च ग्रहणं न स्यादिति चेन्न-प्रणवष्टेरिति ज्ञापकादेतादृश सादृश्यस्याग्रहणात् ननु भाष्याविचारित प्रयोजनानां सूत्राक्षराणां पारायणा दावदृष्टार्थत्वमेव नतु तत्र फल कल्पनं युक्तं (क्तम्) अतएव तदधीतेति सूत्रेद्वि स्तद्ग्रहणं प्रमादकृत आचार्यस्येति भाष्ये उक्तमत

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति प्रातिशाख्यभाष्ये स्पष्टम्। यद्यपि वर्गद्वितीयचतुर्थयोरपि 'स्थानेऽन्तरतम' (१।१।५०) सूत्रभाष्यादूष्मत्वं तथापि विवृतमूष्मणामित्यत्रैत एव गृह्यन्ते। अन्यथा स्वादीनां सावर्ण्यानापत्तौ 'नाऽऽज्झलौ' (१।१।१०) इत्यादिनिर्देशासङ्गतिरिति भावः। अचः स्वरा इति। उदात्तादिभिः स्वयमेव राजन्त इति व्युत्पत्तेः, तद्धर्मत्वादुदात्तादयोऽपि स्वरा इत्युच्यन्ते। कपाभ्यामिति। खफयोरप्युपलक्षणम्। 'अं अः' इत्युपलक्षणमिकारादेरपि। तदाह– अचः पराविति।

ऋलृवर्णयोरिति। (१) आच लृवर्णश्चेति विग्रहः। 'ऋत्यकः' (६।१।१२८) इति प्रकृतिभावः। एतदर्थमेव वर्णोपदेशे लृकारपाठः। अन्यथा तस्यासत्त्वशङ्कयाऽस्य वचनस्यैवाशक्यत्वं स्यात् ध्वनितञ्चेदम् 'एओङ्' (मा० सू० ३) इति सूत्रशेषे भाष्ये। तत्र हि-सँय्यन्तेत्यादौ 'हलोऽनन्तराः (१।१।७) इति सूत्रे प्रत्याहारघटकेष्वपि ग्रहणकशास्त्रप्रवृत्त्या मात्राकालिकस्य यद्वयादेः 'अणुदित्' (१।१।६९) सूत्रेण तद्ग्रहणमित्युक्तम् असत्प्रतिपत्तेरशक्यत्वान्न 'अणुदित्' (१।१।६९) सूत्रेण तद्ग्रहणमित्युक्तम्। न च 'क्लृ३प्तशिखः' इत्यादौ 'अनृत' इति निषेधात् प्लुतानापत्तिः। ऋलृवर्णयोः पृथगनुबन्धत्वकरणेन क्वचित्परस्पराग्राहकत्वकल्पनेनादोषात्।

अकारहकारयोरिति। एकारस्य तालव्यत्वमोकारस्यौष्ठ्यत्वमिति मते एकारशकारादीनामप्युलक्षणमिदम्। एतेन 'नाक्शलौ' इत्येव सूत्रयितुमुचितमित्यपास्तम्(१)। 'हशि च' (६।१।११४) इत्येव सिद्धे 'अतो रोः' (६।१।११३) इत्याकारे व्यावृत्यर्थम्।

सूत्रे द्विवचनोपपत्तये मध्यमपदलोपिसमासं दर्शयति– अकारसहित इति। अत एव

आह्। तदुक्तं भाष्य इति। पदान्ताद्वेतितुगापत्तिरिति। अंत रंगपरिभाषायास्तु ज्ञापकसिद्धत्वेन छत्रादिभ्योणिति सिद्धे छत्रादिभ्योण इति गुरुनिर्देशाज्ज्ञापक सिद्धस्याऽसार्वत्रिकत्वादिवि भावः। ज्ञापक सिद्ध त्वेनेति।

एवं च वर्ण ग्रहणे जाति ग्रहण मित्यस्यापि ज्ञापकसिद्धत्वेनासार्वत्रिकत्वाच्छंका न युक्तेवि भावः। ननु ज्ञापक सिद्धस्यापि प्रवृत्ति रौत्सर्गिकी। अप्रवृत्तिस्तुगमक साध्येति दोषः प्रकृते तदवस्थ एवेति चेदंतरंग पीरभाषा विषयेपि तुल्यत्वात्तदाह। अंतरंगत्वेनेति। अर्वन् छब्दस्य छाँदसत्वादाह निकृष्टमित्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'वेलासु' इति निर्देश उपपद्यते समाहारद्वन्द्वे तु टच्प्रसङ्गोऽच्झलिति समाहारद्वन्द्वं कृत्वा आपदेन द्वन्द्वे तु अज्भिरप्याकारस्य सावर्ण्यं न स्यादिति भावः। अतएव भाष्ये प्रयत्नभेदेनैषां(२) सावर्ण्याभावः साधितः। एतेषु परेष्विति। इदमुपलक्षणम्। एतेषु विद्यमानस्येत्यपि बोद्धयम्। तेन हकारादीनामकारादिषु परतो दीर्घादिसङ्ग्रहः। अच्त्वं स्यादिति। अच्पदबोद्ध्यत्वं स्यादित्यर्थः। इदं प्रत्याहारघटकेष्वपि ग्राहकशास्त्रप्रवृत्तिरिति मते व्यक्तिपक्षे च बोद्धयम्।

अणुदि (१।१।६९)। अणमुद्दिश्य सवर्णबोधकतात्र विधीयते। सवर्णस्येत्यस्य (१) बोधकमिति शेषः। आदेशादौ सवर्णग्रहणवारणायाह– प्रतीयते इति।

परे तु प्रत्ययग्रहणमेकदेशानुमत्या 'भाव्यमानेन सवर्णानां ग्रहणं न' इति परिभाषां (२) ज्ञापयतीति युक्तम्। प्रत्ययपदस्य तदर्थत्वन्तु न युक्तं वार्त्तिककृता टित्किन्मित्सूपसंख्यानोक्तेः। भाष्यकृता चाप्रत्ययग्रहणमेतत्परिभाषाज्ञापकमित्युक्तम्। 'ज्यादादीयसः (६।४।१६०) इति सूत्रे भाष्ये ध्वनितमिदम्। तत्र हि– 'किमर्थमादित्युच्यते ज्याद इत्येवोच्यताम्। का रूपसिद्धिः? आन्तर्यतो दीर्घो भविष्यति। एवन्तर्हीदमेव ज्ञापयति भवत्येषा परिभाषा भाव्यमानेन' इत्यादि। त्वदुक्तव्याख्याने हि पूर्वपक्षसिद्धान्तयोरुभयोरपि निर्द्दलत्वापत्तिः। जातिपक्षेऽप्यनयैव परिभाषया सवर्णग्रहणं वारणीयम्। व्यक्तिपक्षे गुणाभेदकत्वप्राप्तञ्च वारणीयम्। तेन घटवदित्यादौ नानुनासिको वकारः एतेनाजुदिदित्येव सिद्धेऽण्ग्रहणेन यण्सु गुणभेदकत्वं ज्ञाप्यते इति परास्तमित्याहुः।

ननु 'चोः' (८।२।३) इत्यादावनुवादे कथमुदित्त्वमिति चेत्? न, व्याकरणान्तरे एषामुदित्संज्ञकत्वेनादोषात्। उपदेशशब्दस्य करणसाधनत्वेन शास्त्रपरत्वेऽस्यापि शास्त्रत्वेनेत्त्वप्रवृत्तेः सुलभत्वाच्चो। भिन्नक्रम इत्याह– उदिच्चेति। यद्यपि

बाहुलकस्यागतिकगतत्वादाह। अर्श आद्यजिति निषेधस्त्विति गार्ग्य काश्यप गालव मत इत्यर्थः। इत्यर्थ इति। एतदभाष्ये तथैवव्याख्याततत्वादिति भावः। एतेनाह व्याप्ताविव्यस्माद्द हलोर्व्यति छांदसत्वादृष्टध्यभावे सुपां सुलुगिति षष्ठ्याः स्थाने सुरादेश इत्यपास्तं अर्थासंगतेः। व्याख्या (तम्) नादिति। आस्यग्रहण सामर्थ्यादित्यर्थः। तत्सामर्थ्यादिति। ननु प्रयत्न ग्रहणे सामर्थ्यादास्य शब्देन वायु संयोगस्यैव ग्रहणं न कण्ठादीनामिति विपरीतं कुतो न स्यादिति चेन्न तुल्यास्य ल्वादिम्य इत्यादि निर्देशात्। न चैवं प्रयत्न ग्रहणं व्यर्थमेव निर्देशेनैव वायु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समुदायसवर्णिनोऽप्रसिद्धातस्थापि तदवयवचादि सवर्णा एवाऽत्र तत्सवर्णा बोद्धयाः। ह्रस्वाकाराद्योरपि कालपुरुषाद्युपाधिभेदेन स्थानेषु भेदमारोप्य तुल्यस्थानत्वं सूपपादम्। अत्रेति। ग्राहकसूत्र एवेत्यर्थः। व्याख्यानादिति भावः। 'उपसर्गादृति' (६।१।९१) इत्यादितपर करणादिति तु न युक्तम्। लृकारग्रहणेन चारितार्थ्यात्। एवमिणपि परेणैव। 'अचि श्नु' (६।४।७७) इति सूत्रे इण इत्येव सिद्धे य्वोरिति गुरुनिर्देशाव्द्या ख्यानाच्चेति 'लण्' (मा० सू० ६) सूत्रे भाष्ये स्पष्टम्। नन्वेवं 'अस्य च्वौ' (७।४।२३) इत्यादौ सवर्णग्रहणं न प्राप्नोति। अण्ग्रहणेन वर्ण समाम्नायस्थानामेव ग्रहणेन णकारादिचिह्नेन प्रत्याहारे तत्प्रत्यभिज्ञानेन तत्रत्याद्यवर्णोपस्थितेषु उच्चारिताभेदेन गृहीतेषु सूत्रस्य (१) चारितार्थ्येन व्यक्तिपक्षे तत्रत्यात्रत्यव्यक्त्योर्भेदिन प्रकृते प्रत्याहार घटकद्वितीयवर्णादौ चोच्चारितस्यैव ग्राहकत्वादप्रवृत्तेरिति चेत्? न, (२) जातिपक्षाश्रयणोनादोषात्। अत एवानेकतकारादीनां झल्त्वादिसिद्धिः। सूत्रेऽण्ग्रहणं च न कार्यम्। 'ऋलृवर्णयोः सावर्ण्यम्' इत्यनेन समानजातित्वस्यैवातिदेशेन 'उपसर्गादृति' (६।१।९१) इत्यादौ न दोषः। एतव्द्यातिरिक्तसवर्णे समानजातित्वसत्त्वात्। पृथगनुबन्धकरणाच्च न ऋदिल्लृदित्प्रयुक्तकार्यसङ्करः। अत्र पक्षे 'अइउण्' (मा० सू० १) सूत्रशेषोक्तभाष्यरीत्या 'तपर' (१।१।७०) सूत्रस्य जातिग्रहणप्राप्तसवर्णग्रहणनियामकत्ववत् 'अप्रत्ययः' इत्यस्य योगविभागेन तत्प्राप्तसवर्णग्रहणनिषेधकत्वात् 'त्यदादीनामः' (१।१।७४) इत्यादौ विधेये न दोषः। एवं गुणाभेदकत्वप्राप्तसवर्णग्रहणानिषेध कत्वमप्यस्य बोद्ध्यम्। अत एव 'घटवत्' इत्यादौ मतोर्मस्य नानुनासिको वकारः। सामर्थ्यादिति। 'एचोऽयवायावः' (६।१।७८) इत्यादौ 'स्थानेऽन्तरतम' (१।१।५०) सूत्रेणैव निर्वाह इति वक्ष्यते। 'न य्वाभ्याम्' (७।३।३)

संयोगस्याग्रहणादिति वाच्यं। निर्देशस्य स्थान (च्यम्) मात्र ग्रहणमास्य शब्देनेत्यर्थेनाप्युपपत्तेः। तथासति प्रयत्न भिन्नयोश्चययोरपि सवर्ण संज्ञायामंचित इत्यादौ यकारोपि परसवर्णः स्यादिति भावः। वाक् श्च्योतीति न च झयोझयीति न्यासे न न दोषः। निस्वनिंस इत्यादौ लोपानापत्तेः। इति भाव इति। एवं चाकारादीनां स्थानांतराभावात्कंठ्यत्वेनैव व्यवहारः। इकारादीनांतु स्थानान्तरसत्त्वात्तालव्यत्वादिना व्यवहारइति भावः। यावत्स्थान साम्यादिति। जिह्वामू लतालुस्थानाभ्यां भेदादिति भावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यत्र ऐऔ स्वरूपेण पाठ्यौ, 'वृद्धिरादैच्' (१।१।१) इत्यत्राप्येङित्येव पाठ्यम्। तत्र गुणसूत्रे च परस्परसवर्णसञ्ज्ञावादिमते चतुर्णां ग्रहणसत्त्वात्। अत्रैतत्सूत्रवैयर्थ्योपन्यासेन तन्मूलकस्य गुणवृद्धिसञ्ज्ञाविधौ प्रत्याहारद्वयग्रहण वैयर्थ्यस्य 'प्लुतावैचः' (८।२।१०६) 'एचोऽप्रगृह्यस्य' (८।२।१०७) इत्यत्र तद्ग्रहणवैयर्थ्यस्य च सङ्ग्रहो बोध्यः। प्रयत्नभेदेनाप्यसावर्ण्यमेतयोः प्रागुक्तं न विस्मर्त्तव्यम्।

यद्यपीति। इदं व्यक्तिपक्षे। 'वर्णानामुपदेशस्तावदुपदेशोत्तरकालेत्सञ्ज्ञा तदुत्तरकालम् 'आदिरन्त्येन' (१।१।७१) इति प्रत्याहारस्तदुत्तरकाला सवर्णसञ्ज्ञा तदुत्तरकालम् 'अणुदित्' (१।१।६९) इति, एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानाङ्ग्रहणं भवति, न चात्रेकारः शकारं गृह्णाति' इति 'नाज्झलौ' (१।१।१०) इतिसूत्रभाष्योक्तवाक्यापरिसमाप्तिन्यायादित्यर्थः। अयं भावः–'आदिरन्त्येन' (१।१।७१) इति प्रत्याहारसिद्धौ 'नाज्झलौ' (१।१।१०) इत्येतद्वाक्यार्थबोधे सति निर्णीतितद्विषयपरिहारेण सवर्णसञ्ज्ञाबोध्यनिश्चये 'अणुदित्' (१।१।६९) सूत्रेण तावतां ग्रहणं बोधनीयम्। अन्यथा बाधकसम्भावनया 'तुल्यास्य' (१।१।९) सूत्रजशक्तिग्रहेऽप्रामाण्यसन्देहेन 'अणुदित्' (१।१।६९) शास्त्रजबोधानापत्तिः। न चैतद्वाक्यार्थबोधात्प्राक् तन्निश्चय इति।

हो ढ इति। हकारेणाऽऽकारग्रहणे सति यद्यत्प्राप्नोति तस्य सर्वस्याप्युपलक्षणमिदम्। ननु यण्सवर्णिनामप्रसिद्धेरज्ग्रहणेनैव सिद्धेऽण्ग्रहणं व्यर्थमत आह–यवला इति। 'अमोऽनुनासिका न ह्वौ' इति शिक्षोक्तेर्यण इति नोक्तम्। तेन 'सँयन्ता' इत्यादौ परसवर्णनिष्पन्नानुनासिक यवलानाम् 'अनचि च' (८।४।४७) इति द्वित्वं सिद्ध्यति। 'हलो

ननु सूत्रमते इकारस्यै कारैकाराभ्यामु कारस्यौका शैकाराभ्यां सावर्ण्यं स्यादत आह्। भिन्न स्थानेति। वैयर्थ्यापत्तेरिति। शिक्षार्था भिन्न स्थान कथनस्यैका रादीनां वैयर्थ्यापत्तेरिति भावः। ननुस्थानविधानानन्तरं सवर्ण संज्ञायामणुदित्सूत्रस्य व्यापारात्स्था न विधायकेऽकुहेत्यादि वाक्येऽकारादिभिर्दीर्घादीनां ग्रहणाभावात् तेषां स्थानविधानं नस्यादत आह्। तत्तद्वर्णोत्पत्तेरिति। दंत संयुक्तेति। अत एव दंतोष्ठ्यो व इत्यत्र शरीरावयवाच्चेति यत्। अन्यथा दन्तानां शरीरावयवत्वाभावान्नस्यात्। न चावयवत्वमेव दं तानामस्त्विति वाच्यं। यस्य छेदने शरीरस्य दुःखं (च्यम्) जायते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यमाम्' (८।४।६४) इति लोपस्तु वैकल्पिकः। अत्रेदं बोद्धयम्-व्यक्तिः पदार्थो गुणा भेदका इत्यभिमानेनात्र सूत्रेऽण्ग्रहणमिति।

'अतो भिसः' (७।१।६) इत्यादौ तपरकरणात् 'सहिवहोः' (६।३।११२) इति सूत्रस्थवर्णग्रहणाव्द्याख्यानाच्च तपरपदे बहुव्रीहिपञ्चमीतत्पुरुषावित्याह– तः पर इत्यादिना। वर्णग्रहणे तु तत्सामर्थ्यादत्वावच्छिन्न सर्ववर्णग्रहणबोधनेन तपरसूत्राप्रवृत्तिः। आद्योदाहरणम् 'अतो भिसः' (७।१।६) इति। अन्त्योदाहरणं 'वृद्धिरादैज्' (१।१।१) इति। यद्यप्यत्र सञ्ज्ञा तात्परा, न च तत्समकालस्तत्सवर्णो वा प्रसिद्धस्तथापि तपरकरणाद् भाष्य प्रामाण्याच्च तात्परशब्दबोद्धयो वर्णः स्वसमकालग्राहक इत्यर्थेनादोषः। इदं च विद्धयर्थमेवाण्ग्रहणाननुवृत्तेः। गुणानां भेदकतयाऽनणि विधित्वेऽपि 'वृद्धिरादैच्' (१।१।१) इत्यादावाकारांशे सावकाशेनानेन 'अतो भिस' (७।१।६) इत्यादौ परत्वेन 'अणुदित्' (१।१।६९) सूत्रबाधः। संख्याकृतव्यवहारस्य परस्परपरिहारेणैव दृष्टतयेह विरोधस्य सत्त्वात्। गुणानामभेदकत्वे त्वनवकाशत्वाद् बाध इति बोद्ध्यम्। अत्रावध्यवधिमतोः साजात्येन वर्णस्यैव सञ्ज्ञात्वेऽपि विशिष्टाद्विभक्त्युत्पत्तिः सौत्रत्वाद् बोध्या। तत्कालस्येत्यस्य तदुच्चारणकालसमकालस्येत्यर्थस्तदाह– समकालस्यैवेति। एवकारो न्यायसिद्धबाध्यबाधकभावस्यानुवादक इति भावः। जातिपक्षे तु नियमार्थमेव सवर्णग्रहणानुवृत्तेः। एवं गुणानामभेदकत्वमिति 'वृद्धिरादैच्' (१।१।१) इति सूत्रभाष्यसम्मतसिद्धान्तपक्षेऽपि नियमार्थमेव। इदम् 'आद् गुणः' (६।१।८७) इत्यादौ विभक्तितकारे न प्रवर्त्तते। 'उपसर्गादृति' (६।१।९१) इति तपरकरणात्। 'ऋदोरप्' (३।३।५७) इत्यादौ दकार एवेति न दोषः। स च पञ्चमीसमासाभावे तकार इवोच्चारणार्थो

तस्यैतदवयवत्व स्वीकारात्। स्पष्टं चेदं चर्मणि द्वीपिनं हन्तीति व्याख्यावसरे शब्देंदुशेखरे। फलांतरमप्याह्। अत इति। अतएव ञमङणनानां नासिकास्थानत्वादेव। एतेषां नासिकास्थानं किंतु करणं। (णम्) शिक्षायामेतेषां नासिकास्थानानुक्तेरिति केषाञ्चिन्मतं खंडयति। यत्त्विति। ञमामपि परस्परंसावर्ण्यापत्तिरिति तथा हरिन्नमतीत्यादौ आदिः परसवर्णः स्यादिति भावः। अनुवादकं सत्तस्यैव बोध कमिति। प्रयत्न भेदस्यैव बोध कमित्यर्थः। प्रयत्न भेदादिति। अइउणअ सूत्रस्थेनविवृत्तेन संवृत भेदादसावर्ण्यात्तस्याणुदित्सूत्रैनाण्ग्रहणा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुखसुखार्थो वा। 'तपर' (१।१।७०) सूत्रे दकारप्रश्लेषपक्षे तु धकारादिस्थानिको दकारो बोध्यः।

वृद्धिरा दैच् (१।१।१)। वृद्धि, आत्, ऐच इति पदत्रयमिति न समासान्तादिप्रवृत्तिशङ्का। तपरकरणमसन्देहार्थतया पूर्वार्थं प्रकृतसूत्रे भाष्येऽत्र शास्त्रे गुणानामभेदकत्वं ज्ञापकादाश्रित्य सवर्णग्रहणार्थत्वाभावस्योक्त्वात्। 'कृष्णौत्कठ्यं' 'गङ्गौघः' इत्यादौ त्रिमात्रव्यावृत्तये परार्थमपि। वृद्धिशब्दोऽत्र पदपरोऽर्थपरत्वासम्भवात्। आदैचो वृद्धिपदाभिन्ना इति वाक्यार्थः। पदपदार्थयोः (१) तादात्म्यस्याङ्गीकारात्।

'रामेति व्यक्षरं नाम मानभङ्गः पिनाकिनः'

इत्यादौ तयोरभेदप्रतीतेरनुभवसिद्धत्वादित्यन्यत्र विस्तरः। वृद्धिशब्दस्थ सञ्ज्ञात्वं तु व्याख्यानात्। विधेयत्वेऽपि तस्य पूर्वपाठो मङ्गलार्थः। 'अपृक्त एकाल्' (१।२।४२) इत्यादौ तथा करणं विधेयस्य प्रथमं प्रयोगेऽसाधुत्वभ्रमनिवारणायेति भाष्ये स्पष्टम्। सर्वशब्दानां सर्वार्थवाचकत्वेऽपि वाचकत्वस्य गृहीतस्यैव बोधजनकतया सञ्ज्ञासूत्राणामज्ञातशक्तिज्ञापकतया विधित्वम्। (२) किञ्च 'सर्वे सर्वार्थाः' इत्यभ्युपगमो योगिदृष्ट्या नास्मदृदृष्ट्या, सर्वशब्दानामर्थानाञ्च विशिष्यज्ञानाभावात्। सामान्यतस्तथा ज्ञानञ्च न बोधोपयोगि। शास्त्रं त्वस्मदाद्युद्देशेनैव प्रवृत्तमिति बोद्धयम्। तत्रैव सङ्केतग्राहकशास्त्रकरणं स्वेच्छयैवेत्येषां यदृच्छाशब्दत्वेन व्यवहारः, स्वेच्छया सञ्ज्ञाः क्रियन्त इति च। एतदुपदेशरूपसङ्केतात्प्राक् तत्र सञ्ज्ञात्वाग्रहेण तासामनित्यत्वव्यवहारः। अत एव तत्तत्सञ्ज्ञाकरणज्ञानरूपप्रकरणादन्यार्थाग्रहणरूपनियमः कृत्रिमाकृत्रिमन्यायमूलतयोक्तः संख्यासञ्ज्ञासूत्रे भाष्ये। आर्थिकमेवामुं नियममादाय सञ्ज्ञासूत्रेषु नियमत्वव्यवहारो

दत्व्त्वा भावाद्दी घर्भाव इत्यर्थः एतेन प्रयत्न भेदेन दीर्घाभावेप्याद् गुणस्य दुर्वारत्वेन सर्वेविधयश्छंद सिविकल्प्यंत इत्यस्यावश्यक त्वात्तेनैव दीर्घस्य वारणसंभवे प्रयत्न भेद कथनस्य वैयर्थ्यान्न्यूनतापत्तेरि त्यपास्तं (तम्) व्याख्याना दिति। तपरकरणरूपादेक शेष निर्देशरूपाद्वा भाष्योक्तादित्यर्थः।

अनुनासिकेष्विति। प्राप्तेष्वित्यर्थः भष्भावानापत्तिरिति। तत्र घत्वे भष् भावेनाप दत्वाद्बाधितेपि जश्त्वेनुनासिक भष्भावयोर्विनिगमनाविरहेण पर्यायेण प्रवृत्तौ कृताकृत प्रसंगित्वेनानुनासिक पक्षे भष्भावानापत्तिरिति भावः। ननु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यवहाराय नियमः सञ्ज्ञायाः सञ्ज्ञिनि क्वचिदित्यादिना कृतः। वाचकताबोधकत्वेऽपि तदनुत्पादकत्वान्न शब्दार्थसम्बन्धनित्यताहानिः। आसाञ्च शिष्टप्रयुक्तत्वात्साधुत्वमित्यन्यत्र विस्तरः। कार्यकालपक्षे 'मृजेर्वृद्धिः' (७।२।११४) इत्यादौ वृद्धिपदार्थजिज्ञासायां 'वृद्धिरादैच्' (१।१।१) इत्युपस्थित्या तदर्थबोधरूपे शक्तिग्रहे वृत्ते विधिवाक्यार्थबोधः। अत एव 'ष्यङः सम्प्रसारणम्' (६।१।१३) इति सूत्रे भाष्ये– 'कार्यकालं सञ्ज्ञापरिभाषं भस्येत्युपस्थितमिदं भवति' 'यचि भमिति' इत्युक्तम्। 'ईदूदेद्' (१।१।११) इति सूत्रे भाष्येऽपि 'कार्यकालं सञ्ज्ञापरिभाषं, प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति ईदूदेद् द्विवचनं प्रगृह्यमिति'। 'निष्ठा' (३।२।१०२) इति सूत्रे कैयटोऽपि 'निष्ठेत्युक्ते सञ्ज्ञावाक्यं क्तक्तवतू निष्ठेति स्मर्यते' इत्याह। अत्र पक्षे एकत्र शक्तिग्रहे वृत्तेऽपि तत्प्रदेशस्थस्यैव तत्रार्थे शक्तिरिति सम्भावनया प्रदेशान्तरस्थे बोधो न स्यादिति सर्वप्रदेशेषु तत्तत्पदशक्तिग्रहपूर्वकं विधिवाक्यार्थबोधः। एथोद्देशे तु एकदैव शक्तिग्रहात्सर्वत्र बोध इति विशेषः। एतेन 'कार्यकालपक्षेतपरत्वं स्पष्टार्थमेव। आदैच्पदार्थस्य वृद्धिविशेषणतया विधेयत्वेन सवर्णग्रहणाप्रसक्तेः। यत्र वृद्धिपदं तत्रादैजित्युपतिष्ठते इति क्रमेण सञ्ज्ञासूत्राणामर्थात्' इत्यपास्तमित्यन्यत्र विस्तरः। अत्रातद्भावितानामपि आदैचां ग्रहणं, तेन शालीयादिसिद्धिः।

भूवादयो (१) (१।३।१)। (२) क्रियावाचिनः किम्? विकल्पार्थक वाशब्दस्य निपातस्य धातुत्वेऽप्रातिपदिकत्वात्सुबभावे पदत्वानापत्तेः। तदुक्तौ तु न दोषः। वार्थस्य विकल्पस्य भूतभविष्यत्कालसम्बन्धाभावेन क्रियात्वाभावात्। अस्त्याद्यर्थस्यापि तत्त्वं भूतभविष्यत्कालसम्बन्धात्। भ्वादयः किम्? 'आणवयति' 'वट्टयति' इत्यादीनां धातुत्वे शास्त्रविषयतया (१) साधुत्वापत्तेः। (२) सूत्रशेषे भाष्ये स्फुटमेतत्। स्तम्भ्वादीनामुदित्त्वेन

पर्यायस्वीकारेण शास्त्रद्वय बाधापेक्षया शब्दंतरात्प्राप्नुवतोविधरेनित्यत्वेऽनित्ये नानुनासिक शास्त्रेण भष्भाव शास्त्र वाधापे क्षया च शास्त्रद्वय समावेशस्य न्याय्यत्वेन पूर्वं भष् भावेततोऽनुनासिके नोक्त दोषोऽत आह्। वस्तुतः इति। वत्वापत्तिर्दोष इति। वत्वाऽनु नासिकयोरे कत्र समावेशासंभवेन पर्यायेण प्रवृत्तौ पक्षे वत्वापत्तिर्दोष इति भावः। अतएवेति। भष् भावानुनासिकयोः समावेशस्य न्याय्यत्वादेवेत्पर्थः। अधिकारत्वे प्रमाणमाह। श्चुत्वंधुटिति। अतएवेति। वाक्यभेदादेवेत्यर्थः। तेनेति। श्रृंगग्राहि कतयैव तत्तच्छास्त्रं प्रत्यसिद्धत्वस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धात्वधिकारविहितकार्योद्देश्यत्वादिना स्थितपाठभ्रंशानुमानान्न तेषु दोषः।

प्राग्रीश्व (१।४।४५)। 'अधिरीश्वरे' (१।४।९७) इत्यभिव्याप्य प्राङ्निपाता इत्यधिकारः। प्राक् निपाताः सन्तो गत्यादिसञ्ज्ञका इत्यर्थः। तेन ताभिः समावेशः 'अधिरीश्वरे' (१।४।९७) 'विभाषा कृञि' (१।४।९८) इत्यत्र निपातपदसम्बन्धश्च सिद्धः। एषां द्योतकत्वं वाचकत्वञ्च यथाकार्यं यथाप्रयोगं बोद्ध्यमित्यन्यत्र विस्तरः।

असत्त्वे इति पर्युदासो लाघवादित्याह– अद्रव्येति। (३) विशेष्यतया द्रव्यभिन्नार्था इत्यर्थः। तेन क्रियाविशिष्टद्रव्यवाचिनां विप्रादिघटकप्रादीनां न। चादयः किम्? स्वरादिपठितानामसत्त्ववृत्तित्वे आद्युदात्तत्वं मा भूदिति।

उपसर्गाः (१।४।५६)। योगग्रहणं यदर्थे प्रादीनामन्वयः (४) तं प्रत्येवोपसर्गत्वादीत्यर्थबोधनाय। तेन विगताः सेचका अस्माद्विसेचको ग्राम इत्यादौ षत्वं न।

गतिश्चेति। 'च' उपसर्गसञ्ज्ञासमावेशार्थः। तेन 'प्रतिप्रणीतम्' इत्यादौ गतित्वात् 'गतिरनन्तरः' (६।२।४९) इति स्वर उपसर्गत्वात् णत्वञ्च सिद्ध्यति। प्रादय इति योगविभागस्तु क्रियायोगाभावेऽपि निपातत्वाय। एतत्सिद्धमेवोपसर्गप्रतिरूपकस्य निपातत्वमुक्तं चाद्यन्तर्गणसूत्रेणेति दिक्। प्रपरेत्यादावनुकार्यानुकरणयोरभेदविवक्षया सुबनुत्पत्तिः। निस्दुसिति। अत्रेदं बोध्यम्–सान्तग्रहणे रान्तस्याग्रहणमेव। यत्र तु रुत्वमसिद्धं तत्र रान्तग्रहणेऽपि न सान्तग्रहणं तद्दृष्ट्या रुत्वस्यासिद्धत्वात्। यत्र तु रुत्वस्य सिद्धत्वं यथा षत्वणत्वयोस्तद्विषयोपसर्गत्वप्रतिषेधपरे 'दुरः षत्वणत्वयोः' (का० वा०) इति वार्त्तिके कृतरेफसान्तस्यापि ग्रहणम्। षत्वणत्वयोरित्यस्य तद्विधायकशास्त्रयोरित्यर्थात्। (१) अत एव

यत्रोपस्थितिस्तस्यप्रति पादने नेत्यर्थः। अपवादस्य घत्वस्य। यंप्रतिढविधिंप्रति अन्यत्रवत्वविधौ। नन्चपवादस्याऽसिद्धत्वाभावेद्वित्वे परसवर्णस्य सिद्धत्वं वक्तव्यमिति वचनस्याऽनुत्थानमेवस्यात। तथाहि तद्धि संयन्तेत्यादौत्रियकारादिसिद्धयर्थं। अन्यथाऽनुस्चारस्यद्वित्वे (र्थम्) परस्य वापदांतस्येति परसवर्णेपि पूर्वस्यापदांत्वाद्वापदांतस्याप्राप्तावपदांतस्ये त्यस्यासिद्धत्वादनुरवारस्य ययीत्यस्याप्यप्राप्याऽनुस्वार स्यश्रवण प्रसंगात्। अपवादस्य सिद्धत्वेतु वा पदांतस्येत्य स्यसिद्धत्वाद्वार्तिकानुत्थानमिति चेन्न। अपवाद

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुषामादिषु दुःष्ठशब्दपाठः सार्थकः। स हि 'अपदुःसुषु स्थः कुः' (उ० सू० २५) इति दुस्पूर्वकस्था धातोः कुप्रत्यये साधुः। अन्यथा दुस्पूर्वकात्कुप्रत्यये 'उपसर्गात्' (८।३।६५) इत्येव षत्वे सिद्धे (२) तद्वैयर्थ्यं स्पष्टमेव। न चास्य रूढत्वेनावयवार्थाभावादुपसर्गत्वाभावः। अत्यन्तरूढेषु प्रतिष्ठानिष्ठादिषु षत्वानापत्तेः। अर्थवत्त्वारोपेण चेत्प्रकृतेऽपि। दुसः पाठस्तु 'दुरयते' इत्यादौ रुत्वासिद्धया लत्वाभावार्थ इति दिक्।

न वेति (१।१।४४)। इतिर्लोकेऽर्थपदार्थकस्य शब्दपदार्थकत्वकृत्। यथा 'गवित्ययमाह' इत्यादावनुकरणे। इह तु 'स्वं रूपम्' (१।१।६८) इति परिभाषणाच्छब्दपदार्थकस्यार्थपदार्थकत्वकृत्। क्वचित् पदार्थविपर्यासकत्वं यथाऽनुवादवाक्ये। स च नवाशब्दाभ्यां प्रत्येकं सम्बध्यते व्याख्यानात्। तेन नवाशब्दयोरर्थौ संज्ञिनौ। स्वं रूपमित्यस्य प्रत्याख्याने तु (३) इतिशब्दो व्यर्थ एव; अर्थे कार्यस्याबाधात्। तयोरेव संज्ञित्वे तु 'विभाषा श्वेः' (६।१।३०) इत्यादौ नवाशब्दावादेशौ स्याताम्। प्राप्तविभाषासु नास्योपयोगः, तासां पक्षे निवृत्तिमात्रफलकत्वात्। अप्राप्तविभाषास्वपि न, तासां पक्षे विधिमात्रार्थत्वात्, अप्राप्तत्वेन निषेधासम्भवाच्च। तस्मादुभयत्र विभाषार्थमिदम्। 'विभाषा श्वेः' (६।१।३०) इत्यादौ एतद्भावे यदि विधिमुखेन प्रवृत्तिस्तर्हि पित्स्वेव विकल्पः स्यात्। कित्सु तु नित्यमेव सम्प्रसारणं स्यात्। निषेधमुखेन प्रवृत्तौ कित्स्वेव प्रवर्त्तेत न पित्सु। उभयथा प्रवृत्तिस्तु वैरूप्याद्वाक्यभेदापत्तेश्चाशक्या। सञ्ज्ञाकरणे तु श्रुतक्रमानुरोधात्पूर्वं कित्सु निषेधस्ततः किदकिद्रूपे सर्वस्मिन् लिटि ऐकरूप्यं प्रापिते सति पक्षे भवतीत्येकरूपेण विधिमुखेनैव विकल्पः। भाष्यकृतस्तु एवं हि 'हृक्रोरन्यतरस्याम् (१।४।५३) इत्यादावनुपपत्तिर्विभाषापदाभावात्। इतिशब्दस्य 'विभाषा' इत्यत्रापि

वचन सामर्थ्या दुत्सर्गशास्त्रेऽ पवादशास्त्रोद्देश्यतावच्छेदकानाक्रान्तस्योद्देश्य स्यग्रहणेनाप्युपपत्तौ श्रृंगग्राहिकयैव तत्त च्छास्त्रं प्रत्यसिद्धत्व कल्पने गौरवमिति तदाशयात्।

यदि तु साक्षाद्विधिभूतोत्सर्गशास्त्रे संकोच कल्पनापेक्षयाऽपवाद शास्त्रेऽनुवृत्ताति देशभूतपूर्वत्रासिद्धमिति शास्त्रीय पूर्व शब्दे एवोत्सर्गसूत्र भिन्नस्यग्रहणमिति संकोचः। एवं चैकदैव पूर्वत्रेत्यस्य वाक्यार्थो न तु श्रृंग ग्राहि कयैव तत्तच्छास्त्रं प्रत्यसिद्धत्वं स्वस्य पूर्वं प्रवृत्तिरित्येवाप वादेनोत्सर्गस्यवाध इति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्बन्धात् विभाषापदार्थः सञ्ज्ञेति तु न युक्तम्, अर्थे सञ्ज्ञात्वस्यादृष्टत्वात्। अर्थाक्षिप्तशब्दमात्रं सञ्ज्ञेत्यपि न युक्तम्। एकस्यार्थस्य समानफलकानेकसञ्ज्ञाकरणस्य 'अनाकृतिः सञ्ज्ञा' इति वृद्धिसञ्ज्ञासूत्रस्थभाष्येण तिरस्कारात्। तस्मात्तत्र लक्ष्यानुसारेणैवोभयमुखेन प्रवृत्तिर्वाच्येति विभाषापदघटितेऽपि तथैवास्तु किं सूत्रेणेति जातिव्यक्तिपक्षयोरुभयोरपि सूत्रं प्रत्याचख्युः।

स्वं रूपं श (१।१।२८) स्वं रूपमित्यस्य बोध्यमिति शेषो व्याख्यानात्; तदाह–संज्ञीति। 'राज्ञो यत्' इत्यादौ लौकिकव्युत्पत्त्योपस्थितार्थस्य प्रत्ययेन पौर्वापर्यासम्भवात्प्रातिपदिकादित्यनेनान्वयासम्भवाच्च तदर्थकशब्दमात्रग्रहणापत्तौ नियमार्थं सूत्रम्। तत्र स्वशब्द (१) आत्मीयत्वेनार्थमाह। रूपशब्देन शब्दस्वरूपम्। 'एतदुभयं सञ्ज्ञीत्यर्थः। तत्रार्थो न विशेष्यः, उक्तयुक्तेः। किन्तु शब्दविशेषणम्। एवञ्चार्थविशिष्टः शब्दः सञ्ज्ञीत्यर्थवद्ग्रहणपरिभाषा सिद्धा। अत्र चार्थः कल्पितान्वयव्यतिरेककल्पितः प्रकृतिप्रत्ययादिबोध्यः शास्त्रीयोऽपि। स च मुख्यः प्रसिद्धश्चेति गौणमुख्यन्यायः 'अभिव्यक्तपदार्था ये' इति न्यायश्च सिद्धः। अत एवेयं (१) विशिष्टरूपोपादान एव, इदं सूत्रञ्च, तत्रैवार्थोपस्थितेस्तत्रैवानियम प्रसक्तेश्च, न तु वर्णग्रहणे इत्याकरे स्पष्टम्। 'दाधा घ्वदाप्' (१।१।२०) इत्यस्य 'ई हल्यघोः' (६।४।११३) इत्यादौ चारितार्थ्येन 'उपसर्गे घोः' (३।३।९२) इत्यादौ 'स्वं रूपम्' (१।१।६८) इत्यनेन परत्वाद् बाधशङ्कावारणार्थम्। अशब्दसञ्ज्ञेति। नात्र षष्ठीतत्पुरुषः। कर्मसञ्ज्ञादेरर्थसञ्ज्ञात्वेन निषेधाप्रवृत्तौ 'कर्मण्यण्' (३।२।१) इत्यादौ स्वरूपग्रहणापत्तेः। किन्तु सप्तमीतत्पुरुषः। शब्दपदेन च शब्दशास्त्रं तदाह–शब्दशास्त्रे इति। भाष्ये तु अर्थे कार्यस्य बाधेऽपि उपस्थितत्वात् 'राज्ञः' इत्यादौ

स्वीक्रियते। तदा ततोलाघवमिति द्वित्वे परसवर्णस्येति वचनं न कर्तव्यमिति महदेव लाघवं। अत एवाप (वम्) वादोनासिद्धो वचन प्रामाणयादिति प्रकृत सूत्रभाष्योक्तं संगच्छते। एतत्संर्वध्वनयता श्रृंग ग्राहिकयैवत्वि त्यरूचि बोधकस्तु शब्दो मूल कृता प्रयुक्त इति दिक्।।

इदं तुभ्रमात् वस्तुतस्तु स्वमत मेवेदं इति ननुपूर्वत्रेत्येवसूत्रमस्तु आमंत्रितं पूर्वमविद्यमानत्य तोऽविद्यमानवदित्यनुवर्तते। एवं च मनोरथ इत्यादौ पूर्वत्रोत्वे रोरीति लोपोऽविद्य मानवदितिसिद्धेऽसिदमिति व्यर्थमत आह्। सिद्धमिति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तज्जन्यबोधे (२) प्रकारतया भासमानस्य राजन्शब्दस्यैव ग्रहणं भविष्यतीति व्यर्थं सूत्रम्। उपस्थितार्थत्यागे मानाभावेन तस्य विशेषणतयाऽन्वयसम्भवेन च 'अर्थवत्' (प० १४) परिभाषाऽपि सिद्धा। लक्ष्यानुसारात् तत्तत्संज्ञाकरणज्ञानरूपप्रकरणाच्च षान्तसंख्यावाचकषष्शब्दस्य षट्संज्ञाकरणेन शब्दशास्त्रीयसञ्ज्ञायां स्वरूपाग्रहणज्ञापनाच्च 'उपसर्गे घोः' (३।३।९२) इत्यादावदोषेणाशब्दसञ्ज्ञेत्यपि व्यर्थमित्युक्तम्। अत एव जनपदापत्यपशुदेवतादिशब्देषु न दोषः। अत एव वृक्षादिषु विशेषाणां ग्रहणम्, 'स्वे पुषः' (३।४।४०) इत्यत्र पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणं, 'सभाराजा (४।२।२३) इत्यत्र पर्यायाणामेव ग्रहणं, 'पक्षिमत्स्यमृगान् हन्ति' (४।४।३५) इत्यादौ मृगपक्षिणोः पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणं, मत्स्यपदेन स्वरूपस्य विशेषाणां मीनरूपपर्यायस्य च ग्रहणं सिद्ध्यति। अन्यथा तदर्थं यत्नः कर्त्तव्यः। 'परेश्चघाङ्कयोः' (८।२।२२) इत्यत्र घशब्देन स्वरूपग्रहणं 'नदीपौर्णमासी' (५।४।११०) इत्यत्र नदीपदेन च स्वरूपग्रहणं सिद्ध्यति। लक्ष्यानुसारिव्याख्यानेन च मम सर्वेष्टसिद्धिः। ज्ञापकपक्षेऽपि ज्ञापकसिद्धस्यासार्वत्रिकत्वान्न दोषः। अतएव भगवता ज्ञापकेन सिद्धं वचनं प्रत्याख्यातमिति (३) दिक्।

(१) येन वि (१।१।७२)। येनेति करणे तृतीया। विधिरिति भावे किः। कर्मात्र विधेयं, कर्ता चाचार्यः प्रसिद्धत्वाल्लभ्यत एव। यत्तु 'करणं कर्तृपरतन्त्रमिति तृतीयया पारतन्त्र्यं लक्ष्यते, तच्च शब्दानां विशेषणत्वेनेति (२) विशेषणमिति लब्धम्' इति, तन्न, 'सुब्विभक्तौ न लक्षणा' इत्यस्य सर्वसम्मतत्वात्। किं बहुना येषां प्रत्ययानामन्येषां वा शब्दानामर्थे विधानं कृतं शास्त्रेण, तेषामन्यत्रार्थे तदर्थे चान्येषां लक्षणयाऽपि साधुत्वाभावस्य 'प्रत्ययः' (३।१।१) 'पुंयोगाद्' (४।१।४८) इत्यादिभाष्यतो लाभात्। करणस्य

अविद्यमानव दित्यनेन तु न निर्वाहः। गोमानित्यादौ नलोपापत्तेः। शास्त्रस्याविद्यमानत्वेऽपि कार्यस्य विद्यमानत्वात्। कुलालस्याविद्यमानत्वेऽपि तत्कृत घटस्य विद्यमानत्ववदिति भावः। अंतरंगत्वात्रैपादिक मिति। इदंप्राचामनुरोधेन। स्वमते त्वंतरंग परिभाषायस्त्रि पाद्यामप्रवृत्तेरकृ त्व्यूह् परिभाषाया अभावाद्वाचिक इत्यादेरसिद्धदेश्च। पूर्वत्रेत्यस्य पूर्व विषये परमसिद्ध मित्यर्थस्य वाचिक इत्यत्र स्वयमेवोक्तत्वात् नांतरंगस्य पूर्वं प्रवृत्तिरिति तत्त्वं (त्वम्) दिगिति। दिगर्थस्तु न लोपेसुपस्वर संज्ञा तुग्विधयः कृतीति न्यासेन पूर्वत्रेत्यस्यासंबंधेन च प्रकृते न लोपे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यापारवत्त्वनियमादन्येषां च व्यापाराभावाद्विशेषणमेवात्र करणतृतीयान्तेनोच्यते। तस्य चेतरव्यावृत्तिकरणमेव व्यापारः। तदुक्तं भाष्ये– 'येनेति करणे एषा तृतीयाऽन्येन चान्यस्य विधिर्भवति। यथा–चैत्रस्य सङ्ग्रामं हस्त्यश्वादिभिर्विधत्ते, एवम् अचो यदिति अचा धातोर्यतं विधत्ते' इति। अन्येन चान्यस्येति। अनेन यस्य कार्यं, यस्मिन्परतश्च, तयोरकरणत्वं दर्शितम्। अन्यस्येत्यन्यस्मिन्नित्यस्याप्युपलक्षणम्। तत्र शब्दोपस्थितविशेष्यस्य तादृशं विशेषणमेव तदन्तग्राहकम्। क्वचित्सति गमके तादृशं शब्दरूपं विशेष्यमादायापि तदन्तविधिः। तच्चान्तरङ्गत्वात्समानाधिकरणमेव। तत्र तदन्तविधौ सति तथा (३) विशेषणत्वयोग्यताप्येतत्प्रवृत्तौ निमित्तम्। अत एव 'इन्हन्' (६।४।१२) इत्यादौ इनंशे तदन्तविधिः। न हि इन् अङ्गमित्यन्वयो भवति। तदन्तस्येत्यस्य तदन्तशब्दस्येत्यर्थः। नन्वेवम् 'एरच्' (३।६।५६) इति 'अयः' इत्यत्र न स्यादत आह– स्वस्य चेति। स्वमित्यनुवृत्तं षष्ठ्या विपरिणम्यते इति भावः। 'स्वं रूपम्' (१।१।६८) इत्यस्य प्रत्याख्याने तु तदन्तस्य चेति पाठ्यमिति बोध्यम्।

समासप्र (का० वा०) इति। विशेषणविशेष्यभावव्यत्यासे तात्पर्यग्राहकमिदम्। एवञ्च 'द्वितीयाश्रित' (२।१।४) इत्यादौ श्रितादयोऽधिकारप्राप्तसमर्थैरित्यस्य विशेष्यभूता इति न तदन्तविधिः। तस्य तत्प्रकृतिके लक्षणया 'सुपा' इत्यनेनान्वयः। तेन 'कृष्णं परमश्रितः' इत्यत्र न समासः। 'नडादिभ्यः फक्' (४।१।९६) इत्यादावपि नडादि विशेष्यं, प्रातिपदिकं विशेषणमिति सौत्रनाडिरित्यत्र न फक्।

उगिद् (का० वा०) इति। तेन 'अतिभवती' इत्यत्र 'उगितश्च' (४।१।६) इति ङीप्, 'दाक्षिः' इत्यत्र 'अत इञ्' (४।१।९५) च सिद्धः। एवञ्चोक्तनिषेधः प्रत्ययांशे

कृते एते न भवंतीत्यर्थेनादोषेपि ग्रोमानित्यादौ संयोगांत लोपादे रनापत्तिरिति।।

शछयोरपीति। तयोः सावर्ण्ये राजंश्छिंधीत्यत्र झरोझरीति लोपः स्यात्। आदंत इति। अदंतत्वे ह्यतंस्थाभिरित्यसंगतं स्यात्। द्विव्यंजनाश्र योविधिरिति। संयोग संज्ञेत्यर्थः। नाणुदित्सूत्रेण तद्ग्रहणमित्युक्त मिति। यद्यप्यनुस्वार परसवर्णयोरसिद्धत्वेनाप्यत्र समाधानं वक्तुं शक्यं तथाप्यनचि चेति द्वित्वसिद्ध्यर्थमेतत्समाधानस्यावश्य कत्वेन संयोग संज्ञायामपि समाधानस्य समाधानांतरा दूषकत्वादिति न्यायेने दमेवोक्त मितिभावः। एकारस्य तालव्यत्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गृह्यमाणप्रातिपदिकविषये, प्रत्ययविधिविषयेण 'गृह्यमाणप्रातिपदिकेन तदन्तविधिर्नास्ति' इत्यनेनैकवाक्यत्वलाभात्। 'उगिद्वर्ण' (का० वा०) इति त्वेकदेशानुवाद इति बोध्यम्। अत एव 'वनो र च' (४।१।७) इत्यादौ 'प्रत्ययग्रहणे तदन्तग्रहणम्' (प० २३) इत्यस्य नायं निषेध इति दिक्।

विरामः (१।४।११०) भावे घञ्। शब्दानुशासनप्रस्तावादाह– वर्णानामिति। (१) उच्चारणाभाव इत्यार्थः। स च व्याख्यानात्किञ्चिद्वर्णोच्चारणानन्तरकालिक एव गृह्यते। प्रदेशाः 'वाऽवसाने' (८।४।५६) इत्यादयः। अभावस्यापि बुद्धिकृतं पौर्वापर्यं, वर्णवत्।

परशब्दो नान्यार्थोऽन्यत्वस्याव्यभिचरितत्वादत आह– अतिशयति इति। स्वभावसिद्धार्धमात्रातिरिक्तकालव्यवायेन रहितः। तेन तद्व्यवायेन वाक्योच्चारणे सञ्ज्ञा न। सन्निकर्षश्च प्रायः परेण, क्वचित्पूर्वेणापि। अत एवावसानकार्याणां संहिताधिकारे पाठः। न चावसानसञ्ज्ञया परसत्त्वे सावकाशायाः संहितासञ्ज्ञायाः सत्यपि सम्भवे बाधनं भवति' इति न्यायेन विषयभेदेऽपि (१) बाधः स्यादिति तदसङ्गतिरेवेति वाच्यम्। तदधिकारे तेषां पाठेन 'आकडार' (१।४।१) सूत्रस्य स्वशास्त्रीयसञ्ज्ञामात्रविषयत्वकल्पनात्। एते तु न तथा, लोकेऽपि सत्त्वात्। तदुक्तं वार्त्तिककृता-'संहितावसानयो र्लोकविदितत्वात्' इति। न चावसानकार्येषु संहिताधिकारासम्बन्ध एवास्तु, अग्रे च मण्डूकप्लुतिरस्तित्वति वाच्यम्। सत्यामुपपत्तौ मण्डूकानुवृत्तेरयुक्तत्वात्। ध्वनितञ्चेदं 'विसर्जनीयस्य सः' (८।३।३४) इति सूत्रे भाष्ये। सन्निकर्षः-सामीप्यम्।

सुप्तिङ् (१।४।१४)। सुबिति सुपः पकारेण प्रत्याहारो व्याख्यानात्। यद्यपि 'प्रत्ययग्रहणे तदन्तग्रहणम्' (प० २३) इत्युक्तेः शब्दरूपं विशेष्यमादाय तदन्तग्रहणं सिद्धम्।

मोकारस्यौष्ठत्वय् मिति। अत्र मते यजुष्ये केषमत्नं खल्वोरित्यादि निर्देशादिगेङनेः सावर्ण्याभाव इति भावः। एकार शकारादीनामिति। आदिना विवृत मूषमणामित्यत्रोष्म शब्देन वर्ण द्वितीय चतुर्थयोरपि ग्रहणात्तयोर्विवृतत्वं नाझलावि त्यादि निर्देशात्तत्तद्वर्गयोरपि प्रयत्नः प्रयत्नांशेच यत्किचित्सांम्यंतन्निर्देशादाश्रीयत इति मते इकार शकारदीनां ग्रहणं नस्यादिति भाव इति। तथा च नाज्झलावित्यादि निर्देशा संगतिः परवल्लिंगमिति नपुंसकत्वं च स्यादित्यर्थः। अच्पदवोध्यत्वमिति। अच्त्वं स्यादित्य आच्पदस्योपस्थानात्तस्य च स्वबोध्ये लक्षणेति भावः। ननु प्रत्याहारेषु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्ययेन स्वप्रकृत्यवयवकसमुदायस्याक्षेपात्तद्विशेषणत्वेन तदन्तविधिरिति न युक्तम्। 'इयान्' इत्यादौ तस्य तादृग्समुदायेन व्यभिचारेणाक्षेपासम्भवात्, आक्षिप्तस्य शाब्देऽनन्वयाच्च। तथाऽपि सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभाव (१) ज्ञापनार्थमन्तग्रहणम्। तेन घसञ्ज्ञा तरप्तमपोरेव, न तदन्तस्य। तेन (२) 'गौरीब्राह्मणितरा' इत्यत्र न ह्रस्वः। (३) एतन्निषेधसामर्थ्यादेव प्रदेशेष्वपि न तदन्तविधिः। न च ज्ञापितेऽपि व्यर्थम्, पदप्रदेशे प्रत्ययग्रहणे तदन्तग्रहणेनैव सिद्धेरिति वाच्यम्। पदत्वस्य प्रकृतिसाधारणतया पदग्रहणे प्रत्ययग्रहणस्यैवाभावात्। 'यस्मात्प्रत्ययविधिः' (१।४।१३) इत्याद्यनुवृत्तेः पदसमुदायस्य न पदत्वम्। 'इयान्' इत्यादौ यस्मात्प्रत्ययविधिरतदादितद्धितान्तत्वं (४) व्यपदेशिवद्भावेन बोद्धव्यम्। तेनाशास्त्रीयस्याप्येकाच्त्वादेरतिदेशात्। विशिष्टनिष्ठव्यवहारनिमित्तकार्याणि असहायेऽपि कर्त्तव्यानीति तदर्थात्। अत एव 'इयन्मात्रम्' इत्यादौ 'वत्वन्तात्स्वार्थे इति मात्रच्सिद्धिः। 'हरिषु' इत्यादौ सोस्तु नैवं पदत्वं, 'हलि सर्वेषाम्' (८।३।२२) इति निर्देशेन ससहाये तदप्रवृत्तेः। 'निजौ चत्वार एकाचः' इति भाष्यन्तु (१) अभ्युपेत्यवादेन। ध्वनितञ्चेदम् 'आदेच उपदेशे' (६।१।४५) 'तास्यनुदात्तेत्' (६।१।१८६) इत्यादौ भाष्ये। तत्र हि 'ढौकते' इत्यौकारस्य 'हतः' इत्यादांवकारस्यैजन्तोपदेशत्वमकरान्तोपदेशत्वं व्यपदेशिवद्भावेनाशङ्क्यार्थवता व्यपदेशिवद्भाव इत्युक्तम्। यो वर्णोऽर्थवांस्तेन व्यपदेशिवद्भावः। वर्णस्यार्थवत्त्वञ्च 'इयाय' इत्यादावसहाये एव, न तु प्रकृते इति तदर्थः। एवञ्चैकस्मिन्नित्यस्यार्थवतेत्यनेनोक्ते इति दिक्।

हलोऽनन्तराः (१।१।७) 'गर्गाः शतं दण्ड्यन्ताम्' इत्यत्र (२) समुदाये शतदण्डनवदत्र समुदायस्यैव सञ्ज्ञा, न प्रत्येकम्, (३) नन्तररा इत्युक्तेश्च तस्य विशेषणताया एवौचित्यात्।

तद्वाच्यवाच्ये लक्षणेति पक्षेप्ययं दोषो ऽस्त्येवेत्यत आह्। व्यक्तीति। जाति पक्षे न दोष इति भावः ज्ञापयतीति बोधयतीत्यर्थः। टित्किन्मित्स्विति। इङ्न्युगमिवत्यर्थः। ध्वनित मिति। प्रत्यय पदस्य प्रतीयते विधीयत इत्यर्थस्याऽयुक्तत्वमित्यर्थः। ज्ञाप्यत इति। एवं व घटवदि ममित्यादौ भाव्य मानेनानंतरत्वाद णुदित्सवर्णस्येत्यस्यैव निषेधेऽणि न दोष इतिभावः। परास्तमिति।

अष्टम आ इत्याद्यर्थं बाध्यसामान्यचिन्ताया आवश्यकत्वादितिभावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्तु 'संयुज्यन्ते वर्णा यत्रेत्यन्वर्थसञ्ज्ञाबलान्न प्रत्येकं संज्ञा' इति, तन्न, घटपटौ संयुज्येते यत्रेत्यादौ संयुज्यमानपदार्थातिरिक्तस्यैवान्यपदार्थतया प्रतीतेर्व्युत्पन्नत्वेन तदतिरिक्ततद्घटित पदवाक्यरूपसमुदायस्य सञ्ज्ञापत्तावनिष्टापत्तेः। महासञ्ज्ञा तु प्राचामनुरोधादेव। तेन 'सुदृषद्ध्राति' इत्यत्र संयोगान्तलोपो नेत्यन्यत्र विस्तरः। 'हलः' इति बहुवचनं (४) सौत्रम्। यद्वा, हलौ च हलश्चेत्येकशेषः। 'स्वरितात्संहितायाम्' (१।२।३९) इति सूत्रेऽनुदात्तानामिति पदे तथैकशेषस्य भाष्ये करणात्। तेन द्वयोरपीति 'शिक्षा' इत्यादौ 'गुरोश्च हलः' (३।३।१०३) इति अप्रत्ययः सिद्ध्यति। यत्रापि बहवः श्लिष्टास्तत्रापि द्वयोर्द्वयोरेव न बहूनाम्, झलि परे संयोगादिलोपविधानात्। बहूनामपीति चिन्त्यमेव, (१) फलाभावात्। तत्र तत्राङ्गपदधात्ववयवसंयोगस्यैवाश्रयणेन तादृशस्य च त्रयाणां संयोगस्याभावादिति भाष्ये स्पष्टम्। आनन्तर्यं व्यवधानाभावः, व्यवधानञ्च विजातीयेनैवेत्याशयेनाह– अज्भिरिति। अत्र कुत्वं न्याय्यम्। अत एव 'हयवरट्' (मा० सू० ५) सूत्रे 'अचोऽक्षु' इति भाष्यप्रयोगे कुत्वं दृश्यते। स्वैररव्यवहिता इति सूचिता वृत्तिः। हलः किम्? तितउ देव। अत्र 'गुरोः' (८।२।८६) इति प्लुतः स्यात्। अनन्तराः किम्? द्रप्सम्। अत्र सकारमकारयोः संयोगत्वे 'स्कोः' इति लोपः स्यात्।

संयोगे गुरु (१।४।११)। 'भेत्ता' इत्यादौ गुणस्तु क्नोः कित्त्वसामर्थ्येन (२) भूतपूर्वलघूपधग्रहणाद् बोध्यः।

इति सञ्ज्ञेति। प्रथमाध्यायस्थानां सन्धिकार्योपयोगिनीनां सञ्ज्ञानां प्रकरणमिति समाप्तमित्यर्थः। तेनाम्रेडितप्रगृह्यभसञ्ज्ञालोपसञ्ज्ञाद्यनुपन्यासेऽपि न क्षतिः। 'अ अ' (८।४।६८) इत्याद्युपन्यासस्तु प्रासङ्गिकः।

चोभिन्न इति। नतु स्वरूपस्यसमुच्चायकः। स्वस्यापिस्व सवर्णत्वेन फलाभावात्तदेव ध्वनयन्वक्ष्यति। ह्रस्वेत्यादिना। भेदमारोप्येति। मूलानुरोधेनेदं। स्वमते सादृश्यस्य भेदाघटित्वात् व्याख्यानादिति। उऋदित्यत्रतपरकरणरूपादित्यर्थः। नऋृदिल्लृदित्प्रयुक्तेति। क्लृ ३प्तशिखेत्यादौतु वत्यघटितानांत्रिपाद्याम प्रवृत्तेर्न दोष इति भावः। ऐ औ इत्यनयोरसत्व शंका वारणाय सूत्रमावश्यकमत आह। अमेति। वैकल्पिक इति। अत्र चाणग्रहण मेवमानमिति भावः। ननु यणोगुणाभेदकत्त्वेन सिद्धत्वादच ग्रहणे नैव सिद्धावण्ग्रहणं व्यर्थमतआह। गुणा भेदका इति। अवर्ण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति सञ्ज्ञाप्रकरणम्।।

इको गुण (१।१।३)। परिभाषेयं (१) व्याख्यानात्। गुणवृद्धिशब्दाभ्यामिति। गुणवृद्धि ग्रहणानुवृत्त्यैव सिद्धे पुनर्गुणवृद्धिग्रहण (२) सामर्थ्यादिति भावः। अनुवर्त्तमानञ्च (३) सञ्ज्ञिपरमेव स्यात्। सञ्ज्ञाकरणेनान्यत्र (४) सञ्ज्ञिपरत्वात्। यद्वा, तदप्यनुवर्त्य गुणो वृद्धिरिति योजनयैतल्लाभः। 'स्वादिषु' (१।४।१७) इति सूत्रेऽनुवृत्तपदपदस्य सञ्ज्ञापरताया एव (५) दृष्टत्वात्। 'ष्णान्ताः' (१।१।२४) इति सूत्रे संख्यापदस्य तदन्तत्वासम्भवादर्थपरतेति बोद्धयम्। लक्षणप्रतिपदोक्तपरिभाषया तु नात्र निर्वाहः। तत्र 'प्रतिपदोक्तस्य' इत्यस्य साक्षादुच्चारितस्येति साक्षात्तत्तच्छब्दानुवादेन विहितस्येति वा (१) ऽर्थात्। ध्वनितञ्चेदमत्रैव भाष्ये। अस्याश्च (२) विधेयसमर्पकगुणवृद्धिपदश्रुतिर्लिङ्गं, तदाह–विधीयेते इति। अत एव 'अतो गुणे' (६।१।९७) 'वृद्धिर्यस्य' (१।१।७३) इत्यादौ न दोषः। एतेन 'शब्दपरयोः पूर्वयोर्गुणवृद्धिपदयोरनुवृत्त्या यत्र ते पदे तत्रेदमुपतिष्ठते इत्यर्थेन 'त्यदादीनामः' (७।२।१०२) इत्यादिव्यावृत्तौ सिद्धायामि गुणवृद्धी इति व्यर्थम्' इत्यपास्तम्। एतन्मूलक एव 'विधौ परिभाषोपतिष्ठते, नानुवादे' इत्युद्घोषः। एवञ्च पदोपस्थापकपरिभाषाविषये 'विधीयते' इत्यस्यैवाध्याहारो बोद्धयः। एवञ्च 'तस्मिन्निति निर्दिष्टे' (१।१।६६) 'षष्ठीस्थाने' (१।१।४९) इत्यादेरनुवादेऽपि प्रवृत्तिः। तेन 'प्रत्ययस्थात्कात्पूर्वस्य' (७।३।४४) 'उदात्तस्वरितयोर्यणः' (८।२।४) इत्यादौ न दोषः। 'उदीचामातः स्थानेः (७।३।४६) इति स्थानेग्रहणन्तु स्पष्टार्थमेव। तत्र विधिवाक्ये प्रथमाया विधेयविभक्तित्वेन तदन्तस्य (३) विधेयसमर्पकत्वनिर्णयः। अत एव गुणादिपदानामिक्पदोपस्थापनेन चरितार्थानामपि वाक्यार्थान्वयिता। तदर्थस्य तदनन्वयित्वे विधेयत्वाभावेन उपस्थापकत्वस्यैव भङ्गापत्तेः।

ग्रहण प्रत्याख्याने आह। व्याख्यानाच्चेति। वृद्धि रादैजितितपरकरण सामर्थ्य रूपादित्यर्थः। गुणानां भेदकत्वमिति मते आह्। भाष्येति। उपसर्गादिति तपरकरणादिति। अनेन च टाङसीति सूत्रे आदित्येव छेद इति ज्ञाप्यते इति बोध्यं। (ध्यम्) ध्वनितं चेदं रामादित्युदाहरणे द्वित्वमिति प्रतीकमादाय पूर्वत्रासिद्धीयम द्वित्वे इत्यादि ग्रन्थेन स्वयमेव। धकारादिति। आदिना थकारादिपरिग्रहः। पूर्वार्थमिति। अतएवादित्यस्य प्रातिपदिकत्वेन पदत्वाज्जश्त्वं सिद्ध्यतीति भावः। नन्वादैचामेव संज्ञात्वं कुतोनाऽत आह्। वृहदीति। व्याख्यानादिति। एकस्यानेक संज्ञाकरणे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इयञ्च 'एधिता' इत्यादौ व्यञ्जानानां गुणव्यावृत्त्यर्थं, 'भिन्नम्' इत्यादौ निषेधप्रवृत्तये इग्लक्षणत्वसम्पत्यर्थञ्चेति दिक् (१)।

प्लुत शब्दैरिति। 'ऊकाल' (१।२।२७) इति सूत्राद् ह्रस्वदीर्घप्लुत इति, अजिति चानुवर्त्तते; ह्रस्वेत्यादिपदञ्च तृतीयया विपरिणतमिति भावः। तेन 'दिव उत्' (६।१।१३१) 'अष्टन आ विभक्तौ' (७।२।८४) इत्यादावेतदनुपस्थितिः। शेषं प्राग्वत्।

आद्यन्तौ (१।१।४६) यद्यप्यत्र मिलितस्य नैकत्रान्वय इति द्वन्द्वो न प्राप्नोति, तथापि समूहयोरन्वयबोधोत्तरं 'यथासंख्यम् (१।३।१०) इतिसूत्रारम्भसामर्थ्यात्पुनः प्रत्येकान्वयः। लोके त्वेवंरीत्या प्रयोगो (२) ऽसाधुरेवेति भाष्ये स्पष्टम्। अत्रैव 'यथासंख्य' (१।३।१०) सूत्रोपन्यासो युक्तः। द्वन्द्वान्ते श्रूयमाणस्येच्छब्दस्य प्रत्येकं सम्बन्धः। पुरस्तादपवाद न्यायेन स्थानेयोगत्वस्यायमपवादः। प्रत्ययपरत्वन्तु परत्वादमुं बाधते। तेन चरेष्टादयः परा एव भवन्ति। अत एव यत्रैतदभावे स्थानषष्ठीसम्भावना तत्रैवेदं प्रवर्त्तते; तदाह– यस्योक्ताविति। आद्यन्ताक्षिप्तोऽवयवी यच्छब्दार्थः। यथासंख्यसिद्धमर्थमाह–क्रमादिति। इताविति किम्? टुक् पर्यायेणाद्यन्तयोर्मा भूत्।

मिदचो (१।१।४७)। अयं बाध्यसामान्यचिन्तया स्थानेयोगत्वप्रत्ययपरत्वयोरपवादः, 'तृणहः' (७।३।९२) इति निर्देशात्। (१) निर्धारणे इति। यस्य समुदायस्य मिद्विहितस्तस्याचां मध्ये इत्यर्थः, सौत्रमेकवचनमिति भावः। तस्यैवेति। यस्य विहितस्तस्यैवेत्यर्थः। अत एव 'समुदायभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां विहन्तुम्' इति भाष्यं सङ्गच्छते। अन्तावयव इति। पूर्वसूत्रात्समस्तमप्यन्तपदमे (२) कदेशे स्वरितत्वप्रतिज्ञाबलादनुवर्त्तते इति भावः। गुञ्चति इत्यादिविषये तु फलाभावादयोग्य

प्रयोजनाभाव रूपा दित्यर्थः।

ननु घुभादीनां साधुत्वं न स्यादनादित्वाभावाद् व्याकरण संस्कृतत्वाभावाच्चात आह्। आसांचेति। अभेति। कार्यकाल पक्षे इत्यर्थः। भूवादयोधातवः। भूवावादीयेषामिति विग्रहः। तत्र वाशब्दस्यवा निरूपित इत्यर्थः। आदि शब्दस्य प्रकारोर्थः। एवंच वानिरूपित सा दृश्यवंतोधातव इत्यर्थः। पदत्वानापत्तेरिति। ननुनिपातानामनर्थकानामिति वार्तिकस्थानर्थक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वाच्चान्तावयव इत्यंशाप्रवृत्तिः।

परिभाषाणामनियमे नियमकारिणीत्वादाह– अनिर्धारितेति। तेन 'ऊदुपधाया गोहः' (६।४।८९) इत्यत्र स्थानेयोगत्वं न। उपधापदसन्निधानेनावयवषष्ठीत्व (१) निर्णयात्। 'स्थानेयोगा' इत्यस्य (२) स्थानपदार्थनिरूपितसम्बन्धार्थिकेत्यर्थः। स्थानेन योगो यस्या इति विग्रहे निपातनात्साधुत्वस्य भाष्ये उक्तत्वात्। 'अस्तेरनन्तरे' इत्यादेरपि अनन्तरादिनिरूपितसम्बन्धे इत्येवार्थः। षष्ठीमात्रोच्चारणे स्थानपदाद्यध्याहार इत्यन्यत्र विस्तरः। प्रसङ्ग इति। 'दर्भाणां स्थाने शरैः प्रस्तरितव्यम्' इत्यादौ (३) तथा दर्शनात्। भावे ल्युट् स्थानशब्दे। प्रसङ्गश्च सति सम्भवेऽर्थवत एव, अर्थप्रत्यायनार्थ शब्दप्रयोगात्। 'इको यण्' (६।१।७७) इत्यादेरच्परेकारघटित शब्दस्यार्थबोधनाय प्रसङ्गे तत्परयकारघटितः प्रयोक्तव्य इत्यर्थः। 'एरुः' (३।४।८६) इत्यादेश्च (१) 'तेस्तुः' इति; अतो न शब्दनित्यताहानिः। किञ्च इकारबुद्धिप्रसङ्गे यकारबुद्धिरित्यर्थः। अत एव 'अचःपरस्मिन्' (१।१।५७) इत्यादि सङ्गच्छते। स्पष्टञ्चेदं 'दाधाघु' (१।१।२०) इति सूत्र-'स्थानिवत्' (१।१।५६) सूत्रयोर्भाष्ये।

स्थानेऽन्त (१।१।५०)। षष्ठीत्यनुवृत्त्या यत्र स्थानषष्ठी तत्रेदमुपतिष्ठते इति विध्येकवाक्यतयैवास्य नियमाकत्वं न तु विहितानां नियमः, 'भुक्तवन्तम्' इतिन्यायविरोधात्। फलितमाह–प्रसङ्गे इति। (२) सदृशतम इति। अर्थात्प्राप्यमाणानां मध्ये एव। अत एव 'गङ्गोदकम्' इत्यादौ त्रिमात्रो न। तमप् किम्? 'वाग्घरिः' इत्यादौ महाप्राणत्वसाम्येन जायमानः पूर्वसवर्णे वर्गद्वितीयो मा भूत्, किन्तु नादवान् महाप्राणश्चतुर्थो 'घ' एव यथा स्यादिति। स्थानेऽन्तरतमे इति सप्तम्यन्तपाठस्तु (१) दीर्घेषु यणसिद्ध्या दुष्ट

ग्रहणस्यफलाभावेन प्रकृत सूत्रे प्रत्याख्यानादत्र तेन वार्तिकेन प्रातिपदिक त्वंस्यादेवेति चेन्न? अर्थवत्सूत्रे भाष्येऽधिपरी अनर्थकाविति ज्ञापकादनर्थक निपातानामर्थवत्प्रयुक्तं कार्यं भवती त्युक्तयातद्वार्तिकस्य प्रत्याख्यानात्। आणवयति। आज्ञापयति। वद्दयति'' वर्तयति। इत्यादीनामिति। आदिना वर्धयतीत्यर्थकंबवुयतीति (ध्यम्) बोध्यं। ननूदित्वं नुमर्थं स्यादत आह्। धात्वधिकारेति। इत्यभिव्याप्येति। रीश्वरादिति ल्यब्लोपे इति पंचमीति भावः। कार्यस्यापि द्योतकत्वमनुभूयत इत्यादौ। वाचकत्वमहं युरित्यादौ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति भाष्ये स्पष्टम्। यत्रानेक इति। स्थानेग्रहणे एकदेशानुवृत्त्याऽनुवर्तमाने पुनः स्थानेग्रहणं तृतीयया विपरिणामेन वाक्यभेदमाश्रित्य प्रसङ्गे सति सम्भवे स्थानत एवान्तरतम इत्यर्थमिति भावः। स्थानत इति। स्थानेनेत्यर्थः। तत्र स्थानतः–'इको यणचि' (६।१।७७) इति। अर्थतः–(२) 'तृज्वत्क्रोष्टुः' (७।१।९५) इति, इह क्रोष्टुशब्दस्थाने पक्तृशब्दो नादेशः। गुणतस्तु 'वाग्घरिः' इत्यादौ। प्रमाणतः– (३) 'अदसोऽसेः' (८।२।८०) इत्यादौ।

तस्मिन्निति (१।१।६६)। अत्र 'तस्मिन्' इति उत्तरत्र 'तस्मात्' इति च सप्तम्यन्तपदपञ्चम्यन्तपदार्थकः स्वतन्त्रस्य सर्वनाम्नो निर्देशो व्याख्यानात्, बहुलक्ष्यसंस्कारानुरोधाच्च; न तु तत्तत्पदपरम्। अन्यथा 'तस्मिन्नणि च' (४।३।२) 'तस्मान्नुडचि' (६।३।७४) 'तस्माच्छसो नः' (६।१।१०३) इत्यत्रैव प्रवर्त्तेयाताम्। सप्तमी तु सप्तम्यन्तानामेव तच्छब्दार्थत्वमिति बोधनाय, तद्बोध्यार्थस्य निर्दिष्टे इत्यनेन सामानाधिकरण्याय च। इतिशब्दः पुनस्तस्य तदर्थपरत्वं बोधयति। निःशब्दो नैरन्तर्ये, दिशिरुच्चारणे। एवञ्च सप्तम्यन्तार्थेऽव्यवहितोच्चारिते उपश्लिष्टस्य (४) पूर्वस्य कार्यमिति वाच्योऽर्थः। एवञ्चैतत्परिभाषाद्वयोपस्थितौ सप्तम्यन्तपदस्य पञ्चम्यन्तपदस्य चार्थोलिङ्गम्। अत्र सूत्रे उपश्लिष्टपदाध्याहारेण निर्दिष्टे इति औपश्लेषिकेऽधिकरणे सप्तम्येवोचिता 'उपपदविभक्तेः' (प० १०२) इति न्यायात्, न तु सतिसप्तमीति 'तत्र च दीयते' (५।१।९६) इति सूत्रे कैयटे स्पष्टम्। 'स्नुक्रमोः' (७।२।३६) इति सूत्रे च कैयट आह–'तस्मिन्निति परिभाषायां सत्यां सत्सप्तम्याश्रयणमशक्यम्' इति। उपश्लेषः समीपवृत्तित्वं, तच्च वर्णयोर्बौद्धं द्रष्टव्यम्। एवम् 'इको यणचि' (६।१।७७) इत्यादावपीयमेवेति 'संहितायाम्' (६।१।७२) इति सूत्रे भाष्ये। तत्रोपश्लेषः पूर्वस्येव परस्याव्यवहितस्येव व्यवहितस्य चेति

प्रयोगाश्रयत्वादाह। यथाप्तयोगमिति। गतिरनंतर इति। प्रशब्दस्येति भावः। अव्ययपूर्वपदप्रकृति स्वरस्तुप्रति शब्दस्यस्यात्। अत एव निपातद्वयोचारणं चरितार्थम् अभेदवि वक्षयेति। प्रकृति वदनुकरणमित्यतिदेशेनाव्ययत्वादिति भावः। सुबनुत्पत्तिरिति। प्रत्ययलोपलोप विधायक शास्त्रैः प्रत्ययानुत्पत्तेरेवान्वाख्यानेनाव्ययादाबिति लेकेति भावः। यत्रत्विति। उपसर्गस्यायतावित्यादावित्यर्थः। ननुवार्तिके कार्य निर्देशात्तयोः कर्तव्ययोस्तत्प्रतिषेध इति वार्तिकार्था द्वार्तिकस्योपसर्ग संज्ञासूत्रस्थत्वला भेनतदृष्ट्यारुत्व स्यासिद्धत्वमत

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्वस्यैवेति नियमार्थमिदमव्यवहितस्यैवेति च। अत एव लक्ष्यानुसारात् क्वचित्सतीत्यध्याहारात् सत्सप्तम्याश्रयणे नास्याः प्रवृत्तिरिति 'श्नान्नलोपः (६।४।२३) इत्यत्र भाष्ये उक्तम्। अत एव 'कर्तृकर्मणोः कृति' (२।३।६५) इत्यत्र नास्याः प्रवृत्तिः, कृति सति प्रत्यासत्त्या तत्प्रकृत्यर्थकर्तृकर्मणोः षष्ठीति तदर्थात्। 'तस्मात्' (१।१।६७) इति सूत्रे निर्दिष्टे इति निर्दिष्टादित्यर्थकं विभक्तिविपरिणामात्। सा चोत्तरस्येति दिग्योगलक्षणा इति दिग्योगलक्षणपञ्चम्यामेव तत्प्रवृत्तिः। 'उदः स्था' (८।४।६१) इत्यादौ च 'उदः' इति दिग्योगलक्षणा पञ्चमी। तत्रानियतदिक्शब्दादध्याहारे प्रसक्ते परशब्दस्यैवादध्याहार इति 'तस्मात्' (१।१।६७) इत्यनेन नियम्यते। अव्यवहितोच्चारितात्पञ्चम्यन्तात्परस्येति तदर्थः। तत्फलितमाह–सप्तमीनिर्देशेन इत्यादि। यदि तु अर्धमात्राधिककालेन वर्णान्तरे वा व्यवधाने उपश्लेष एव नेत्युच्यते तदा निर्दिष्टपदं संहिताधिकारश्च विफल इति 'संहितायाम्' (६।१।७२) इति सूत्रे भाष्ये स्पष्टम्। अवग्रहे च सम्प्रदाय एव शरणमिति आनङादिविषये आदेशोत्तरमेवावग्रहोऽन्यत्र ततः प्राक्। अकृतव्यूह परिभाषात्वनित्या, नास्त्येव वा। 'न लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्यम्' इति भाष्येण तदनुरोधेन शास्त्रासङ्कोचस्य शास्त्रकरणाभावस्य च स्पष्टमुक्तत्त्वाच्च। एतेन संहिताधिकारस्तद्बहिर्भूतानामर्धमात्राधिककालव्यवाये प्रवृत्तिज्ञापनार्थम्। तेन 'अग्नाविष्णू' इत्यादाववग्रहे आनङादि सिद्धिरित्यापास्तम् 'प्रत्ययः' (३।१।१) 'परश्च' (३।१।२) इत्यादौ तू (१) त्तरांशविकला 'तस्मात्' (१।१।६७) इति परिभाषा प्रवर्त्तते। तेन न प्रत्यया व्यवहिताः। अत एव 'छन्दसि परेऽपि' (२) 'व्यवहिताश्च' इति सूत्रं सार्थकम्। आगमविधावपि 'आने मुक्' (७।२।८२) इत्यादौ 'तस्मिन्' (१।१।६६) इति परिभाषया

आह्। षत्वणत्वयोरित्यस्येति। अनेन वार्तिकस्यतत्तद्वि धायकसूत्रस्थत्व सूचयति। नन्वेताहशार्थे किं मानमत आह्। अतएवेति। स्पष्टमेवेति। अपसूदुष्विति न्यासकरणेनेत्यर्थः। दुस इति। निसोप्युपलक्षणमिदं। दुरयत इत्यादाविति। (दम्) आदिनानिरयत इत्यस्य संग्रहः। अनुवाद वाक्य इति। हंतीतिपलायत इत्यादौ हेत्वादाविति शब्द इति भावः। व्याख्यानादिति द्वंद्वांतेश्रूयमाणमिति न्यायरूपादितिभावः। नियमार्थमिति। अर्थे कार्य बाधे उपात्त शब्दबोध्यार्थ वाचक सर्वशब्द ग्रहणं यत्र प्रसक्तं तत्र तादृशार्थविशिष्टोपात्त शब्दस्यैव ग्रहणमित्येवं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्वसम्बन्धित्वनिर्णयः। अत एवात्र पूर्वस्येत्यादि न स्थानषष्ठी। तत्तद्विधिभिरेव सम्बन्धस्य निर्णीतत्वेन 'षष्ठी स्थाने' (२।१।४६) इत्यस्याप्रवृत्तेः। 'गाङ्कुटादिभ्यः' (१।२।१) इत्यादावपि षष्ठ्यशविकलैत्परिभाषा प्रवृत्तिर्बोद्ध्या। परिभाषाणां नियमत्वन्तु यदि परिभाषासूत्रं न स्यात्तदाव्यवहितादावपि प्रवृत्तिः स्यादित्येतावतेति दिक्।

अलोऽन्त्यस्य (१।१।५२) षष्ठी स्थाने इत्यनुवर्त्तते; तदाह–षष्ठी इत्यादि। स्थाने विधीयमानः स्थानषष्ठीनिर्दिष्टान्त्यस्येत्यर्थः। स्थाने इत्यादि किम्? इट् तृच ऋकारात्पूर्वो मा भूदिति। अन्त्यस्येति साहचर्यादल इति षष्ठ्यन्तम्, अन्त्यस्याल इत्यर्थः। अल इति किम्? पदस्येति विधीयमानं 'वसुस्रंसु' (८।२।७२) इति दत्वं 'स्वनडुद्भ्याम्' इत्यादावन्त्यस्य पदस्य मा भूत्। स्थाने विधीयमान इति प्रत्यासत्तिलब्धम्। एवञ्चाल एवेति, अन्त्यस्यैवेति नियमद्वयमत्र। अल्समुदायबोधकपदोत्तरं स्थानष्ठी अस्या लिङ्गम्। (१) अत एव 'इतोऽत्' (७।१।८६) इत्यादौ नास्याः प्रवृत्तिः। पथ्यादीनामित्यस्यावयवषष्ठीत्वात्, इत इत्यस्याल्समुदायोत्तरत्वाभावाच्च।

ङिच्च (१।१।५३)। अनेकालर्थमिदम्।

आदेः इति। आदेरल इत्यर्थः। तेन 'द्वीपम्' इत्यादौ पान्तसमुदायस्य न ईत्त्वम्। अत्र परस्येत्यावर्त्तते तेन परबोधकशब्देन यत्र परस्य स्थाने विधानं, तत्रैवेदम्। तेन 'नित्यं ङितः' (३।४।९९) इत्यादौ (२) न दोषः। तत्र विकरणव्यवधाने प्रवृत्तये धातोरित्यस्य विहितविशेषणत्वात।

अनेकाल् शित् (१।१।५५)। शित उदाहरणम् 'इदम इश्'। ननु शकरोच्चारणसामर्थ्याद्

नियमार्थमित्यर्थः। नत्वपूर्वविधित्वं गौरवादारंभ प्रत्याख्यान योः फलमेदापत्तेश्च। अतएवापत्यादिषु न स्वरूप ग्रहणमिति भावः। शोध इयमिति। अर्थवद्ग्रहण इति गौणमुख्ययोरिति अभिव्यक्तेति च परिभाषेत्यर्थः अनियम प्रसक्तेश्चेति। चो हैतौ। यतोऽर्थोपस्थितिरतो नियम प्रसक्तिरिति। नन्वत इञित्यादावत इति वर्णादप्यार्थोपस्थिति संभवोऽताह् आकरेस्पष्ट मिति। इत्यादौ चरितार्थेनेति। तत्रात इत्यनुवृत्त्या न स्वरूप ग्रहणमिति भावः। शंकावारणार्थमिति। अर्थेकार्याबाधाद्देव नैतत्सूत्रं प्रवर्तत इति भावः। ननुशब्दस्यापि शब्दबोध्यत्वात्संज्ञाविषये उभय गति ज्ञाप

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(३) भूतपूर्वनिकाल्त्वमादाय सर्वादिशत्वे सिद्धे शिदिति व्यर्थम्। किञ्च सानुबन्धकनिर्देशे यथा (४) नालः स्थानित्वं भोभगो (८।३।१७) इति सूत्रे भाष्ये उक्तम्, तथा (५) ऽऽदेशत्वमपि (६) सूत्रोपात्तस्यैवेति तव्द्यर्थम्। (१) विधौ निर्दिष्टो योऽनेकाल्स सर्वस्येति सूत्रार्थः। (२) उद्देश्यत्वविधेयत्वाख्यविषयतया बोधविषयता तु अनुबन्धविनिर्मुक्तस्येति न 'अणुदित्' (१।१।६९) सूत्रभाष्यविरोधः। 'ध्वसोः' (६।४।११९) इति लोपस्य 'लोपो यि' (६।४।११८) इति प्रकृते पुनर्लोपग्रहणसामर्थ्यात्सर्वादिशत्वसिद्धिः। अनुबन्धानामेकान्तत्वमेव न्याय्यमित्युक्तमिति चेत्? न, 'नानुबन्धकृतमनेकाल्त्वम्' (प० ५) इति ज्ञापनेन (३) चारितार्थ्यात्। तेन दिव औत्' (७।१।८४) इत्यादीनां न सर्वादिशत्वम्। अस्य च यथेत्सञ्ज्ञा तथा वक्ष्यते। 'नानेकाल् शित्' इति तु नोक्तम्, 'अनन्तरस्य' इतिन्यायेन 'आदेः परस्य' (१।१।५४) इत्यस्यैव निषेधापत्तेः। परत्वात् इति। 'आदेः परस्य' इत्यस्यावकाशः 'द्व्यन्तरुपसर्गेभ्यः' (७।१।६), द्वीपम्। शित्सर्वस्य 'इदम इश्' (५।३।३) एवम् 'अतो भिसः' (७।१।९) इत्यादि विषये 'अनेकाल्' (१।१।५५) इत्यनेन 'आदेः परस्य' (१।१।५४) इति परत्वाद् बाध्यते। एतेन 'ङिच्च' (१।१।५३) इत्यत्र ङिदेवानेकालन्त्यस्येति नियमेन सिद्धेऽनेकाल्ग्रहणं व्यर्थम्' इत्यपास्तम्।

स्वरितेन (१।३।११)। इत्थंभूतलक्षणे (४) तृतीया। (५) स्वरितत्वज्ञाप्योऽधिकारो विनियोग इत्यर्थः। स्वरितत्वञ्चेदं दोषविशेषरूपमञ्झल्साधारणं स्वरूपमधिक्रियमाणपदघटका (१) ऽज्जिष्ठं वा। तच्चानुनासिक्यवत्प्रतिज्ञागम्यम्। विनियोगश्च प्रायेणोत्तरत्रोपस्थितिः, क्वचित्पूर्वत्रापि। कियद् दूरमधिकार इत्यत्रासति गमके व्याख्यानमेव शरणम्। किं च स्वरितेनाधिकारगतिः। तेन 'गोस्त्रियोः' (१।१।४८) इत्यादौ

नाच्च उपसर्गे घोरित्यादौ दोषोऽत आह्। षंतिति। अतएवार्थे कार्यस्यावाधादेव। अन्यथेति। सूत्रस्यापूर्वविधायकत्वे इत्यर्थः। स्वरूपग्रहणमिति। ज्ञापकसिद्ध स्यासार्वत्रिकत्वादंक शब्द साहचर्याच्चेति भावः। नदी शब्देन स्व रूपग्रहणं चेति। पौर्ण मासस्याग्रहणी ग्रह्णसामर्थ्याच्छरदादिषु विवाद् शब्द सामर्थ्याच्च नदी संज्ञकस्य नदी वाचकस्य च न ग्रहणमिति भावः।

अतएव। ज्ञापकसिद्धस्यासार्वत्रिकत्वादेव। सिद्धं वचनमिति। अशब्द

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्र्यधिकारस्थप्रत्ययग्रहणमित्याद्याकरादवसेयम्। एतेन 'व्याख्यानादेव निवृत्तिवदनुवृत्तिरपि भविष्यति आकाङ्क्षायान्तु सत्यामश्रुतकल्पनाया अन्याय्यत्वाच्छ्रुतापेक्षणस्य न्याय्यत्वाच्च किं सूत्रेण' इत्यपास्तम्। स्पष्टं चेदं भाष्ये। परनित्य इति (प०) परं विप्रतिषेधसूत्राद् बलवत्। नित्यं कृताकृतप्रसङ्गि, तद्विपरीतमनित्यम्। तत्राक्लृप्ताभावकल्पनापेक्षया क्लृप्ताभावकस्यैव तत्कल्पनं युक्तमिति तस्य बलवत्त्वे बीजम्। अन्तर्मध्ये (२) बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्येऽन्तर्भूतान्यङ्गानि निमित्तानि यस्य तदन्तरङ्गम्। तदीयनिमित्तसमुदायाद्बहिर्भूताङ्गकं बहिरङ्गम्। तस्य बलवत्त्वे बीजमाह–'असिद्धम् इति। इयञ्च 'वाह ऊठ्' (६।४।१३२) इति (३) सूत्रेण ज्ञापिता। यद्यपि 'प्रत्यङ्गवर्ती लोको दृश्यते, मनुष्योऽयं प्रातरुत्थाय प्रथमं शरीरकार्याणि करोति ततः सुहृदां ततः सम्बन्धिनाम्' इतिन्यायमूलकत्वमस्या 'अचः परस्मिन्' (१।१।५७) इति भाष्ये उक्तं तथापि तेन न्यायेन युगपदप्राप्तिविषयतैव स्यात्; ज्ञापकेन तु सर्वविषयता बोद्धयत इति 'वाह ऊठ्' (६।४।१३२) इति सूत्रे कैयटे स्पष्टम्। अन्यथा वाहः सम्प्रसारणे पूर्वरूपे च कृते ण्याश्रये गुणे 'वृद्धिरेचि' (६।१।८८) इति वृद्धौ 'प्रष्ठौहः' इत्यादिसिद्धावूठ्विधानं व्यर्थ स्यात्। नाजानन्तर्यपरिभाषा तु नास्त्येवेति न 'अयजे इन्द्रम्' इत्यादौ दोष इति परिभाषेन्दुशेखरे विस्तरः। अपवादस्तु वचनप्रामाण्याद् बलवान्। अकृत (प०) इति। न कृतो विशिष्ट ऊहस्तर्को (१) निमित्तविनाशेऽपि कार्यस्थितिरूप!, यथा दण्डविनाशेऽपि घटस्थितः, स यैस्ते इत्यर्थः, तदाह– निमित्तम् इत्यादि। तत्प्रयुक्तं कार्य जातमपि न कुर्वन्ति-नोच्चारयन्तीत्यर्थः; इति कैयटादयः। अन्ये तु व्यूहोऽन्तरङ्गशास्त्रं बहिरङ्गापोहनरूपत्वात्। तत् निमित्तविनाशं दृष्ट्वा पूर्वमपि न कुर्वन्तीत्यर्थ इत्याहुः। इयं परिभाषा (२) निष्फला निर्मूलेति परिभाषेन्दुशेखरे

संज्ञेतिवचनमित्यर्थः। कर्मात्र विधेयमिति। प्रदेश वाक्येन यद्विधेयं तदेत द्वाक्यार्थ बोधकमित्यर्थः। अन्येषां वाशब्दानामिति। सर्वनामादिशब्दानामित्यर्थः। व्यापाराभावादिति। इतर व्यावृत्तिकरणरूपव्यापाराभावादित्यर्थः। एतादृशशब्द स्वरूपमिति। शब्दानुपस्थित मित्यर्थः। तदंत विधिरिति। सर्वनाम संज्ञादावित्यर्थः। इनंशे। अनर्थकेनंशे। एरजित्यादीति। आदिनाटिढ्ढाण जित्यादे रोणी त्यादेश्च संग्रहः। अय इत्यादविति। आदि आदिना औपगवी रौण इत्यादेः संग्रहः। पाठयमिति। अन्य व्याव्यपदेशिवद्भावोऽप्रातिपदिकेनेविनिषेधादौपगवी रौण इत्या

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निरूपितम्।

इति परिभाषाप्रकरणम्।

स्यात् इति। कार्यशब्दवादे इदम्। संहितायां विषये इति। इदं कार्यिनिमित्तयोः संहितायां विषयभूतायामित्यर्थः। स्थानत इति। इदं 'यथासंख्य' (१।३।१०) सूत्रे भाष्ये स्पष्टम्। जातिपक्षे यथासंख्येनापि निर्वाह इति 'स्थानेऽन्तरतम' (१।१।५०) सूत्रे भाष्ये स्पष्टम्। अनुनासिकस्थानेऽपि निरनुनासिक एव, विधीयमानत्वेन सवर्णाग्राहकत्वात्। गुणाभेदकत्वपक्षोऽपि न विधेयाण्विषये। दीर्घादीनामिगादिपदैरुपस्थितये प्रत्याहारेषु जातिपक्ष एवेति 'अणुदित्' (१।१।६९) सूत्रे भाष्ये स्पष्टम्। अत एव सर्वतकारादीनां झल्त्वादिसिद्धिः। 'ल्वादयः' (८।२।४४) इत्यादिनिर्देशादयञ्च जात्याश्रयणे मानमिति दिक्। व्याकरणस्य साध्वनुशासनत्वन्तु शब्दनित्यतापक्षे शब्दानां सिद्धत्वेन शास्त्रवैयर्थ्यापत्त्या मृजिप्रसङ्गे मार्जिः साधुर्भवतीत्यादिवृद्धिसञ्ज्ञासूत्रस्थभाष्यप्रामाण्येन यदिह परिनिष्ठितत्वेन ज्ञाप्यं तत्साध्वित्यर्थापत्तिकल्प्यवाक्येन बोद्धयम्। कार्यशब्दवादे तु पूर्वभाष्योन्नीता (१) ऽनादितात्पर्यवशात्तत्कल्पनं बोद्धयम्। एतेन स्थानप्रमाणोभयान्तरमे ह्रस्वेकारे चरितार्थो यणअ दीर्घे कथं स्यादित्यपास्तम्। (२) स्थानत आन्तर्यस्य सर्वतो बलवत्त्वात्, 'स्थानेऽन्तरतमे' इति सप्तम्यन्तपाठस्य चैतद्दूषणेनैव भाष्ये दूषितत्वादिति भावः।

चो विध्यर्थः। ध्वनितञ्चेदम् 'एओङ्' (मा० सू० ३) सूत्रे भाष्ये, तदाह–द्वे वा स्तः इति। सूत्रकृता शाकल्यमते सर्वत्र द्वित्वाभावोक्तेरिति भावः। अवसाने द्वित्वसिद्धयेऽनचीति प्रसज्यप्रतिषेधः, तदाह-न त्वचि इति। इदं द्वित्वं षाष्ठद्वित्ववद् द्विःप्रयोग एव। 'यरः' इत्यादेरध्याहृतोच्चारणक्रियानिरूपित-(३) कर्मषष्ठीत्वस्यौचित्यात्। इति धकारस्य इति। न तु

दौऽडीबणादिश्च न स्यादिति भावः। द्वितीयाश्रितेत्या दाविति। आदिना पूर्व सदृशेत्यादेः संग्रहः। तस्येति। पूर्वादिशब्दस्येत्यर्थः। द्वितीयाश्रितेव्यादौतुगतिकारको पपदानामित्यनेन सुबुत्पत्तेः प्राक्कृदन्तेन समास बोधनात् सुपेत्यस्याऽनन्वयेन लक्षणां विनैव निर्वाह इति भावः। सौत्र नाडिरिति। अत्रानुशतिकादित्वा दुभयपदवृद्धिः। तेन गृह्यमाणेति। प्राति पदिकत्वव्याप्यधर्मवत्वेन गृह्य माणेत्यर्थः। तेन यशस्वीत्यादावस्म स्मयामेधेतिविनिः सिद्धयति। न तु स्वरूपोच्चार्य माणेत्यर्थः। तेन प्रियपंचन् शब्दात्संख्याया अतीतिकन्नेति भावः। वनोरचेत्यादाविति। आदिना

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वित्वे पूर्वधस्थाने जश्त्वनिष्पन्नदस्यापि 'लक्ष्ये लक्षणम्' इति न्यायात्। विकारान्यत्वेन (४) न लक्ष्यभेद इत्यन्यत्र प्रपञ्चितम्।

(1) स्थान्यादेशर्योर्फत्नभेदात् (२) 'स्वं रूपम्' (१।१।६८) इत्युक्तेश्च 'तत्स्थानापन्नस्तद्धर्मं लभते, यथा गुरोः स्थाने शिष्यो याज्यकुलानि गत्वाऽग्रासनादीनि लभते' इति लोकन्यायेन स्थानिकार्यमादेशे न स्यादतः स्थानिवत्सूत्रम्। न तु स्थान्यल इति। (३) प्रत्यासत्तिन्यायलब्धमिदम्।

(४) आदेशस्य स्थानिभूतो योऽल्;-

(१) तस्थानिसम्बन्धी च योऽल्; तद्वृत्तिधर्माश्रये नेत्यर्थः। अत एव रेफस्थानिकविसर्गस्य रुशब्दत्वंन स्थानिवत्त्वेनेति 'भोभगो' (८।३।१७) इत्यत्र भाष्ये स्पष्टम्। ऋघातोर्द्वित्वेऽभ्यासस्य 'उरत्' (७।४।६६) अत्त्वेऽरित्यस्य हलादिः शेषस्तु-अरित्यस्य पुनः पूर्वोऽभ्यासः' (६।१।४) इत्यनेनाभ्यासत्त्वात्, तस्यापि (२) द्विरुक्ताधातुपूर्वभागत्वात्। प्रक्रियाज्ञानवतां तथा ज्ञानस्य सुलभत्वात्।

अत एव 'धिन्वन्ति इत्यादाविण् (१) न। उकारवृत्यार्धधातुकत्वस्य वकारेऽनुतिदेशात्। यत्तु अत्रेण्निवृत्तये स्वविधावपि स्थानिवत्तवमपरविधाविति न्यासेन साधितं भाष्ये, सा त्वेकदेश्युक्तिः। 'असिद्धवत्' (६।४।२२) सूत्रेण सिद्धस्याऽऽयन्नासन्नित्यादेस्तत्फलत्वेनोपन्यासात्, अस्यापि 'अचः पूर्वत्वविज्ञानात्' (का० वा०) इति वार्त्तिके पञ्चमीसमासेन सिद्धेः कैयटेनोक्तत्वाच्च। 'प्रदीव्य' इत्यादौ च वलादिलक्षण इण्न। (१) स्थान्यलित्युक्तेः (२) 'बभूविव' इत्यादौ वलादिलक्षणेट्सिद्धिः। न

याजिजोश्चे त्यस्य संग्रहः। विरामो। ननुरज् भक्तिः दत्तः। अश्व इत्यादावपि पूर्वत्र वर्णाभावसत्वादवसाने विद्यमानानांरेफ दकाराणां विसर्ग चर्त्वानुनासि काः स्युरत आह्। स चेति। तत्र प्रमाणमाह। व्याख्यानादिति व्याख्यानमेवाह। अभावस्यापीति। सुप्तिडन्तं पदं। व्याख्यानादिति। तिङ्साह चर्यात्सुप्रत्याहारो न तु सप्तमी बहुवचनमित्यर्थः। शब्दरूपमिति प्रत्यय ग्रहण इति परिभाषालब्धं तदादिरूपमित्यर्थः। स्वप्रकृत्य वयवकेति। श्वश्चप्रकृतिश्चावयवोयस्येत्यर्थः। ननुरदा भ्यामित्यादा वीदूदे दित्यादौच संज्ञाविधाविति निषेधस्या वकाशान्नसामर्थ्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हि तत्र वलादित्वं स्थानितो लभ्यं; किन्तु स्वाश्रयमेव।

यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशो मृग्यते तस्य निमित्तस्य (३) स्थान्यल्साधारणधर्मत्व एव निषेधप्रवृत्तेः। प्रकृते चाऽऽर्द्धधातुकत्ववैकल्यप्रयुक्ताऽप्राप्तिर्न तत्स्थान्यल्साधारणं यच्च तादृशवल्त्वघटितं वलादित्वं न तद्वैकल्यप्रयुक्ताऽप्राप्तिरिति बोद्ध्यम्। प्रत्यासत्त्या च शास्त्रीयकार्ये एव स्थानिवत्त्वं, तेन (४) नायकसिद्धिः।

प्राधान्यात्कार्यातिदेशोऽयम्। शास्त्रातिदेशस्तु कार्यातिदेशादभिन्नरूपः। तस्यापि कार्यफलकत्वादिति 'तृज्वत्' (७।१।९५) सूत्रे कैयटः। भाष्येऽपि 'तत्राऽऽङ्गशास्त्रातिदेशात्सिद्धमाङ्गं यत्कार्यं तदतिदिश्य' इत्युक्त्या तयोरभिन्नरूपत्वं सूचितम्। तत्रानपेक्षितार्थसन्निधानस्तत्तन्निमित्तरूपकार्यव्यवहार एवानेन। कार्यन्तु स्वशास्त्रेणैवेति। अत एव 'रामाय' इत्यादौ 'स्थानिवत्त्वेन सुप्त्वात् सुपि चेति दीर्घः' इति सङ्गच्छते 'परिवीः' इत्यादौ परत्वात् दीर्घ इति च सङ्गच्छते। यद्वा किं चिन्निमित्तवैकल्येऽपि दीर्घादिकार्यमनेन क्रियते। तच्च कार्यं किमित्याकाङ्क्षायां तत्स्वरूपनिर्णयस्य विधिशास्त्रमूलकत्वेन तद्देशेनैव परशास्त्रविहित्वरूपं परत्वं तेषां बोद्ध्यम्। एतदेवाभिप्रेत्यातिदिश्यमानकार्याणामुपदेशदेश एव देश इत्यभियुक्ताः।

अत्राऽऽद्यपक्ष एव भाष्यसम्मतः अत एव 'स्थान्यल्विधिप्रतिषेधे कुरुवधपिबां प्रतिषेधो वक्तव्यः' इत्येतदुपपादनावसरे 'स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयं च लघूपधत्वादि, तत्र लघूपधगुणादिः प्राप्नोति' इत्यादिभाष्योक्तेरिति बोद्ध्यम्। एवं (१) यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तारितिक्तसर्वानिमित्तकत्वमतिदेशस्यापि। अत एवेष्ठवद्भावेनातिदिष्टभत्वस्य वर्णाश्रयत्वमित्यादिव्यवहारः। सर्वातिदेशेष्विदं तुल्यम्।

मित्याशयेन शंकते। नचेत्यादिना। अनुवृत्तेरिति। उपस्थिते रित्यर्थः। पदसमुदायस्य नपदत्वमिति। तेन देवदत्तः पचति भवतीत्यादौ भव तीत्यादेस्तिङ्ङतिङ इति निघातो नेति भावः। नन्विया नित्यादौ सुब्लुगर्थेजायमान प्रातिपदिकत्वेनैवसु बुत्पत्तिः सेत्स्यतीति व्यपदेशिवद्भावरूय तदादितं त्वानयनेन प्रयोजनमत आह्। अतएवेति। व्यपदेशिवद्भावांगीकारादेवेत्यर्थः हलोनंतराः संयोगः तस्येति। आनंतर्य्यस्येत्यर्थः। एवौचित्यादिति। एवेनोपलक्षणस्य व्यावृतिः। सति संभवे विशेषणत्वमेवोचितमिति भावः। अनिष्टापत्तेरिति। सख्ये त्यादौ स्कोरिति लोपाद्यापत्तेरिति भावः। ननुव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तं शास्त्रीयमेव प्रत्यासत्तेः।

स्थानिवदित्युक्तेः (२) सम्बन्धिशब्दमहिम्नैवाऽऽदेशलाभे आदेशग्रहणं श्रौतस्थान्यादेशभावस्यैव ग्रहणमितिशङ्कावारणद्वारा 'एरुः' (३।४।८६) इत्यादौ शब्दानित्यत्ववारणाय 'सर्वे सर्वपदादेशाः' इति न्यायेन कल्प्यमानस्य (१) तेस्तुरित्यानुमानिकादेशस्य सङ्ग्रहार्थम्। तेन 'पचतु' इत्यादेः पदत्वसिद्धिरिति भाष्ये स्पष्टम्।

ननु तोस्तित्त्वमपि छिन्नपुच्छे शुनि श्वत्वव्यवहारवल्लोकन्यायेनैव सिद्धम्। तदुक्तं– 'प्राग्दीव्यतोऽण्' (४।१।८३) इति सूत्रे भाष्ये 'दीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणमिदम्' इत्युक्त्वा 'किमर्थं' विकृतनिर्देशः? (२) एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा 'एकदेशविकृतमनन्यवत्' इति। (३) अत एवात्र विकारोऽशास्त्रीयोऽपि। अत एव श्रायसशब्दादण्णन्ताद् द्विवचने 'श्रायसौ' इत्यत्र वृद्धौ कृतायां सान्तस्योगित्त्वेनानेन न्यायेनाङ्गतया प्राप्तो नुम् पूर्वसम्बन्धिविधित्वेन 'अचः परस्मिन्' (१।१।५७) इति स्थानिवत्त्वेन वारितः 'अचः परस्मिन्' (१।१।५७) इति सूत्रे भाष्ये। एतन्न्यायानाश्रयणे त्वङ्गत्वमेव दुर्लभम्। 'अन्तादिवत्' (६।१।८५) सूत्रे भाष्यकैयटयोरपि 'गुडोदकम्' इत्यादावेकादेशे कृते दशकशब्दस्यानेन न्यायेनो दकशब्दत्वमाश्रित्य 'उदकेऽकेवले' (६।२।९६) इति पूर्वपदान्तोदात्तत्वमुक्तम्। शब्दानित्यत्वं तु रेखागवयन्यायेन समाधेयम्। अनन्यवदित्यस्यान्यवन्नेत्यर्थः। तत्रा ऽन्यसादृश्यनिषेधेऽन्यत्वाभावः सुतरामिति चेत्? न, अर्द्धस्यान्यत्वे जातिव्यञ्जकभूयोऽवयवदर्शनाभावेन तौ तित्त्वप्रतीतेर्न्यायेनानुपपादनात्। किं च तिङ्सञ्ज्ञायास्तिबादिसूत्रोपात्त परिच्छिन्नपरिमाणनिष्ठतया परिच्छिन्नपरिमाणार्थवाचकशब्दानां न्यूनेऽधिके वा शास्त्रव्यापारं विनाऽप्रवृत्तेः 'येन विधिः'

हुवचनाद्वहूनामेव संयोग संज्ञास्यान्नद्वयोरत आह्। हल इतीति। सौत्रमिति। अनेकत्वार्थकं बहुवचनं नतु बहुत्वा र्थकमित्यर्थः। नन्वत्र पक्षेऽपूर्वकल्पनापत्त्या गौरवमत आह्। यद्वेति। वहूनामेवेति। समुदायेवाक्य परिसमाप्तेर्वहूनामेव प्राप्तेतिभावः। चिन्त्यमेवफलाभावादिति। एकस्मिन् प्रयोगे द्वयोर्वहूनां चेत्संज्ञाद्वयस्वीकारे फलाभावादित्यर्थः। एवंच वहूनां समवधानेऽपियत्रद्वयोः संज्ञायाः प्रयोजनमस्ति तत्र द्वयोरेव संज्ञा यत्रतुवहूनां फलमस्ति तत्र वहूनामेवेत्ये कैक यैव संज्ञायाः सकल लक्ष्याणां निर्वाहे एक प्रयोगो निष्फलः। संज्ञाद्वय स्वीकारो न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(१।१।७२) इति सूत्रेऽङ्गसंज्ञासूत्रे च भाष्ये उक्ततया तदभावात्। न्यूनाधिकत्वञ्च वैरूप्यस्योपलक्षणम्।

न च 'तण्डुलान्' इत्यादौ स्थानिवद्भावेन प्रत्ययान्तत्वेऽपि स्वतः प्रत्ययान्तभिन्नत्वात् (३) प्रातिपदिकत्वापत्तिरिति वाच्यम्। अतिदेशस्वभावेना(४) ऽतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावात्। अत एव 'जहि' इत्यादौ जादेशस्यासिद्धत्वे स्वाश्रयो हेर्लुग्न, सिद्धत्वासिद्धत्वयोर्विरोधात्। 'असिद्धवत् (६।४।२२) सूत्रं तु 'शाधि' इत्यादौ स्थानिप्रयुक्ताधिभावसम्पादनेन चरितार्थम्। न च 'अप्रत्ययः' इत्यस्य पर्युदासत्वे शास्त्रीयकार्याभावात्स्थानिवत्त्वं दुर्लभमिति वाच्यम्। 'वे स्कन्देरनिष्ठायाम्' (८।३।७३) इति षत्वविधायके तिडन्तेषु षत्वाभावायाऽऽवश्यकेन न्याय्येन चानिष्ठायामिति पर्युदासेन वृत्यादिसम्मतेन पर्युदासलभ्याशास्त्रीयेऽपि शास्त्रतात्पर्यविषये शास्त्रीयवदतिदेशबोधनात्। 'विस्कन्नः' इत्यादौ हि निष्ठानत्वस्य नित्यतया स्थानिवत्त्वेनैव निष्ठात्वस्य वक्तव्यत्वात्। तस्य प्रसज्यप्रतिषेधत्वे तु लक्ष्यानुसारिव्याख्यानादेवोक्तार्थसिद्धिरिति बोद्धयम्।

केचितु भाष्ये 'तत्स्थानापन्ने तद्धर्मलाभस्य तत्कार्यस्य च लोकन्यायेनैव सिद्धेरयमतिदेशः स्वं रूपमित्येतच्छास्त्रसत्वाद्धन्ते कार्यं वधौ न स्यादिति' इत्युक्तम्। एवञ्चाशास्त्रीयस्यापि धर्मस्यातिदेशो भवत्येव। अतिप्रसङ्गस्तु लक्ष्यानुसारेण क्वचिल्लोकन्यायानाश्रयणेन परिहरणीयो यदि प्राप्नोति। एवञ्च न कश्चिद्दोषः। 'न पदान्त' (१।१।५८) इति सूत्रे 'ब्राह्मणकण्डूतिः' इत्युदाहरणाच्च क्वचित्तदनाश्रयणम्। तत्र हि कण्डूयतेः क्तिचि तत्राल्लोपे तस्य स्थानित्त्वादुवङि (१) यणि वाऽनादिष्टादचः पूर्वत्वे स्थानिद्वारके गृह्यमाणे ऊठ् न स्यादित्याहुः।

युक्तइतिभावः।

एतेन झलादि प्रत्यय परक संयोगाद्योः सकारककारयोर्लोप इति स्कोरित्यस्यार्थान्मिङ्क्त्यादौ वहूनां संयोग संज्ञाया अभवात्सकार लोपोन स्यादित्यपास्तं। हल इति वहुवचनं सौत्रमिति। यद्वेतिच पक्ष द्वये मानमाह। तत्रतत्रेति। प्लुतः स्यादिति। प्रत्येकं संयोगसंज्ञेति पक्षे इदं। समुदाय संज्ञापक्षे तु संयोगांतलोपःस्यादितिबोध्यं। भूतपूर्व लधूपधग्रहणादिति। लघुत्वांशे भूतपूर्वगतिस्वीकारो न तूपधांशेपि। एतेन कुंडितेत्यादावपि ज्ञापकेन भूतपूर्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(२) अत एव अर्थवत्सूत्रशेषे 'अप्रत्ययः' इत्यस्य पर्युदासत्वमेवोक्तं भाष्ये। तत्र पक्षे (३) 'काण्डे' इत्यत्र पूर्वान्तवद्भावेन प्रत्ययान्तभिन्नत्वाद्दोषः शङ्कितो न तु स्वाश्रयाप्रत्ययान्तत्वेन। 'क्षियो दीर्घात्' (८।२।४६) इति सूत्रे भाष्येऽपि अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभाव इति स्फुटम्। तत्र हि 'क्षियः' इत्यत्रेङर्थ प्रकृतिवदतिदेशे स्वाद्यनुत्पत्तिमाशङ्क्य 'एवं तर्हिआतिदेशिकानां स्वाश्रयाणि न निवर्त्तन्ते' इति समाधायातिदिश्यमानधर्मविरुद्धस्वाश्रयनिवृत्तेरावश्यकत्वाभिप्रायेण-'अथाप्येतन्न' इत्याशङ्क्य 'निर्देशसामर्थ्याद्विभक्तिः' इत्युक्तम्। 'असिद्धवत्' (६।४।२२) सूत्रे च कैयटे स्फुटमेतत्। यत्तु 'गाङ्कुटादि' (१।२।१) सूत्रे भाष्ये 'सृजिदृशोः' (६।१।५८) इत्यत्राकितीति पर्युदासात् 'सिसृक्षति' इत्यत्र 'हलन्ताच्च' (१।२।१०) इति कित्त्वातिदेशेऽपि अमागममाशङ्क्य प्रसज्यप्रतिषेधाश्रयणेन समाहितं, तत्तु वार्त्तिककृदुक्तमुपायान्तरं बोद्धव्यम्। 'अनल्विधौ' इति विधिग्रहणात् (१)अलाश्रये विधावित्यर्थात् यत्र विधौ शब्दतः स्थानिस्थान्यवयवा(२)ऽन्यतरालवृत्तिधर्मवतस्तेन तस्मात्तस्य तस्मिंस्तदादेरित्यादिप्रकारेण विशेष्यतया विशेषणतया वा अलाश्रयणं तत्र निषेधः। 'व्यूढोरस्केन' द्यौः' 'द्युभ्यां' 'क इष्टः' 'प्रपठ्य' इत्युदाहरणानि। शब्दत इत्युक्ते 'अग्रहीत्' इत्यादौ (३)'इटीटि' (८।२।२८) इति सिद्ध्यति। दीर्घविधावत्र च इट इति समुदायाश्रयणात्। अन्यथा टस्यानुबन्धत्वादिकारस्यैवोभयत्राश्रयणमित्यल्विधित्वं स्यात्। अत्र सूत्रे विशेषातिदेशोऽपि। अन्यथा इडादेरपि क्त्वः सत्त्वात् वलादित्वस्य तद्विशेषधर्मत्वात् उपस्थितधर्मैस्तद्व्यापकधर्मैश्च विध्याकाङ्क्षापूरणे सति तदतिरिक्तविशेषग्रहणे मानाभाव इत्येतन्न्यायमूलकेन सामान्यातिदेशे (४)विशेषानतिदेशेन सिद्धौ विशेषणतयाऽलाश्रयणे निषेध

लघुपधाश्रयोगुणः स्यादित्यपास्तं लघुत्वमात्रांशे भूतपूर्वत्वाश्रयणेन क्नोःकित्वस्य चारिताार्थ्ये नोपधांशेपितत्स्वीकारे मानाभावा दितिभावः। इतिसंज्ञा प्रकरणं।। (णम्)

इकोगुणवृध्दी व्याख्यानादिति। अन्यस्यासम्भवरुपादित्यर्थः। तथाहि न संज्ञा समान विभक्त्यन्तत्वा भावात्। वृध्दिरादैच् ''इकच अदेङ्गुण इतिसिद्धे इकोगुणवृध्दीत्यारम्भात्। जाग्रो विचिणणल् इत्या रंभाच्च नापि विधिः। सार्वधातुकार्ध धातुकयोरित्यादी नां नियमार्थत्वे गौरवापत्तेः। नियमोपि न। न्येनासिद्धेः।। नाप्यति देशः समान विभक्त्यंतत्वाभावात्। अधिकारोपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्येतत्प्रतिपादकस्यानल इत्येव सिद्धे कृतस्य विधिग्रहणस्य वैयर्थ्यं स्यात्। हला दिक्ङिन्निमित्तकेत्वप्रतिषेधकात्(५)'न ल्यपि' (६।४।६९)) इति लिङ्गाच्च। अनुबन्धकार्ये त्वनल्विधाविति न, अनुबन्धानामनेकान्तत्वात्, एकान्तत्वेऽपि शिद्ग्रहणेन तेषामल्व्यवहाराभावज्ञापनात्। 'नानुबन्धकृतमनेकाल्त्वम्' (प०६) इति ज्ञापयतीति भाष्ये(१)ऽल्त्वव्यवहाराभावबोधनद्वारेति शेषः। ध्वनितञ्चेदं 'क्ङिति च' (१।१।५) 'गाङ् लिटि' (२।४।४९) 'हलः श्नः' (३।१।८३) इति सूत्रेषु भाष्ये। तत्राऽऽद्ये 'यासुटो ङिद्वचनात् ङिदादेशा ङितो न इति ज्ञाप्यते' इत्युक्तम्। द्वितीये गाङो ङित्त्वस्य सानुबन्धकादेशे इत्कार्याभावज्ञापकतोक्ता, तिबाद्यादेशेषु पित्त्वासिद्ध्या दूषितं च ज्ञापकम्। अन्त्ये शानचः शित्त्वस्य सार्वधातुकादेशेऽनुबन्धास्थानिवत्त्वज्ञापकत्वमुक्तम्, उक्तदूषणैरेव दूषितञ्च। अन्यथाऽनल्विधाविति निषेधेन तत्त्वाप्राप्त्या ज्ञापकत्वासङ्गतिः, तिबाद्यादेशेषु पित्त्वाद्यसिद्धिश्चेति बोद्ध्यम्।

अचः पर (१।१।५७)। आदेशग्रहणमनुवर्त्तते, तदनुरोधात् 'अचः' इति स्थानष्ठी। 'परस्मिन्' इत्यादेशविशेषणं, तदाह– परिनिमित्त इत्यादि। (२) अच एवादेश इत्यर्थः। तेन–

(१) मरुतमाष्टे 'मारयति' इत्यादौ वृद्धिः। अत्र सूत्रे–

(१) प्रयोगे योऽच् तत्स्थानिक इत्यार्थः, (२)न तु सूत्रे स्थानित्वेनोपात्ताच्स्थानिक इत्यर्थस्तेन णिलोपादेरनेन स्थानिवत्त्वं सिद्ध्यति। अत एव चङ्परनिर्ह्रासे ण्यन्तात् णिचि 'अवीवदत्' इत्यादिसिद्ध्यर्थो निषेधः सार्थकः। अच इति किम्? (३) आगत्य, मलोपस्य स्थानिवत्त्वात् 'ह्रस्वस्य' (६।१।७१) इति तुग्न स्यात्। परिस्मिन्नति किम्? (४)युवजानिः। निङः स्थानिवत्त्वेन यलोपो न स्यादिति। पूर्वविधाविति किम्? नैधेयः निपूर्वाद्धाञः किप्रत्यये

नयोगविभागसामर्थ्यादिति। नन्वनुवृत्तमपिस्यादिष्वित्यादि सूत्रे पदादि पदं संज्ञापर मेवात आह्। यद्वेति। गुणो गुणोवृद्धिरितीति। गुणवृद्धिपदजन्योपस्थितिविषयो ये गुणवृध्दीत्यर्थः। इति वार्धादिति। एवं चत्यदार्दानाम इत्यादाविति आदिना उदीचामातः स्थानित्यत्र यक्पूर्वाया इत्यस्य संग्रहः।।

इत्यादावपि साक्षादुच्चारितत्वा दुवस्थितिः स्यादिति भावः एवंचेति। अत्र गुणवृद्धि ग्रहणसामर्थ्याद चश्चेत्यत्राजित्यनुवृत्ति सामर्थ्याच्चेत्यर्थः। एवंचेति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आतो लोपे तस्य स्थानिवद्भावाद् (५) त्र्यच्त्वव्यपदेशविरोधात्स्वाश्रयद्व्यच्त्वनिवृत्तौ ढगनापत्तेरिति दिक्।

अत्र स्थानिनि सति यद्भवति, तदादेशेऽपि भवति, स्थानिनि (१) यन्न भवति तदादेशेऽपि नेति भावाभावयोरुभयोरप्यतिदेशः। तत्र भावोदाहरणं 'निगाल्यते' इति, अन्त्योदाहरणं 'पटयति इत्यादि। स्थानिमित्तकं भवत्यादेशनिमित्तकं नेति च तदर्थः। लघूपधत्वसम्पादनद्वारा लोपनिमित्तिका वृद्धिरित्याहुः।

स्थानिभूतादच इति। सूत्रे श्रवणाद्याख्यानाच्च तस्यैव पूर्वत्वेऽवधित्वमिति भावः। 'पूर्वविधौ' इत्यस्य पूर्वसम्बन्धिन्येव शास्त्रविधेये कर्त्तव्ये इत्यर्थः। तेन पूर्वपरयोर्विधौ न। तेन (२) आरतुः' इत्यादौ ऋच्छत्यताम्' (७।४।११) इति गुणस्य सवर्णदीर्घे न स्थानिवत्त्वम्। वस्तुतोऽत्र पूर्वविधिशब्दे तन्त्रम्। एकस्योक्तोऽर्थः, द्वितीये भावे किः। सम्बन्धसामान्यषष्ठ्यन्तपूर्वशब्देन समासः विधिर्भावः पूर्वसम्बन्धिभावे तत्स्थितौ स्थानिवदित्यर्थः। अत एव 'ऐनेयः' इत्यादौ 'यस्येति च' (६।४।१४८) इति लोपे तस्य एव 'न पदान्त' (१।१।५८) सूत्रे पञ्चेन्द्राण्यो देवता अस्य 'पञ्चेन्द्रः' इति 'लुकि न स्थानिवत्' इत्यस्योदाहरणं दत्तं भाष्ये। अन्यथा तत्र पूर्वत्वेन दृष्टस्य सम्बन्धिनः कस्यचिद्विधेयस्याभावात्स्थानिवत्त्वाप्राप्तिरेवेति तदसङ्गतिः स्पष्टैव। प्रकृतसूत्रेपि भाष्ये 'कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिष्टं सङ्गृहीतमिति भावसाधनो विज्ञास्यते पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति स्थानिवत्' इत्युक्तम्। तत्र भावसाधन इत्यस्य (१)सोऽपीत्यर्थः। पूर्वत्वञ्च व्यवहिताव्यहितसाधारणम्, अव्यवहितग्रहणे मानाभावात्, निषेधाच्च। तेन 'पटयति' इति सिद्धम्। प्रकृते च द्वित्वनिषेधे स्थानिवत्त्वप्राप्तिः।

प्रमाणाभावाद्विधीयते इत्यध्याहाराभावे चेत्यर्थः।

इत्यादेरिति। आदिना तस्मादित्युत्तरस्येत्यस्य संग्रहः। ननूदीचामिति सूत्रेस्थे स्थाने ग्रहणमेव मानमत आह्। उदीचामिति। अजिति चानुवर्तर्त इति। एवं चैतदनु वृत्ति सामर्थ्याद्वि धीयते इति अध्याहाराद नुवादेऽप्रवृत्त्या ह्रस्वस्यपिति छेच दीर्घादित्यादावचः स्थानिकस्य ह्रस्वस्य दीर्घस्यतुगित्यादि नार्थ इतिभावः। इतावििति। किमिति। अर्श आद्य चार कावित्ये वास्त्विवति प्रश्नः। मिदचोंत्यात्परः। तृणह्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न पदान्त (१।१।५८)। अत्र द्विर्वचनसवर्णादिग्रहणं वतिघटिता(२)ऽन्यातिदेशानां त्रिपाद्यामपि प्रवृत्तिबोधनार्थम्। तेन 'रामः' इत्यादौ विसर्गादिसिद्धिः अत्र विधिशब्दो (३) भावसाधनः। पदान्तेत्यत्रान्तशब्दश्चरमावयववाची। कर्मषष्ठ्या समासः। तेन 'एषो यन् हसति' इत्यादौ 'एतत्तदोः' (६।१।३२) इति सुलोपो न। इणः शतरि 'यन्' इति रूपम्। तत्र यणः स्थानिवत्त्वात्। उत्वे च न स्थानिवत् अनेन निषेधात्। स्पष्टञ्चेदं भाष्ये इति भाष्यप्रदीपोद्द्योते निरूपितम्। अत्र पदेऽन्त इति सप्तमीसमासो भाष्ये उक्तः, तेन प्रत्यासत्त्या पदे परतः चरमावयवे कार्ये कर्त्तव्ये (१) परपदस्थाजादेशस्यैवानेन स्थानिवत्त्वनिषेध इति (२) वेतस्वान् इत्यादौ न दोषः न चैवमपि 'पूर्वत्रासिद्धीये न स्थानिवत्' (का०वा०) इति निषेधोऽत्र दुर्वारः। पदेऽन्त इत्यर्थेन तत्र स्थानिवत्त्वनिषेधव्यावृत्तिपरभाष्यप्रामाण्येन पूर्वत्रासिद्धे इत्यत्र। (३) पदचरमावयवविधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणात्। अत एव (१) महिष्मान् इत्यत्र जश्त्वं न। सूत्रे जश्पदेन। (२) 'झलां जश् झशि' (८।४।५३) इत्यस्यैव ग्रहणम्, चर्सन्निहितस्यैव ग्रहणौचित्यात्। कार्यकालपक्षेऽपि त्रिपाद्यामन्तरङ्गपरिभाषा न प्रवत्तते इति वक्ष्यते इति न तयाऽस्य सिद्धिः। 'गोचा इत्यादौ 'गतिकारकोपपदानाम्' (प०) इत्यस्यानित्यंत्वेन सुबुत्पत्त्यनन्तरमेव समासः। 'उत्तरपदत्वे च' (का०वा०) इति प्रत्ययलक्षणप्रतिषेधश्च प्रत्यासत्त्योत्तरपदस्य कार्यित्वे एवेति न दोषः। पदे इति (३) पदत्वयोग्योपलक्षणं वा। अत्रेदं भाष्यमपि मानम्। अत्र पदचरमावयवादि (४)साधकः (५)प्रतिबन्धकश्च स्थानिवद्भावो निषिद्ध्यते; विनिगमनाविरहात्। एतत्सूत्रभाष्य 'कर्मेणिङ्' (३।१,३०) इत्यादिसूत्रभाष्यैः 'पूर्वत्रासिद्धे न स्थानिवत्' इत्यवष्टभ्य वरेयलोपस्वर (१)दीर्घग्रहणवर्जं द्विर्वचनादि प्रत्याख्यातमिति लभ्यते। निषेध इति। द्विर्वचनग्रहणात्

इत्यादीति।।

आदिना बंधुनि बहुव्रीहावित्यस्य ग्रहणं। तस्यैवेत्यर्थ (णम्) इति। नत्वंत्य स्याच इत्यर्थः। सुहिन्स्वित्यादौ षत्वापत्तेरितिभावः। प्रसंगश्चासति संभवे इति। एवं चारे त्यादावुकदत्वोत्तरं हलादिः शेषदीर्घयोः कर्तव्ययोरनर्थकस्यापि प्रसंगो संभवाद्ग्राह्य इति भावः। अत्रोरदत्वे कृतेभ्यासत्वंतु तत्स्थानापन्न इति न्याये न बोध्यं। (ध्यम्) न शब्द नित्यता हानिरिति। आरेत्यादौ नित्यत्वाहानिस्तु ऋ ऋ इत्यस्यात्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'पूर्वत्रासिद्धे' इति निषेधाद्वेति भावः।

दकार इति। स्थानत आन्तर्यादिति भावः।

अदर्शनम् (१।१।६०)। स्थाने इति वर्त्तते, प्रसङ्गे सतीति तदर्थः, तदाह-प्रसक्तस्य इति। शास्त्रोऽर्थतो वेति भावः। अत्र दृशिर्ज्ञानसामान्ये। तत्र ज्ञानस्यावर्जनीयत्वेन तत्सामग्र्यन्तर्गता उच्चारणकृता (२) सत्ता निषिद्ध्यते। तत्र प्रत्ययलोपे शास्त्रतोऽर्थतश्च प्रसक्तोच्चारणस्य पोपविधानेन तस्य तस्मिन् विषये (३) ऽनुत्पत्तेरेवान्वाख्यानं प्रत्ययलक्षणार्थमिति बोद्ध्यम्। अर्थस्यैषा सञ्ज्ञा व्याख्यानात्। यत्तु 'प्रसक्तस्येति किं ग्रामे तिष्ठतीत्यादौ 'ल्यब्लोपे' इति पञ्चम्यापत्तेः। अस्ति चात्र ल्यपोऽदर्शनम्। शास्त्रतोऽर्थतश्च न तत्प्रसक्तिरिति न दोषः' इति, तन्न, तेन प्रत्यासत्त्या ल्यबन्तार्थकर्माधिकरणयोरेव पञ्चमीविधानेन तस्यात्राप्राप्तेः। तत्त्वे तु अस्त्येवार्थतो ल्यबन्तस्य प्रसक्तिः। तस्मात् (१)त्रपु इत्यत्र क्विपोऽदर्शनसत्त्वेन प्रत्ययलक्षणेन तुगापत्तिर्दोषः। कृत्प्रत्ययेन प्रकृत्याक्षेपस्तु न। अत्रैव प्रकृतिं विनाऽतिदेशतः प्रत्ययज्ञानसत्त्वेन व्यभिचारात्तदाक्षेपासम्भवात्।

इति पक्षे इति। (२) विनिगमनाविरहादिति भावः। द्वित्वस्य त्रैपादिकत्वात्तत्र न यणो बहिरङ्गासिद्धत्वम्। अत एव 'दद्ध्यत्र' इति भाष्ये उदाहृतम्। धकारयकारयोरिति। तेन विसर्गादिद्वित्वेनाऽऽधिक्येऽपि न क्षतिः। द्विधमिति। द्विधत्वं (३) प्रक्रियायां बोध्यम्। 'एकस्या आकृतेश्चरितः प्रयोगो न द्वितीयस्यास्तृतीयस्याश्च भविष्यति' इति 'कृञ्चानुप्रयुज्यते' (३।१।४०) इति सूत्रभाष्योक्तन्यायेनैकस्य द्वित्वे परस्य तदभावोऽनुचित इति न वाच्यम्, सार्थकानेकविषये तन्न्यायाङ्गीकारात्; यत्रान्याकृतिकरणे भिन्नार्थत्वसम्भावना (४)तद्विषयत्वाच्च। 'हलो यमाम्' (८।४।६४) इति लोपे द्वित्वाभावे चैकधमेव रूपम्।

इत्यादेशेतन अऋ इत्यादे शेतत आऋ आदेशेतत उत्तरस्य गुणे आऋ इत्यस्य स्थाने आ अरित्यादेशे ततः सवर्ण दीर्घेणारिति कल्पनया बोधः। नत्वारेत्यादावुरदत्वे श्रौतस्थानिवत्वेततो ऽत आदेरिति दीर्घ हलादिः शेषयोरपि श्रौतस्थानिवत्वेऽन्यतरस्मिन् कृते भ्यासत्वं लौकिकैक देश विकृतन्याये न सेत्स्यति किमनर्थकस्य अरित्यस्य आरित्यस्य च स्थानिवत्वेनेति चेन्न। अर्ध विकारेण लौकिक न्यायस्याप्रवृत्तेः। ननु गणयतीत्यादावचः परस्मिन्निति स्थानिवत्वं न स्यादत आह्। किंचेति। तत्र प्रमाणमाह। अत एवेति। न चेषो यन्नित्यादावचः परस्मिन्नित्यस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नादिन्या (८।४।४८)। 'यरोऽनुनासिके' (८।४।४५) इत्यतो यर इति वर्त्तते। पुत्रशब्दस्येत्यवयवषष्ठी 'आदिनीशब्दे परे' इति च प्राधान्याद् यर एव विशेषणम्। सूत्रे आदिनीति ङ्यन्तानुकरणं लुप्तसप्तमीकम्। अत एव 'तत्परे च' (का० वा०) इत्यस्याऽऽदिनीशब्दो यस्मात्परस्तत्र परे इत्यर्थं हरदत्तो व्याख्यत्। अद्धातौ माधवोऽप्येवमेव। इद्दृशाक्रोशस्य स्त्रीष्वेव दर्शनाच्च। आक्रोशो निन्दा तदाह– पुत्रादिनि इति। तादृशाक्रोशस्य स्त्रीष्वेव दर्शनादाह-पुत्रहति इति। 'अनचि च' (८।४।४७) इति सिद्धे पुत्रस्य क्तान्ते चेद्धतजग्धयोरेव, आक्रोशे एवेति नियमार्थमिदम्।

संयुक्तेषु इति। 'त्रिप्रभृतिषु (८।४।५०) इति सूत्रे वर्णानां सजातीयानामेव ग्रहणं; परस्परसाहचर्यात्। न च तथाऽचः सम्भवंति। अत एव (१)'अचो रहाभ्याम्' (८।४।४६) इति सार्थकम्। निर्धारणे सप्तमी, 'अच' इत्यनुवर्त्तते, त्रिप्रभृतिसंयुक्तवर्णमध्येऽचः परस्य यरो द्वे वा न स्त इत्यर्थः। तेन 'इन्द्रः' राष्ट्रम्' इत्यत्र नकारषकारयोः प्राप्तद्वित्वस्यैव निषेधविकल्पः। 'अनचि च' (८।४।४६) 'सर्वत्रशाकल्यस्य' (८।४।५१) इत्येव सिद्धे इदं सूत्रद्वयं विकल्पस्य मतभेदप्राप्तव्यवस्थाबोधनार्थमिति बोध्यम्। 'यरोऽनुनासिके' (८।४।४५) इत्यतो वेत्यनुवृत्त्या 'अनचि' (८।४।४७) इत्येव सिद्धे तु सूत्रत्रयमपि तथेति बोद्ध्यम्।

अचो र (८।४।४६)। अच इति श्रुतात्वाद्याख्यानाच्च रहाभ्यां सम्बध्यते। 'तस्मादित्युत्तरस्य' (१।१।६७) इत्येतल्लभ्यमाह– अचः पराभ्याम् इति।

वा यमि इति। 'झयो हः' (८।४।६२) इत्यतोऽन्यतरस्यामित्यनुवृत्तेरिति भावः। 'दीर्घादाचार्याणाम्' (८।४।५२) इत्युत्तरम्' 'अनुस्वारस्य ययि' (८।४।५८) 'वा पदान्तस्य' (८।४।५९) 'तोर्लि (८।४।६०) 'उदःस्थाः' (८।४।६१) 'झयो हो' (८।४।६२)

सावकाशत्वमत आह्।। आंदिति। आदिना न पदांतेत्यस्य संग्रहः। स्पष्टं चेदमिति। सर्वेसर्व पदादेशा इतीत्यर्थः। त्रिमात्रोनेति। स्थानेंतरतम इत्यस्यापूर्व विधाय कत्वाभावादिति भावः। स्थाने ग्रहणे इति। स्थाने ग्रहणं यस्मिन्निति वहुव्रीहिण षष्ठी स्थाने योगेति। सूत्रेत्यर्थः। एकदेशानुवृत्येति। एकदेशस्य षष्ठीपद स्यानुवृत्तिर्ययास्वरितत्व प्रतिज्ञया तयेत्यर्तः। पुनः स्थाने ग्रहणमिति। इदं च ताल्वादि स्थान पर मित्यर्थः। तस्मिन्निति निर्दिष्टे। व्याख्यानादिति। शब्द परत्वेन स्मिन्नाणि चेत्यभैवोपस्थितौ। तस्मिन्निति निर्दिष्टे पूर्वयो र्युष्माकास्माकावणि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'शश्छोऽटि' (८।४।६३) इति षट्सूत्रीपाठोत्तरं 'झलां जश् झशि' (८।४।५३) 'अभ्यासे चर्च' (८।४।५४) 'खरि च' (८।४।५५) 'वाऽवसाने' (८।४।५६) 'अणोऽप्रगृह्यस्य' (८।४।५७) इति पञ्चसूत्र्याः पाठ इति (२) भाष्यसम्मताष्टाध्यायीपाठे तु 'वैकल्पिकत्वं 'लण्' (मा० सू० ६) सूत्रे भाष्ये।

आदित्य इति। आदित्यशब्दा(३)च्छेषार्थण्यान्ताद्देवतार्थे ण्यः। 'यस्येति च' (६।४।१४८) इत्यल्लोपेऽनेन यलोपः। 'आपत्यस्य' (६।४।१५१) इति तु न। आपत्यत्वाभावात्। हल इति किम्? शय्या। यमामिति किम्? आर्ध्नोत्। यमीति किम्? रामाभ्याम्।

एचोऽय (६।१।७८)। 'इचोऽचि यणयवायावः' 'अवावौ यि प्रत्यये' इति सूत्रयितुमुचितमित्याहुः। यथासङ्ख्यसूत्रलब्धमर्थमाह-क्रमाद् इति। उदात्तादिगुणयुक्तानामन्यगुणकव्यावृत्तिस्तु स्थानेऽन्तरमपरिभाषया बोद्ध्या। एतदेवाभिप्रेत्य यथासङ्ख्यसूत्रे भाष्ये प्रकृतसूत्रे 'स्थानेऽन्तरतम'-(१।१।५०) सूत्रेण व्यवस्थोक्ता-(१)'संवृतावर्णस्य संवृतावर्णो विवृतावर्णस्य विवृतावर्ण' इति। एतद्भाष्यप्रामाण्येन एओ इत्यनयोरकारांशे संवृतत्वम्; इतरांशे विवृततरत्वं, तदुपरागाच्च न संवृतत्वस्य पृथग् ग्रहणम्। ऐऔ इत्यनयोस्त्वकारांशेऽपि विवृतत्वमेवेति बोद्धयम्।

तस्य लो (१।३।६)। 'उपदेशेऽज्' (१।३।२) इत्यत इदित्यनुवृत्त्या विभक्तिविपरिणामेन च सिद्धौ 'तस्य' ग्रहणं सर्वलोपार्थम्। तेन ञिटुडूनामन्त्यस्य लोपो न। 'नाऽनर्थके' (प०) इति परिभाषा तु भाष्ये प्रत्याख्यातैवेति दिक्। न भवति इति। फलाभावादिति भावः।

चेत्येवलाघवात्कर्तव्ये एतदारंभादेतत्साह चर्यादुत्तरत्रापि शब्द परत्वाभाव बोधनाच्चेति भावः। अन्यथा अर्थपरत्वानंगीकारे। इत्यैवेति। इदमुपलक्षणं तस्मान्नुड्द्विहल इत्यस्यापि। ननु सप्तमी निर्दिष्ट इत्येवास्तु इत्यत आह्। तद्बोध्यार्थस्येति। ननु तच्छब्दस्य सप्तम्यंतस्य तदवाचकत्वेन इदमसंगतमत आह्। इति शब्द इति। तस्य तच्छव्दस्य तदर्थपरत्वमिति। सप्तम्यंत पदार्थपरत्वमित्यर्थः। एवं वच्छब्दस्य सप्तम्यंतार्थ परत्वे च। ननु कर्तृकर्मणोरित्यादाव व्येतदुपस्थितिः स्यादत आह्। अत्रसूत्रे इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वान्तो (६।१।७६)। 'येन विधिः' (१।१।७२) इत्यस्यापवादभूतय (२) 'तस्मान्नुडचि' (६।३।७४) इत्याद्यर्थमावश्यिकया- (१) वाचनिक्या 'यस्मिन्विधिस्तदादावल्ग्रहणे' (प०) इति वार्त्तिककृदुक्त(२)परिभाषय लब्धमर्थमाह– यकारादाविति। ओदौतोरिति। 'ओदौतोरिति वक्तव्यम्' इतिवार्त्तिकमूलाद्याख्यानादिति भावः। 'पूर्वसूत्रे वान्तौ प्रतितयोरेव स्थानित्वनिर्णयात्' इति 'स्थानेऽन्तरतम' (१।१।५०) सूत्रस्थकैयटोक्तं तु न युक्तम्। वातज्ञानाय सूत्रपर्यालोचनस्याऽऽवश्यकत्वेऽपि तद्वाक्यार्थपर्यालोचने मानाभावात्। 'यथासंख्य' (१।३।१०) सूत्रसहकारेण(३)बोधोत्तरं तयोस्तत्त्वनिर्णयात्। अन्तरतमपरिभाषया निर्वाहे तु लक्ष्यपर्यालोचनकाले तन्निर्णयः। अत एव 'पूर्वसूत्रे स्थानिविशेषलाभो यथासंख्यसम्बन्धात्, इह तु निमित्ताभावात्तल्लाभाभावः' इति षष्ठे (४)प्रकृतसूत्रे कैयटः। गव्यमिति। भत्वाद्वलोपो न। यीति किम्? गोभ्याम्। प्रत्यये किम्? गोयानम्।

ननु 'गव्यूतिः' इत्यत्र वस्य 'हलि सर्वेषाम्' (८।३।२२) इति (१) 'लोपः शाकल्यस्य' (८।३।१९) इति वा लोपः स्यादत आह-वान्त इत्यत्रेति। न च विशेषविहितेन कार्यित्वेन लोपे वस्य निमित्तत्वबाध इति वाच्यम्। निमित्तत्वानाक्रान्ते विषये (२) कार्यित्वस्य चारितार्थ्यात्। तक्रकौण्डिन्यन्यायश्चानवकाशविषयो (३) विधेयविषयश्चेति स्पष्टं 'तद्धितेष्वचाम्' (७।२।११७) इति सूत्रे यङ्विधायके च भाष्ये। अन्त्ये 'उत्तरयोर्विग्रहेण विशेषासम्प्रत्ययान्नित्यग्रहणानर्थक्यं, क्रियासमभिहारे च नैतेभ्यो यङा भवितव्यम्' इति भाष्ये चेन विशेषासम्प्रत्यादित्यनुकृष्यते। अन्यथा तक्रकोण्डिन्यन्यायेन सिद्धे विशेषासम्प्रत्ययादित्यनुकर्षकचकारवैयर्थ्यापत्तिः। निरूपयिष्यते चेदं ङन्ते। तस्य च

तत्र मानमाह। अतएवेति, फलमाह अतएवेति। विफल इमीति उत्तरत्रैव निर्दिष्टादितिवक्तव्यमित्यर्थः। उत्तरांशेति। उत्तरस्येत्यंशेत्यर्थः। तत्र फलमाह् अत इति। मानमाह। अतएवेति। षष्ठ्यंश विकलेति। छंदसि परेपि व्यवहिताश्चेत्येव सामान्य पेक्षमंश विकलायाः परिभाषायाः प्रवृत्तौ ज्ञापकमितिभावः। अलोंत्यस्य।। षष्ठिनिर्दिष्टेति।। निर्दिष्टस्येस्या ध्याहृत्यतद्योगे षष्ठीपदं तृतीयांतेन विपरिणम्यते तेनायमर्थ लाभ इति भावः। षष्ठतंमिति। वेन संयोगांतस्य लोपः पादस्यलोप इत्यादौ नाव्याप्तिरिति भावः। अनेकालः। ननु भूतपूर्व गति स्वीकारे गौरवमत आह्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वार्त्तिकेऽनुवृत्त्या यूतौ श्रूयमाणवकारान्त आदेश इत्यर्थः। सूत्रे तु न फलं, गव्यादौ भत्वेन वान्तस्य पदत्वाभावात्; लव्ये स्वत एव तदभावात् लोपाप्राप्तेः। गोशब्दादिभ्यः क्यजादावपि 'नः क्ये' (१।४।१५) इति नियमेन पूर्वस्य पदत्वाभावात्। एवं तर्हि वार्तिके एव प्रश्लेष उचित इत्याशयेनाह– छकाराद्वेति। 'लोपो व्योः' (६।१।६६) इति सूत्रे वकारप्रत्याख्यानं तु लौकिकोदाहरणाभावेन तदर्थतया बोद्धव्यम्। अत एव 'इको गुण' (१।१।३) इति सूत्रे 'अतो ल्रान्तस्य' (७।२।२) इत्यत्र लुप्तनिर्दिष्टो वकार इत्युक्तं भाष्ये। शास्त्रीयसौत्रप्रयोगार्थं तदिति तदाशय। न चैवं 'विष्णवे' इत्यादौ 'तस्य लोपः' (१।३।९) इति दुर्वारं, गव्यूतावुच्चारणस्य चारितार्थ्यादिति वाच्यम्। 'गवि च युक्ते' (का० वा०) इत्यादिनिर्देशैर्वारणात्।

परे तु सा पूर्वपक्ष्युक्तिरिति न वकारप्रश्लेषो लोपेनोचितः किञ्च छन्दसि सर्वविधीनां व्यवस्थितत्वान्न वलोपप्रसक्तिस्तत्रत्ये गव्यूतौ। अध्वपरिमाणेऽपि सञ्ज्ञाशब्दोऽयम्, तत्र (१)सञ्ज्ञात्वभङ्गापत्तेर्न वलोपः। यथा 'रघुनाथ' इति सञ्ज्ञाशब्दे नित्यस्यापि णत्वस्याभावः, सर्वनामशब्दे णत्वाऽऽशङ्का तु तस्य सञ्ज्ञिविशेषे आधुनिकविनियोगात् शास्त्रानुसारिशब्दस्यैव विनियोग उचित इत्यभिप्रायेण। निरूपितञ्चैतत्सर्वादिसूत्रे भाष्यप्रदीपोद्द्योते इत्याहुः। निरूपयिष्यते चेदं 'पूर्वपदात्सञ्ज्ञायाम्' (८।४।३) इति सूत्रे।

(२) धातोस्त (६।१।८०)। धातोरित्यस्याभावे (३) प्रातिपदिकमात्रविषयो नियमः स्यात्, तथाच 'गव्यम्' इत्यत्र न स्यात्; 'ओयते' इत्यत्र च स्यात्। तदभावे सामान्यतो नियमापादनन्तु योगविभागैवकारवैयर्थ्यापत्तेरयुक्तम्। 'तन्निमित्तस्य चेद्धातोरेवे' ति नियमे बाभ्रव्यासिद्धेस्तद्वारणाय एवकारः। लव्यमित्यादि। अत्र गुणवृद्ध्योर्यण्णयन्निमित्तकत्वेनैचो यादिप्रत्ययनिमित्तकता। तन्निमित्तस्येति किमिति। सूत्रमेव किमर्थमिति प्रश्नः। ओयत इति।

किंचेति। अनंतरस्येतिन्यायेनेति।। बाध्य विशेष चिंतायामित्यर्थः।।

इत्यस्यैव निषेधापत्तेरिति। तथाच जरसावित्यादावलोंत्य परिभाषायामन्त्य जरसादेशः स्यादिति भावः। ननुङिच्चेत्यारंभात् सामान्य चिंतामाश्रित्यालोंत्यस्येत्यस्या पिबाधान्न दोष इति चेन्न। निर्दिश्यमानपरिभाषाया अपिबाधापत्तौ निर्जरसावित्यादावंगस्या देशापत्तेः। न चात्र इत्यनुवर्त्य तत्सामर्थ्यदलों त्यस्येत्यस्यापि वाध इति वाच्यं।। एवमप्यणिओर नार्षयोरित्यनेन निर्दिश्यमानपरिभाषयाऽणिञोः ष्यङ्नस्यात्। रिङ्रीङोर्ङित्वस्य कर्तव्यता स्वाच्च।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेञः कर्मणि लटि यकि यजादित्वात्सम्प्रसारणे 'अकृत्सार्व' (७।४।२५) इति दीर्घे आङा सहाऽऽद्गुणः। 'न धा-तुलोप' (१।१।४) सूत्रभाष्यरीत्या बहिर्भूतधातूपसर्गकार्यस्य बहिरङ्गत्वाद्वान्तादेशे गुणोऽसिद्ध (१) इत्यरूचेराह-औयतेति। तस्मादेव कर्मणि लङि आडागमे वृद्धिः पूर्ववत्।

क्षय्यज (६।१।८१)। क्षि क्षये, जि जये, इत्यनयोरेव। ग्रहणं न तु क्षीष् हिंसायाम्, क्षै क्षये, इत्यनयोर्व्याख्यानात्। अत एव 'क्षियोरेवैचः' इति भाष्ये उक्तम्।

तस्मै प्रेति। क्रयार्थे वस्तुनि क्रय्य इति निपात्यते इत्यर्थो, व्याख्यानाद् गुणभूतस्यापि तदा परामर्शः। क्रयार्थत्वञ्च फलोपधानरूपं तदर्थे इति विशेषणात्, तदाह-क्रेतार इति। योग्यतामात्रग्रहणे त्वव्यावर्तकं तत्स्यादिति भावः। केचित्तु स्वीयं धान्यादि दत्त्वा यत्र तन्मूल्यग्रहणं, तत्र धान्यं क्रय्यम्। यत्र तु स्वयं द्रव्यं दत्त्वा यत्र तन्मूल्यग्रहणं, तत्र धान्यं क्रेयम्। (२) द्रव्ये तु न क्रय्यत्वं नापि क्रेयत्वं; किन्तु धान्यादेरेव, शक्तिस्वभावात्, भाष्यस्वरसोऽप्येवमेवेत्याहुः।

लोप शा (८।३।१९)। 'भोभगोअघोअपूर्वस्य' इति अशीति चानुवर्त्तते, तत्र ओकारान्तेषु 'ओतो गार्ग्यस्य' (८।३।२०) इति बाधकमित्याशयेनाह– अवर्णपूर्वयोरिति। व्योरित्यनुवृत्तावपि वर्णसमाम्नाये यकारस्य प्राक्पाठात्तत्क्रमेणाह–यवयोरिति। 'स तस्मा आचष्ट' इत्यादिभाष्यप्रयोगादत्र रोरित्यस्यासम्बन्धः। इदं सूत्रं लघुप्रयत्ने न (३)शाकटायनमते तयोर्विधानेन शाकल्यमते तदभावात्। अवर्णेति किम्? गौर्यत्र। पदान्तयोः किम्? हरये।

अशि किम्? वृक्षं वेतीति वृक्षवीः, क्विप्, तमाचष्टे इति ण्यन्ताद्विच्। वृक्षव् करोति।

स्वरितेनाधिकारः। ननुस्वरितत्वस्य दोषविशेष रूपत्वे गौरवमत आह्। स्वररूपमिति।। परमिति। रामेभ्यइत्यादौ पूर्व दीर्घात् परमेत्वमित्यर्थः। परान्नित्यं बलवत्। तुदतीत्यादौ तत्र पराद्गुणान्नित्यत्वाच्छ प्रत्ययपादिर्भवति।

परादंतरंगं। अयज इन्द्रं। परात्सवर्ण दीर्घादंतरंग माद्गुणः। नित्यादंतरंगं ग्रामणि नीनुमः पूर्वहस्वः।। एवं परनित्यातरंगेभ्यः प्रतिपदोक्तं बलवत्तस्य बलवत्त्वे बीजंतु शिघ्रो पस्थितिकत्वं। मयङ्वैतयो रिति सूत्रस्थमेतयोरिति ज्ञापकमप्यत्र।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्विपि तूठ् स्यात्। विज्निमित्तको 'लोपो व्योः (६।१।६६) इति लोपस्तु न, णिलोपटिलोपयोः स्थानिवत्त्वात्, प्रातिपदिकाण्णिजुत्पत्त्या पदत्वाभावेन परपदस्थाजादेशाभावेन च लोपस्य पदचरमावयवत्वाभावेन च 'न पदान्त' (१।१।५८) इति निषेधाप्रवृत्तेः। (१)एतेन 'वनिमित्तको वलोपोऽत्र दुर्वार' इत्यपास्तम्। किञ्च स्थानिवत्त्वनिषेधं विनाऽस्य पदान्तत्वासिद्ध्याऽत्र निषेधाप्रवृत्तिः। स्थानिवत्त्वनिषेधज्ञाने पदान्तत्वज्ञानं, तन्निर्णये च स्थानिवत्त्वाभावज्ञानमित्यन्योन्याश्रयस्तत्राप्रवृत्तौ मानम्। इदञ्च 'न पदान्त' (१।१।५८) सूत्रे भाष्ये स्पष्टम्।

न च पदसञ्ज्ञायां टिलोपस्य स्थानिवत्त्वाद्वस्य पदान्तत्वमेव नास्तीत्यशीति व्यर्थमिति वाच्यम्, 'पूर्वत्रासिद्धीये' इति निषेधात्। साक्षात् पदत्वादिद्वारकपरम्परया वा पूर्वत्रासिद्धीयप्रापकस्य तत्प्रतिबन्धकस्य वाऽतिदेशस्य तेन (२)निषेधादिति केचित्।

परे तु 'न पदान्ता (३)हलोऽणः सन्ति' इति लण्सूत्रस्थभाष्याद् वृक्ष वादेरनभिधानमेव। 'भोभगो' इति सूत्रेऽग्रहणमनर्थकमन्यत्राभावादिति वार्त्तिकाच्च। अशोन्यत्र तन्निमित्तकार्यिणोऽभावादिति तदर्थः। न ह्यन्यत्र रुरस्तीति तद्याख्यानभाष्ये रुपग्रहणुपलक्षणम्। एतदाशयमजानानैकदेशिना 'उत्तरार्थं 'हलि सर्वेषाम्' (८।३।२२) इति 'वृक्षव् करोति' इत्यत्र मा भूत्' इत्युक्तम्। अस्य चैकदेश्युक्तित्वं 'लण्' (मा. सू. ६) सूत्रस्थोक्तभाष्यविरोधेन स्पष्टमेव कैयटेनोक्तम्। अत एव भाष्ये उत्तरार्थमित्युक्त्वा 'हलि सर्वेषाम्' (८।३।२२) इत्यत्रैव प्रयोजनमुंक्तम्। 'हलि सर्वेषाम्' (३।८।२२) इत्यत्र वकारनिवृत्यैवात्र तद्वारणसम्भवान्न तत्राप्यश्ग्रहणस्य प्रयोजनमिति तद्भाष्यमेकदेश्युक्तिरेवेत्याहुः।

तथाहि तद्योग विभागेन पुनर्विधानद्वारा बिल्वा द्यण्बाधनार्थं। न चार्थद्वयलाभार्थं। अधिकारा देवतत्सिद्धे। अन्यथा परत्वान्मयटित द्वैयर्थ स्पष्टमेव। तदुक्तं भाष्येऽधि कारादेवार्थ द्वयलाभे एतयोरित्य पवाद विषये पिप्रवृत्यर्थं। तेन बिल्वमयं बैल्व मितिसिध्यति। परात्प्रतिपदोक्तं। औपानह्यंचर्म परिमयि चर्मणोञिति बाधित्वा ऋषभोपानहोर्त्र्य इति। ज्यः। नित्यात्प्रतिपदोक्तं। स्वांपिनुमंबा धित्वाऽसृन्निति दीर्घः।। अंतरंगत्वात्प्रति पदोक्तं।। सेदुषः। इटंबाधित्वासंप्रसारणं।। बलवानिति।। पूर्व पर नित्यांतरंग प्रतिपदोक्तेभ्य इत्यर्थः।। पूर्वादपवादे।। दुग्ध्वं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कानि सन्तीति। वाक्यसंस्कारपक्षेऽपि पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वमादायान्तरङ्गाणां पूर्वं प्रवृत्तिरितीकारादेः स्थानिभूतादचः पूर्वत्वं बोद्धयम्।

एकः पूर्व (६।१।८४)। गुण इत्यादे(१) र्विधेयसमर्पकत्वेन तत्रैकत्वसंख्याया विवक्षणेनोभयोः पूर्वपरयोरेकवाक्यतयैव विधेयान्वयेन चानयोः पूलयोः कटं कुर्वित्यादित इवोभयसम्बध्येकविधेयस्यैव प्रतीतेरेकग्रहणं(२) स्पष्टार्थम्।

उरण (१।१।५१)। उः स्थाने इति 'षष्ठी स्थाने' (१।१।४९) इति परिभाषया लब्धम्, उदात्तस्वरितयोर्यणः' इतिवत्। 'स्थानेऽन्तरतम' इत्यतः स्थानेग्रहणमनुवर्त्तते, तस्य लक्षणया प्रसङ्गावस्थायामित्यर्थस्तदाह-रपरः सन्नेवेति। रपर इत्यवयववाचिना परशब्देन षष्ठ्यर्थे बहुब्रीहिस्तेनास्यावयवत्वात् यदागमा इति न्यायेन विशिष्टस्य गुणवृद्धित्वेन ऋकारस्य गुणवृद्धी अरारावेवेति नियमोपपत्तिः। अत एव 'रदाभ्याम्' (८।२।४१) इति सूत्रे 'थलि च सेटि' (६।४।।१२१) इति सूत्रे च भाष्ये – 'गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसञ्ज्ञकोऽभिनिर्वत्तते' इत्युक्तम्। उः स्थानेऽण् प्रसज्यमान एव रपरो भवति, पूर्वभक्तश्च रेफ इत्यर्थ इति कैयटः। अवयवत्वं वाचनिकमेव तत्सादृश्यबोधनपर्यवसायि। अन्यथा वर्णस्य वर्णान्तरावयवत्वं 'हलन्ताच्च' (१।२।१०) इति सूत्रभाष्योक्तरीत्याऽसङ्गतं स्यात्। पञ्चम्यर्थे बहुब्रीहिणाऽनवयवत्वे तु गणवृद्धिशब्देनाकारादेरेव रेफपरस्यैतदेकवाक्यतया विधानं स्यात्। गुणत्वादिकन्त्वकारादिनिष्ठमेव स्यादित्युक्तनियमानुपपत्तिः।

अत एव 'वव्रे' इत्यादौ 'हलादिः शेष' (७।४।६०) सिद्धिः।

ढत्वं बाधित्वाधत्वं परादपवादः पचंति दीर्घबाधित्वा पररूपं नित्यादपवादौ रमायाँ याटं बाधित्वाऽम्।। अंतरंगादपवोदो हे गार्ग इमातक णं बाधित्वा मातजादेशः।। प्रति पदोक्ताप वादोऽमीमृजत्। बृद्धिं वाधित्वाऋदादेशः बीहरंगापोहन रूपत्वादिति। बहिरंगस्यापोहनं दूरीकरण रूपं यस्य तद्रूप त्वादित्यर्थः। इतिपरिभाषाप्रकरणं।

कार्य शब्दबाद इति। नित्य शब्दत्व पक्षे इक् घटितस्य प्रसंगे यण्घटितः साध्वित्यर्थो बोध्यः। एतेनेति।। जाति पक्षे यथासंख्याश्रयेणनेत्यर्थः। आंतरतम्याश्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभ्यासावयवस्यैवानादेस्ते निवृत्तेः। एतेनाणमनूद्य रपरत्वं विधीयते इति परास्तम्। उक्तनियमानुपपत्तेः। अत्र पक्षे क्व रपरत्वं क्व लपरत्वमिति व्यवस्थाऽनुपपत्तिस्तु न। रेफवत्स्थानिकस्य रेफपरत्वं, लकारवत्स्थानिकस्य लपरत्वमिति व्यवस्थासम्भवात्। तत्रान्तरतम्यादिति। स्थानत इति भावः। रेफादिद्वाराऽऽदेशस्यापि मूर्धादिस्थानत्वात्। तत्र तत्राऽऽदेशानेव रलपरानुच्चार्येदं सूत्रं न कार्यमिति तु न वाच्यम्। 'आप्ज्ञप्यृधामीत्' (७।४।५५) 'भृञामित्' (७।४।७६) इत्यादौ दोषापत्तेः। अत्राण् पूर्वेणैव, प्रशास्तृणामिति निर्देशात्। वस्तुतो रप्रत्याहाराभावेन 'रपर' इत्यस्य स्थाने 'र्लपर' इति पठनीयमिति 'लपरत्वं वक्ष्यामि' इति तुल्यास्यसूत्रभाष्याल्लभ्यते।

झरो झ (८।४।६५) 'झयो हः' (८।४।६२) इत्यतो 'वाऽवसाने' (८।४।५६) इत्यतो वा विकल्पोऽनुवर्त्तते। हयवरट्सूत्रशेषे भाष्ये स्पष्टमिदम्। लोपे इति। ऋधधातोर्झर इति भावः। असतीति। 'द्वित्वाभाव' इत्यनुकृष्यते। त्रिधमिति त्रिधकारत्वं प्रक्रियाभिप्रायेण।

न च द्वित्वभिन्ने पूर्वत्रकर्त्तव्ये परमसिद्धमित्यर्थकेन 'पूर्वत्रासिद्धमद्वित्वे' (प० भा०) इत्यनेन धातुधकारस्य जश्त्वे दस्य द्वित्वमिति इदमयुक्तमिति वाच्यम्। फले विशेषाभावेन तदनादरणात्। न ह्यत्र जश्त्वात्पूर्वमनन्तरं वा द्वित्वे रूपे विशेषोऽस्ति। तदनन्तरज्जश्त्वप्रवृत्तेः। तस्य परिभाषात्वेन फलविशेषे एव प्रवृत्तेरित्यन्यत्र विस्तरः। पञ्चमीति। विनिगमकाभावादिति भावः। अत एवास्य वैकल्पिकत्वम्।

कृष्णैकेति। कृष्णेति सम्बुद्ध्यन्तं पृथक्पदमिति कश्चित्।

एत्येध (६।१।८९) ऊठ् अत्राऽऽदेश एव; व्याख्यानात्। एचीति नोठो

यणेऽपि दोषाभावमाह स्थानत इति। ननु सप्तम्यंत पाठे दोष एवेत्यत आह्। स्थानऽन्त रतम इति। चोविध्यर्थ इति। अतएवाचः परस्यैव यरो द्विर्वचनं भवति न यत्र कुत्रेति भावः। तत्र प्रमाणमाह। ध्वंनित चेदमिति। एतेनानचीति निषेध सामर्थ्याद्विध्यनुमानं। तस्य च यत्र कुत्रापि विद्यमानस्य यरोद्वित्यं भवतीत्यर्थः। निषेधस्यत्वचः परस्य यरोचिपरे द्वित्वं नेत्यर्थ इत्यपास्तं। नन्वनचीति पर्युदासे नापि भाष्यं सुयोजनमत आह्। अवसान इति। प्रसज्यप्रतिषेध इति। हलीति वक्तव्येऽनचीति गौरव करण सामर्थ्यादितिभावः। द्विरुक्त धातुपूर्वमणत्वादिति। तत्स्थानापन्न इति लौकिक न्याये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशेषणमूठस्तत्त्वासम्भवात्। 'एतेधत्योः' (६।१।८९) इति योगं विभज्य तयोरेवैचीति विशेषस्य भाष्ये कृतत्वाच्च तदाह-एजाद्योरिति। एतिरत्र इणेव प्रसिद्धत्वात्। 'उपैति इत्यादौ 'वृद्धिरेचि' (६।१।८८) इत्यनेन गतार्थत्वमाशङ्क्याह-पररूपगुणेति। एत्येधत्योरेङिपररूपस्योठि चाऽऽद्गुणस्येति विवेकः।

उपैधते इति। अत्र न सर्वादिशः। एत्येधत्याद्यवयवेऽचीत्येवं क्रमेण (४) सूत्राणामर्थात्। अयमेवार्थ इति प्रत्यलक्षणसूत्रस्य भाष्यस्वरसः। वृक्षे शाखेतिवदेत्येधत्यूठ्सु (६।१।८९) इति सप्तमी बोध्या। प्रष्ठौह। प्रष्ठं वहतीत्यर्थे वहेण्वौ ततः शस्यूठि सम्प्रसारणे पूर्वरूपेऽनेन वृद्धिः।

प्रेदिधदिति। परे तु 'इणीकारादौ प्रतिषेधः' (का०बा०) इति वार्त्तिके एधत्यनुपादानात् 'न त्वेधतेरव्यभिचारात्' इतिवृत्तेश्चास्यानभिधानमेव। 'एत्येधत्योरेचीति विशेषणम्' इति भाष्यस्यैधत्यंशे सम्भवमात्रेणोपरञ्जकतया विशेषणमित्याशय इत्याहुः। 'उपैधयत' इत्यादावपि वृद्धिर्भवत्येव। प्रकृतिभागस्यैध्रूपत्वात्। किं च एत्येधत्यवयवेऽचीत्यर्थः प्रत्ययलक्षणसूत्रभाष्यसम्मत इति अत्र न दोषः।

पुरस्तादिति। 'पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान्' इति न्यायः। अवश्यं स्वपरस्मिन्बाधनीये भेदेनापेक्षायां प्रथमोपस्थितबाधेनाऽऽकाङ्क्षानिर्वृत्तिर्हि तद्बीजम्। असाधुरेविति। आङिणोरेकादेशस्य पूर्वान्ततयाऽऽङि पररूपेण बाधादिति भावः। अर्थवद्ग्रहणे इति। अस्या बीजं 'स्वं रूपम्' (१।१।६८) इति सूत्रे उक्तम्। पररूपे प्राप्ते इति। 'पूर्वन्धातुः साधनेन युज्यते' इति सिद्धान्तादिति भावः।

नेति भावः। स्थान्यल साधारण धर्मत्व एवेति। स्थान्यल् वृत्ति धर्मत्व एवेत्यर्थः। न ततस्थान्यलसाधारणमिति। नतत्स्थान्यलवृत्तीत्यर्थः। नायक सिद्धिरिति। अन्यथा स्थानिन्यायादेशाप्राप्त्या देशेप्यभावातिदेशः स्यादिति भावः। भाष्ये पीति। तृज्वत्सूत्र इत्यर्थः। तत्र चिण्वद् भावे। तत्रेति कार्या तिदेश इत्यर्थः।

अनपेक्षितार्थ सन्निधानः। अनपेक्षित कार्य सन्निधानः। अर्थ शब्दः प्रयोजन वाचीति भावः। शास्त्रातिदेशे त्वादेशे स्थानिधर्माभावेपिस्थानिवद् भावादादेशेशास्त्रं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपसर्गादृति (६।१।६१)। तपकरणादुप ऋकारीयतीत्यादौ 'वा सुपि' (६।१।६२) इति न वृद्धि। सौत्रऋृतिस्तु न गृह्यते; व्याख्यानात्। आदित्यनुवृत्तेन तदन्तविधिरित्याह– अवर्णान्तादिति। 'यस्मिन्विधिः' इति परिभाषयाऽऽह – ऋकारादाविति। पूर्वपरयोस्तयोः समुदाययोरन्त्याद्योर्वर्णयोरेकादेश इत्यर्थः। उपसर्गावयवाकाराद्धात्ववयवे ऋकारे तयोः पूर्वपरयोर्वृद्धिरित्यु चितम्। गतेरिति नु नोक्तम्। 'अच्छर्छति' इत्यादौ दोषात्।

'अन्ता (६।१।८५)। इह पूर्वपरयोरिति वर्तते; यथासंख्यञ्च, अन्तादिशब्दावुपस्थितैकादेशस्थानिपरौ। पूर्वपरशब्दौ च तद्घटित समुदायपरौ। एवञ्च पूर्वस्य परस्य समुदायस्यान्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहाराः प्रातिपदिकत्वसुबन्तत्वप्रत्ययत्वादयस्ते कृतैकादेशस्य भवन्ति, न तु तद्वर्णमात्रवृत्तयोऽत्वह्रस्वत्वादय इत्यर्थस्तत्फलितमाह्योऽयमित्यादि। तेन रामावित्यादौ परादिवत्त्वेन औ इत्यस्य सुस्त्वे पूर्वमान्तस्यैकदेशविकृतन्यायेन प्रकृतित्वे यस्माद्विहितस्तदादितदन्तत्वमार्थसमाजग्रस्तमिति पदत्वसिद्धिः। तद्वर्णमात्रवृत्तिधर्मानतिदेशात् खट्वाभिरित्यत्राऽत्वनिबन्धन ऐस्न, अयजे इन्द्रमित्यादौ सवर्णदीर्घश्च न। अत एव तुक्यसिद्धवचनं चरितार्थम्। अन्यथा 'अधीत्य' इत्यादावादिवत्त्वेन ह्रस्वत्वप्रयुक्ततुक्सिद्धौ तद्वैयर्थ्यं स्पष्टमेव तदुक्तम्– ;वर्णाश्रये चान्तादिवत्त्वप्रतिषेधो वक्तव्योः न वाऽताद्रूप्यातिदेशात्' इति। अन्तादिवर्णमात्रवृत्तिधर्मानतिदेशादिति तदर्थः। 'क्षीरपेण' इत्यादावेकारविशिष्टे एकाजुत्तरपदत्वं भवत्येव। स्थानिवद्भावेन तु नैतल्लभ्यम्। अप्राधान्येनालाश्रयणात्। किं च एकादेशे वर्णयोरेव स्थानित्यं न समुदायस्येति भी ई मियः इत्यादावेकादेशविशिष्टे धातुत्वानापत्तिः। धातुत्वस्यैकादेशस्थानिधर्मत्वाभावात्।

प्रवर्तत इत्येवार्थ इति तत्त्वं। नन्वम पक्षे कार्याति देश इति अक्षर स्वारस्य मंगोऽत आह्। यद्वेति शास्त्रादि देशे यद्वेति। कार्यातिदेशे चविशेषमाह एवमिति अत्र प्रमाणमाह अत एवेति व्यवहार इति। अभियुक्तानामित्यर्थः। तत्फलं युष्मदित्यत्रादेशे एऽवाभावः सर्वातिदेशेष्विति। निमित्त व्यपदेश शास्त्र कार्याति देशेष्वित्यर्थः। सर्वातिदेशेषुविशेषांतरमाह। यन्निमित्तेति शास्त्रीयमेवेति। तेना देर्घस्लादेशे तासौ नित्यानिट्त्वस्या शास्त्रीय त्वाज्जघसिथ उपयिथेत्यत्रोपदेशेत्वत इतीण् निषेधोनेति भावः। लोक सिद्धन्यायेनेति। द्व्यूध्नीत्यादिसिध्द्यर्थ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आनुमानिकादेशकल्पकवाक्यमन्तादिघटितसमुदायस्यैका-देशघटित आदेश इत्येव, न तु प्रत्येकं तयोः स्थानित्वबोधकं, तथा सति स्वाश्वशब्दस्य स्थानिवत्वेन स्वशब्दतया तत ईरिन्शब्दे वृद्ध्यापत्तेः। किं च भवत्सम्मतस्य 'उभयत आश्रयणे नान्तादिवत्' इत्यस्यासङ्गतौ भवत्सम्मत 'अभीयात्' इत्याद्यसिद्धिः। स्थानित्वत्त्वं तूभयत आश्रयणे इष्यत एव। अन्यथा 'अचः परस्मिन्' (१।१।५७) इत्यस्याप्युभयत आश्रयणोऽप्रवृत्त्यापत्तौ 'प्लायते' इत्याद्यसिद्धिरिति दिक्।

निर्देशादिति। न च 'कर्तरि चर्षि' (३।२।१८६) इत्यादौ गुणस्य पदद्वयसम्बन्धिवर्णद्वयाश्रितत्वेन बहिरङ्गत्वाद्रेफाभावेन न विसर्ग इति वाच्यम्। गुणस्येव पदद्वयसम्बन्धिरेफखरात्मकवर्णद्वयाश्रितत्वेन विसर्गस्यापि तत्त्वात्। परनिमित्तकत्वमुभयोः समम्। किं च कार्यकालपक्षे त्रिपाद्यां तदुपस्थितावपि पूर्वं प्रति परस्यासिद्धत्वादन्तरङ्गाभावेन पूर्वस्यान्तरङ्गनिरूपितबहिरङ्गत्वाभात् कथं तस्यासिद्धत्वप्रतिपादनम्। न चानया पूर्वस्यासिद्धत्वादभावेन तं प्रति परासिद्धत्वं 'पूर्वत्र' (८।२।१) इत्यनेन वक्तुमशक्यमिति वाच्यम्। एवं हि विनिगमनाविरहादुभयोरप्यप्रवृत्तौ विसर्गो दुर्वारः। एवञ्च विरोधात्कार्यकालपक्षेऽपि तदनुपस्थितिरेव त्रिपादीस्थेऽन्तरङ्गे उचिता। अत एव विसर्जनीयसूत्रे भाष्ये इमामेव युक्तिमुक्त्वा 'अयुक्तोऽयं परिहारो न वा बहिरङ्गलक्षणत्वात्' इत्युक्तम्। एवञ्च तत्र तत्र वचनान्येव कार्याणि, ज्ञापकानुसरणं वा कर्त्तव्यम्। अत एव 'निगाल्यते' इत्यादौ लत्वाद्यर्थ 'तस्य दोषः' (का०वा०) इति वचनमेवारब्धम्। अन्यथाऽन्तरङ्गत्वात् णिलोपात्पूर्वं वैकल्पिकत्वे चक्र-यत्र, माषवपनीत्यादौ बहिरङ्गासिद्धत्वेन च सिद्धे तद्वैयर्थ्यं स्पष्टमेव। यत्तु लक्ष्यानुरोधात्कार्यकालपक्षे

मवश्याश्रयणीयेनेतिभावः। अतएवेति एतन्न्यायस्य लोकसिद्धत्वादेवेत्यर्तः। तत्राशास्त्रीयविकाराश्रयणे एतन्न्यायाश्रयणे च मान माह।

अत एवेति। अंतादिवच्चेतीति च। अन्यवन्नेत्यर्थ इति। नत्वन्य भिन्नवदित्यर्थः। तथा सति एकदेशोविकृतोयस्य तद्विकृतावयवं स्वापेक्षयाऽयद्यत्सर्वं तद्भिन्नं स्वंतेन तुल्यं स्वयं भवतीत्यर्थे स्व शब्देन विकृतावयवकस्यैव पूर्व मन्यत्वेऽवधित्वेनान्वयात्तदपेक्षयान्यत्व मविकृत स्यापीत्युत्तरस्यापि अपि शब्देन विकृतस्यैवोपस्थित्या लक्ष्यासिद्धेरति देशवैयर्थापत्तेश्च। स्ववदित्येव सिद्धे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपस्थितयाऽन्तरङ्गपरिभाषायाऽऽनुमानिक्या प्रत्यक्षसिद्धस्यापि 'पूर्वत्र' (८।२।१) इत्यस्य बाध इति, तन्न लक्षणैकचक्षुषामादरणीयम्। अत एव 'उरण्' (१।१।५१) इति सूत्रे 'रेफस्य पूर्वान्तवत्त्वे . विसर्जनीयप्रतिषेधो वक्तव्यो नार्कुटाद्यर्थम्' इत्युक्तम् भाष्ये इति दिक्। उपसर्गेणैवेति।

तत्सञ्ज्ञायाः क्रियायोगनिमित्तत्वादित्यर्तः। यदर्थे क्रियारूपे प्रादीनामन्वयस्तं प्रत्येवोपसर्गत्वमिति भावः। प्रकृते च प्रत्यासत्त्या ऋकारादिनिमित्तोपसर्गग्रहणात्प्रगतः ऋद्धः 'प्रद्धः' इत्यत्र न। पुनरिति। प्रकृतसूत्रे भाष्ये स्फुटमेतत्। सुब्धाताविति। सुबन्तप्रकृतिके धातावित्यर्थः। तुल्यास्यसूत्रे उपार्कारीयतीत्यादेरेतदुदाहरणत्वस्य भाष्ये उक्तत्वात्। शास्त्रे सुबन्तस्य धातुप्रकृतित्वेनोक्ततया तत्प्रकृतिके इति व्याख्यानमेवोचितम्। ऋषभस्य समीपमुपर्षभं तदिच्छति उपर्षभीयतीत्यत्र तु न वृद्धिः। उपेत्यस्यानुपसर्गत्वात्। अत्रापि 'धातौ' इत्यनुवर्त्य वाक्यभेदेन व्याख्येयं, तेन सुब्धातावपि न प्रकृतिभावः।

प्रार्षभीयतीति। अत्र 'शरोऽचि' (८।४।४९) इत्यास्यानुपन्यासेन व्यञ्जनात्परस्यैकस्यानेकस्य वोच्चारणे विशेषाभावेन 'अचो रहाभ्याम्' (८।४।४६) इत्यस्य तन्निषेधस्य चानावश्यकता सूचिता। वाक्यभेदेति। इदं वृत्तौ स्पष्टं, भाष्ये तु न दृश्यते। 'एवे च' (का०वा०) इति वार्त्तिकं सूत्रे धातावित्यनुवृत्तेरारब्धम्। अवधारणम्-नियमः। एवशब्दस्य द्योत्यमर्थद्वयमवधारणमसम्भवरूपानवक्लृप्त्यादि च, तयोरन्त्योऽत्र एवशब्दार्थ इत्यभिप्रेत्याह – अनवक्लृप्तावेवेति। 'क्वेव भोक्ष्यसे' इत्युक्तेः स्थलसङ्कीर्णत्वादिना नास्ति सम्भवस्तव भोजनस्येति गम्यते।

अचोऽन्त्या (१।१।६४)। अच इति निर्धारणे षष्ठी। अन्ते भवो ऽन्त्यः। अन्त्यादीति

नञोऽन्यपदस्य च वैयर्थापत्तेश्चेति। यत्किंचिदन्यग्रहणे दामलिडित्यत्रेगुपधेतिक प्रत्ययान्त प्रकृतिक ण्यंते स्वभिन्नाव्ययीभावाभिन्न बहुव्रीहिधर्मस्य बहुव्रीहित्वस्यातिदेशेन पूर्वपदप्रकृति स्वरापत्तेश्चेति भावः। अनुपपाद नादिति। अत एव वासु देव वाचकाद शब्दाद्द्वितीयैक वचनेऽमिपूर्व रूपेऽमित्यायौ सुपिचेति दीर्घो नेति भावः। नन्वर्धस्याऽन्यथात्वे प्येतन्न्यायप्रवृत्तौ न दोषः। अमित्यादौ सुप्सं ज्ञायाः परिछिंन्न परिमाण निष्ठत्वादत आह्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गमकत्वाद् बहुब्रीहिः। मार्त्तण्ड इति। मृताण्डादागतो मार्त्तण्डः। अण्विषये एव पररूपम्। ननु मार्त्तशब्दान्त्याच्तकारकारः; स आदिर्यस्येत्यन्यपदार्थो दुर्लभ इति चेत्? न, एकस्मिन्नेव समुदायरूपत्वारोपेण तदवयवत्वारोपेण च तदुपपत्तेः। एतन्मूलकमेव 'व्यपदेशिवदेकस्मिन्' इति पठ्यते इत्यलम्। वस्तुत आरोपस्य नात्रोपयोगः। 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति पतञ्जल्युक्तेरर्थाभावेऽपि विकल्पात्मकं ज्ञानमत्र, तदपि लक्ष्यानुरोधाच्छास्त्र प्रवृत्त्युपयोगीति बोद्ध्यम्। पतञ्जलिरिति तु अञ्जलेः पतितः इति विग्रहे मयूरव्यंसकादित्वात्समासे तत्रैव निपातनादितशब्दस्य लोपे पृषोदरा-दित्वाद्वा तल्लोपे साधु। गोनर्ददेशे कस्यचिदृषेरञ्जलेः सन्ध्याकरणसये पतित इत्यैतिह्यात्।

ओत्वोष्ठयोः (का०वा०)। अत्र समर्थपरिभाषा नोपतिष्ठते; 'समासेऽङ्गुलेः सङ्गः' (८।३।८) इत्यादौ समासग्रहणेन; पदविधिरितिसूत्र, स्वरसेन; भाष्यादिस्वारस्येन च पदत्वेन सुबन्तत्वेन वा यत्र साक्षादुद्देश्यता तत्रैवैतत् परिभाषाप्रवृत्तिस्वीकारात्। ओत्वोठादिमात्रस्य पदत्वाभावात्। अवर्णादोत्वोष्ठयोरचि तद्घटितसमासे इत्यर्थाद् 'दन्त्योष्ठ्यो वः स्मृतः' इति प्रयोगसिद्धिः। अन्यथा प्रत्यासत्त्यौत्वाद्युत्तरपदकसमास एव प्रवृत्त्यापत्तौ तदसङ्गतिः स्पष्टैव। ओतुर्बिडालः।

ओमाङो (६।१।९५)। अत्र एङीति नानुवर्त्तते, तेनेषदर्थकाऽऽङा सह ऋषभशब्दस्य समासे 'अद्य अर्षभः' इत्यत्र पररूपेऽद्यर्षभसिद्धिः। न चात्र परत्वाद्दीर्घप्रसङ्गः, प्रतिपदविधित्वञ्च निरवकाशत्वे सत्येव बाधकत्वे प्रयोजकमिदञ्च 'मध्येऽपवाद'न्यायेन बाध्यसामान्यचिन्ताश्रयणात्। अन्यत्र प्रतिपदविधित्वस्य बलवत्त्वे प्रयोजकतादर्शनिन परदीर्घात्पूर्वं पररूपप्रवृत्तेश्च।

किंचेति। न्यूने सोंरुकारेत्संज्ञालोपयो राम इत्यादौ। अधिके। अंतादेशे भवंतीत्या दौ। तदभावादिति। अत एव सजुष शब्दाण्णिचि तदंतात्क्विपिटिलोप णिलोपयोः सगित्यस्य सजुषोरिति रुत्वं नेति भावः। ननुराज कीय शब्दाण्णिचि क्विपिटिणि यलोपे पुनर्णिचि क्विपिणि टिलोपे बहुशब्द राजकशब्दयोर्बहुव्रीहौ स्त्रिया अन्य पदार्थत्वेबहु रागित्यादौ डाटस्यात् न्यूनाधिकत्वा भावादत आह्। न्यूनाधिकत्वं चेति। स्थानिवद भावेनेति। स्थानिसदृशाभावे नांतादिवच्चेत्यनेनै कादेशस्य परादिवत्वादित्यर्थः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अव्यक्तशब्दार्थो ध्वनेरिति। अविद्यमानकत्वादिशब्दस्येत्यर्थः। तस्य चाच्छब्दो ऽनुकरणे एव सम्भवतीत्याह – अनुकरणस्येति। अत्रालोन्त्यस्येति न प्रवर्त्तते, 'नानर्थके' (प०भा० १०६) इति निषेधात्; 'आम्रेडितस्य वा' इति वक्तव्यो 'नाम्रेडितस्य' (६।१।९९) इत्यारम्भाद्वा। अत इति किम्? वटगिति।

नाम्रेडित (६।१।९।९) अव्यक्तानुकरणस्य इति, अत इति च वर्त्तते। अव्यक्तानुकरणावयवीभूताम्रेडितावयवाच्छब्दस्येत्यर्थः। 'नाम्रेडितस्य तस्तु वा' इति न सूत्रितं वैचित्र्यार्थम्। फलकल्पनाभिनिवेशस्तु न युक्तो, भाष्यानुक्तेः। अत एव 'तदधीते तद्वेद' (४।२।५९) इति सूत्रे 'द्विस्तद्ग्रहणं प्रमादकृतमाचार्यस्य' इति भाष्ये उक्तम्। लाघवानवधानलक्षणोऽत्र प्रमाद इति कैयटः। क्व तदवधानं क्व तदनवधानमिति तु भाष्यकृदुक्तप्रयोजने तदवधानमन्यत्रान्यदिति निर्णेयम्। ननु डाचोऽभावादेतप्राप्तिरत आह – बहुलवचनादिति।

तस्य परम् (८।१।२) अवयववाचिपरशब्दयोगेऽत एव ज्ञापकात् षष्ठी। 'तस्य' ग्रहणं स्पष्टार्थं, द्वे इत्यनुवर्त्य षष्ठ्या विपरिणामेन सिद्धेः। अन्यद्विरुक्तपरस्य तु न सञ्ज्ञा, अष्टमे 'सर्वस्य' इत्येतत्प्रकरणे सञ्ज्ञाकरणात्।

झलां ज (८।४।५३) अन्तग्रहणं झलीतिनिवृत्यर्थम्। सर्वोपकारकतया च प्रकरणान्तेऽस्य लेखः। एतेन 'श्नत्' इत्यत्रैव लेख उचित इत्यपास्तम्।

अज्झलोः सावर्ण्यनिषेधादाह – अचि किमिति। अनिष्पत्तेरिति। नाज्झलावितिसूत्रविषयनिर्णयेऽपवादविषयपरिहारेण तत्तद्वर्णीयसवर्णपदवाच्यनिर्णयोत्तरं

स्थानिवत्त्वं परादिवत्त्वं ननु तिङंतेषत्व मिष्यते एवेत्यत आह्। न्याये न चेति। तस्य न्याय्यत्वं च लाघवादिति भावः। शास्त्रीयवद तिदेशबोधनादिति। सामान्यापेक्षं ज्ञापकमितिभावः। अतएव वासुदेव वाच केनाशब्देनाङ्गोऽँव्ययीभावे एकादेशे नपुसंक ह्रस्वे अ अमित्यत्रानाङिति निषेधो भवति। नन्वेवंपरादिवत्वे नाङ्भिन्नत्वं तु नाशास्त्रीयत्वादिति निपात एकेति सूत्रस्थ स्वग्रन्थ विरोध इति चेन्न। ज्ञापकेनाति देशस्य पर्युदास लभ्याशास्त्रीये कार्ये प्रवृत्तावप्यशास्त्रीय धर्मस्य तेनानति देशात् तस्य अनिष्ठायामि त्यस्य सामर्थ्यात्प्रसज्य प्रतिषेध एव तत्र कल्प्यत इति भावः। ननु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तावतां ग्रहणस्य ग्रहणकशास्त्रबोद्ध्यतया एतद्बोधकाले ग्रहणकशास्त्रस्य तावद्ग्रहणबोधकत्वानिष्पत्तेरित्यर्थः।

सूत्रस्थसवर्णपदानुवृत्तिमभिप्रेत्याह – ॠति सवर्ण इति। तत्फलं दध्यृकारादावेतदप्रवृत्तिः। एतद्विधेययोः 'अइउण्' (मा०सू० १) सूत्रानन्तरं पाठादच्त्वं, तेन तयोः स्थाने प्लुतसिद्धिस्तयोश्च न स्परत्वम्। द्विमात्रमिति। अत एव 'अकः सवर्णे' (६।१।१०१) इत्यनेनैव अकारद्वयस्य स्थाने रेफद्वयवत्तारूपगुणकृतान्तर्येण कदाचिद्रेफद्वयगर्भस्य विवृतत्वान्तर्येण कदाचिद्विवृत्तस्य, लृकारे लकारवत्तान्तर्येण कदाचिद्द्विलकारस्य कदाचिद्विवृत्तत्वसाम्येन रेफवत्तासाम्येन च तादृशस्य ॠकारस्य सिद्ध्या विकल्पफलसिद्धिमाश्रित्यैतद्वचनद्वयं 'तुल्यास्य' (१।१।९) इति सूत्रे भाष्ये प्रत्याख्यातम्। द्वौ रेफाविति। अत्रापि तदेव भाष्यं मानम्। द्विरेफत्वे हि रेफद्वयवति स्थानिन्ययं, लकारवत्यपर इति व्यवस्था सिद्ध्यति। अभित इति। द्वौ रेफावित्यनुषज्यते, तच्च द्वितीयान्तम्, अभितः पदयोगात्।

'एओङ्' (मा० सू० ३) सूत्रे भाष्ये मातृणामित्यादौ णत्वादिसिद्ध्यर्थवश्यमङ्गीकर्त्तव्ये 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते, इति पक्षे प्रलूय खट्वाभिर्वाचा तरतीत्यादौ तुगसद्व्यज्लक्षणानां शङ्कायाः, 'दीर्घात्' (६।१।७५) इति तुग्विधानसामर्थ्यतपरकरणसामर्थ्यं 'नौन्द्वयचः' (४।४।७) इति सूत्रस्थनौग्रहणसामर्थ्यैर्भेदेनाप्रतिभासमानेषु वर्णावयवेषु अवयवसदृशस्वतन्त्रवर्णाश्रयकार्याभावज्ञापनरूपसमाधानस्य च करणवत् 'प्रातर्कृतम्' इत्यत्र 'रोरि' (८।३।१४) इत्यस्य 'तद्लृकारः' इत्यादौ 'तोर्लि' (८।४।६०) इत्यस्य च शङ्कासमाधानाकरणेन 'यत्तद्रेफात्परं भक्तेः' इति 'हयवरट्' (मा०सू० ५) सूत्रस्थ भाष्येण च

लक्ष्यानुसारोलक्षणैक चक्षुषामयुक्तोऽत आह्। केचित्त्विति। तेनेति। अग्निः करोतीत्यादौ विसर्गस्य प्रत्ययत्वेन षत्वाभावायावश्यकत्वेन तेनेत्यर्थः। एवं च। अस्य न्यायस्य लौकिकत्वेच। अशा स्त्रीयस्यापि धर्मस्येति। यौष्माकीण इत्यादौ यस्माद्धि हितस्तत्वस्येत्यर्थः। अशास्त्रीयेपि कार्ये चेति। अग्निः करोतीत्या दौ षत्वाभावे चेत्यर्थः। अति प्रसंग इति। लोलुव इत्यादावचः पूर्वस्य दुरेत्यादौ द्विरुक्त धातु पूर्वभागत्वस्य च क्वचिदिति। नायक इत्यादावित्यर्थः। ननु लक्ष्यानुसारेण न्यायानाश्रयणमयुक्तमत आह्। न पदांतेति सूत्र इति। ननुवरे ग्रहणेन यङोऽकारस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋलृक्सूत्रस्थयोरर्धमात्राज्भागस्याभितः क्लृप्तत्वेन तथैवोचितत्वादिति भावः। द्वौ लकाराविति। हल्द्वयवत्पूर्वसाहचर्यादिति भावः। अत्र ह्रस्वऋकारद्वयस्थानिकैकादेशे एव पूर्वस्य साधुत्वं ह्रस्व ऋकारलृकारस्थानिकैकादेशे एवोत्तरस्य साधुत्वम्। अत एव लृति न ऋकारो नाप्यृति लृकारः अत एव वार्त्तिके 'ऋति' इति तपकरणमुत्तरवार्त्तिके' 'लृति' इति च चरितार्थम्। 'तुल्यास्य' (१।१।९) सूत्रे भाष्ये यदेतद्वतीति एतद्वत इति वक्ष्यामीत्येतद्वचनाश्रयणेन 'ऋलृवर्णयोः सावर्ण्यम्' (का०वा०) न कार्यमिति च सङ्गच्छते। उपस्थितरेफीयप्रयत्नत्यागे माना भावादीषत्स्पृष्टाविमौ। विवृतत्वे हि विवृतऋकारलृकाराभ्यामनयोरपि ग्रहणे 'अकः सवर्णे' (६।१।१२७) इत्यनेनैव सिद्धे वार्त्तिकस्यैव वैयर्थ्यापत्तेः।

एङः (६।१।१०९)। पदान्तात् किम्? भवति।

सर्वत्र वि (६।१।१२२)। 'प्रकृत्याऽन्तः' (६।१।११५) इति सूत्रात्प्रकृत्येत्यनुवर्त्ते। प्रकृतिशब्दोऽत्र स्वभाववाची 'दुस्त्यजा प्रकृतिः' इत्यादौ तथा दर्शनात्। प्रकृत्या स्वभावेनावस्थानमित्यर्थः। अत एव प्रकृतिभावे न पूर्वरूपं नाप्ययादय इति भावः। 'नान्तः पादम्' इति पाठे त्वनेन सूत्रेण गोशब्दस्य यत्प्राप्तं तन्नेति व्याख्यानेन 'नान्तः पादम्' इत्यनेनैव पूर्वरूपत्वादिकं विकल्पेन निषिद्ध्यत इति बोद्ध्यम्।

अवङ् (६।१।१२३) स्फोटोऽयनं यस्य सः, स्फोटप्रतिपादक इत्यर्थः। स्फौटायनस्येतिपाठे नडादित्वं कल्प्यम्। स्फोटायनोऽवडः स्मर्त्ता, अन्यस्तु तदभावस्येति स्मृत्यन्तरानुसन्धानद्वारेणात्र विकल्पो बोद्धयः। निवृत्तामिति। अत एव 'इन्द्रे' ६।१।१२४) इति सामर्थ्यान्नित्यमिति भाष्यादावुक्तम्। गवाग्रमिति। सन्निपातपरिभाषाया अनित्यत्वाद्दीर्घ

सांभावनिक प्रत्ययत्वाश्रयणेपि यगकारस्यतथात्वे मानाभावादुवङ् न स्यादतआह्। यणि वेति। अत एवेति। अतिदिश्यमानधर्म विरुद्ध स्वाश्रयधर्मस्याभावाल्लौकिक न्यायाश्रयणाच्चैवे त्यर्थः। पूर्वंतित्वेन प्रत्ययांतभिन्नत्वादिति। तत्स्थानापन्न इति न्यायेनाशास्त्रीयस्यापि धर्मस्यातिदेशादित्यर्थः। अमित्यादौ परादिवत्वेनाङ्भिननत्वंत्वत्रपक्षेऽनित्य त्यत्वान्नातिदि श्यत इति भावः। नन्वेवं गाङ्क टादिति सूत्रस्थ भाष्यविरोधोऽतआह्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति बोद्धव्यम्। व्यवस्थितेति।

'देवत्रातो गलो ग्राह इतियोगे च सद्विधिः।
मिथस्तेन विभाष्यन्ते गवाक्षः संशितव्रतः।।

तेन प्राण्यवयवे न' इति 'शाच्छोः' (७।४।४१) इति सूत्रे भाष्ये स्पष्टम्। 'अग्नीत्प्रेषणे' (८।२।९२) इति सूत्रे 'अग्नीदग्नीन्विहर' इत्यत्र एतच्चावृत्त्यर्थं वार्त्तिककृद् बहुलग्रहणघटितं न्यासं कृतवान्। तत्प्रत्याख्यानाय भाष्ये कृतेन विभाषेति योगविभागेन विभाषेत्यस्य व्यवस्थितविभाषात्वं ध्वनितम्। तथा 'अजेर्व्यघञपोः' (२।४।५६) इति च व्यवस्थितविभाषेति अजेर्वीतिसूत्रे भाष्ये स्पष्टम्। न च व्यवस्थितविभाषयेन्द्रे नित्यावङि सिद्धे 'इन्द्रे च' (६।१।१२४) इति व्यर्थमिति वाच्यम्, भाष्योक्तातिरिक्तव्यवस्थितविभाषाणमाप्रामाणिकत्वज्ञापनार्थ तत्सत्त्वादित्याहुः।

इन्द्रे च (६।१।१२४)। क्वचिद्भाष्यपुस्तके चशब्दरहितः पाठः। इन्द्रवयवेऽचीत्यर्थस्तेन षष्ठीतत्पुरुषोत्तरपदषष्ठीतत्पुरुषे 'गवेन्द्रयज्ञः' इत्यादाववङ्सिद्धिः। अन्यथा वाक्ये गोशब्दस्येन्द्रपरत्वासम्भवेन समासाक्षेपादिन्द्रशब्दस्योत्तरपदत्व एव प्रवृत्तिः स्यात्।

'प्लुतप्रगृह्या' (६।१।१२५) इत्यस्य प्रकृत्येति पाठे एव सामञ्जस्य मत्वाऽऽह-अथ प्रकृतीति। न चैतद्घटकपदार्थज्ञानाय प्रगृह्यत्वादिकथनं पूर्वं युक्तमिति वाच्यम्, इन्द्रे च' (६।१।१२४) इत्यत्र प्राचीनपठितनित्यग्रहणस्य प्रामादिकत्वं बोधयितुं तदव्यवहितमेतत्सूत्रलेखनात्। तत्र नित्यग्रहणे तदव्यवहितोत्तरैतत्सूत्रे तद्वैयर्थ्यं स्पष्टमेवेत्याशयेनाह– प्लुताः प्रगृह्याश्च वक्ष्यन्त इति। अचीत्यनुवर्त्तमाने पुनरज्ग्रहणं प्रत्यासत्त्या

यत्त्विति ''उपायांतरमिति'' अतिदिश्यमानेत्य पेक्षयो पायांतरमित्यर्थः विधि ग्रहणादिति तत्सामर्थ्या द्विशेष्यतया विशेषणतया वाऽलाश्रयणं नतु प्राधान्ये नेत्यर्थ इति भावः। यत्र विधाविति स्थान्यादेश विधावित्यर्थः। शब्दत इति। एवं चार्थ तोऽलाश्रय णेपि न दोष इति भावः। अत्र प्रमाणं विशिष्टं ह्येषोऽनलमाश्रयत इटं नामेति प्रकृत सूत्रस्थं वृक्षस्तत्रे त्यत्राल्विधित्वं पयः स्वित्यत्रानल्विधित्वामि तिवैषम्यप्रतिपादन परं भो भगो इति सूत्रस्थंच भाष्यमितिबोध्यं।२६ विशेषाति देशोपीति। तत्फलं तु परि मृज्येत्यत्रल्यपः कित्वा द्गुणवृद्धि निषेधः। उपस्थित धर्मैः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्राचि अनयोः प्रकृतिभावस्तदज्निमित्तकार्यस्यैव तेनाभाव इत्यर्थलाभार्थ, तेन जानु उ अस्य रुजति 'जानू अस्य' इत्यादौ सवर्णदीर्घरूपसन्धि(१) र्भवत्येव। एहि कृष्णेति। वाग्रहणनिवृत्त्यैव तल्लाभ इति प्रश्नः। मा भूदिति। नित्यग्रहणसामर्थ्येन पुनर्विधानाद् वाधकविषयेऽप्य(२)यमेवेति भावः।

इकोऽसवर्णे (६।१।१२७) 'एङः' (६।१।१०६) इत्यतः पदान्तादित्यनुवृत्तं प्रथमया विपरिणभ्यत इत्याह– पदान्ता इति। वेति। ह्रस्वयणोर्विधानसामर्थ्यात्तु न इकल्पसिद्धिः। अपदान्तादौ यणश्चरितार्थत्वात्। सामथ्यदिवेति। चेन प्रकृतिभावाकर्षणेऽपि 'ऋत्यकः' (६।१।१२८) इत्यत्र चानुकृष्टत्वेन तदसम्बन्ध इति तदर्थं ह्रस्वविधानसामर्थ्यस्याऽऽवश्यकत्वेन चकारो व्यर्थ इति भावः। भाष्ये स्थितमिति। प्रकृतसूत्रे इति शेषः। एतेन 'ह्रस्वाभावे प्रकृतिभावार्थं चकारः' इति न्यासाद्युक्तमपास्तम्। 'चक्री अत्र' इति तु संहिताया अविवक्षायां बोद्धव्यम्। 'न समासे' (का० वा०) 'सिति च' (का० वा०) इति वार्त्तिकम्। पार्श्वमिति। 'पर्श्वाणस् वक्तव्यः' (का०वा०) इति णस्। 'सिति च' इति पदत्वम्

ऋत्यकः (६।१।१२८) सवर्णार्थमनिगर्थञ्चेदम्। होतृऋकारः। ब्रह्मऋषिः। आर्छदिति। आटो धात्ववयत्वेनापदान्तत्वादिति भावः। एतेन 'आटश्च' (६।१।९०) इति पुनर्वृद्धिविधानार्थेन चेन 'उस्योमाङ्क्षु' (का०वा०) पररूपबाधवत्प्रकृतिभावस्यापि बाधेनेष्टसिद्धिरित्यापास्तम्। समासेऽपीति। व्याख्यानादिति भावः। सप्तऋषीणामिति। 'दिक्संख्ये' (२।१।५०) इति समासः। प्रकरणशुद्धये प्रकृतिभावविधायकसूत्रद्वयमुपन्यस्य 'प्लुतप्रगृह्या' इतिसूत्राकाङ्क्षितप्लुतप्रगृह्योर्मध्ये प्रथमोपात्तत्वात् प्लुतप्रकरणामारभते –

शब्दोपस्थित धर्मैरित्यर्थः। तद्व्यापक धर्मैरिति। उपस्थित विशेष धर्मानुमित धर्मैरित्यर्थः। विध्याकांक्षापूरणे सतीति। विधीनां क्त्वातोसुन् कृत्तद्धितेव्यादीना माकांक्षा तिदेशवाक्यस्य तस्याः पूरणे सतीत्यर्थः। विधिशब्दात्कर्मणि षष्ठी अति देशशब्दात्कर्तरिषष्ठीति भावः। न चोभय प्राप्ताविति नियमात्कर्तरिषष्ठी न स्यात्कर्मणि चेति निषेधात्षष्ठी समासोपि न स्यादिति वाच्यम् स्त्रीप्रत्ययोर काकार योरिति नियमाभावात् ननु युष्मदित्य त्रादादेशे वहुवचने झल्ये दित्येत्ववारणाय विशेषणतयाऽलाश्रयणेऽल्विधित्वसंपादनेन विधि ग्रहणं चरितार्थ्यमत आह्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाक्यस्य टेः। (८।२।८२)। वाक्यस्येत्यभावे पदस्य टेरित्यर्थेऽनन्तरस्यापि पदस्य टेः प्लुतः स्यात्। तत्सत्त्वे तु वाक्यस्य टिरन्त्यपदस्यैव सम्भवतीति न दोषः। टिग्रहणाभावे प्लुतश्रुत्योपरिस्थिताच्परिभाषयाऽजन्तस्यैव स्यात् टिग्रहणे तु तत्सामर्थ्याट्टिनाऽचो विशेषणाद्व्यञ्जनान्तस्यापि भवति।

प्रत्यभिवादे (८।२।८३)। प्रणामादिभिराशिषं वाच्यमानो गुर्वादिर्यत्प्रतिसम्भाषते तत्प्रत्यभिवादः, न त्वाशीर्वचनम्। शूद्रे आशीर्वादरूपप्रत्यभिवेनाऽशूद्रे इत्यस्य वैयर्थ्यापत्तेः। अत एव भाष्ये 'अशूद्रे इति किम्? कुशल्यसि तुषजक' इत्युक्तम्। अभिवादये इति। नमस्कारादिपूर्वमाशीरादि वाचयामीत्यर्थः। आयुष्मानित्यायुष्मत्त्वस्य विधेयत्वात्सम्बोधनविभक्त्यभावः। एधीति। भवेत्यस्याप्युपलक्षणम्। प्रत्यभिवादे शर्मादिप्रयोगो न नियतः 'एचोऽप्रगृह्यस्य' (८।२।१०७) इति सूत्रे प्रत्यभिवादेऽन्तस्यैचः प्लुतविधानात्। 'आयुष्मानेधि अग्निभूता ३ इ' इति भाष्ये तदुदाहरणाच्च। शर्मनादिप्रयोगे तु तट्टेरेव प्लुतः। 'शर्मान्तं नाम ब्राह्मणस्य इत्यादिस्मृत्या तस्य नामावयत्वबोधनात्। स्त्रियां नेति। स्त्रिया अपि नाम्नाऽभिवाद प्रत्यभिवादौ इत्यर्थस्य भाष्यसम्मतत्वादिति भावः। नाम गोत्रे वेति। अभिवादप्रत्यभिवादे नामगोत्राभ्यामेव स्मृतिषु प्रसिद्धेः तत्राधिकृतस्य पदस्येत्यस्य प्रत्यभिवादे इत्यनेन विशेषणात्प्रत्यासत्तया प्रत्यभ्युद्यमानार्थवाचकस्यैव प्लुत इति भावः। तत्र नामशब्देन द्वादशेऽह्नि पित्रादिकृतं गृह्यते। अत एव 'आयुष्मान् भव दण्डिन्' इत्यादौ प्लुतो नेति स्पष्टं भाष्ये। 'भोराजन्य' (का०वा०) इति। भोःशब्दस्य राजन्यवैश्य वाचकनाम्नश्च टेः प्लुत इत्यर्थः। भोःशब्दस्याप्राप्ते इतरयोस्तु नामत्वात्प्राप्ते विभाषेयम्।

दूराद्धूते (८।२।८४)। यावति देशे प्राकृतप्रयत्नोच्चारितं सम्बोद्ध्यमानो न श्रृणोति किं

हलादिति। लिंगादिति। सेटः क्त्वो कित्वात् कित्वस्य क्त्वात्वव्याप्यत्वेन स्थानिवद्भावाऽप्राप्तेरितिभावः। ङिदादेशा इति। ङितोलस्यादेशा इत्यर्थः।

तेन रमायामित्यादावामोङित्वाद्याडादि सिद्धिरितिभावः सानुबंधकादेशे इति। सानुबंधके आदेशे इत्यर्थः। तेनाचिनवमित्यादौ मिपो निरनुबन्धकेऽमिस्थानिवत्वे न पित्वाद्गुणादिसिद्धिः। इत्कार्याभावेति। स्थान्य वयवनिमित्तकं स्थानिवद् भावेन यदित्कार्यं तस्याभाव ज्ञापकतेत्यर्थः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वधिकं प्रयत्नमपेक्षते तावद्दूरम्। दूरादाह्वानञ्च दूरोद्बोनस्योपलणं न तु सम्बोधनविभक्ति नियामकस्याभिमुखीकृत्य बोधनरूपस्य सम्बोधनस्योपलक्षणम्, 'आगच्छतु भवान्देवदत्त' इत्येवमाह्वानस्यापि सम्भवात्। अत एवाऽऽकडारसूत्रे नदीगुरुसञ्ज्ञयोः समावेशे 'वात्सीबन्धुः' इत्यत्र 'गुरोः' (८।२।८६) इति प्लुतो 'नदी बन्धुनि' (६।२।१०९) इति पूर्वपदान्तोदात्तत्वञ्च फलमुक्तं भाष्ये। अन्यथाऽत्र सम्बोधनाभावेन 'गुरोः' (८।२।८६) इत्यस्याप्राप्त्या तदसङ्गति स्पष्टैव।

उपलक्षणत्वादसत्यप्याह्वाने भवति; तदाह-सक्तूनित्यादि। अत्रापि 'दूराद्धूते' (८।२।८४) इत्येतदनुवृत्तस्य 'पदस्य' इत्यस्य विशेषणं, तेन हूयमानार्थवाचिनः पदस्यैव टेः प्लुतः। तच्च रूढं यौगिकं वेत्यन्यदेतत्।

हैहेप्र (८।२।२१)। हैहयोः सम्बोधनद्योतकत्वेन केवलाभ्यामपि ताभ्यां सम्बोधनदर्शनिन च तयोरपि हूयमानार्थपदत्वाद् (५) 'गुरोरनृतः' (८।२।८६) इत्येव सिद्धे नियमार्थमिदमित्याह–हैहयोरेवेति। 'हैहेऽन्ते' इत्येव सिद्धे प्रयोगग्रहणादनन्त्योरपि, तदाह – हे३रामेति। केचित्तु एकं हैहेग्रहणमनन्त्यार्थम्। अन्यथा 'वाक्यस्य टे'रित्यधिकारादन्त्योरेव तयोः स्यात्, तदाह – हे३ राम इति। प्रयोग इति तु-यत्र सम्बोधनोत्तरं तयोः प्रयोगस्तत्र तेनैवाभिमुखस्य द्योतिवेन द्योत्याभावादनर्थकयोरपि तयोः प्लुतार्थं, तदाह-राम है३ इति। अन्यथाऽप्रयुक्तयोः प्लुतासम्भवात्तद्वैयर्थ्यं स्पष्टमेव। 'हैहयो'रिति तु-तयोर्हूयमानार्थपदत्वाभावादप्राप्ते विध्यर्थम्। नियमे तु न मानं, तेनात्र प्लुतसमावेशः। एतत्सर्वं भाष्यकैयटयोः स्पष्टमित्याहुः। यत्तु अयं हूयमानार्थपदस्य टेः प्लुतस्य बाधकस्तक्रकौण्डिन्यन्यायादिति। तन्न, 'शिव हे' इत्यादौ तस्या प्राप्तेस्तन्न्यायविषयाभावात्।

तिबाद्यादेशेषु। तिप्सिप्मिपामा देशेषुणल् थल् णल् ष्वित्यर्थः। सार्वधातुकादेश इत्यर्थः। अन्यथा। अनुबन्धकार्येऽनल्विधाविति निषेध स्वीकारे। ननु ज्ञापकान्येतानि भाष्ये एवदूषितानीतितत्रानल्विधाविति निषेधोऽस्त्वित्यत आह्। तिवाद्योदेशेष्विति। आदिना ल्यपोपि संग्रहः। पित्वादिति।'

आदिनाकित्वम्। असिद्धेश्चेति। चेननल्यपीत्यस्यशिद्ग्रहणस्य च ज्ञापकत्वस्य च संग्रहो बोध्यः।। अचःयस्मिन् तदनुरोधादिति। ननु षष्ठीस्थान इत्यस्यप्रवृत्तिर्गु णानांच परार्थत्वादिति न्यायादिति भावः। अतएवेति। नाग्लोपीति सूत्रस्थ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरो (८।२।८६)। 'दूराद्धूते (८।२।८४) इत्यनुवर्त्तते, तेन दुराद् बोधन एव प्रवृत्तिः तदाह-दूराद्धूत इति। दूरत्वञ्चात्राविवक्षितं, तेन प्रत्यभिवादे 'भोराजन्य' (का०वा०) इत्यस्य विषयेऽप्यस्य प्रवृत्तिः, तद्विषयेऽप्युपलक्ष्यबोधनसत्त्वात्। सर्वप्लुतप्रकरणस्य तु न शेषः। यथा हि सति 'वाक्यस्य टे' रित्यनेन सहैवास्याप्यधिकारत्वमेव कुर्यात्। एतत्त्रयविषयमेवेदमिति प्रकृतसूत्रे 'अनुदात्तं प्रश्नान्त' (८।२।१००) इति सूत्रे च वृत्तौ स्पष्टम्। अपिशब्दो यथाप्राप्तटिसमुच्चयार्थः। यदि तु गुरोः सन्निधानादन्त्यो गुरुरेव समुच्चीयते तदाऽन्त्यलघुमति अनन्त्यगुरावेतस्य, अन्त्यलघौ 'दूराद्धूते च' (८।२।८४) इत्यादीनां दुर्वारत्वेन प्लुतसमावेशापत्तिः। एकैकग्रहणं त्वेतद्विहितानामेव पर्यायार्थं स्यात्। तेन यत्रान्त्योऽपि गुरुरन्त्यगुरुद्वयं वा तत्रैव पर्यायः स्यात् व्याख्यानाच्चैतदर्थलाभः अनन्त्यस्यापीति। अपिनाऽन्त्यस्य गुरोरगुरोश्चेत्यर्थः पर्यायार्थमिति। अन्यथा समावेशः स्यादिति भावः। 'अनुदात्तं पदम् (६ः१।१।५८) इति तु त्रिपाद्यां न प्रवर्त्तत इति तत्रैव वक्ष्यते। प्राचामिति तु पक्षे सर्वेषां प्लुताभावार्थम्। विकल्पत इति। सा च व्यवस्थितविभाषा। तेन 'अग्नीदग्नीन्विहर' इत्यादौ 'अग्नीत्प्रेषणे' (८।२।९२) इति न। भाष्ये तु 'विभाषापृष्ट' (८।२।९३) इति सूत्रे विभाषेति योगविभागो दर्शितः। साऽपि व्यवस्थितविभाषेति कैयटः। अत एव 'ओश्रावये परस्येति वक्तव्यम्' इति वचनस्य 'अग्नीदग्नीन्' इत्यादौ प्लुतनिवृत्तये कृतस्य विभाषेति योगविभागेन प्रत्याख्यानं भाष्योक्तं सङ्गच्छते। एवञ्च भाष्यसंमतैषा व्यवस्थितविभाषेत्याहुः।

अप्लुतवदित्युक्त्या प्लुत इत्यद्ध्याहारस्तदाह – प्लुतोऽप्लुतवदिति। प्लुत एव निषिद्ध्येतेति। तत्स्थाने अप्लुतस्य विधानेन स एव निवर्त्तेतेत्यर्थः। प्रसज्यप्रतिषेधेन व्याख्यानं

भाष्यप्रामाण्यदिति भावः।। ननु 'परस्मिन्नित्यस्यापि सूत्रेश्रवणमत आह्। व्याख्या नादिति। किरतौ लवन इयादि निर्देशात्। अचः पूर्वत्व विज्ञानादिति। वार्तिकोक्तादितिभावः। द्वितीयार्थे फलमाह्। अतएवेति। प्रमाणमाह। अह एव नं पदांत सूत्रे इति विधेयस्याभावदिति। पंचेन्द्र इत्यत्र यस्येति लोपस्तु न। स्थानिवद्भाव प्रत्ययलक्षणयोरपि नलुमतेति निषेधस्वी कारादिति भावः। उपादाने इति। इदं सप्तम्यंतम्। मानाभा वादिति। उत्तरस्येत्यंशिवकलातस्मादित्युत्त रस्येतितु न प्रवर्तते गुणानां चेति न्यायादिति भावः। ननु गुणः कृतात्म संस्कारः प्रधानस्य महते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तु न युक्तम्, गौरवात्। किं च तथा सति प्लुतप्रकरणे एव नोपस्थिते इति वदेत्। न च पर्युदासे 'अग्नी३ इति' इत्यादौ प्रगृह्याश्रयप्रकृतिभावं बाधित्वा परत्वादप्लुतवद्भावे दीर्घादिकं स्यादिति वाच्यम्। शब्दत इतिशब्दसापेक्षाप्लुतवद्भावापेक्षया वर्णमात्रापेक्षप्रकृतिभावस्यान्तरङ्गत्वात्। अप्लुतवदित्यस्य प्लुतकार्यं नेत्यर्थस्तु न शब्दमर्यादालभ्यः। प्लुतेऽप्लुतसादृश्यविधानस्यैव शब्दतो लाभात्। भाष्ये प्लुतकार्यप्रतिषेधार्थमित्युक्तिस्तु फलितार्थाभिप्रायेणैवेति बोध्यम्। प्रगृह्याश्रये इति। प्लुते कृतेऽपि तस्यासिद्धत्वादीर्घत्वबुद्धिवत् तद्गतं प्रसृह्यत्वमनुकार्ये सुलभम्। अनुकरणे तु 'प्रकृतिवदनुकरणम्' प०भा०) इत्यतिदेशात्तत्वमिति भावः।

किं मया कर्त्तव्यमिति पृष्ट आह-चिनु ही३इदमिति। 'विभाषा पृष्टप्रतिवचने हेः' (८।२।९३) इति प्लुतः इदंशब्दोऽत्र वाक्यान्तरस्थ इति हेरिकारस्य वाक्यटित्वम्। उभयत्र विभाषेयमिति। उपस्थिते प्राप्तेऽनुपस्थिते चाप्राप्ते इत्यर्थः। विभाष्यतेविकल्प्यते; इति विभाषा। 'गुरोश्च हल' (३।३।१०३) इत्यप्रत्यये टाप्, न वेति विभाषायामिति भाष्यप्रयोगात्। भाष्ये तु 'किमर्थमिदमुच्यतेऽनुपस्थितार्थ, तत्र ईग्रहणेन नार्थः, अविशेषेण चाक्रवर्मणस्याप्लुतवदित्येव इदमपि सिद्धं वशा इयं वशेयम्' इत्युक्तम्। तद्बलेनोपस्थिते पूर्वविप्रतिषेधेन ईग्रहणेऽपि नित्याप्लुतवद्भाव एवेष्टः। प्रत्याख्याने नित्याप्लुतवद्भावस्य येननाप्राप्तिन्यायेन वैकल्पिकतद्बोधिताभावांशबाधकत्वात्। उपस्थित इत्यस्य निवृत्त्या परविप्रतिषेधादुभयत्र विभाषेयमिति कैयटस्य प्रमादः मूलं तु इतिशब्दभिन्ने वैदिकेतिशब्दे चेत्येवंपरतया कथं चिद्व्याख्येयमित्यन्ये। उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयत् सर्वनामपर्यायेण तत्तल्लिङ्गभागियमिति निर्देशः।

उपकाराय भवतीति न्यायोप्यस्ति। अत एवांग संज्ञा सूत्रे तस्मिन्नितिपरिभाषा प्रवर्तते। एवं चानेन न्यायेन प्रकृते पूर्वत्वस्या व्यवहित स्यैव ग्रहणं स्यादत आह् स्वरे निषेधाच्चेति।।

हल् स्वर प्राप्ताविति तु स्वरे कर्तव्ये एव नतुस्थानिवद् भावे कर्तव्येणीति भावः। नपदांत।। वर्ति घटित न्यायाति देशानामिति। स्थानिवदादेशः। अंतादिवच्च। आद्यंतवत्। एकदेश विकृतमनन्यवत्। प्रत्ययलोपे। प्रातिपदिक ग्रहणे लिंगविशिस्यापीत्येतेषामित्यर्थः। ननुप्रत्ययलोपे प्रातिपदिक ग्रहणे इत्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशेषणेन तदन्तविधिमाश्रित्याह – इदूदेदन्तमिति। द्विवचनमिति। सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिनिषेधादितिभावः। एदन्तमिति व्याख्याने फलमाह – पचेते इति।

निपात ए (१।१।१४)। निपात इति किम्? चकारात्र। प्रत्ययस्य शास्त्रकल्पितार्थवत्त्वात्, एकाजिति कर्मधारयो वर्त्तिपदार्थप्रधानत्वेनान्तरङ्गत्वाद्, 'व्याहरति मृगः' इत्यादिनिर्देशाच्च। तेन प्रेदमित्यादौ न दोषः, तदाह-एकोऽजिति। आङ्वर्ज इति। पर्युदासस्यौचित्यात्। अत एवैकाज्ञ्नाङिति नासूत्रि। वासुदेववाचकस्य अशब्दस्य आङा सहाव्ययीभावे आ आत् अमित्यादौ (२) सत्यभिधाने स्वत आङ्भिन्नत्वेन पूर्वान्तवत्त्वेन निपातत्वेऽपि प्रगृह्यत्वन्न। पूर्वान्तवत्त्वेनाऽऽ ङ्त्वातिदेशेऽतिदिश्यमानधर्म विरुद्धस्वाश्रयधर्मप्रयुक्तकार्यनिवृत्तेरनतिदेशस्वभावसिद्धत्वात्। ओदिति सूत्रे आ उ ओ, इत्यत्र अनाङिति 'प्रतिषिद्धार्थोऽयमारम्भ' इति तु भाष्यं तु पर्युदासेपि गम्यस्य प्रतिषेधस्य सत्त्वान्नानुपपन्नम्। अनाङिति पर्युदासादेव निपातैकाज्रूपत्वे लब्धे निपातैकाज्ग्रहणं स्पष्टार्थम्। स्वाङ्गसमुदाये स्वाङ्गत्वाभाववदच्समुदायेऽच्त्वाभावाद् अच् इत्येवाच्समुदायग्रहणाभावे सिद्धे एकग्रहणान्यत्र वर्णग्रहणे जातिग्रहणार्थम्। तेन धिप्सतीत्यादिसिद्धिरिति भाष्ये स्पष्टम्। जातिग्रहणार्थमित्यस्योपात्तजात्याश्रयैकानेकव्यक्तिग्रहणार्थमित्यर्थः। तेन तितउशब्दैकदेशस्य अउ इत्यस्यानुकरणे अउ अकरोदित्यत्र 'अनुकरणं चानिति' (६।४।६२) इति निपातत्वेऽपि प्रगृह्यत्वाभाव एकग्रहणफलं बोध्यम्। ननु ङकारस्य क्वाप्यश्रवणेन ङिन्दङिद्विवेको दुर्ज्ञेय इत्यत आह – वाक्यस्मरणयोरिति। वाक्यशब्देन स्वार्थगतमनभिमतत्वम्। स्मरणं-विस्मृतस्य स्मृतिविषयता। एवं किल तदिति – स्मृतार्थनिर्देशः।

नयोर्वतिघटितत्वाभाव इति चेन्न। प्रत्यय लोप इत्यत्र स्थानिवदिति स्थानिवदित्यनुवृत्ते।

प्रातिपदिकग्रहणे इत्यस्यप्रातिपदिक वल्लिंगविशि दष्टमित्येव स्वरूप ज्ञापनाच्च। राम इत्यादाविति। आदिना वस्नसित्यादि विसर्गादिति। आदिनारुत्वादि। उत्वेचन त्रुटि ननु रोः कथं स्थानि भूतादचः पूर्वत्वं स्थानिवत्सूत्र दृष्ट्या रोरसिद्धत्वे न तद्बुध्या सकार एवोत्वप्रवृत्तेः। तत्स्थानापन्न इति न्यायाच्च। पर पदस्थेति। तेन भावार्थकाण्णंत माहिषा ण्णिचि विंचपि माहिषदेव दत्त इत्यत्र झलांजशोंत इति जस्त्वे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निपात इत्यनुवृत्तमोदित्यनेन विशेष्यत इत्याह – ओदन्त इति। निपातसञ्ज्ञा चादिपदोपस्थितचादीनां सति सम्भवेऽर्थवतामेवेति सार्थकनिपातानां निपातपदेन तत्तदर्थविशिष्टानामेवोपस्थितिरिति। गौणमुख्यन्यायेन प्रकृतसूत्रस्थनिपातपदेन गौणार्थानां न ग्रहणमिति गोऽभवदित्यादौ च्व्यन्ते नास्य प्रवृत्तिः। एवञ्च कार्यकालपक्षेऽपि च्व्यन्ता निपाता इत्यस्यानुपस्थितिरेतत्परिभाषावशात्। अव्ययसञ्ज्ञादौ तु नैतत्परिभाषाप्रवृत्तिरनित्यत्वात्। अत एवानर्थकेऽपि निपाते सा सञ्ज्ञा सिद्ध्यति।

त्रपो इतीत्यादौ प्रगृह्यात्वायाह – सम्बुद्धिनिमित्तक् इति। सम्बुद्धिपर इति व्याख्याने तु सोर्लुका लुप्तत्वेन तत्परत्वाभावान्न स्यात्। 'न लुमता' इति निषेधानित्यत्वं त्वगतिकगतिः। इताविति किम्? पटोऽत्र। अनार्षे किम्? ब्रह्मबन्धवित्यब्रवीत्। संहिताया विवक्षायामप्यवादिरहितप्रयोगार्थमिदम्। तद्विवक्षा च वर्णोच्चारणे नियतेनार्धमात्राकालव्यवायेनोच्चारणेच्छा। तदधिकार्द्धमात्राकालव्यवायेनोच्चारणेच्छा च तदविवक्षेतिबोद्ध्यम्।

उञः (१।१।१७) अत्रोञ् निपात एव। उञ ऊँ इत्येकसूत्रत्वे तु शाकल्यग्रहणाननुवृत्तौ ऊँ इतीत्येकमेव स्यात्। प्रगृह्यसञ्ज्ञाप्रकरणेन प्रगृह्यत्वस्यादेशस्य च सह विधानात्। उ इति वितीति च न स्यात्। आदेशे प्रगृह्यत्वकार्यन्तु स्थानिवद्भावेन बोद्ध्यम्। प्रगृह्यत्वस्य साक्षादुद्देश्यसम्बन्धस्य क्लृप्ततया विधेयविशेषणत्वे मानाभावात्। शाकल्यग्रहणानुवृत्तावपि प्रगृह्यत्वस्य ऊँ आदेशस्य विकल्पे ऊँ इति वितीति सिद्ध्यति; न तु उ इतीति। प्रगृह्यत्वविकल्पेन पक्षे तदभावेऽपि अस्य तात्पर्यात्। एतदभावे निपात एकाजित्यस्याप्रवृत्तेः। तदुक्तं भाष्ये योगविभागं प्रदर्श्य किमर्थो योगविभागः शाकल्यमते ऊँ विभाषा यथा स्यात्।

स्थानिवत्वं भवत्येवेति भावः।। पदस्य चरमावयवेति। अस्यतद्धित निमित्तकालोप परकेत्यादिः। तेन पिपठिषतेः क्विपिपिपठी रित्यस्य सिद्धिः। क्वौ लुप्तमिति निषेधाद्वा तत्सिद्धि रितिभावः। अतएवेति।। न वदांतेति पूर्वत्रासिद्ध इति च निषेधाभावे न स्थानिवत्वादेवेत्यर्थः। चरसन्निहित स्यैवेति। चर् सहचरितस्य परिनिमित्तकस्यैवेत्यर्थः। औचित्यादिति। साहचर्यानाश्रवणे मानाभावा दिति भावः। वक्ष्यत इति, वति घटित्वा भावाच्च पूर्वोक्त ज्ञापकादपि सान्निपाद्यां न प्रवर्तत इत्यपि वोध्यम् एवमेव जातिपक्षे ऋलृ वर्णयोरित्यनेन समान जात्यति देशविधानात्तस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ॐ इति उ इति। अन्येषामाचार्याणां मतेन वितीति। अनेन हि योगविभागस्य 'उ इति' इति रूपसिद्धिः फलमिति स्पष्टमेव लभ्यते। अतो योगविभागेन व्याचष्टे उअ इति। उञो वाचकं प्रगृह्यपदमित्यर्थः।

शाकल्यस्येतौ प्रगृह्यमित्यनुवर्त्तते, तदाह – उञ इतौ वेत्यादि। विकल्पाननुवृत्तौ हि निपात एकेत्येव सिद्धे इदं व्यर्थमेव स्यात्।, एवञ्च प्राप्तविभाषेयम्। ऊं इत्यत्र शाकल्यप्रगृह्यपदयोरसम्बन्धे उञ इत्यर्थाधिकारादप्रगृहस्यैवादेशे तस्य 'इको यण्' (६।१।७७) इति यणि ॐ इतीत्यस्यासिद्धिः, दीर्घोच्चारणवैयर्थ्यापत्तिश्च। विकल्पमात्रसम्बन्धेऽपि ॐ इतीत्यस्यासिद्धिरिति विधानसामर्थ्यात्प्रगृह्यपदसम्बन्धः। प्रगृह्यपदमात्रसम्बन्धेऽर्थाधिकारादप्रगृह्यस्य नित्ये ऊआदेशे ॐ इतीति, प्रगृह्यस्य उ इतीति सिद्धेऽपि वितीति न सिद्ध्येत्; तदाह – उञ इतौ दीर्घोऽनुनासिक इत्यादि। अत्र विशिष्टस्य विधिरिति न वाक्यभेदः। न च प्रगृह्यत्वमादेशश्च शाकल्यमते इति तयोरेकप्रयोगे एव प्रवृत्तिः स्यादिति वाच्यम्, योगविभागसामर्थ्येन शाकल्यमते एव भावाभावकल्पनात्। वस्तुत उञनुवादेन सञ्ज्ञाऽऽदेशयोः सहविधानमेव न्याय्यम्। आदेशे स्थानिवद्भावात्प्रगृह्यकार्यम्। भाष्ये 'प्रगृह्यसञ्ज्ञकश्च' इत्यपि स्थानिवद्भावलब्धार्थस्वलरूपकथनमिति न्यायविदो विचारयन्तु।

मय उञो (८।३।३३)। व्याख्यानादत्र मय् प्रत्याहारः। अस्य त्रैपादिकत्वेनासिद्धत्वान्न 'प्लुतप्रगृह्या' (६।१।१२५) इत्यनेन बाधः। नानुस्वार इति। किं वितीत्यादौ प्रगृह्यसञ्ज्ञाऽभावेऽस्यासिद्धत्वाद् 'इको 'यण्' (६।१।७७) इति यणि अनुस्वारो भवत्येव।

ननु 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति न्यायेन गौरीशब्दस्य

वतिघटित त्वाभावात्रिपाद्याम प्रवृत्तिः। तेन क्लृऽप्त शिरवेत्यत्रानृत इति निषेधो नेति प्रागुक्तं नविस्मर्तव्यम् अत्रेदमिति। उत्तरपदत्वे चेत्यस्योत्तरपदकार्यित्वे एव प्रवृत्ति रित्यत्र गतिकारकेत्यस्यानित्यत्वे च पद इत्यस्य पदत्व योग्योपलक्षणत्वे वेत्यर्थ इत्यर्थः।। इदं भाष्यमपीति। पदेंऽत इति सप्तमीसमासपरं प्रकृत सूत्रस्थं भाष्यभपीत्यर्थः। अपिना षात्पदांतान्न लुमतांगस्य ङ्मोह् स्वादुञि च पद इति च सूत्रस्थ भाष्य ग्रहणं किं साधकम्।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तम्यर्थवृत्तित्वेऽपीकारस्य तत्त्वाभावोऽत आह-ईदूदन्तमिति। शब्दस्वरूपस्य विशेष्यत्वात्तदन्तविधिरिति भावः। मामकी तनू इति। प्रगृह्येषु इतिशब्दप्रयोगस्य पदकारैर्नियमितत्वात्पदपाठे प्रगह्यत्वफलमत्र बोध्यम्। ईदूतौ किम्? अग्ना भवाति, सप्तम्या डादेशः। तपरत्वम् सन्देहाय। सप्तमीति किम? धीती मती; ह्रस्वान्ताभ्यां तृतीयैकवचनस्य पूर्वसवर्णे सवर्णदीर्घः। अर्थग्रहणं किमिति। न च तदभावे 'ईदूदेद्' इतिवदीदूदन्ता या सप्तमीत्यर्थापत्तिः। तथा च 'ययी' इत्यादावेव स्यात् एकादेशस्य परादिवद्भावेन सप्तमीत्वात्, न तु 'गौरी' इत्यादाविति तत्सिद्ध्यर्थं तदावश्यकमिति वाच्यम्, 'ईदूतौ सप्तमी प्रगृह्यम्' 'अदसः' 'एच्वद्विवचनम्' इत्येव सिद्धे गुरुभूतन्यासकरणेन तत्प्रकरणापेक्षया वैजात्यबोधनादूकारांशेऽसम्भवाच्च 'सञ्ज्ञाविधौ' (प०भा०) इति तदन्तग्रहणनिषेधाप्रवृत्त्याईदूदन्तं सप्तम्यन्तमित्यर्थेनेष्टसिद्धेरिति प्रश्नः। 'ययी' इत्यादेरन भिधानमेवेति परे।

वृत्ताविति। अर्थग्रहणसामर्थ्यात् सप्तम्यर्थमात्रे पर्यवसन्नमित्यर्थेनात्र। तत्संसृष्टाऽऽधेयार्थेऽपि वृत्तेर्न दोषः। 'सञ्ज्ञायाम्' इति समासे जहत्स्वार्थायां वृत्तौ पूर्वपदस्याऽऽनर्थक्येऽपि 'सुप्सुपा' इति समासे अजहत्स्वार्थयां प्रसक्तदोषस्योक्तरीत्यैव वारणमिति भावः। 'गौरी अधिश्रितः' इत्यत्राधिश्रयणक्रियायामेव गौरीपदंबोद्ध्याधिकरणत्वान्वय इति गौर्यधिकरणके लक्षणायां मानाभाव इति न तत्र दोषः। वाप्यामश्व इति। सुप्सुपेति समासः, 'सञ्ज्ञायाम्' (२।१।४४) इति वा। ननु सञ्ज्ञायामिति समासे वाक्येन सञ्ज्ञाऽनवगमान्नित्यसमासत्वेन विग्रहोऽनुचित इति चेत्? न, तेषु समाससमानार्थकवाक्याभावेन नित्यसमाससदृशत्वेऽपि नित्यसमासत्त्वाभावत्,

---

गोचेत्यादौ अवङादि साधकः। प्रतिबंध कश्चेति। एषो यन्नित्यादावुत्वादि प्रतिबंधकश्चेत्यर्थः। अदर्शनं लोपः। ननुप्रासादात्प्रेक्षत इत्यादौ शास्त्रतोऽप्रसंगादाह।। अर्थतोवेति।। प्रत्यय लोप इति। लिट् धुगित्यादौ प्रत्यय लोपविषय इत्यर्थः।। लोप विधानेति। हल्ङ्यादिभ्य इत्यादिनेति भावः। तस्येति। स्वादेः प्रत्ययस्येत्यर्थः। व्याख्यानादिति। लोपनं लोप इत्यन्वर्थ संज्ञा करणरुपादित्यर्थः। तुगापत्तिरिति। ह्रस्वस्यपितीति तुगायत्तिरित्यर्थः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विभाषाधिकारबाधे मानाभावात्। नित्यसमासे हि वृत्तिघटकपदानां पृथक् प्रयोगाभाव एव। अत्र तु पृथक्प्रयोगेऽपि तद्बोद्ध्यविशिष्टार्थाऽप्रतीतिमात्रमित्याहुः।

अणोऽप्र (८।४।५७)। अण इति किम्? कर्त्तृ, हर्तृ, अत्राण् पूर्वेणैव व्याख्यानात्। 'आगच्छतमग्नी' इत्यादौ प्लुतस्यासिद्धत्वात्ततः प्रागेव यथोद्देशत्वात् प्रगृह्यत्वे जाते पश्चात्प्लुते तस्याप्यनुनासिकप्रतिबन्धार्थं पुनः सञ्ज्ञेति नानुनासिकः। सञ्ज्ञायाः कार्यार्थत्वात्पुनः प्रवृत्तौ कार्यमेव बीजम्। स्थानिवत्तवन्तु न, प्लुतस्थान्यल्वृत्तिधर्मत्वेनाल्विधित्वात्। पूर्वसवर्णे कृते द्विवचनत्वन्तु परादिवद्भावेन। तेन–

ताद्रूप्यानतिदेशेऽप्येतर्द्धर्मातिदेशाङ्गीकारात्। अत एव 'रामौ' इत्यादौ परादिवद्भावेन सुप्त्वात्पदत्वं साधितम् 'अन्तादिवत्' (६।१।८५) इत्यत्र भाष्ये इति स्पष्टमाकरे।

अच्सन्धिरिति। 'सिद्धमनच्त्वाद्' इति वार्त्तिकप्रयोगेण 'अल्पाच्तरम्' (२।२।३४) इति सौत्रप्रयोगेण 'कथमनच्त्वम्' इति भाष्यप्रयोगेण च वृत्तिघटकाच्पदे पदान्तकार्यस्य तत्सन्निधानेन श्चुत्वस्य चाभावो बोध्यते इति केचित्।

इति स्वरसन्धिः।

स्तोश्चु (८।४।४०)। स् इति श् इति च लुप्तविभक्तिके भिन्न पदे। योगे इति। संयोगे इति तदर्थः। तेन 'चितम्' इत्यादौ न दोषः। अत्र 'पदस्य' (८।१।१६) इत्यधिकृतमपि न सम्बद्ध्यते 'शात्' (८।४।४४) इति ज्ञापकात्। तेन 'याच्ञा' सिद्धा। शात्परस्य स्तोः श्चुत्वनिषेधकात् 'शात्' इति लिङ्गादेव निमित्तकार्यिणोयथासंख्यं न। एवमुत्तरसूत्रेऽपि 'तोःषि' (८।४।४३) इति ज्ञापकान्न तत्। शकारचवर्णौ स्त इति। यथासंख्यमिति शेषः हरिश्शेते इति। 'वा शारि' (८।४।३६) इति विसर्गाभावे शः सच्चिदिति।

ननु प्रत्ययग्रहण इति परिभाषया यस्मात्सविहितस्त दादेरित्यस्यात्रो पस्थित्या नतुगापत्तिरिति चेन्न त्रपेःक्विपि सौ हल्ङ्यादि लोपे जश्त्वे वावसान इति चर्त्वे ततऽ इति निवातन योगे यस्माद्विहित स्तादे रपि सत्त्वात्। विषयत्वाच्चेति। हेतावत्र च शब्द इतिभावः। पर एवेति। तेन पुत्रादिनीत्या दौ न निषेध इतिभावः। लुप्तसप्तमी कमिति। सुपांसुलगित्यनेनाकारादेशाल्लुप्ता दृष्टा सप्तमी यस्मात्तदित्यर्थः। एतेनेदूतौ चेति प्रगृह्यत्वेन यण दुर्लभमित्यपास्तम्। नन्वेतादृशक्लिष्टकल्पनापे क्षयादिन प्रकृतिक सप्तम्यं तस्यैवसूत्रे निर्देशोस्तु।। एवं चस्त्रियामपि ङीप्प्रकृति भागभादाय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चुत्वस्यासिद्धत्वाज्जश्त्वेन दत्वे तस्य चुत्वेन जकारे चर्त्वमिति बोध्यम्। तयोरत्रालेखस्तु वैचित्र्यार्थः।

विश्न इति। 'यजयाचयतविच्छप्रच्छरक्षो नङ्' (३।३।९०) इति नङि 'चछ्वोः' (६।४।१९) इति शादेशे ङित्वाद् गुणाभावः। 'प्रश्ने चासन्नकाले' (३।२।११७) इति निर्देशात्सम्प्रसारणाभावः।

न पदान्ता (८।४।४२)। पदाट्टोरित्येव सिद्धेऽन्तग्रहणं स्पष्टार्थम्। टोः किमिति। षकारस्यापि पदान्ते जश्त्वविधानात्प्रश्नः। 'ह्रस्वात्तादौ' (८।३।१०१) इति षत्वस्याऽसिद्धत्वाज्जश्त्वाभाव इत्युत्तरम्। षण्णवतिरिति। षडधिका नवतिरिति विग्रहः। षण्णगर्य इति पृथक्पदे।

यरोनु (८।४।४५)। पदान्तस्येति किम्? वेद्मि, बध्नाति। स्पर्शे चरितार्थ इति। उपलक्षणमिदं वलयोरपि प्रवृत्तेः। एतच्च जातिपक्षे स्पष्टमेव। व्यक्तिपक्षेऽपि तादृशव्यक्तौ चरितार्थस्य एतद्व्यक्तिविषयतयोपप्लव एव नेति बोध्यम्। स्पष्टश्चेदम् 'इको यणचि' (६।१।७७) इत्यत्र कैयटे।

परेतु स्थानेऽन्तरतमसूत्रे सप्तम्यन्तपाठस्य भाष्यकृता दूषितत्वेनैतद्युक्तेरुक्तिसम्भव एव न। तस्मात् 'अनुस्वारस्य' (८।४।५८) इति सूत्रात्सवर्णग्रहणमपकृष्य परः सवर्णोऽनुनासिको भवतीत्यर्थान्न दोषः। तदुक्तं भाष्ये – रेफेऽनुनासिकपरसवर्णत्वयोः प्रतिषेधो वक्तव्यो, न वक्तव्यो; रेफोष्माणां सवर्णां न सन्ति' इति। चिन्मयमिति। स्वार्थिकः 'तत्प्रकृतवचने' (५।४।२१) इति मयट्। तत्र तदिति वाक्यभेदेन क्वचित्प्राचुर्यरूपप्रकृतवचनाभावेऽपि

भविष्यतीत्यत आह्। अत एवेति एवं च पुंसिव्यावृत्यर्थे स्त्री लिंगस्थ ङीबन्तस्यैव सूत्रे ग्रहणमितिभावः।। आदिन् शब्दप्रकृतिक सप्तम्यंतस्य सूत्रे निर्देशेऽपि न पुंस्यतिव्याप्तिरित्याह। ईहशाक्रोशस्येति। प्राप्तद्वत्वस्यैवेति। नत्वच इत्यस्य नेत्यस्य चानुवृत्येंद्रशब्दे दस्यराष्ट्र शब्दे रेफस्यवा प्राप्तद्वित्वस्य विधाय कमितिभावः। ननु श्रुतत्वाद्रहा भ्यामित्यचोविशेषणमच इति यर इत्यस्येत्येव किं नेत्यत आह। व्याख्यानादिति। श्रुतक्रम३५ रूपात्। यर इति चागं तूनामंते निवेश इतिन्यायेन रहाभ्यामित्यस्य विशेष्यमिति भावः।। अनुवादेपरिभाषानुपस्थितेरत्र पर शब्दा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मयडर्थम्। अत एव 'चिन्मयं ब्रह्म' इति सामानाधिकरण्यम्। 'चिन्मात्राम्' इति क्वाचित्कोऽपपाठः, मात्रचः प्रत्यस्यात्रोपपत्त्यभावात्। मयूरव्यंसकादिष्वेवार्थमात्रशब्देनात्र समासस्य वक्ष्यमाणत्वात्। निपातनादिति। यवादिगणे 'ककुद्मान्' इति प्रकृतिप्रत्ययसमुदायः पठ्यते इति मतेनेदम्।

उदः स्था (८।४।६१) 'तस्मादित्युत्तरस्य' (१।१।६७) इति परिभाषालभ्यमर्थमाह-उदः परयोरिति। अत्राघोषस्येति। समनियतत्वेनान्यतमग्रहणे बाधकाभावेन श्वासविवारयोस्त्यागेऽपि न न्यूनतेति बोद्धयम्। थस्यासिद्धत्वादिति। त्रिपाद्यां परत्वादिति भावः हलो यमाम्' (८।४।६४) इति सूत्रोक्तभाष्यसम्मताष्टाध्यायीपाठे तु थस्यासिद्धत्वाभावेन चर्त्वं भवत्येव। अत एव 'उत्पूर्वस्कन्दे रोगे उपसंख्यानम्' उत्कन्दो रोगः' इति भाष्यं सङ्गच्छते। मूलन्तु प्राचामनुरोधेनेति परे। न चेदं सूत्रं व्यर्थं 'झलो झलि' (८।२।२६) इत्यनेन सस्य लोपे उत्थानस्य सिद्धेरिति वाच्यम्, झलादौ प्रत्यये तेन लोप इत्यर्थस्याऽनेन ज्ञापनात्। उदस्थादित्यत्र तु निर्दिश्यमानपरिभाषया निर्दिश्यमानादेरेव स्थानित्वान्न दोषः।

'झयः' इति पञ्चमीत्याह—झयः परस्येति। पूर्वस्येत्यनुवर्तते। घोषवत इति। समनियतत्वेऽपि विनिगमनाविरहात्स्वरूपप्रतिपादनाय च त्रितयग्रहणम्।

झय इति। पदान्तादित्यपि बोद्यम्। तेन 'विरप्शम्' इत्यादौ छत्वं न। जकारे कृते इति। छत्वमिति शेषः, पूर्वोक्तभाष्यसम्मताष्टाध्यायीपाठे चर्त्वस्य छत्वं प्रत्यसिद्धत्वात्।

मोऽनु (८।३।२३) पदस्येत्यधिकृतं म इत्यनेन विशेष्यत इत्याहमान्तस्योति। 'हलि सर्वेषाम्' (८।३।२३) इत्यतो हलीत्यनुवर्त्तते। हलि किम्? राममाश्रय।

ध्याहार इति प्रकाशाद्युक्तं खंडयति ।।तस्मादितीति।। विधौपरिभाषेति न्यायस्तु इको गुण वृध्दी अचश्चेति परिभाषाद्वय विषय एवेति भावः।। भाष्यसंमतेति।। भाव्येशश्छोटीत्युत्तरमभ्यासे चर्चेत्यस्योपादानादिति भावः। हाय्येति ह य गतौ ऋहलोर्ण्यत्।। (शय्येति। शीङ् स्वप्नें। लषपतेति क्यप् अयङि्य क्ङिति सयङादेशः।।) अवाविति।। मूलमतेनेदम्।।

स्वमते त्वोदौतोरिति वार्तिक स्यावश्यकत्वास्थानें तरतम परिभाषया वांत

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नश्चा (८।३।२४) चेन मोऽनुकृष्यते। अपदान्तस्य किम्? राजन्पाहि। यशांसीति। यशश्शब्दाद् जसः शौ 'नपुंसकस्य' (७।१।७२) इति नुमि 'सान्त' (६।४।१०) इति दीर्घः। आक्रंस्यत इति। क्रमेर्लृट्, 'आङ उद्गमने' (१।३।४०) इति तङ्; स्यः।

अनुस्वारस्य (८।४।५८) परेति लुप्तषष्ठीकं पृथक्पदम्। अत एव 'उदः स्था' (८।४।६१) इत्यादौ सवर्णग्रहणानुवृत्तिः 'यरोऽनुनासिके' (८।४।४५) इत्यत्र तदपकर्षश्च सिद्धः। ययीति स्पष्टार्थम्। 'दंशनम्' इत्यादौ तु न दोषः शकारसवर्णाऽप्रसिद्धेः, प्रयत्नभेदेनाञ्झलोः सावर्ण्याभावात्। अचि अनुस्वाराभावात्।

मो राजि (८।३।२५)। नेति सिद्धे म इत्युक्तिः 'हेमपरे (८।३।२६) इत्येतद्विषये 'प्रशाम् ह्मलयति' इत्यादौ 'मो नो धातोः' (८।२।६४) इतिनत्वबाधनार्था। निषेधस्त्वन्तरत्वादनुस्वारस्यैव स्यात्। ध्वनितञ्चेदम् 'तददोऽन्' (५।३।५) 'अमो मश्' (७।१।४०) इति सूत्रयोर्भाष्ये।

हे मपरे (८।३।२६)। मपरे इति बहुव्रीहीः न तु तत्पुरुषोऽसम्भवात्। 'मोऽनुस्वारः' (८।३।२३) इत्यतो म इत्यनुवर्त्तते।

(३) यथासंख्य (१।३।१०)। सम्यक् ख्यानं संख्या–

क्रमवैशिष्ट्येन ज्ञानम्, 'यत्सांख्यैः प्राप्यते स्थानाम्' इत्यत्र संख्या शब्दस्य ज्ञानार्थतायाः दृष्टत्वात्। तामनतिक्रम्य यथासंख्यम्। अनुदेशः-पश्चाद्‌भववाक्यार्थबोधकालिकः सम्बन्धः। साम्यं-संख्यया, योग्यत्वाद्याख्यानाच्च। एवञ्च समसङ्ख्यायां येन क्रमेण पदज्ञानं पदादुपस्थितिर्वा, तेनैव क्रमेण वाक्यार्थबोधविषयः सम्बन्धस्तेषामित्यर्थः। फलितमाह–सम-

---

इति यथाश्रुतेप्यदोषादिति भावः।।

संवृतावर्ण इति। भाष्य प्रामाण्यादत्र अ इत्यस्य नासिद्धत्वमितिभावः। तदुपरागादिति। तत्सान्निध्यादित्यर्थः।। तस्मान्नुऽचीत्यर्थमावश्यिकयेति। अनेनात्रानावश्य कत्वं सूचितम्।। तथाहि यकार रूपस्य यकारांतस्य वा प्रत्ययस्या संभवात्प्रत्यये विद्यमाने यकार इत्यर्थे नापीष्टसिद्धेरिति भावः।। ननुवकार प्रश्ले षाभावे प्रकृते लक्ष्यासिद्धिरत आह्। किंचेति। भंगापत्ते रिति।। अध्वपरिमाणे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्बन्धीति। यद्यपि स्थानाख्यलौकिकप्रमाणादेव सिद्धं, तथापि 'परस्मैपदानाम्' (३।४।८२) 'एचोवयवायावः' (६।१।७८) इत्यादौ शब्दतः सूत्रान्तरस्थक्रममादाय सम्बन्धबोधार्थम्, 'आद्यन्तौ टकितौ' (१।१।४६) इत्यादौ समासनिर्देशे साहित्ये द्वन्द्वविधानादप्राप्तक्रमान्वयोबोधनार्थञ्चेप्तम्। एवञ्च तत्र यथासंख्येनान्वयबोधकवाक्य कल्पना एतत्प्रामाण्यात्, ततश्च बोध इति बोध्यम्। अत्र 'स्वरितेन' (१,३।११) इत्यपकृष्यते इति 'ख्यत्यात्' (६।१।११२) इत्यादौ नातिप्रसङ्गः। तत्र प्रतिपत्तिकालिकमेव संख्यासाम्यमेतच्छास्त्रप्रवृत्त्युपयोगीति 'ञमङणनम्' (मा०सू०७) इति सूत्रे भाष्ये स्पष्टम्।

एते यवला निरनुनासिका एव विधीयमानत्वेन सवर्णाग्राहकत्वात्' जातिग्रहणप्राप्तस्येव गुणाभेदकत्वप्राप्तस्यापि 'अप्रत्यय' इत्यनेन निषेधाच्च। एवं 'मय उञ' (८।३।३३) इत्यत्रापि। अत एव मतोर्मस्य नानुनासिको वकारः। अन्यथा 'तद्वानासाम्' (४।४।१२) इत्यादौ नित्यानुनासिकापत्त्या तन्निर्देशासङ्गत्यापत्तिरित्याहुः।

चयो द्वितीया (का०वा०) इति। 'नादिन्याक्रोशे' (८।४।४८) इत्यत्र भाष्ये इदम्। एतत्सामर्थ्यदितत्कृतद्वितीयस्य न चर्त्वम्।

ऊष्मोदयं प्रथमं स्पर्शमेके 'द्वितीयमाहुरपदान्तभाजम्'। इति प्रातिशाख्येऽपदान्तभाजमिति चर्त्वासिद्धत्वलब्धार्थानुवादः पदान्ते जश्त्वप्रवृत्त्याचयोऽलाभात्। अत्र तु कृते न जश्त्वप्राप्तिरस्यासिद्धत्वात्। 'अफ्सरा' 'वथ्सा' इति भाष्योदाहृते छान्दसत्वाच्चर्त्वस्यासिद्धत्वं न। एवञ्च प्रातिशाख्येऽपदान्तभाजमित्युत्सर्गः। यद्वा तयोरव्युत्पन्नत्वं, न त्वप्पूर्वात्सर्त्तेरसिर्वदिः सो वेत्यन्यत्र विस्तरः।

गम्यमाने यूतौ परे गो शब्दस्यावादेश इति तद्वार्तिकार्थः। तत्र वलोपेऽध्वपरिमाणस्या गम्यमानत्वात्तत्र वलोपपक्षेऽ वादेशस्यैवाभावेन नलोपइतिभावः।। उक्तार्थ प्रसिद्धमाह। यथेति। णत्वस्याभाव इति। तत्रापि पूर्व पदस्थान्निमित्तात्परस्य नस्यणत्वं स्यात्संज्ञायां कृतणत्वेन चेत्संज्ञायां गम्यमानायामित्यर्थ इति भावः।। एवं च संज्ञापदघटित सूत्राणामेतादृशार्थ करणेन फलितार्थ कथनं तत्र तत्। संज्ञाभंगापत्तेरिति संस्कृत मितिबोध्यम्।। एतेन संम्राडित्यत्र संज्ञात्व भंगापत्तेरेवानुस्वारामावेव तद्बाधनार्थं मोराजीति सूत्रंव्यर्थमित्यपास्तम्।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ङः सि (८।३।२९)। 'सि' इति सप्तमी षष्ठ्यर्थे; व्याख्यानात् तदाह-सस्येति। पदस्येत्यनुवर्त्तमानस्य वैयधिकरण्येनान्वयात्पदावयवस्य सस्येत्यर्थः। षट्त्सन्त इति। धुटि धस्य चर्त्वे लक्ष्यभेदात्पुनर्डस्य चर्त्वम्।

नश्च (८।३।३०)। नकारान्तादिति। पदस्येत्यनुवृत्तं पञ्चस्या विपरिणम्यत इति भावः। वैयधिकरण्येनैवान्वय इति ङमुट्सूत्रस्थभाष्यस्वरसः। नस्य पदान्तस्येति। अपदान्तनकारेऽनुस्वारप्रवृत्त्या फलितार्थप्रदर्शनमिदम्। नान्तस्य पदस्येत्युचितम्। चतुष्टयमिति। वक्ष्यमाणविकल्पैरिति भावः। तेन तुकश्चुत्वे छत्वस्यासिद्धत्वात् 'चयो द्वितीयाः (का०वा०) इति पक्षे चस्य छत्वेन छकारछकारछकारशकारघटितरूपद्वयाधिक्ये ञशानुस्वारविसर्गाणां द्वित्वविकल्पेनाऽऽधिक्येऽपि न क्षतिः।

ङमो (८।३।२)। पदस्येत्यनुवृत्तं सामानाधिकरण्यानुरोधात्पञ्चम्या विपरिणम्यते इत्याह – तदन्तं यत्पदं तस्मादिति। तत्र ङम् स्वयं ह्रस्वादितिविशेषण सम्बन्धमनुभूय पदविशेषणत्वेन तदन्तपर इति भावः। ङम इति पञ्चमीबलादचीति सप्तमी षष्ठ्यर्थे, तदाह-अच इति। सप्तमीनिर्देशस्तु लाघवार्थः। 'ङम उत्तरस्याचः' इति 'तस्मिन्' (१।१।६६) इतिसूत्रस्थ भाष्यात्। ङमन्तं यत्पदमिति किम्? 'अनिति' ङमुण्माभूदिति। भाष्ये तु विभक्तिव्यत्ययकल्पने गौरवात्पदावयवङमः परस्येति वैयधिकरण्यमेवोक्तम्। 'दण्डिना' इत्यत्र ङमुडभावो मण्डूकप्लुत्या 'उञि च पदे' (८।३।२१) इत्यतः पदे इत्यनुवर्त्याजादेः पदस्य ङमुडित्यर्थेन बोद्ध्यः। पदस्येत्यस्याऽवृत्त्या सम्बन्धेऽपि विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्वे एव तदादिविधिप्रवृत्त्या तदलाभः स्यात्। एतदर्थमेवाचीति सप्तमीनिर्देशः। ङमन्तं यत्पदमिप्यर्थेऽपि 'परमदण्डिना' इत्यादावेतद्वारणाय 'पदे' इत्यनुवृत्तिरावश्यक्येव।

अनुस्वारविधायक सूत्रस्य संज्ञापद घटितत्वा भावात्संज्ञात्व भंगापत्तेर्न कार्यमित्यपूर्ववचना भावाच्च। धातोस्तन्निभित्तस्यैव। नयकी तितु न सूत्रितम्। भुवः क्वि बन्तादुगवादिभ्यो यतिओर्गुणे भोयमित्यादौ पूर्व सूत्रेणावा देशापत्तेः।। यथान्यासे नायं दोषः तथाहि। धातोस्तन्निमित्त स्येत्यस्यारंभाद्वां तोयीत्यत्राधात्ववपवयोरोदौ तोग्रहणमिति भोयमित्यादौ नतत्प्राप्तिः। धातोरित्यस्तु धातोः कार्यमु च्यमानमिति परिभाषया धातुशब्दमुच्चार्य विहिते यादौ प्रत्यये परे तन्निमित्तयोर्धा तोखयवयोरोदौतोर्वांतादेश इत्यर्थाद्भोयमित्पादाव प्राप्तिरितिभावः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्तर्वर्त्तिविभक्त्या दण्डिन्नित्यस्य पदत्वात्। उत्तरपदत्वे च' इति प्रत्ययलक्षणनिषेधस्तु न, माषकुम्भवापेनेत्यादौ 'पदव्यवायोऽपि' (८।४।३८) इतिनिषेधसिद्धये तस्य यत्रोत्तरपदस्य कार्यित्वं तत्रैव प्रवृत्तेः। 'तेन निषेधेन सिद्धम्' इत्येतत्सूत्रस्थभाष्योक्तिस्त्वेकदेशिन इति दिक्। 'इको यणचि' (६।१।७७) इति सौत्रो निर्देशः।

रूप्रकरणे इति। अत एव 'समः सुटि' (८।३।५) इत्यादौ प्रश्लेषेण सविधानमिति भाष्ये उक्तम्। रोः पूर्वस्येत्युपलक्षणं रुप्रकरणविधेयस्य। एवमुत्तरत्र रोः पूर्वस्मादित्यपि। अयमधिकारः। तेनोत्तरसूत्रविषये एवास्य प्रवृत्तिः, न तु 'मतुवसोः' (८।३।१) इत्यत्र, तत्सूत्रस्थ वार्त्तिकयोश्च। अत्रेति तु-रुप्रकरण एवास्य सम्बन्धो, न त्वग्रे 'ढो ढे लोपः' (८।३।१३) इत्यादावित्यर्थसूचनार्थं, स्पष्टार्थमेव। तुशब्दः परस्य नित्यं रूत्वं वाऽनुनासिक इति विशेषद्योतनार्थः। पूर्वस्येत्यस्य च रुस्थानिनः पूर्वस्येत्यर्थो बोद्धव्यः।

अनुनासिकात्पर इत्यत्रानुनासिकादिति ल्यब्लोपे पञ्चमी, व्याख्यानात्। अयमागमोऽनवयव, एव, अवयवत्वे मानाभावात्।

खरीति। विसर्गाक्षिप्तस्याप्यवसानस्य न सस्बन्धो व्याख्यानात्। सो वक्तव्य इति। 'समः सुटि' (८।३।५ इत्यादिसूत्रत्रये स इत्युपसंख्याय 'समः सुटि' (८।३।५) इत्यत्र सकारं प्रश्लिष्य वा एतैः सकार एव विधेय इत्यर्थः। एवञ्चास्यासिद्धत्वाद्रुत्वाभावेन विसर्गाभावे तत्तद्विधीनामप्राप्तिरेवेति भावः। स्पष्टं चेदं भाष्ये। विसर्गस्यानेन सत्वविधाने तु गौरवं स्फुटम्। लोपस्यापीति। यत्तु –

उपधारञ्जनं कुर्यान्नमो रुकरणे सति।

ननु वांत इत्यत्रैतदारंभात्धातु शब्दमुच्चार्यविहित यादि प्रत्यय परक धात्ववयव भिन्न योरो दौतोरि त्येवार्थाद्भो यमित्यादौ तत्राप्तिर्दुर्वारैवेति चेन्न।। तत्रासति बाधक इतिन्यायेन न यकीत्ये व सिद्धे धातोस्तन्निमित्तस्येत्यारं भेण च धात्ववयव भिन्नयोरित्येव वांत इत्यत्रार्थादिति दिक्।। वहिरंगत्वादिति।। पदद्वयाश्रित्वेनेति भावः। आडागमे वृद्धिरिति। अत्रवृद्धेरप्येक पदाश्रयत्वेन नावादेशा द्वहि रंगत्वम्।। ननु पूर्वोपस्थिति निमित्तकत्वेनावादेशस्यांतरंगत्वम्।। यादि प्रत्यय निमित्त कत्वात्।। वृद्धेः पश्चादुपस्थित संप्रसारण निमित्तकत्वाद्वहि रंगत्वं।।३८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोपे प्रकृतिभावे वा नोपधारञ्जनं मतम्।।

उपधारञ्जनम्-अनुनासिकानुस्वारागमरूपम्। नमोर्नकारमकारयोः। प्रकृतिभावोदाहरणं 'नॄन्पाहि' इति। तत्तु प्रातिशाख्यत्वात्तच्छाखामात्रविषयमिति भावः। अतएव भाष्ये – 'समादिषु सत्वं वक्तव्यम्' इत्युक्तम्। रुत्वपक्षे चानुनासिकाद्यापत्तिर्दोषत्वेन नोक्ता। ननु लोपपक्षे एव द्वित्वेन द्विसकारस्य सिद्धत्वात् 'समः सुटि' इति व्यर्थमित्यत आह- त्रिसकारकमपीति। 'स्कोः' (८।२।२९) इति लोपस्तु न, अस्यासिद्धत्वात्। पुनर्द्वित्वेन त्रिसकारस्य सिद्धिरिति तु न युक्तं, 'लक्ष्ये लक्षणस्य' इति न्यायात्। एतेन 'समः सुटि' (८।३।५) इत्यत्र वेति पाठेनैव पक्षे मोऽनुस्वारेण सिद्धे 'अनुनासिकात्परः' (८।३।४) इति व्यर्थमित्यपास्तम्।

ननु व्यञ्जनात्परस्यैकस्यानेकस्य वोच्चारणे विशेषाभावोऽत आह– अनुनासिकवतामिति। तत्रोच्चारणे विशेषाभावकल्पने इदं वचनं व्यर्थमेव स्यादिति भावः। हयवरट्सूत्रभाष्योक्ते शर्षूपसंख्याने फलमाह– अनुस्वारवतामिति। अपिना कस्य सङ्ग्रहः। लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तेराह – वचनान्तरेणेति। 'यणो मयः' (का०वा०) इत्यनेन। एकस्यैव शास्त्रस्य पुनः प्रवृत्तौ हि स न्याय इति भावः। पूर्वत्रासिद्धत्वेन पूर्वद्वित्वस्य पूर्वं प्रवृत्त्या तेन द्वितीयस्य साधुत्वे बोधिते तदनन्तरं परद्वित्वप्रवृत्त्या तयोर्मध्ये पुनरन्यस्य साधुत्वं बोध्यते इति त्रितस्य निर्वाहो बोद्धव्यः। 'अनचि च' (८।४।४७) इत्यत्र 'यणो मयः' (का०वा०) इत्यस्योपसंख्यानात् 'अचो रहाभ्याम्' (८।४।४६) इत्यतस्तस्य परत्वं बोद्धव्यम्।

पुमः ख (८।३।६)। अप्पर इति बहुव्रीहिः। क पयोरिति। 'कुप्वोः' (८।३।३७) इतिसूत्रविधेययोरित्यर्थः। 'इदुदुपधस्य' (८।३।४१) इति सूत्रेऽप्रत्ययस्येत्यस्य

अतएव क्ङितिचेति सूत्रे भाष्ये क्ङि तिवरे इकोगुणवृद्धी नेति सूत्रार्थे ओयत इत्यत्र निषेधमाशंक्यांतरंगः प्रतिबेधो बहि रंगावृद्धिरित्युक्तं संगच्छत इति चेन्न।। समकालप्राप्तिकांतरंग बहिरंग विषये एव पूर्वोपस्थिति निमित्त कस्यांत रंगत्वं पश्चादुप स्थितनिमित्तकस्य बहिरंगत्वमिति स्वीकारादिति बोध्यम्।। व्याख्यानात्।। तदर्थइति विशेषण सामर्थ्यरुपात्।। तदेति।। तच्छब्देनेत्यर्थः। तत्रेति। वृक्षव् करोतीत्यत्रेत्यर्थः।। अप्रवृत्तौबीजमित्ति'' न पदांतेति निषेधाप्रवृत्तौ बीजं कारणमित्यर्थः।। नन्वेवं. वेतस्वानित्यत्र पदचरमावयवे नेत्यर्थेपि निषेधाप्रवृत्त्येष्टे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्ययावयवभिन्नस्येत्यर्थादिति भावः। अव्युत्पत्तीति। तत्पक्षे प्रकृतिप्रत्ययविभागाभावादिति भावः। षत्वेति। इदमनुनासिकपक्षे। अनुस्वारपक्षे तु 'कुप्वोः' (८।३।३७) इत्यस्यैव प्राप्तिः, अनुस्वारव्यवधानेनोदुपधत्वाभावात्। पुंक्षीरमिति। क्षरधातोरुपधाया ईत्वेऽच्प्रत्यये क्षीरमिति भावः।

नश्छवि (८।३।७)। 'अप्रशान्' इति षष्ठ्यर्थे प्रथमा।

नृन्पे (८।३।१०)। नृनिति द्वितीयान्तानुकरणम्, षष्ठ्याः सौत्रो लुक्। नलोपस्तु सौत्रत्वान्न। एवं 'कान्' (८।३।१२) इत्यत्रापि। चाद्विसर्ग इति। 'र्शपरे' (८।३।३५) इति सूत्रात्तदनुकर्षश्चेनेति भावः'

येन नेति। 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधकः' इति न्यायेनेत्यर्थः। येन नेत्यादेर्यत्कर्तृका वश्यप्राप्तावित्यर्थः, नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वात्। 'प्राप्त' इति भावे क्तः। तदप्राप्तियोग्यविषयेऽचारितार्थ्यं हि बाधकत्वे बीजम्। तदुक्तं शर्पूर्वाः' (७।४।६१) इति सूत्रे भाष्ये– 'शर्पूर्वा इत्येतद्धलादिःशेषस्य बाधकम्। ननु विषयभेदे कथं बाधकत्वम्। इदं तावदयं प्रष्टव्यः, यदि तन्नोच्येत किमिह स्यात्, हलादिः शेषश्चेत्? नाप्राप्ते तस्मिन्नारम्भादिदं तद्बाधकं भविष्यति' इति। 'अजादेर्द्वितीयस्य' (६।१।२) इति सूत्रे भाष्येऽपि स्फुटमेतत्।

न तु शर्पर इति। न चस्य विसर्गस्य ᳵकᳶ पौ दुर्वारौ, किं चास्यैव तौ स्यातां, 'खरवसानयोः' (८।३।१५) इति विहितस्य तु एतयोरसिद्धत्वात्सत्वमेव स्यादिति वाच्यम्, 'शर्परि' (८।३।३५) इति सूत्रं 'कुप्वोः' (८।३।३७) इत्यत्रानुवर्त्य शर्पर्योः कुप्वोः क

सिद्धे पदेंत इतिसप्तमी समासा श्रयेण निषेधवारण परस्यन पदांतसूत्रस्थ भाष्यासंगतिरिति चेन्न।। पदांतस्यस्थाने विधौनेत्यर्थे पदांतस्यानूद्य मानत्वेना न्योन्याश्रयेपि पद चरमावयवे कर्तव्ये नेत्यर्थे पदचरमावयवस्य क्वापि पूर्वं सिद्धत्वाभावेन भावि न एव ग्रहणेनान्योन्याश्रयाभावात्।।

प्रापकस्येति।। रण् च इश्च तयोख्योरित्या दौ साक्षात् ङ्मुट् प्रापक स्यनावि ओ वासु देवोस्य नावः स इवाचरंतौ नावा वित्यादौ पदत्व द्वारा लोपप्रापकस्य चेत्यर्थः।। प्रतिबंधकस्य वेति।। राज्ञ इत्यादौ साक्षात् श्चुत्वस्य हरितमाचष्टे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पयोरपवादो विसर्ग इति वाक्यभेदेन व्याख्यानेनादोषात्। स्पष्टश्चेदं भाष्ये।

वार्त्तिके कान्ग्रहणं शक्यमकर्तुमित्याह – यद्वेति। एवं सम्ग्रहणमपि त्यक्तुं शक्यम्। पुम्ग्रहणं त्वावश्यकमेव, अनुनासिकपक्षे इणः परत्वेन षत्वापत्तेः। एष्विण इति। गणे कृतसत्वषत्वानामेव पाठादिति भावः। ˘क˘ पयोरपवाद इति। तद्विहितविसर्गस्यापीत्यपि बोध्यम्। कांस्कानिति। वीप्सायां द्वित्वम्।

संहितायाम् (६।१।७२)। संहिता च स्वारसिकार्धमात्राकालव्यवायेनोच्चारणम्। ततोऽधिकार्धमात्राकालेनोच्चारणे एतदधिकारोक्तकार्यव्यावृत्तये इदम्। तदधिककालव्यवाये तु न साधुत्वं; नापि बोध इष्यते इति – वृद्धा इति, तेषां शास्त्रविषयतैव नेति भावः।

छे च (६।१।७६)। छे इत्यकार उच्चार्णार्थ; तेन 'आच्छिन्नम्' इत्यत्र तुक्। 'ह्रस्वस्य पिति' (६।१।७१) इत्यतो ह्रस्वस्येति तुगिति च वर्त्तते। जश्त्वेनेति। स्वशब्दे उपपदे छ्यतेः के स्वच्छशब्दो निर्मले रूढः, एवं नञ्पूर्वाच्छादयतेर्डे अच्छशब्द इति पदान्तत्वं बोद्ध्यम्। स्पष्टश्चेदममरटिप्पणे।

आङ्माङोः (६।१।७४)। आङ्साहचर्यान्माङव्ययमेव।

दीर्घस्यायमिति। वक्ष्यमाणज्ञापकाद् व्याख्यानाद्वा दीर्घादिति षष्ठ्यर्थे पञ्चमीति भावः। एओङ्सूत्रभाष्ये ध्वनितमेतत्। चेच्छिद्यते इति। तुको हलादिःशेषस्तु न, अभ्याससञ्ज्ञाप्रवृत्तिकाले स्थानिद्वारा साक्षाद्वा सन्निहितानां हलामेव तेन निवृत्तेः अत एव 'नुगतो' (७।४।८५) इत्यादि चरितार्थम्।

दीर्घात्पदान्तादिति। पदान्तस्य दीर्घस्येत्यर्थः। योगविभागोऽनयोः 'एओङ्' (मा०सू०

हरिदित्यादौ पदत्व द्वारा राजत्वस्य च प्रतिबंधकस्य वेत्यर्थः।। वार्तिकाच्चेति। चेन क्वावुप संख्यानमिति वार्तिक लोपोव्योरितिसूत्र स्थवकारारंभ प्रत्याख्यान योरेक वाक्यतयाविचो सार्वत्रिकत्वस्य संग्रहो बोध्यः।। तस्य लक्षणयेति। स्थान पदस्य तत्सूत्रे ताल्वादि स्थानपरस्य त्वस्योक्तत्वादिति भावः।।

भाष्योक्त रीत्येति।। तत्र ह्यंत शब्दस्य समीपवाचित्वं नावयव वाचित्वं हलङ्गवयवत्वाभावादित्युक्तमिति भावः।। अण मनूद्येति।। लक्ष्ये प्रवृत्तमणमनूद्येत्यर्थः।। नतु तद्विध्येक वाक्यतयाऽनेन परत्वविधानमिति भावः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३) इति सूत्रे भाष्ये स्पष्टः। दीर्घान्तस्य पदस्येत्यर्थेन सिद्धेऽन्तग्रहणं पदान्तविधित्वमस्य, न पदविधित्वमितिबोधनद्वारा समर्थपरिभाषानुपस्थित्यर्थम्। तेनासामर्थ्येऽप्यस्य प्रवृत्तिरिति समर्थसूत्रे कैयटः।

इति हल्सन्धिः।

विसर्जनीयस्य सः (८।३।३४)। प्राग्व्याख्यातमपि विसर्जनीयपदानुवृत्तिप्रदर्शनाय स्मारितम्।

शर्परे इति बहुव्रीहिः। विशेष्यश्चावध्यवधिमतोः साजात्याद्विसर्जनीयाक्षिप्तः खरेव। विसर्गस्य विसर्गविधौ फलमाह-न त्वन्यदिति। अन्यदेव विवृणोति-इहेति। त्रैरूप्यमिति। विकल्पद्वयसामर्थ्यादिति भावः।

सोऽप (८।३।३८) अपदाद्योरिति। सूत्रे-सौत्रत्वादेकवचनम्।

अनव्ययस्येति। अत्राव्यायीभावातिरिक्ताव्ययस्यैव ग्रहणं, व्याख्यानात्। तेन 'उपपयस्काम्यति' इत्यादौ सत्वसिद्धिधरिति स्पष्टम् 'अव्ययीभावश्च' (१।१।४१) इत्यत्र भाष्ये। गीः काम्यतीति। 'वाः कांस्यति' इत्यस्याप्यु पलक्षणमिदम्।

इणः ष (८।३।३९)। 'इदुदुपधस्य' (८।३।४१) इत्यस्यासिद्धत्वात् 'सर्पिष्पाशम्' इत्यादौ सत्त्वनिवृत्तर्थं, 'गीष्पाशं' 'दोष्कल्पम् इत्याद्यर्थश्चेदम्। अत्रानव्ययस्येत्यपदादाविति काम्ये इति च सम्बद्ध्यते। तेनोच्चैःकल्पं, दोः पश्य, गीः काम्यतीत्यादौ षत्वं न। अत एवात्र प्रकरणे सर्वत्र सत्वमेव विधेयमिण उत्तरस्य विसर्गस्थानिकसस्यानेन षत्वमिति भाष्योक्तपक्षान्तरं सङ्गच्छते। विसर्जनीयस्थानिकेत्युक्तया 'पुँस्पुत्रः' इत्यादौ न दोषः। तत्र हि

अत्र पक्षे इति। अणमनूद्यरपरत्वं विधीयत इति पक्ष इत्यर्थः।। व्यवस्था संभवादित्ति। अचिविभाषेति गिरतेर्विकल्पेन लत्व विधानाज्ज्ञापका दिति भावः।। इत्यादवित्ति।। आदिना वृद्धि रादैज्देङ्गुण इत्यनयो भृजाभिन्मातु रूदित्यस्य च ग्रहणं बोध्यम्।। दोषापत्तेरिति।। तत्र तत्रादेश द्वयोच्चारणस्य गौरवात् सर्वादेशरूप दोषयोरापत्तेरित्यर्थः।।

भाष्यसंमताष्टाध्यायी पाठे आह्। वावसानइत्यतो वेति। इदमिति। लोपस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मस्थानिकः सः। अत्र विसर्जनीयस्येत्यनुवृत्त्यैतदर्थलाभः। अनव्यस्येत्यादि त्वत्र पक्षेऽत्र न सम्बद्ध्यते। तेन 'द्विष्कृतं' 'दुष्काम्यति' इत्यादौ षत्वसिद्धिः। गीः काम्यतीऽत्यादौ सकाराभावादेव न दोषः। अपदादाविति च न सम्बद्ध्यते। तेन 'दुष्करोति' इति षत्वसिद्धिः। परन्त्वयं पक्षोऽसङ्गतः उत्तरसत्वस्यासिद्धत्वेन 'निष्कृतम्' इत्यादौ षत्वासिद्धेः। 'प्रकरणे प्रकरणमसिद्धं न योगे योगः' इति पक्षस्तु नास्त्येव ज्ञापकासम्भवादिति 'उपसर्गादसमासेऽपि' (८।४।१४) इत्यत्र निरूपयिष्यामः। विसर्जनीयस्यैव षत्वमिति मूलोक्तपक्षे तु सकारषकारयोः स्वरितत्वेऽपि यथायोगं सम्बन्धो मण्डूकप्लुत्येत्यन्यत्र विस्तरः।

नमस्पु (८।३।४०) इत उत्तरमपदादाविति न सम्बद्ध्यते, व्याख्यानात्। साक्षात्प्रभृतित्वादिति। ऊर्यादित्वाद्गतित्व, स्वरादिपठितस्य तु गतित्वाभावः, तेन साक्षात्प्रभृतिषु च्व्यर्थवचनेऽपि न क्षतिरित्यन्ये। इदुदु (८।३।४१)। अप्रत्यस्येति पर्युदासो लाघवात्। तत्र प्रत्ययपदं तत्सम्बंधिपरं, तेन प्रत्ययसम्बन्धिभिन्नस्येत्यर्थः। अत एव 'कविभिः कृतम्' इत्यादौ न षत्वम्। स्पष्टश्चेदं भाष्ये इत्यन्यत्र विस्तरः।

एकादेशशास्त्रेति। एकादेशशास्त्रसम्पन्नरेफस्थानिकत्वेन विसर्जनीयस्यैकादेशशास्त्रनिमित्तकत्वं बोद्ध्यम्। स्पष्टञ्चेदमत्र सूत्रे, 'उरण् रपरः' (१।१।५१) इति सूत्रे च भाष्ये इत्यन्यत्र विस्तरः। प्रत्ययभिन्नसम्बन्धिन इति तु नार्थः। 'अग्निः करोति' इत्यादावपि प्रत्ययभिन्नसमुदायसम्बन्धित्वेन षत्वापत्तेः। तपरकरणं किम्? गीः करोति। उपधाग्रहणं व्यर्थम् 'उपधा ग्रहणं न करिष्यते, इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः' इति हयवरट्सूत्रभाष्योक्तेः।

तिरसोऽन्य (८।३।४२)। अत्र गतिग्रहणं नानुवर्त्तते, पराभवे तिरस्कारशब्दप्रयोगात्।

वैकल्पिकत्वमित्यर्थः। गुणेन निषेधानित्यत्वस्य भाष्यानुक्तत्वात्षष्ठी। समासो न स्यादत आह्।। पृथक् पदमिति। इति कश्चदिति।। अत्रारुचि बीजं तु बुद्धि मांद्य मित्यादाविव शाकपार्थिवादित्वात्संबधि शब्दस्य लोपात्षष्ठी समासेनापि सिद्धेरितिदिक्।। नन्वत्रोढ्शब्देनोठचेति धातोर्ग्रहणं स्यादत आह्। आदेश एवेति।। व्याख्यानादिति।। अल्पाच्चतरमितिपूर्व निपाताकरण रूपात्।। आदेशस्यैव ग्रहणे तु अभ्यर्हितं चेत्येधत्योरेव पूर्व निपातः साह्चर्येतु कृत्वोर्थ ग्रहणेनानित्यमिति भावः।। नन्वा अंवतीत्यौः जनस्यौर्जन औरित्यत्र तत्संभवोऽत आह्।। एत्येधत्यो रितीति।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्तर्धाविव तिरसो गतित्वात।

द्विस्त्रि (८।३।४३)। 'कृत्वोऽर्थ' इति न विसर्गविशेषणं चतुःशब्देऽसम्भवात्, किन्तु द्विरादीनामित्याह-वर्त्तमानानामेषामिति। 'इसुसोः' (८।३।४४) इतिसूत्रवक्ष्यमाणरीत्या 'सुचः' इति सूत्रयितुमुचितम्, सुजन्तान्तस्य पदस्येत्यर्थात्। चतुष्कपाल इति। 'इदुदुपधस्य' (८।३।४१) इति। नित्यं षः।चतुःशब्दोऽव्युत्पन्न इति अप्रत्ययस्येति पर्युदासो न। अत एव 'चतुष्पाद्यो ढञ्' (४।१।१३५) इत्यादिनिर्देशाः सङ्गच्छन्ते। 'चतुष्पञ्चाशत्' इत्यत्रापि षत्वं भवत्येव। न चेदुदुपधस्य सस्य यो विसर्ग इति हयवरट्सूत्रभाष्योक्तेः कथमत्र षत्वमिति वाच्यम्; विसर्गस्य पाठाभावेनोपधात्वासम्भवात्तत्स्थानिनिमित्तमुपधात्वं ग्राह्यमिति भाष्यतात्पर्यात्। अत एव 'समः सुटि' (८।३।५) इतिसूत्र भाष्ये 'सम्पुङ्कानाम्' (का०वा०) इत्यनेन रुविधिरेवास्त्वित्याशङ्क्य 'पुस्कामा' इत्यत्र षत्वापादनं सङ्गच्छते।

न च कृत्वोऽर्थे विद्यमानस्य पदस्येदुदुपधस्य यो विसर्ग इत्यर्थान्न 'पञ्चकृत्वः करोति' इत्यादौ दोषो, नापि 'चतुष्करोति इत्यादावव्याप्तिरिति द्विस्त्रिश्चतुरिति व्यर्थमिति वाच्यम्, कृत्वोऽर्थे इत्यस्यासिद्धत्वेन चतुःशब्दे 'इदुदुपधस्य' (८।३।४१) इति नित्यषत्वापत्तेः। 'प्रकरणे प्रकरणमसिद्धम्' इति पक्षस्तु 'उपसर्गादसमासेऽपि' (८।४।१४) इति सूत्रे कैयटे 'पूर्वपदात्' (८।१।१३) इति सूत्रे भाष्ये च दूषित एव। 'उपसर्गात्' (८।३।१०३) इति सूत्रे चोपपादयिष्यते। किञ्च पूर्वत्रेति पूर्वशब्देन प्रकरणग्रहणेऽव्यवहितप्रकरणे एव त्रिपाद्यसिद्धत्वं स्यात्, न सम्पूर्णसपादसप्ताध्य्याम्। किञ्चास्याधिकारत्वात्प्रतिसूत्रमुपस्थित्या प्रतियोगमसिद्धत्वं दुर्वारमित्यन्यत्र विस्तरः।

इसुसोः (८।३।४४)। अत्रेसुसोः प्रातिपदिकावयवयोर्ग्रहणम्। तेन 'पेचुः काष्ठैः'

इणे वेति।।

नतु बीगतीत्यत्र प्रश्लिष्टो पीति भावः।। असिद्धत्वादिति।। एवं च शीघ्रोपस्थिति कत्वेन प्रतिपदोक्तत्वादिण एव ग्रहणमिति भावः।। उपरंजकतयेति। स्वरूप बोधकत्येत्यर्थः ननुण्यंतस्य शब्दांतरत्वात् प्रकृतिभागस्य जहत्स्वार्थ त्वेनार्थकत्वाच्चो पैधयत इत्यादौवृद्धि र्नस्यादतआह्।। उपैधयत इत्यादावयीति।। एध्रूपत्वादिति।। जहत्स्वार्थातु तत्रैव रूढिर्यत्रवि रोधिनीति हर्युक्तेरत्राजहत्स्वार्थ वृत्तेरेव सत्वादितिभावः।। नन्वेवमपि सर्वादिशोऽत्र स्यादत आह्। किंचेति। न दोष

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'सख्युः पाकः' 'कविभिः कृतम्' इत्यादौ षत्वं न। 'नित्यं समासे' (८।३।४५) इति सूत्रोदाहरणे समासविषये तयोरेव सम्भवेनार्थाधिकारानुरोधात् साहचर्याच्च। इसुसन्तपदावयवविसर्गस्येत्यर्थः पदस्येत्यधिकारात्। न च प्रत्ययग्रहणपरिभाषया 'परमसर्पिष्करोति' इत्यादौ षत्वानापत्तिरवयवस्येसुसन्तत्वेऽपि 'उत्तरपदत्वे च' इति निषेधेनापदत्वादिति वाच्यम्, अनुत्तरपदस्थस्येति निषेधेन क्वचिदुपात्तविशेष्यसत्त्वेऽपि शब्दरूपं विशेष्यमादाय तदन्तविधिज्ञापनेन शब्दरूपं विशेष्यमादाय प्रत्ययग्रहणपरिभाषया लब्धतदन्तार्थकस्य पदविशेषणतया इसुसन्तान्तस्येत्यर्थेनादोषात्। अत एव 'वनोरच' (४।१।७) इत्यादौ न दोषः। 'ब्राह्मणस्य सर्पिष्करोति' इत्यादौ सापेक्षत्वेनासामर्थ्यं नाशङ्क्यं, तस्यैकार्थीभावसामर्थ्यविषयत्वात्। 'अधात्वभिहितं समानाधिकरणमसमर्थवत्' इत्युक्तेः सर्पिः कालकम्' इत्यादौ न षत्वम्। अधात्वभिहितमित्युक्तेः 'सर्पिष्पीयते' इत्यत्र षत्वसिद्धिः धातुसहचरितप्रत्ययाभिहितार्थेन समानाधिकरणसमर्थवन्नेति तदर्थः।

यदा तु सर्पिरादकमव्युत्पन्नं प्रातिपदिकं पाणिनेरूणादिष्वव्युत्पत्तिपक्षएवेति 'आयनेयीनी' (७।१।२) इति सूत्रे भाष्ये स्पष्टमुक्तेः। तत्र हि 'शङ्खः' इत्यादावादेशानाशङ्क्य 'उणादीनां प्रतिषेधो वक्तव्यः, प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेः सिद्धम्' इत्युक्तम्। 'अयामन्ताल्वाय्येल्विष्णुषु' इति सूत्रं व्याकरणान्तकरीत्यैव, सर्वनामस्थानमिति महासञ्ज्ञावत्। अत एव भाष्ये -'उणादयोऽव्युत्पन्नानि' इत्येवोक्तं; न तु 'अनेकार्था अपि धातवः' इतिवदव्युत्पन्नान्यपीत्युक्तं, तदा 'इदुदुपधस्य' (८।३।४१) इति नित्ये षत्वे प्राप्तेऽनेन विकल्प इति प्रत्ययग्रहणाभावात्तत्परिभाषानुपस्थितेः 'परमसर्पिष्करोति' इत्यादौ षत्वविकल्पः सिद्धः। 'नित्यं समासे' (८।३।४५) इति सूत्रमनुत्तरपदस्थस्येतिप्रतिषेधार्थम्।

इति।। न सर्वादेश रूप दोष इत्यर्थः।। ननुपूर्वं धातुरुपसर्गेण युज्यते इत्याद्गुणस्य प्राप्तेः पर रूपे प्राप्ते इत्यसंगत मत आह्। पूर्वं धातुः साधनेनेति।। सुखार्त इत्यारभ्यध्वनित मित्यंतो ग्रंथः सर्वपुस्तकेष्व दर्शनान्निर्देशादिति प्रतीकस्थवक्ष्यमाण स्वोत्तया सहविरोधाच्च, वासुपीति न वृद्धिरिति।। वासुपीत्यस्यापवादत्वादत्र सूत्रे ऋकारादाव सुप् धातावित्यर्थादस्यतत्राप्राप्तिरितिभावः।। व्याख्यानादिति।। अचीत्यनुवर्ततेतस्य ऋतीति विशेषण करणादित्यर्थः।। अंत्याद्योरिति।। अलोंत्यस्यादेः परस्येति परिभाषाभ्यामितिभावः।। ननुनाम्नेऽतिस्येति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नित्यग्रहणं तु न कर्त्तव्यमेव। समासे नित्यषत्वस्य 'इदुदुपधस्य' (८।३।४१) इत्येव सिद्धेः। 'सर्पिषा' इत्यादौ षत्वं त्वत्र पक्षे क्वचिदन्यदेवेत्यर्थकाद् बहुलग्रहणादिति स्पष्टं भाष्ये। व्यपेक्षेति। व्याख्यानात्। एकार्थीभावसामर्थ्यग्रहणे 'परमसर्पिः कुण्डिका' इत्यादौ समासे विकल्पापत्तिः। अनुत्तरपदस्थस्येति निषेधादुत्तरसूत्रस्य न प्रवृत्तिरिति भावः।

नन्वनेनैव सिद्धे कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठो व्यर्थ इत्यत आह – कस्कादिष्विति। एतेन तत्सामर्थ्यादुत्तरपदस्थस्यापि षत्वमित्यपास्तम्। व्यपेक्षाविरहेऽपीति। आनय सर्पिः, कुण्डिका तिष्ठति' इत्यादौ। व्यपेक्षायामिति। 'इदं सर्पिष्कुण्डिकायाः' इत्यत्र। प्रत्ययभिन्नविसर्गस्येत्यर्थम् 'इदुदुपधस्य' (८।३।४१) इत्यत्र व्याचक्षाणानां व्याख्यादर्शकृतां मतेऽव्यपेक्षायां तेन सिद्धेरिति भावः। एतेन कस्कादिपाठस्याव्यपेक्षायां चारितार्थ्येन व्यपेक्षायां तस्यासिद्धत्वाद्विकल्प एवोचित इत्यपास्तम्। प्रत्ययसम्बन्धिभिन्नविसर्गस्येत्यर्थे तु तदप्राप्तिरेवेति व्यपेक्षायां विकल एवेति बोद्ध्यम्।

अतः कृ (८।३।४६) कृशब्देन तदादिग्रहणं, समासाक्षिप्तोत्तरपदस्य विशेष्यत्वात्। 'विष्वग्यदेवयोः (६।३।९२) इति सूत्रे प्रत्ययग्रहणेन धातोर्विशेषणत्वे तदादिविधिज्ञापनात्। 'अयस्कुम्भी' इत्यादौ लिङ्गविशिष्टपरिभाषया सत्त्वं बोध्यम्।

भास्कर इति। तपरकरणात् 'अतः कृ' (८।३।४६) इत्यस्याप्राप्तिः।

इति विसर्गसन्धिः।

यत्तु स्वौजसित्यत्र रुरेव पाठ्यः, सर्वत्र सुग्रहणे रुग्रहणमेवास्त्विति। तन्न, 'यशोऽत्र' इत्यादौ रोरसिद्धत्वादुत्वानापत्तेः, 'अतो रोः' (६।१।११३) इत्यस्य प्रथमैकवचने

निषेधारंभादल् इत्येतत्पदघटित परिभाषा पूर्व परयोरित्यधिकारे न प्रवर्तते इतिसामान्यायेक्ष ज्ञापकमिति सर्वादेशः स्यादत आह्।। उपसर्गावयवाकारादिति।। अंतादिवच्च। पृथगव स्थिताम्यामिति।। तृतीयाबोध्यहेतुत्व विशिष्टस्य येव्यवहारा इत्यत्रान्वयः।। ते चव्यवहाराः प्रत्यासत्या पूर्वपरशब्दोवस्थित समुदायाश्रिता एव गृह्यंते तदाह।। नत्विति। औ इत्य्य सुम्वे इति।। द्वित्वरुपार्थ तद्वाचक शब्दयोर्यः समुदायस्त न्निष्ठत्वात्तस्येति भावः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चारितार्थ्यात्। तद् ध्वनयन्नाह– स्वौजसेति। पदस्येत्यनुवृत्तं ससजूर्भ्यां विशेष्यते, तेन तदन्तविधिः। आदेशस्त्वलोऽन्त्यस्येत्यन्तस्य। तत्फलितमाह – पदान्तस्येत्यादिना। 'सजूः' इत्यत्र व्यपदेशिवद्भावेन सिद्धिः। 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' (प० मा०) 'ग्रहणवता प्रातिपादिकेन तदन्तविधिर्न' (प०भा०) इति परिभाषाद्वयं प्रत्ययविधिविषयमिति 'असमासे निष्कादिभ्यः' (५।१।२०) इत्यत्र भाष्ये स्पष्टम्। इदज्जश्त्वापवादः। 'श्रेयान्' इत्यादौ रुत्वस्यासिद्धत्वात्संयोगान्तलोप एवेति दिक्। यत्वस्यापवाद इति। यदीदं न स्यात्तर्हि यत्वं प्राप्नोतीत्येतावता। कृते त्वस्मिन् यत्वस्यासिद्धत्वादुत्वगुणयोर्यत्वाप्राप्तिरेवेति भावः।

प्रथमयोः (६।१।१०२)। व्याख्यानात् प्रथमयोरित्यनेन प्रथमाद्वितीयारूप सुब्विभक्त्योर्ग्रहणम्। तदाह– प्रथमाद्वितीययोरिति। पूर्वग्रहणं किम्? 'अग्नी' इत्यत्र पक्षे परसवर्णो मा भूदिति। दीर्घग्रहणं तु त्रिमात्रस्य स्थानिनस्त्रिमात्रो मा भूदिति। सवर्णग्रहणं तु स्पष्टार्थम्। पूर्वस्या ऽदीर्घत्वात् पूर्वजातीय इत्यर्थेनेष्टसिद्धेरिति स्पष्टं भाष्ये। आद्गुण इति। 'तौ सत्' (३।२।१२७) इति निर्देशेन भ्रष्टावसरन्यायस्यात्र शास्त्रेऽनाश्रयणादिति भावः।

देवदत्तहन्तृहतन्यायस्य तु नात्र प्रवृत्तिः। देवदत्तहन्तृहनने हि नोज्जीवनं, देवदत्तहननप्रसक्तहनने त्वस्त्येव देवदत्तजीवनं, प्रकृते तु न हननस्थानीया वृद्धिहन्तुः पूर्वसवर्णदीर्घस्य लक्ष्ये प्रवृत्तिः, किन्तु हननोद्यमसजातीयं प्रसक्तिमात्रं, प्रसक्तस्य निषेधे बाध्योज्जीवने न बाधकमिति। स्पष्टं चेदं 'स्वादिषु (१।४।१७) इति सूत्रे कैयटे।

सुस्रोत इति। सुस्रोतस्शब्दः कस्यचित्सञ्ज्ञा। सम्बुद्धौ 'दूराद्धूते च' (८।२।८४) इति प्लुतः तत्सामर्थ्यादिति। प्रतियोगित्वेन तदाश्रयणसामर्थ्यादित्यर्थः, आश्रयात्सिद्ध इति भाष्योक्तेः। पयस्यटति पयो ददातीत्यर्थे 'आगच्छ हे पयोऽट्' 'आगच्छ हे पयोऽद'

दीर्घश्चनेति।। दैत्यारिः श्रीशइत्यादि सिद्धयर्थमइ उणित्यादिषु तुल्यास्येति निर्देशेनार्थ रहिताना मेवा कारादीनां निर्देशेना क्त्वादेर्वर्ण मात्र वृत्तित्वेनार्थ घटित समुदायधर्मत्वादितिभावः।। तत्र मानमाह। अतएवेति।। तदुक्तमितिच। ननुस्थानिवत्सूत्रेण सिद्धे इदं सूत्रं व्यर्थमत आह्। क्षीरपेणेत्यादाविति।। ननूत्तरपदत्वमात्रं स्थानिवत्वेनातिदिश्यते एकाच्त्वं स्वतः सिद्धमेवात आह्। किं चैकादेश इति। इतिदिगिति। दिगर्थस्तु स्थानिवादादेश इत्यभैवोभपत आश्रयणेन स्थानिवदिति पठय्त इति तस्यैवायं मध्येपवादा इतिन्यायेन निषेधोनत्वचः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादावेकपदस्थवर्णद्वयसापेक्षमन्तरङ्गमुत्वं प्रति वाक्यसम्पादकपदान्तरसापेक्षप्लुतस्यासिद्धत्वा दुत्वे प्लुतसिद्धिः। अन्यथा प्लुतस्योत्वदृष्ट्या सिद्धत्वात्परत्वात् प्लुते आद्येऽप्लुतपरत्वाभावादन्त्येऽप्लुतात्परत्वाभावादुत्वं न स्यात्। परिभाषादृष्ट्य बहिरङ्गासिद्धत्वेऽपि न क्षतिः। स्वदृष्टचाऽसिद्धस्यापि परं प्रत्यसिद्धत्वप्रतिपादनसम्भवात्, स्वदृष्टचाऽविद्यमानस्य परं प्रत्यविद्यमानत्वप्रतिपादनवत्। अन्तरङ्गस्यासिद्धत्वे तु प्रतिपाद्याभावे इव कं प्रत्यसिद्धत्वं प्रतिपाद्येत्। तत्राद्ये 'वाक्यस्य टेः' (८।२।८२) इत्यट्शब्दाकारः प्लुतः, अन्त्ये रेफदकारसंयोगपरत्वेनाकारस्य गुरुत्वात् 'गुरोः' (८।२।८६) इति प्लुतः। आश्रयेण तु येननाप्राप्तिन्यायेन प्रत्यक्षत्वेन च पूर्वत्रासिद्धत्वमेव बोध्यते न त्विदम्। 'सुस्रोतः' इत्यादौ त्वेकवाक्यमात्रसापेक्षत्वात् प्लुतोऽन्तरङ्गो, भिन्नवाक्यस्थाकारसापेक्षत्वादुत्वं बहिरङ्गमिति स्पष्टं भाष्ये। उकारानुबन्धेति। उकारेत्सञ्ज्ञकरेफस्येत्यर्थ इति भावः। तेन 'देव रुहि' इत्यादौ न दोषः।

भोभगो (८।३।१७)। 'रोः सुपि' (८।३।१६) इत्यतो रोरिति वर्त्तते; न तु 'रो रि' (८।३।१४) इत्यतो र इति, 'प्रातरत्र' इत्यादावतिप्रसङ्गात्। अशब्दान्तद्वन्द्वेन पूर्वशब्दस्य बहुब्रीहिमभिप्रेत्याह – एतत्पूर्वस्येति। नन्वेवं पूर्वरूपापत्तिरत आह–असन्धिरिति। भगोऽघोशब्दौकारयोरकाराभ्यां प्राप्तपूर्वरूपात्मकसन्धिकार्याभाव इत्यर्थः। इदं प्राचामनुरोधेन। वस्तुतः सूत्रे रान्तानामेवानुकरणसन्धिर्न्याय्य एवेति बोद्धयम्।

न ह्ययमिति। इदमर्वाचामनुसारेण। भाष्ये तु रेफस्य विसर्गस्थानित्वेन तद्वृत्तिरुत्वाश्रयमपीदमल्विधिरेव, स्थान्यल्वृत्तिधर्माश्रयत्वात्। 'अग्रहीत्' इत्यत्र च दीर्घे लोपे च इट्त्वेनैव निवेश इति विशेषः। अतः 'पयःसु' इत्यादौ दोषः। तत्र हि 'रोः सुपि'

परस्मिन्नित्यस्यापीति पूर्वोक्तमेव दूषणमिति बोध्यम्४२।। सममिति। एवं च नांतरंग परिभाषया निर्देशस्य प्राच्र्छतीत्यादि प्रयोगाणां चोप पत्तिरितिभावः।।

ननु गुणवृध्द्योः प्रवृत्ति वेलायां पूर्वोत्तरयोः पदत्वेन तयोः पदद्वयाश्रितत्वेपि विसर्गप्रवृत्ति समये पूर्वभागस्य विसर्गे कर्तव्ये पूर्वांतत्वेन पदत्वेप्युत्तरस्य स्वतः पदत्वामावात्कार्यस्थाशास्त्रीय स्याभावेन फलाभावे न चाति देशेन पदत्वाभावाच्च न विसर्गस्य पदद्वयाश्रित्वमत आह्। किंचेति। ननु प्रगत ऋश्यः प्रश्र्य इत्यत्रापि वृद्धि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(८।३।१६) इति विसर्गः नियमशास्त्राणि च विधायकान्येव वाच्यवृत्त्या। आर्थिकार्थमादाय तु निषेधकानीति। तत्रापि रो रेफस्य विसर्ग इत्यर्थे त्वश्ग्रहणं व्यर्थमित्युक्तम्। नन्वेयं 'हे राम' इत्यादौ सम्बुद्ध्वयवस्थ हलः सस्य लोपे तद्वृत्तिसुप्त्वस्याल्धर्मत्वेन स्थानिवत्त्वाभावे पदत्वासिद्धिरिति चेत्? न, आनुमानिकादेशस्य रामेत्यस्य स्थानिवद्भावेन सुबन्तत्वस्य तत्प्रयुक्तकार्यस्य वा लाभेन तत्सिद्धेः। प्रत्ययलक्षणेनापि न प्रत्ययवृत्तिधर्मलाभः, लक्षणपदोपादानेन प्रत्ययनिमित्तककार्यस्य तन्निमित्तकव्यवहारस्य वाऽतिदेशात्। एवं 'दीर्घाहो निदाघ' इत्यादौ सम्बुद्ध्यवस्य हलः सस्य लोपे तद्वृत्तिसुप्त्वस्याल्धर्मत्वेन स्थानिवत्त्वाभावे पदत्वासिद्धिरिति चेत्? न, आनुमानिकादेशस्य रामेत्यस्य स्थानिवद्भावेन सुबन्तत्वस्य तत्प्रयुक्तकार्यस्य वा लाभेन तत्सिद्धेः। प्रत्ययलक्षणेनापि न प्रत्ययवृत्तिधर्मलाभः, लक्षणपदोपादानेन प्रत्ययनिमित्तककार्यस्य तन्निमित्तकव्यवहारस्य वाऽतिदेशात्। एवं 'दीर्घाहो निदाघ' इत्यादौ हल्ङ्यादिलोपे उक्तरीत्या स्थानिनि जायमानस्यासुपीति रत्वनिषेधस्यादेशे दीर्घाहन्शब्देऽतिदेशेन प्रवृत्त्या न रेफ इति दिक्।

तेषां रोरिति। इदञ्च निपातानाख्याय 'विभाषा भवत्' (का० वा०) इति वार्त्तिकं प्रत्याचक्षाणस्य वृत्तिकृतो मतेन। परे तु तेषामपि रोरित्यर्थः। अपिना 'विभाषा भवद्गगवदघवतामोच्चावस्य' इतिवार्त्तिकनिष्पन्नसङ्ग्रहः। एषामन्त्यस्य रुः स्यादवस्य चोकारः सम्बुद्धाविति तदर्थः। अवग्रहण सामर्थ्यात् 'अलोऽन्त्यस्य' (१।१।५२) इति नेति बोद्धयम्। वार्तिकनिष्पन्नानां त्रयाणां भोस्शब्दनिपातस्य चावश्यकत्वमन्यत्र स्पष्टमित्याहुः।

व्योर्लघु (८।३।१८)। यद्यपि वर्णसमाम्नाये यस्य प्राथम्यात्। य्योरित्युचित्तं; तथापि 'लोपो व्योः' (६।१।६६) इति लोपवारणाय सौत्रत्वमाश्रयणीयं स्यात्, अतो व्योरित्युक्तम्।

र्दुवरित्यत आह्। यदर्थेति। धात्वर्थे त्यर्थः।। तं प्रत्येवेति। धातुं प्रत्येवेत्यर्थः।। एवं च ऋश्य शब्द्य धातुत्वाभावान्नतस्य कार्येकर्तव्ये उपसर्गत्वं प्रादीनामिति भावः।। एतच्चोपसर्गाः क्रिययेत्येव सिद्धे योग्रहणसामर्थ्यासिद्धम्४३।। नन्वेवमपि प्रगत ऋद्धः प्रर्द्ध इत्यत्र वृद्धि र्दुवरिवेत्यत आह्। प्रकृते चेति। ननु सुबन्ते धातावित्येवार्थः कुतोनेत्यत आह्। तुल्यास्येति। नन्वेवं सुबंतावयवके धातावित्येवार्थः कुतोनेत्यत आह्। शास्त्रे इति। तेन ऋच्छेः क्वि बंतात्सुपि हल्ङ्यादि लोपे प्राच्छं इति सुबंते ऋषभपुत्रमाचष्टे प्रार्षभपुत्रीयतीति सुबंतावयवके च धातौ पूर्वेण नित्यमेववृद्धिः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लघुत्तरः प्रयत्नो यस्योच्चारणे स लघुप्रयत्नतरः। अन्यपदार्थसम्बन्धोत्तरं वर्त्तिपदार्थप्रकर्षविवक्षा साधुः। प्रयत्ने लघुतरत्वं चैषां शैथिल्यजनकत्वमेव। लघूच्चारणाविति। लघुतरोच्चारणावित्यर्थः। सूत्रे सौत्रत्वादेकवचनम्। वकारोदाहरणम् 'असावादित्यः' इति वृत्तिः।

ओतो (८।३।२०)। 'व्योः' इत्यत्र यकारसाहचर्याद्वकारोऽपि धात्वनवयव एव। अत्राप्यर्थाधिकारात्तथैव। तेन 'स्मृतोवच्युत' इत्यादौ न दोषः, तदाह-यस्येति। तादृशवस्यासम्भवादिति भावः। 'भोभगो' इति तु नानुवर्त्तते विच्छेदात्, तद् ध्वनयन्वक्ष्यति – पदान्तस्य किं तोयम्' इति। इदं लघुप्रयत्नयोर्न गार्ग्यश्रुतेः, तदाह–अल घुप्रयत्नस्येति। पूजार्थमिति। व्याख्यानादिति भावः। तादृशश्च भोसादिपूर्वक एवेत्याशयेनाह – भो अच्युतेति।

भाष्यानुसारिणस्तु – भो इत्याद्यनुवृत्तेः 'स्मृतोत्' इतत्र्यादौ न दोष;, तस्यानभिधानाच्च। 'अपूर्वस्य' इति तु ओत इत्यनेन विरोधान्न सम्बध्यते। 'लोपः शाकल्यस्य' (८।३।१९) इत्येव भोभगो इत्याद्यनुवृत्त्या सिद्धे नित्यत्वार्थमिदमित्याहुः।

उञि च (८।३।२१)। भोइत्यादिपूर्वस्य पूर्वेण सिद्धेराह – अवरणपूर्वयोरिति। एतदपि नित्यमेव अत्रापि गार्ग्यग्रहणानुवृत्त्याऽलघुप्रयत्नस्यैव लोपः। एतेन भोइत्यादिपूर्वे लघु प्रयत्नलोपार्थमत्रापि तदनुवृत्तिरित्यपास्तम्। वकारोदाहरणन्तु 'असा उ एकाग्निः' इति वृत्तिः। उत्तरार्थमिति। 'ङमो ह्रस्वादचि' (८।३।३२) इत्यर्थमित्यर्थः। एतत्तत्रैव निरूपितम् 'हलि सर्वेषाम्' (८।३।२२) इत्यादौ तु न सम्बद्ध्यते; व्यवहिते ङम इत्यत्रैव प्रयोजनकथनपरभाष्यप्रामाण्यात्। अत एव 'लिट्त्सु' इत्यादौ धुडादयः। अन्यथा सादौ पदे

नत्वनेन विकल्प इतिभावः।। धातावित्यनुवृत्तेरिति उपसर्गादित्यस्य संबंधात्तेन च धातावि त्यस्याक्षेपादितिभावः।। गमकत्वादिति।। नित्यसापेक्षत्वादित्यर्थः।। इत शब्दस्य लोप इति।। तकारस्य जश्त्वं तुन गति कारकोप पदानामिति सुबुत्पत्तेः पूर्वं समासेन तस्य पदांतत्वाभावादिति भावः।। वातल्लोप इति।। अत्र पक्षे सुप् सुपेति समास इति भावः।। ननु शकंध्वादित्वात्पतत् शब्दस्य पररूपमेवात्र कुतो नेत्यत आह्। गोनर्द देश इत्यादिना। तत्र प्रमाणमाह्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यर्थान्न स्युः। अत एव 'माभ्याम्' इत्यादौ 'हलि सर्वेषाम्' (८।३।२२) इति लोपसिद्धिरिति दिक्।

हलि स (८।३।२२)। 'भोभगो' इत्याद्यनुवर्त्तते। तत्रौकारात्परस्य लघुच्चारणस्यैवानेन लोपः अलघूच्चारणस्य तु 'ओत' (८।३।२०) इत्येव सिद्धम्। अपूर्वे तूभयोरपि। न चापूर्वालघुप्रयत्ने अस्यासिद्धत्वात् 'लोपः शाकल्यस्य' (८।३।१९) इति प्राप्नोतीति वाच्यम्। लघुप्रयत्नस्यैवानेन लोपे 'व्योः' (८।३।१८) इति सूत्रेऽचीति करणेन हलि विधानाभावेनैव सिद्धावस्य सूत्रस्य वैयर्थ्यापत्त्या तद्बाधात्। न चालघुप्रयत्नयोरेव लोपः स्यात्, व्योरित्यर्थाधिकारादिति वाच्यम्, ऋषिमात्रग्रहणार्थस्य सर्वेषामित्यस्य वैयर्थ्यापत्तेः, विकल्पस्य विच्छिन्नत्वेन नित्यत्वसिद्धेः। अत्र च यकार एवानुवर्त्तते, न वकारः। वृत्तौ तथैवोक्तेः, फलाभावात्, अव्यपरे इत्यादिनिर्देशाच्च। अन्यथा तत्र सौत्रत्वाद्याश्रयणीयं स्यात्, तदाह–लध्वलघूच्चारणस्येति।

न तु सुपीति। पर्युदासे हि सुप्सदृशे प्रत्यये एव स्यात्। एवञ्च 'अहर्भाति' इत्यत्र न स्यात्। यदि तु सुब्भिन्ने शब्दे स्यात्, 'दीर्घाहो निदाघ' इत्यत्रापि स्यात्। सुबन्तेत्यर्थस्तु न, 'उत्तमैकाभ्याम्' इत्यादिनिर्देशैः सप्तमीनिर्दिष्टे प्रत्यये तदन्तविद्ध्यभाव ज्ञापनात्। लक्ष्यानुरोधेन क्वचित्प्रत्ययग्रहणे शब्दस्वरूपस्य विशेषणताया एवाश्रयणाच्च। अत एव 'रदाभ्यां निष्ठा' (८।२।८४) इत्यादौ न दोषः। अहरहरिति। 'नित्यवीप्सयोः' (८।१।४) इति द्वित्वम्। 'न लुमता' (१।१।६३) इति निषेधात् सुप्परत्वाभावः।

गतमहो रात्रिरिति। केचित्तु भाष्ये आतिदेशिकस्याहोरात्रस्यैवोदाहरणात्, 'न लोपः प्रातिपदिकान्तस्य' (८।२।७) इतिसूत्रे 'न हि रूपरात्ररथन्तरेषु रौ रे वा विशेषोऽस्ति' इत्यत्र

ऐतिह्यादिति एवं च भेदमस्यवार्तिकस्योदा हरणमितिभावः।। ओत्वोष्ठयोः समासेवा। ननु समर्थ परिभाषाया अत्रोपस्थित्या समासे एवतस्य प्रवृत्तौ समास इति व्यर्थमतआह्। अत्रेति।। ननुसमासें गुलेरित्यत्र ऋते च तृतीया समास इत्यत्र च समासग्रह्णे न सुबंतत्वेन तद्व्याप्यत्वे नवा यत्रोद्देश्यत्वं तत्रैवसमर्थ परिभाषा प्रवर्त्तेत ज्ञापक साजात्यान्न तु यत्र पदत्वेनोद्देश्यत्वं तत्रापीत्यत आह्।। पदविधिरिति सूत्रस्वरसेन चेति।। पदत्वेनेति।। उपपद मतिङ् कर्मव्यणित्यादौ उपपदमिति महासंज्ञा करणेन समीपोच्चारितं पदमुपपदमित्यर्थात्।। सुबंतत्वेनवेति।। वाशब्दस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रायेण रात्रेति पाठाच्चेद्दृशानामनभिधानमेवेत्याहुः। अनन्यत्वादिति। रात्रिशब्दान्तात् समासादचि समासान्ते 'यस्येति च' (६।४।१४८) इति लोपेऽपि रात्रिशब्दत्वाक्षतेरिति भावः। अनुवादे रेफविशिष्टस्योपादानाद्रेफस्य रेफविधानं व्यर्थमत आह – विसर्गापवाद इति।

(८) ढ्रलोपे (६।३।१११) नायं तत्पुरुषोऽनीयरि 'चचार इत्यादौ च दोषापत्तेः नापि बहुव्रीहिर्व्यधिकरणत्वात्। अतो णिजन्तात्कर्मण्यण्युपपदसमास इत्याह – ढरेफावित्यादि। भाष्ये तु व्यधिकरणबहुब्रीहिरेव दर्शितः। न च 'अजर्घाः' इत्यादौ 'सिपि धातोः' (८।२।७४) इति रुत्वस्य, 'लीढः' इत्यादौ ढत्वादीनां 'पितू राज्यम्' इत्यादौ संयोगान्तलोपस्यासिद्धत्वा 'कथं दीर्घ इति वाच्यम्, ढग्रहणेन लणसूत्रे 'अजर्घाः' इति भाष्योदाहरणेन च तत्व्छास्त्रैकवाक्यतापन्नपूर्वत्रासिद्धमितिसूत्रस्थपूर्वग्रहणेनैतत्सूत्राग्रहण बोधनात्। अणः किमिति। अच इत्येव सिद्धमिति प्रश्नः। 'तृहू' इति प्राठे 'नकारजावनुस्वारपञ्चमौ' इति वृद्धोक्तेः 'अनिदिताम्' (६।४।२४) इति नलोपे 'तृढः' इति रूपम्। अत्राण् पूर्वेणैव व्याख्यानात्।

विप्रतिषेधे। (१।४।२)। विप्रतिपूर्वात्कर्मव्यतिहारे वर्त्तमानात्सेधतेर्घञि परस्परविरोधार्थो विप्रतिषेधशब्दस्तत्र नित्यस्यावश्यकतयाऽन्तरङ्गस्य ज्ञापकादिनाऽपवादस्य वचनप्रामाण्याद् 'बाधकत्वे स्थिते तद्भिन्नोऽस्य विषय इत्याह–तुल्यबलेति। द्वयोः शास्त्रयोः क्वचिल्लब्धावकाशयोरेकत्र प्रयोगे युगपदसम्भवि स्वकार्यसमर्पणञ्च सः। तत्र प्रायेणैकस्य कार्यद्वययोगकृतेऽसम्भवे एतस्य प्रवृत्तिः। यथा 'वृक्षेभ्यः' इति। तत्र हि दीर्घैत्वयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तानन्तर्यासम्भवः। क्वचित्केवलासम्भवेऽपि, यथा

समुच्चयार्थत्वात्सुबंतत्वव्याप्येन तिङंतत्वेन चेत्यर्थः।। सुबंतत्वेन सुप्सुपेत्यादौतद्व्यापत्वेन कर्तृकरणे कृतेत्यादौ तिङंतत्वेनाख्यातमा ख्यातेन तिङश्चेत्यादौ। ननुपदविधिरिति सूत्र स्वरसेन पदत्वेन यत्र साक्षादुद्देश्यतातत्रैव प्रवृत्तिः स्यान्नतु यत्र सुबंतत्वादिना तत्र चेति चेन्न पारे मध्ये इत्यत्र वा ग्रहणसामर्थ्येन पदत्व प्रयोजकेनोद्देश्यत्वेपि तत्प्रवृत्तिज्ञापनात्।। पदत्वाभावादिति।। ओत्वोष्ठांगुलि संगादि मात्रस्य पदत्वेन तत्प्रयोजकत्वेन सुवंतत्वा दिनावोद्देश्यत्वा भावादित्यर्थः।। चस्तु हेता विति भावः।। अतएवोपसर्गाद्दृतीत्यादौ परिभाषा नोपतिष्ठति इति दिक्।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'शिष्टात्' इत्यादौ। अत्र हि तातङ्शाभावयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तान्तर्यासम्भवः यद्यपि तातङादेः स्थानिवत्त्वेनास्त्येव तत्, तथापि अतिदेश आदेशप्रवृत्त्युत्तरमेव, न तु तत्प्रवृत्तिकाले इति युगपदसम्भवोऽरुत्येवेति परत्वात्तातङि सकृद्गतिन्यायेन न शादेशः। स्पष्टञ्चेदं सर्वं प्रकृतसूत्रे 'इको गुणवृद्धी' (१।१।३) 'आदसो मात्' (१।१।१२) इत्यादावाऽऽकरे। तत्र युगपदुभयोः कार्ययोरसम्भवात् पर्यायेण तृजादिवच्छास्त्रद्वयप्रसङ्गे नियमार्थमिदम्, परमेवेति। तेन 'तिसृणाम्' इत्यत्र यौगपदासम्भवेन परत्वात्तिस्रादेशे पुनः स्थानिवत्त्वेन त्रयादेशो न तत्पठ्यते 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद् बाधितमेव' इति।

यद्वा, यथा तुल्यबलयोरेकः प्रेष्यो भवति; स तयोः पर्यायेण कार्यं करोति, यदा तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्ये भवतस्तदोभयोर्न करोति यौगपदासम्भवात्, तथा शास्त्रयोर्लक्ष्यप्रेष्ययोः क्वचिल्लक्ष्ये यौगपद्यासम्भवादप्रतिपत्तौ प्राप्तायामिदं 'परं भवति' इति विद्धृयर्थम्। तत्र कृते यदि पूर्वस्यापि निमित्तमस्ति तदा तदपि भवत्येव। तत्पठ्यते – 'पुनर्धिर्भवति। विज्ञानात्सिद्धम्' इति। यथा 'भिन्धि' इत्यत्र परत्वात्तातङि पुनर्धिर्भवति। अत्र तातङ्धिभावयोर्युगपदेकस्थानिसम्बन्धस्याङ्गरूपनिमित्तानन्तर्यस्य वा न सम्भव इति भाष्ये स्पष्टम्। कार्ये परत्वञ्च परशास्त्रविहितत्वम्। कार्यकालपक्षेऽप्यष्टाध्यायीपाठपरत्वमेव नियामकम्। अत एव 'ङमो ह्रस्वात्' (८।३।३२) इत्यादौ त्रिपादीस्थे कार्यकालपक्षे एव परिभाषयोः प्रवृत्त्या एकदेशस्थत्वेऽपि परत्वात् 'तस्मादित्युत्तरस्य' (१।१।६७) इत्यनेनैव व्यवस्थेति सङ्गच्छते। त्रिपादीस्थेन शास्त्रेण विरुद्धपरिभाषाद्वयमध्ये परैव काल्यते आकृष्यते न पूर्वेति तत्त्वम्। सञ्ज्ञानां तु कार्यकालपक्षे प्रदेशे एव वाक्यार्थेन तद्बोधोत्तरमेव विरोधप्रतिसन्धानं कार्यज्ञानञ्चेति तत्रत्यपरत्वमेवैतत्सूत्रप्रवृत्तौ बीजम्। अत एव

ननु लक्षणैक चक्षुषां लक्ष्यानुरोधोऽनुचितोऽतआह्।। अन्यत्रेति।। मयङ वैतयोरिति सूत्रे भाष्ये स्वांपि सेदुष इत्यादि प्रयोगेचेत्यर्थः। तस्याच्छब्द१ इति।। तस्यानुकरणे एवाच्छब्दः संभवति नतुतद्रूपानुकरणे इत्यर्थः।। एवं चाव्यक्तस्यानुकरणमितिषष्ठी समासो नतु कर्मधारय इति भावः।। अनुकरण ग्रहणंतु भग्न दंताद्युच्चारिताऽव्यक्तानुकार्येऽच्छब्दे पर रूप व्यावृत्यर्थमित्यलम् नन्वत इत्युच्यमाने स्वरूपग्रहणायातोगुण इत्यतोनुवर्तमाने पुनरद्हणरूप ज्ञापका श्रयणेप्रक्रिया गौरवाद्ट रित्येव सिद्धावत इति व्यर्थ मिति पृच्छति अत इति किमिति वैचित्र्यार्थमिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'कार्यकालपक्षेऽयादिभ्यः परैव प्रगृह्यसञ्ज्ञा' इति 'अदसो मात्' (१।१।१२) इति सूत्रे भाष्ये उक्तम्। परिभाषाणां तु तत्पक्षे तद्देशत्वेऽपि स्वस्वदेशे ऽर्थबोधोऽस्त्येवेति तासां पाठकृतमेव तत् एतत्सूत्रप्रवृत्तौ नियामकमिति बोद्ध्यम्।

यद्यपीयं परिभाषा तथापि कार्यग्रहणेन कार्यमात्रग्रहणात् 'तस्मिन्' (१।१।६६) इति 'तस्मात्' (१।१।६७) इतिपरिभाषयोरपि व्यवस्थापिका। कार्यकालपक्षेऽपि नैषा इक्परिभाषादिवद्विध्येकवाक्यतयाऽत्वाङ्गत्वास्त्वकार्यनिष्पादिका, किन्तु वाक्यभेदेनैव कार्यं व्यवस्थापयति। यथा 'वृक्षेभ्यः' इत्यत्रैत्वदीर्घत्वयोः प्राप्त्योः परमेत्वं प्रवर्तयति। एवम् 'असिद्धं बहिरङ्गम्' (प०भा०) इत्यादयोऽपीति 'खरवसानयोः' (८।३।१५) इत्यत्र कैयटे स्पष्टम् एवञ्च 'विप्रतिषेधे' (१।४।२) इत्येषा यथोद्देशैवेति स्थितम्। त्रिपाद्यां कार्यकालपक्षेऽप्यप्रवृत्तेः, पूर्वदृष्ट्या परावस्थानाभावादित्यन्यत्र विस्तरः।

इति लोपे इति। उत्वं नित्यमिति तु न, 'भोभगो' (८।३।१७) इतिसूत्रोक्तरीत्या लोपस्या ऽल्विधित्वात् स्थानिवत्त्वेन तद्धर्मातिदेशेऽपि उच्चारणप्रसङ्गरूपस्थानषष्ठ्यर्थाभावेन लोपे तदप्राप्तेश्च।

एतत्तदोः (६।१।१३२)। अनुकार्यस्वरूपभङ्गभिया कोशे इवैकशेषाभावः एतत्तदोरनन्तर इत्यर्थः। तेन 'परमस ददाति' इत्यादौ न दोषः। गौणे तु न दोषः, तत्र त्यदाद्यत्वाभावेन हल्ङ्यादिलोपस्य दुर्वारत्वात्। सु इति प्रथमैकवचनमेव व्याख्यानात्। अनञ्समासे किमिति। तस्य पूर्वपदार्थप्रधानत्वादुपसर्जनत्वात्तदाद्यत्वाभावेन हल्ङ्यादिलोपो दुर्वार इति प्रश्नः उत्तरपदार्थप्रधानः स इत्युत्तरम्।

प्रियतद्धिता दाक्षिणात्या इति बोधन द्वारा स्पष्टार्थमित्यर्थः।। ननु वाक्य भेदेनांत्यमात्रस्य ठगित्यादीनामपि विकल्पेन पररूप प्रवृत्यर्थमित्येव किं न स्यादत आह् फलकल्पनेति अंतग्रहणं झलीति निवृत्यर्थ मिति दधस्तथोश्चेति सूत्रस्थत योरित्यस्य प्रत्याख्यानाय झषस्तथोर्धोऽध इत्यत्रत्या धइत्यस्य प्रत्याख्यानाय च भाष्ये दध इति सूत्रे झलां जशोंत इत्यत्र जश इति योगंविभज्य दध इति झष इति च तत्रानुवर्त्य जश इति सूत्रे चानुवर्तितस्य झलीत्यस्य झलामिति सूत्रे निवृत्यर्थमंत ग्रहणमित्यर्थः।। ननु कृते प्यंत ग्रहणे पदस्यांते विद्यमानानां झलां जशो झलि पर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सोऽचि (६।१।१३४)। ससिति प्रथमान्तस्य (४) लुप्तषष्ठीकमनुकरणम्। सेमामविड्ढीति। द्वादशाक्षरपादा जगती छन्दः। स एव मुक्तत्वेति। लोपेऽत्र पादापूर्त्तेर्न लोप इति भावः। अवधारणन्त्विति। वृद्धैर्व्याख्यातमवधारणन्त्वित्यर्थः। बहुलेत्यादि। गमकान्तराभावादिति भावः। एवञ्च तदनुवृत्त्येव क्वचिदप्रवृत्तौ सिद्धायामवधारणपरतया व्याख्यानं व्यर्थमिति भावः। सर्वमेतदवधारणन्त्विति तुना सूचितमित्यलम्।।

इति स्वादिसन्धिः।

स्वादिविधौ प्रातिपदिकाधिकारात् तां सञ्ज्ञामाह – अर्थवदिति। अधातुरित्यादिः पर्युदासो लाघवात्। प्रत्ययान्तमिति। आवर्त्तिते प्रत्ययपदे प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम्। 'सञ्ज्ञाविधौ' (प०भा०) इति निषेधस्तु प्रत्ययस्य यत्र सञ्ज्ञा तद्विषय इति भावः।

अत्र सूत्रे उत्तर सूत्रे चार्थवत्त्वम् एतत्संज्ञाफलभूतविभक्तीतर समभिव्याहारानपेक्षया लोकेऽर्थविषयक बोधजनकत्वम्। अन्यथाऽधातुरिति पर्युदासेन व्याख्यानादर्थवत्त्वेनैव सादृश्यग्रहणेन सिद्धेरुत्तरसूत्रे कृदादीनामनर्थकानामप्रसिद्धेस्तद्वैयर्थ्यं स्यात्।

नच नञिवयुक्तन्यायानित्यत्वज्ञापनार्थं तत्, तदनित्यत्वज्ञापने भाष्यसम्मतदृढतरफलाभावात् 'अहन्' 'काण्डे' इत्यादावेतत्साध्यविभक्त्यनपेक्षत्वेऽपि तदितरानपेक्षत्वमस्त्येवेति तत्पर्युदासः सार्थकः। न च तत् केवलप्रत्ययस्य। तदुक्तम् – 'संख्याया अतिशदन्तायाः' (५।१।२२) इति सूत्रे भाष्ये 'न हि लोके केवलेन प्रत्ययेनार्थो गम्यते, केन तर्हि? सप्रकृतिकेन' इति। हरिरप्याह –

इत्यर्थः कुतोनेतिचेन्न झलंतस्य पदस्येत्येव सिद्धेंऽतग्रहण सामर्थ्याज्झली व्यस्या संबधादिति भावः। लकाखतांतर्येणेति लकारोविद्यते यस्मिन्लकार रेफरूप हल्द्वयवति समुदाये सलकारोऽर्श आद्यजंतः स विद्यते यस्मिन्लात्मके समुदाये सलकाश्वान्तस्य भावो लकारवत्ता तया लकार वत्तया हल्द्वयवत्तया च पदांतर्यं तेनेत्यर्थः। अभितः क्लृप्तत्वेनेति परत्राज्भक्ति स्वीकार फलं तुकर्त्रीत्य त्रविसर्गः।। चक्लृप इत्यत्र पकारस्य यणोमय इति द्वित्वं चनेति बोध्यं पूर्व साहचर्यादिति।

पूर्व सादृश्यादित्यर्थः।। वार्तिकद्वयप्रवृत्तौ विशेषमाह।। अत्रेति। अतएव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते।

कृतद्धितानामर्थश्च केवलानामलौकिकः।।

प्राग्विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते।। इति।

अत एव पदसञ्ज्ञासूत्रेऽन्तग्रहणस्य सञ्ज्ञाविदौ तदन्तविध्यभावज्ञापकत्वे 'कृतद्धितेति, सूत्रेऽन्तग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्। अर्थवदिति वर्तते कृत्तद्धितेति सूत्रेऽन्तग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्। अर्थवदिति वर्त्तते कृत्तद्धितान्तञ्चैवार्थवत् न केवलाः कृतस्तद्धितावा' इति भाष्यमुपादाय 'शास्त्रीयार्थग्रहणेऽर्थवद्ग्रहणानुवृत्तिवैयर्थेन तदनुवृत्तिसामर्थ्याल्लौकिकार्थ प्रत्यासन्नोऽभिव्यक्ततरो योऽर्थः प्रययान्तेषु लक्ष्यते स आश्रीयते इति कैयटेनोक्तम्। लौकिकं यत्पदं तदर्थस्य प्रत्यासन्नः शास्त्रकृत्कल्पितस्वादिप्रकृतेरर्थः प्रत्ययान्तेषु सुबन्तेषु योऽभिव्यक्ततरो लक्ष्यते बोद्धृभिः स इत्यन्वयः। यत्तु प्रत्ययान्तेष्वित्यस्य कृदाद्यन्तेष्वित्यर्थ इति, तन्न, तावन्मात्रेण कस्याप्यर्थस्याभिव्यक्तेरप्यभावेनाभिव्यक्ततरत्वस्य सुतरामभावात्। अर्थवत्सूत्रेऽप्येवमेवेति अनुवृत्तिसामर्थ्यादित्यनेन सूचितम्। अन्यथा तत्सामर्थ्यादित्येव बदेत्। पूर्वसूत्रे यादृशार्थवत्त्वग्रहोऽत्राप्यनुवृत्तिसामर्थ्यात्तादृशार्थवत्त्वस्यैव ग्रहः। शास्त्रीयार्थग्रहणे तु तदनुवृत्तिर्व्यर्था स्यादिति तद्भावः।

किञ्च पूर्वसूत्रे सामान्यतोऽर्थवत्त्वग्रहणेन किञ्चित्फलं प्रत्ययेष्वतिव्याप्तिदानातिरिक्तम्। अत एव तद्धितग्रहणंस्य नियमार्थत्वाश्रयणेन ह्रस्वो नपुंसके यत्तस्य' इति न्यासेन 'काण्डे' इत्यादौ ह्रस्ववारणात्फलाभावेन वा भाष्योक्ते तत्प्रत्याख्याने 'पञ्चनावप्रियः' इत्यादौ पञ्चनावेत्यस्यानेन न प्रातिपदिकत्वं, नाप्युत्तरसूत्रेण। प्रातिपदिकत्वे तु टाबापत्तिः। एवञ्च प्रत्ययस्य प्राप्तिरेव नेति केवलप्रत्ययपर्युदासो विफलः। 'दशदाडिमानि षडपूपाः'

व्यवस्थया साधुत्व स्वीकाएदेव। तत्र प्रमाणमाह। अतएवेति। ननुतपरत्वेन लृग्रहणे न च परत्र व्यवस्थायाभपि पूर्वत्र दीर्घस्यापि ग्रहणं स्यादत आह् तुल्यास्य सूत्रे इति। ऋतीत्येतत् ऋत इतीति। आवृत्या ऋत इत्यपीत्यर्थः। सिद्धाविति। अच्त्वस्य सिद्धावित्यर्थः। वार्तिकस्य वैर्य्यापत्ते रिति। एतयोरइउण् सूत्रानंतर पाठ बोधक वार्तिकस्य वैपर्थापत्तेरित्यर्थः।। एङः पदांतादति। पदांतादितिकिमिति ङसिङसोश्चेत्यस्यापदांताच्चेन्ङसि ङसोरेवेति नियमार्थ त्वादेवास्य पदांतेएव प्रवृत्या पदांतादितिव्यर्थ मितिप्रश्नः। उत्तरमाह्। भवतीति सुपिचेन्ङसिङसो रेवेत्यपि नियम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादिनिरर्थकपदससुदाय व्यावृत्तिरर्थवद्ग्रहणस्य फलम्। तत्र हि 'सुपो धातु' (२।४।७१) इति लुगापत्तिरिति भाष्ये स्पष्टमिति दिक्।

पूर्वसूत्रेणेति। 'प्रत्ययग्रहणे यस्मात्' (प०भा०) इति प्रत्ययान्तत्वाभावादिति भावः। नियमस्य सजातीयविषयतत्वात्साजात्यं दर्शयितुमाहपूर्वो भाग इति। एतेन यत्तच्छब्दार्थयोरननुगतत्वेन शब्दानुगमस्याप्रयोजकत्वेन व्यवच्छेद्याननुगमेऽपि क्षत्यभावेन च 'यत्र सङ्घाते' इत्यादि व्यर्थमेवेत्यपास्तम्। पदशब्देनात्र स्वातन्त्र्येणापि प्रयोगार्हमर्थवद् गृह्यते। अत एव 'अर्थवत्समुदायानां समासग्रहणं नियमार्थम्' इत्युक्तमत्र भाष्ये। भाष्ये सुबन्तानामित्यनेन भेदसंसर्गद्वारकार्थवन्त उपलक्ष्यन्ते इति कैयटेन स्पष्टमेवोक्तम्। तेन 'गवित्ययमाह' इत्यादौ गो इत्यादीनां सुबन्तत्वाभावेऽपि न समुदायस्य प्रातिपदिकत्वम् अनुकरणस्यानितिपरस्यापि प्रयोगसत्त्वेन तावन्मात्रस्यापि पृथक्प्रयोगार्हत्वात् 'बहुपटवः' इत्यादौ प्रातिपदिकत्वसिद्ध्ये स्वातन्त्र्येणेति। तत्र पूर्व इत्याक्षिप्तपरेषामपि स्वातन्त्र्येण प्रयोगार्हार्थवतामेव ग्रहणात् 'पुत्रकाम्या' इत्यादौ न दोषः। अत एवाङ्गसञ्ज्ञासूत्रे भाष्ये 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्' (प०भा०) इति परिभाषायाः फलनिरूपणावसरे 'देवदत्तो गार्ग्यः' इति समुदायस्य यञन्तत्वेन प्राप्तप्रातिपदिकसञ्ज्ञाऽभावः फलत्वेनोक्तः यथाश्रुतमूलोक्तनियमे तु नियमेनैव तदप्राप्त्या भाष्यासङ्गतिः स्पष्टैव। एतेन 'वृषण्वसुः' इत्यादौ पूर्वभागस्य भत्वात्पूर्वो भागः पदमित्ययुक्तमित्यपास्तम्।

वाक्यस्य नेति। प्रातिपदिकत्वे हि सुपः श्रवणानापत्तिः। 'पिण्डीम्' इत्यादौ वाक्यैकदेशप्रयोगेऽलुक्समासे चाङ्गाधिकारविहितसुप्रत्ययनिमित्तककार्याणां सुबादेशानाञ्च चारितार्थ्यं, विकल्पेन समासविधानञ्च स्वराद्यर्थमिति भावः। शशशृङ्गादिपदानाञ्च बौद्धे

सम्मवाद त्रापि प्रसंगस्यादितिभावः। अनित्यत्वादिति। हूलोनंतरा इतिनिर्देशाद्गवाक्ष इति भाष्योदाहरणाच्च सन्निपात परिभाषाऽनित्यत्व परिगणने एकादेशस्यापि ग्रहणादिति भावः।। सामंजस्यमति प्लुत प्रगृह्या इत्यस्य प्रथमांतत्वादित्यर्थः। नेति पाठे तु षष्ठ्यर्थे प्रथमेति कलपं स्यादितिभावः।। भवत्येवेति। नन्वंतरंगे सवर्णदीर्घे वहिरंगस्य प्रकृति भावस्यासिद्धत्वादेव दोबेऽज्ग्रहणं व्यर्थमिति चेन्न विष्णो इतीत्यादा वप्यंतरंगेऽयादेशे प्रकृति भावेच वहिरंग प्रगृह्य त्वस्यासिद्धस्वात्प्रकृति भावानापत्या संबुद्धौशा कल्यस्येत्यस्य वैयर्थेन प्रकृति भाव वषयेंऽतरंग परिभाषाया अप्रवृत्तेः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शशश्रृंङ्गादौ शक्तिरिति पूर्वेणैव प्रातिपदिकत्वं सिद्धम्। स्वप्राद्यनुरोधेन च बौद्धपदार्थस्याऽऽवश्यकत्वम्। अक्षौहिरथन्तरादिपदेषु अवयवानामत्यन्तनिरर्थकानामप्यन्यत्र दृष्टार्थारोपेण प्रातिपदिकत्वसुबुत्पत्त्यादिना यथाकथञ्चित्साधुत्वान्वाख्यानं बोध्यम्।

अधिकारोऽयमिति। सञ्ज्ञाऽधिकार इत्यर्थः। सञ्ज्ञात्वावगमस्तु व्याख्यानात्। विकारागमानान्तु न तत्सञ्ज्ञा, 'प्रत्यय' इति महासञ्ज्ञया स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकस्यैव तत्सञ्ज्ञकत्वात्। स्वप्रकृत्यर्थत्वञ्च धातुपाठकोशादौ तमुच्चार्य बोधितत्वम्। अत एव नभवधाद्यादेशानां न सञ्ज्ञा। तेषां स्थान्यर्थेनैवार्थवत्वं, न तु स्वार्थोऽस्ति। अत एव कोशादौ तदर्थाकथनम्। एतदर्थमेव भाष्ये स्वीयमर्थं प्रत्याययन्तीति विग्रहे स्वीयपदोपादानम्। भाष्य प्रामाण्याच्च तदर्थान्तर्भाविण प्रत्ययशब्दस्य वृत्तिः।

यत्तु विकारागमादेशानां द्वेशांशे निराकाङ्क्षत्वात् 'परश्च (३।१।२) इत्यस्यानुपस्थितौ तत्सन्नियोगशिष्टप्रत्ययसञ्ज्ञाया अप्रवृत्तिरिति, तन्न, श्नमकज्बहुष्वप्रवृत्त्यापत्तेः। किञ्च 'लविषीय' इत्यत्र विशेषविहितत्वात्परत्वाच्च पूर्वं सीयुटि ततो लादेशे प्रत्ययसञ्ज्ञासन्नियोगेनेटो विधीयमानमाद्युदात्तत्वं सीयुट एव स्यादत आगमानुदात्तत्वं वक्तव्यमिति 'आद्युदात्तश्च' (३।१।३) इतिसूत्रस्य भाष्यकैयटासङ्गतिः। लस्थानिकत्वेन देशांशे निराकाङ्क्षत्वेन 'परश्च' (३।१।२) इत्यस्याप्रवृत्तौ 'प्रत्यय' (३।१।१) इत्यस्याप्यप्रवृत्तौ तत्सन्नियोगकथनासङ्गतेरिति दिक्।

परश्च (३।१।२)। 'गुप्तिज्किद्भ्यः' (३।१।५) इत्यादावपादानत्वासम्भवाद्दिग्योग लक्षणा पञ्चमी। तत्र परः पूर्वो वेत्यत्रानियमेनाध्याहारे प्रसक्ते एवेति नियमार्थमिदम्। 'गापोष्टक्' (३।२।८) इत्यादावपि षष्ठ्यर्थ आनन्तर्य पूर्वपरसाधारणमित्यनियमोऽस्त्येव।

अत एवपचेते इमानित्यादौ प्रकृतिभाव सिद्धिरितिदिक्।। वार्तिकमिति एक वचन प्रयोगे णैकमेवेदं वार्तिकमिति सूचित मिति भावः।। व्याख्यानादिति। ज्ञापक पर भाष्य प्रामाण्यात्सिसाहचर्माद्वा न समास इतिपूर्व सूत्रस्यैव निषेध इति व्याख्यानादिति भावः। भवेतीति स्मृत्युक्तं भवेतीत्यर्थः।। अस्यापीति, एधीत्यस्यापीत्यर्थः।। स्मृतौ भवेत्यस्यार्थ परत्वादितिभावः। एतेनायुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने अकारश्चास्य नाम्नों ते वाच्यः। पूर्वाक्षरप्लुत इति मनूक्तेरेधीत्यनुचित मित्यपास्तम्। नामत्वात्प्राप्त इति। एवं च सर्वस्य प्लुतस्य वैकल्पिकत्वात् तयोर्ग्रहणं स्पष्टार्थमिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र 'तस्मात्' (१।१।६७) इति परिभाषोत्तरांशविकला प्रवर्त्तते इत्यव्यवहिता एव प्रत्ययाः। न चैवं षष्ठ्यंशविकलं सम्पूर्णं सूत्रमुपतिष्ठतां; किं 'परश्च' (३।१।२) इत्यनेनेति वाच्यम्, प्रकृत्यर्थमात्रविवक्षायां केवलप्रकृतेः पच् पत् इत्यादेः (२) प्रयोगो मा भूदिति प्रत्ययः परो भवत्येवेति नियमार्थत्वात्। तेन 'न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः' इति सिद्धम्। अनुकरणे तु अभेदविवक्षयाऽर्थवत्त्वाभावात्प्रातिपदिकत्वाभावेन प्रकृतित्वाभावात् 'गवित्ययमाह' इत्यादौ नानुपपत्तिः। प्रकृतित्वं प्रत्ययविधावुद्देश्यतावच्छेदकाक्रान्तत्वम्। अयं न्यायः शास्त्राबोधितान्यतरप्रयोगविषयः, अत एव 'लिट्' 'इयान्' इत्यादौ न दोषः। अत्र प्रकृतिविशेषोद्देशेनैव प्रत्ययानां विधानात् 'नापि केवलः' इति न्यायमूलकम्। एतन्मूलकमेव पठ्यते 'अपदं न प्रयुञ्जीत' इति। अपरिनिष्ठितमिति तदर्थः परिनिष्ठितत्वञ्च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वम्। निहते तिङन्तादावव्याप्तिवारणायाऽप्रवृत्तेति। वैकल्पिकेडागमोऽद्देश्यतावच्छेदकाक्रान्ते 'सेद्धा' इत्यादावव्याप्तिवारणाय नित्येतीति दिक्।

ङ्याप्प्रातिपदिकात् (४।१।१)। समाहारद्वन्द्वः। ननु 'परश्च' (३।१।२) इत्यनेन प्रकृतेराक्षेपात्प्रातिपदिकाधिकारो व्यर्थः। तिङ्न्ताच्चु न द्वितीयादिः। सख्याऽभावात्, संख्यायास्तिङोक्तत्वाच्च। धातुभ्यस्तु न तिङामपवादत्वात्। तस्येत्यादिसमर्थविभक्तिनिर्देशात्, तमब्विधौ 'तिङश्च' (५।३।५६) इति ज्ञापकाच्च न तेभ्यस्तद्धितव्यावृत्त्यर्थः, इति चेत्? न, तदभावे 'स्वार्थद्रव्यलिङ्गसंख्याकारकप्रयुक्तकार्यैः संस्कृतस्य बहिर्भूतापत्यादियोगः, इति 'कुत्सिते' (५।३।७४) इतिसूत्रभाष्योक्तन्यायेन 'तस्यापत्यम्' (४।१।६२) इत्यादौ तत्सम्बन्धपत्यमिस्याद्यर्थे प्रथमोच्चारितबोध्यात्प्रत्यय

भावः। नन्वेवं वाक्यस्य टेरित्यधिकारात् है हे प्रयोगे है हे ऽतस्यवाक्यस्पटेः प्लुत इत्यर्थेऽनंत्ययोस्तयोर्न स्यादत आह्। है हेंत इति। व्याख्यानाच्चेति अनंतस्य चेत्येव समुच्चयेसिद्धेऽपि ग्रहणसामर्थ्याद्दुर्वसंवद्धस्यैवांत्यस्य समुच्चय इतिभावः। नन्वनुदात्तं पदमित्येव पर्याये सिद्धे एकैक ग्रहणं व्यर्थमतआह्। अनुदात्तं पदमितित्विति। ननुप्राचामित्यस्य विभागेन सर्वप्लुतस्य वैकल्पि कत्वेन पाणिनिः स्वमतात्प्रच्युतः स्यादत आह्। भाष्येत्विति। व्यवस्थित विभाषायां प्रमाणमाह सा चेति। नन्विंद्रे चेतिसूत्रारंभाद्भाष्यानुक्त व्यवस्थित विभाषाणाम प्रामाणिकत्वमत आह्। अतएवेति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यर्थस्य सत्त्वेन च सार्थकतद्धितानां सुबन्तादुत्पत्त्या अनुदात्तादेरित्यस्य प्राधान्यादुपस्थितसुबन्तविशेषणत्वापत्तौ सर्वस्य विकारः 'सार्वः' इत्यत्राञनापत्तेः, 'सर्वस्य सुपि' (६।१।१९१) इत्याद्युदात्तत्वात्। तदधिकारसामर्थ्यात्तु प्रातिपदिकस्यैव तद्विशेषणमिति न दोषः। सर्वशब्दस्योञ्छादिपाठेनान्तोदात्तत्वात्। स्पष्टञ्चेदमत्र भाष्ये।

न च 'अन्तरङ्गानपि' इति न्यायेन लुङ्निमित्तप्रत्ययात्पूर्वमाद्युदात्ताप्राप्त्या तस्य सुबन्तविशेषणत्वेऽपि न दोष इति वाच्यम्, तेन न्यायेन धर्मिग्राहकमानादन्तरङ्गनिमित्तविनाशकलुक एव प्रावल्यबोधनेन दोषात्। 'सर्वस्य सुपि' (६।१।९१) इत्यत्र सौवरीणां सप्तमीनां तदन्तसप्तमीत्वात् प्रत्यये परतः पूर्वकार्यत्वाभावेन 'न लुमता' (१।१।६३) इत्यस्याप्राप्तौ प्रत्ययलक्षणेन सुबन्ततया तस्यान्तरङ्गनिमित्तविनाशकत्वाभावात्। अत एव सर्वस्तोमादिबहुब्रीहेराद्युदात्तत्वसिद्धिः। न चानुदातादिप्रकृतिकषष्ठ्यन्तादित्यर्थेन न दोष इति वाच्यम्। 'गर्गादिभ्यः' (४।१।१०५) इत्यादौ सुबन्तं प्रति गर्गादीनां विशेषणत्वासम्भवादगत्या लक्षणास्वीकारेऽपि प्रकृति लक्षणायां मानाभावात्। वस्तुतस्तत्रापि न लक्षणा। गर्गादिरूपात्प्रातिपदिकात्तत्सम्बन्ध्यपत्यमित्यर्थे प्रत्यय इत्यर्थे प्रातिपदिकात्परत्वं तद्व्यवधानेन भविष्यति। तदव्यतिरिक्तव्यवधाने तु न, मानाभावात्। एतच्च मतुप्सूत्रे कैयटे स्पष्टमित्यन्यत्र विस्तरः।

लिङ्गविशिष्टस्येति। इयञ्च प्रातिपदिकसामान्यग्रहणे तद्विशेषग्रहणे च। अनया परिभाषया ङ्याब्ग्रहणवैयर्थ्यस्य भाष्ये शङ्कितत्वाद्; विशेषविषये बहुतरोदाहरणदानाच्च। स्त्रीप्रत्ययसमभिव्याहारे प्रातिपदिकत्वतद्व्याप्यधर्माविशिष्टेऽनेनातिदिश्यन्ते अत एव

ननुप्रसज्य प्रतिबेधेन व्याख्याने यथा श्रुत मे वास्त्वित्यत आह्। प्रसज्य प्रतिषेधेनेति। गौरवादिति। असमर्थ समासापत्तेरित्यर्थः। नन्वपेह्य इत्यादौ संबोधनार्थ काशब्दस्य निपातस्य निपात एकेति प्रगृह्यत्वे दूरात्धूत प्लुतेऽनेन पर्युदास पक्षेऽप्लुतादेश आंतरतम्याद्दीर्घः स्यात् प्रसज्यप्रतिषेध पक्षे प्लुत निषेधे ह्रस्वस्य श्रवणं स्यादिति फल मुखं गौरवं न दोषाय इत्यत आह्। किंचेति। वदेदिति। एवं चात्रपाठेऽप्लुतग्रहण सामर्थ्याद्दीर्घस्यैव तत्रसाधुत्वं स्यादितिभावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'बहुव्रीहेरूधसः' (४।१।२५) इति सूत्रे भाष्ये 'नद्यृतश्च' (५।४।१५३) इत्यस्य नद्यन्तबहुव्रीहेरित्यर्थे 'कुण्डोघ्नी' इत्यत्र कबापादितः। अन्यथा तु ङ्यन्तस्य बहुव्रीहित्वाभावात्तदसङ्गतिः। नद्यन्तानां यो बहुव्रीहिरित्यर्थेन च परिहृत इत्यन्यत्।

समासान्तेषु तत्परिभाषाऽभावस्तु ङ्याप्सूत्रभाष्योक्तोऽवयवविषय एव। समुदायविषये तत्प्रवृत्तावपि दोषाभावेन तदंशे तदप्रवृत्तौ न मानमित्याशयः। ङ्याबन्तादिति। ङ्याब्ग्रहणं स्त्रीप्रत्ययमात्रोपलक्षणम्। तेन 'ब्रह्मबन्धूतरा' 'युवतितरा' इत्यादेः सिद्धिः। 'जातेश्च' (६।३।४१) इति निषेधान्न पुंवत्त्वम्, वयोवाचिनां वैकल्पिकजातिकार्यस्य वक्ष्यमाणत्वात्।

तद्धित इति। एतच्च समासान्ततिप्रत्ययाद्यतिरिक्तपरं व्याख्यानात्। एतेन 'यूनीतिः' बहुगोमतीका' इति स्यादित्यपास्तम्। एवञ्च स्त्रीप्रत्ययेषु, अत्यन्तस्वार्थिकानारभ्य तद्धितेषु च ङ्याब्ग्रहणासम्बन्धो व्याख्यानात्। अत एव 'लोहिनिका' इत्येतत्सिद्धये 'लोहिताल्लिङ्गबाधनं वा' इति चरितार्थम्। अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमुत्पत्तिरिति 'सर्वस्य द्वे' (८।१।१) इति सूत्रे भाष्ये स्पष्टं, कैयटे च। तत्र हि पदस्येत्यस्य प्रयोजनं-द्विपदिकेत्यादौ द्वित्वसंख्यायुक्तपदार्थस्य वीप्सितत्वात् वीप्सायामेकत्वलक्षणसंख्याया अनन्तर्भावात्समासाद्विभक्त्यभावेन पदत्वाभावात्प्राक् तद्धितोपत्तेर्द्विवनाभाव इत्युक्तम्। 'पुंयोगाद्' (४।१।४८) इति सूत्रे भाष्येऽप्येतत्स्फुटम्। तत्र हि 'गतिकारकोपपदानाम्' (प०भा०) इत्यस्याः 'साङ्कूटिनम्' इति प्रयोजनमुक्तम्। तत्र हि अभिविधौ भाव इनुणि कूटिन्शब्दादण्डप्रत्ययविभक्त्योः प्राप्तयोः स्वार्थिकत्वेनान्तरङ्गत्वादणि कूटिन्नित्यस्यैव वृद्धिः स्यादित्युक्तम्। तस्यापि सुबन्तादुत्पत्तौ तु पूर्वं सुपि इनुणन्तत्वरूपाधिकसापेक्षत्वेन बहिरङ्गतयाऽणः पूर्वं समासे विशिष्टादणि रूपसिद्धौ भाष्यासङ्गतिः। प्राक्सुबुत्पत्तेः समासे तु

ननुपर्युदास पक्षेवगद्ग्रहणं व्यर्थं तत्र कृतेऽकृते वा परत्वाद नेन प्रगृह्याश्रये प्रकृति भावबोधेन फलेविशेषाभावात् प्रसज्य प्रतिषेधेतु प्लुतस्य प्लुतसादृश्यस्य वा निषेधेपि प्रगृह्यप्रकृति भावस्य सत्वादस्ति तत्सार्थक्यमत आह्। न चेति बाधित्वापरत्वादिति प्रकृति भावाप्लुत सादृश्ययोर्विरोधादिति भावः।। अप्लुतवद भावे इति। अप्लुतसादृश्य इत्यर्थः। तथा च सकृदगतिन्यायेन प्रकृति भावो न स्यादिति भावः। सुलभमिति। प्रगृह्याश्रय प्रकृति भावदृष्ट्या प्लुतस्यासिद्धत्वादितिभावः। तत्वमिति। प्रगृह्यत्वं प्रकृतिभावरूपकार्यं वेत्यर्थः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उक्तरीत्यैवान्तरङ्गत्वात्पूर्वं समासे ततो विशिष्टादणिति साङ्कूटिनसिद्धिरित्यन्यत्र विस्तरः।

स्वौजस (४।१।२) सूत्रे समाहारद्वन्द्वः। टङ्पाश्चेत इति। न च फलाभावः, लोपस्यैव फलत्वात्। तत्र तत्रेतरव्यावृत्त्या चरितार्थानां लोपफलकत्वस्वीकारे बाधकाभावात्। काम्यजादौ तु लोपे सति वर्णोच्चारणवैयर्थ्यान्न तन्मात्रफलिकेत्सञ्ज्ञेति बोध्यम्।

'न विभक्तौ' (१।३।४) इति निषेधोपयोगिनीं विभक्तिसञ्ज्ञामाहविभक्तिश्च (१।४।१०४)। चकार एकसञ्ज्ञाधिकारेऽपि पुरुषवचनसञ्ज्ञाभ्यां समावेशार्थः। अन्यथा पर्यायः स्यात्। 'सुपः' (१।४।१०३) इति सूत्रं, तिङस्त्रीणि' (१।४।१०१) इति सूत्रात्तिङ इति चानुवर्तते। 'प्रथमयोः' (६।१।१०२) इत्यादौ व्याख्यानात्प्राचां वैयाकरणानां प्रथमाद्वितीयापदवाच्ययोर्ग्रहणं बोध्यम्। अन्यथा 'औजसोः पूर्व' इत्येव वदेत्। विभक्तिप्रदेशेषु सुप्तिङिति न वक्तुं शक्यम्। 'यत्र' 'तत्र' इत्यादौ त्यदाद्यत्वानापत्तेः। तेषां सुप्सञ्ज्ञात्वशक्त्या, 'एतर्हि' इत्यादौ 'सुपि च' (७।३।१०२) इति दीर्घापत्तेः।

सप्तम्यन्ता इति। स्त्रीलिङ्गा इति शेषः। प्राचाम् वैयाकरणान्तराणाम्। इहापि अस्मिन् व्याकरणेऽपि।

सुपः (१।४।१०३)। सुबिति प्रत्याहारात्षष्ठ्यत्र।

द्व्येकयोः (१।४।२२) नियमार्थे इमे। इह सूत्रे द्व्येकशब्दौ संख्या परौ, न संख्येयपरौ बहुवचनापत्तेः, तदाह-द्वित्वैकत्वयोरिति। लौकिकप्रयोगे तु 'आदशतः संख्याः संख्येये' इति कोशभाष्याद्युक्तेः संख्येयपरत्वे एव प्रायः साधुत्वम्। क्वचित्संख्यापरत्वेऽपि संख्येयगतसंख्यारोपेण साधुत्वम्। अतएव कस्य द्वित्वे इत्याद्यर्थे 'कयोर्द्वयोः' 'केषां बहुषु'

निपात ग्रहणाभावेप्यनाङिति पर्युदासादर्थवत एवैकाचो ग्रहणात्त द्व्यर्थमितिप्रश्नः। निपात इतिकिमिति। नन्वेकाचो द्व इत्यादावेकाच्पदे वहुब्रीहेः क्लृप्तत्वमत आह्। व्याहरतीति। औचित्यादिति। असमर्थ समासवाक्यभेद योर भावरूप लाघवादिति भावः। अतएव। वाक्य भेदापत्तेरेव। नन्वा अ इत्यवस्थायां सवर्ण दीर्घस्य शब्दांतर प्राप्त्वेना नित्यत्वात्पर निमित्त कत्वेन वहिरंगत्वाच्च नित्यत्वादंत रंगत्वाच्च पूर्वं नपुंसक ह्रस्वे ततो दीर्घे पुन र्ह्रस्वाप्राप्त्या दंतत्वाभावेनामभावे विभक्ति लुक्या इत्येव रूपमिति तथा रूपस्यैवाभावोत आह् आदाविति तेन आइनएत इत्यस्य संग्रह इति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति भाष्ये प्रयुक्तमितिबोध्यम्। एकशब्दो द्विशब्दसाहचर्यात्संख्यावाच्येव। एकग्रहणन्त्यक्त्वैकवचनमुत्सर्गः कर्त्तव्यस्तेनाव्ययेभ्यः 'पचतिकल्पम्' इत्यादौ च व्यर्थैकवचनप्रयोगसिद्धिरिति 'तद्धितश्च' (१।१।३८) इति सूत्रे भाष्ये स्पष्टम्।

बहुषु (१।४।२१) बहुशब्दोऽत्र त्रित्वादिपरार्द्धान्तसंख्यानां व्यापको यो धर्मविशेषो बहुत्वं तत्परः। बहुवचनं त्वाश्रयगतबहुत्वं धर्मे आरोप्य कृतम्। तेन वैपुल्यवाचिनो न ग्रहणम्। 'दाराः' इत्यादौ त्ववयवादिगतबहुत्वस्यावयविन्यारोपो बोध्यः। स च कोशवृद्धव्यवहारानुसारेणैवेति नातिप्रसङ्गः। 'भर्तृदारयोरस्तेजसोः' इति सङ्गच्छते। एतेनैकस्मिन्नपि 'गुरवः समागताः' इत्यादि समर्थितम्। अन्वर्थसञ्ज्ञयैव सिद्धे इदं सूत्रद्वयं स्पष्टार्थम्। राम इति। रुत्वे एकदेशविकृतन्यायेन सुबन्ततया पदत्वाद्विसर्गः।

सरूपाणाम् (१।२।६४) 'वृद्धो यूना' (१।२।६५) इति सूत्रादेवकारोऽपकृष्यत इत्याह – सरूपाण्येवेति। तेन जननीपरिच्छेत्तृवाचिनोर्मातृशब्दयोर्भ्यामि नैकशेषः। न चैकविभक्ताविति व्यर्थ 'यानि सरूपाण्येव' इत्युक्त्वैवोक्तदोषवारणादिति वाच्यम्, हरिणस्त्रीवाचकहरिणीशब्दस्य हरितवर्णविशिष्टस्त्रीवाचकहरिणीशब्दस्य चैकशेषानापत्तेः। पुंवद्भावेन तद्धितादौ वैरुप्यात्। दृष्टानीति। लौकिके प्रयोगे इति शेषः। एकशेषश्चायमनैमित्तिकत्वेनान्तरङ्गत्वाद्विभक्त्युत्पत्तेः पूर्वमेवेति एतद्विषये द्वन्द्वप्राप्तिरेव नेति बोध्यम्।

ननु तन्त्रेणैव सिद्धेरिदं व्यर्थम् यथा 'अक्षा भज्यन्तां भुज्यन्तां दीव्यन्ताम्' इत्यत्राक्षा इति कारकस्य सकृदुपादानेऽपि सर्वत्रान्वयः। तन्त्रकारणं तु शब्दानां तुल्यरूपता। एवम् 'अक्षो भज्यतां भुज्यतां दीव्यताम्' इत्यपि। तन्त्रं द्वेधा-शब्दतन्त्रमर्थतन्त्रञ्च। शब्दस्य

बोध्यम् स्पष्टार्थमिति स्पष्टोर्थः प्रयोजनंयस्य तदित्यर्थः। तत्र निपात ग्रहणमिथवती त्यादौ प्रगृह्यत्व वारणाय ओ दित्युत्तरार्थं एकाज्ग्रहण फलमाह स्वांगे त्यादिना उपस्थितिरिति गौणमुख्य न्यायश्च साक्षात्संज्ञाद्वारा वा विशिष्ट रूपोपादान एव प्रवर्तत इत्यर्थस्तदाह गौण मुख्य न्यायेनेति। अव्ययसंज्ञादाविति आदिना निपाता आद्यु दात्ता इत्यस्य संग्रहः।। अनित्यत्यत्वादिति। अत्र प्रमाणंतु ओदिति सूत्रस्यभो भवदिति भाष्यप्रयोग इति बोध्यम्। निपातएवेति नतुप्रत्याहारः तथासति उञ् ग्रहणमेव कुर्यादित्यर्थः। उञ् इत्यस्यषष्ठयंतत्वा त्प्रगृह्य संज्ञायां संबंधो न स्यादत आह

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पर्यायपरिवृत्तसहत्वेआद्यम्, यथा 'अक्षाः' इत्यादौ। तत्सहत्वे त्वन्त्यम्, यथा 'घटा;' इत्यादौ। तत्राक्षा भज्यन्तां भुज्यन्तामित्यादावन्वयिपदार्थभेदाद् बोद्धुरावृत्त्यैव बोधः। उच्चारणन्तु तन्त्रेण। अन्वयिपदार्थस्यैकत्वे तु एकोपस्थिततयेवान्वयः, यथा 'अक्षांन्पश्य' 'घटान् पश्य' इत्यादौ, इति चेत्? सत्यम्, सरूपाणामेकशेष एवेतिनियमार्थत्वात्। तत्फलं तु प्रत्यर्थं शब्दनिवेशस्यापि दर्शनेन कदाचित्ताद्दशप्रयोगे प्राप्तद्वन्द्वस्य निवृत्तिः। स चायं नियमो विभक्तौ यानि सरूपाण्येव तद्विषयः, सहविवक्षाविषयश्च।

अत एव विभक्त्यन्तानामेकशेष इति पक्षे 'द्वन्द्वप्रतिषेधो वक्तव्यः इत्याशङ्क्य 'अनवकाश एकशेषो द्वन्द्वं बाधिष्यते' इति भाष्ये उक्तम्। किञ्चासहविवक्षायामपि तत्प्रवृत्तौ सहविवक्षायां द्वन्द्वस्येवान्यत्र कर्मधारयस्यापि बाधापत्तौ 'सारवसारवोर्मिजः' इत्यादिप्रयोगविरोधापत्तिः। असहविवक्षाविषयेण विभक्त्यन्त्रेण 'ब्राह्मणाभ्यां कृतं देहि' पयो जरयति' इत्यादि 'नीलोत्पलस्पर्धिनी नेत्रे तनुर्वा हरेः' इतिवत् 'विद्वन्मानसहंस' इतिवच्चेष्टमेवेति बोद्ध्यम्। न चासहविवक्षायां तन्त्रसत्त्वे 'इदित' इति गुरुनिर्देशो व्यर्थ;, अन्यपदार्थावगतये तत्सत्वात्। इद्यस्य धातोरिति करणे तु गौरवम्। एतच्च सूत्रं भाष्ये प्रत्याख्यातम् अर्थावर्थौ प्रतियदर्थानर्थान्प्रति च यत्तदपि प्रत्यर्थमेवेत्याश्रयणेन। अनेकघटादिपदानां साहित्ये वृत्तिरेव नानभिधानात्। एकस्यैव त्वनेकार्थस्य तत्र वृत्तिरभिधानस्वाभाव्यादिति तदाशयः। 'द्विर्वचनेऽचि' (१।१।५९) इत्यादावेकशेषशब्दस्तु भाष्ये तन्त्रपरः। स चोच्चारयितुः, बोधुस्त्वावृत्तिरेवेति बोद्धयम्।

एकविभक्तावित्यत्रैकपदं तु स्पष्टार्थम्; एकस्यामपि विभक्तौ यानि विरूपाणि नेत्यर्थं स्पष्टं बोधयितुम्। ध्वनितञ्चेदं 'विभक्तिः सारूप्ये उपलक्षणम्' इति भाष्ये

उओ वाचकमिति वैयर्थापत्तेति दीर्घमुच्चारणंयस्या नुनासिकत्वविशिष्टादेशस्य तद्वैयर्थावत्तेश्चेत्यर्थः। मम् धातो ग्रहणमत्र मत्र कुतो नेत्यत आह् व्याख्यानादिति। त्रिपाद्यां पाठकरण सामर्थ्यादित्यर्थः। सप्तमीति किमिति। सुवर्थ इत्येव वक्तव्यमिति भावः। ननु वैपरीत्यं कुतोनेत्यत् आह्। ऊकारांश इति– नन्वीकारांशे तत्संभवात्तत्रनिषेधो दुर्वार एवेत्यत आह्। ययीत्यादीनाऐमिति। अनभिदानमिति तत्रापि सरसी यदीतिप्रकृत सूत्रस्थ भाष्यप्रामाण्यदितिभावः। क्रियायामेवेति कर्तृ द्वारेतिभावः। बोधस्तु गौर्यधिकरणको घिश्रयण कर्तेतिबोध्यम्। ननु संज्ञायामिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकपदानुच्चारणेन। समाहारद्वन्द्वविषये तु नैकशेषः 'एकवच्चास्यान्यतरस्याम्' इत्यनेनैकशेषविषयपदानां समाहारे वृत्त्यभावबोधनात्। 'न ब्राह्मणं हन्यात्' इत्यादौ तु जातिपक्षेणैव निर्वाहः। अत एव तत्र व्यक्तिपक्षे 'यं कञ्चिद् ब्राह्मणं हत्वा कृती स्यात्' इति दूषणं भाष्ये उक्तम्।

शेषशब्दार्थश्चेतरनिवृत्तिपूर्वकमवस्थानं तदाह – एक एवेति। एकेति लुप्तविभक्त्यन्तं पृथक्पदम्। अत एव तत्र सरूपाणामित्यस्यान्वयः। तत्रावस्थानस्य सिद्धतयानिवृत्तिरेव विधेया। तत्र 'शिष्यमाणं लुप्यमानार्थाभिधायि' इति न्यायेन श्रूयमाणपदवृत्त्या बोधः। धातुषु तु नास्य प्रवृत्तिः एकनिष्ठानेकव्यापाराणामिवानेकनिष्ठानामप्येकधातुत एव निवृत्तभेदानां प्रतीत्याऽनेकधातुप्रयोगाप्रसक्तेः।

सरूपाणां किम्? घटपटौ। 'शेष' इत्येतन्मात्रोक्तौ द्विबह्वोरपि शेषः प्रसज्येत। एक इत्येतावदुक्तौ त्वेक आदेश इत्यर्थः स्यात्।तथा चाश्वश्चाश्वश्चेत्यादौ कदाचिद् द्व्युदात्तवत्त्वद्वयनुदात्तवत्त्वरूपसाम्यमादायोभयस्वरितैकादेशः प्रसज्येत। न च 'अक्षस्यादेवनस्य' (शां०फि० २।३५) इति फिट्सूत्रेण शकटाक्षे आद्युदात्तस्य देवनाक्षे 'फिषः' (शां०फि० १।१) इत्यन्तोदात्तस्य चैकशेषे कदाचिदन्तोदात्तस्यापि शेषः स्यादिति वाच्यम्; 'स्वरभिन्नानां यस्योत्तरस्वरविधिः' इति वचनेनैव निर्वाहात्। एकादिदशान्तसंख्यावाचिनामेकशेषद्वन्द्वावनभिधानान्न भवतः। विंशत्यादौ त्विष्ट एवैकशेष इत्यलम्।

चुटू (१।३।७)। 'आदिर्ञिटुडवः' (१।३।५) इत्यतआदितरिति 'षः प्रत्ययस्य' (१।३।६) इत्यतः प्रत्ययस्येति चानुवर्त्तते, तदाह प्रत्ययाद्याविति। तेन वाचाटे नेत्त्वम्।

समासे प्रगृह्यत्व वारणार्थ ग्रहणस्यावश्यकत्वमत आह् संज्ञायामितिवेति। जहत्स्वार्थावृत्तिस्तु न रूढे रविरोधादिति भावः। व्याख्यानादिति। अप्रगृह्यस्येति पर्युदासत्वे न च एव प्रगृह्यत्वे सिद्धे ण्ग्रहण सामर्थ्यादित्यर्थः। फलसत्वादिति। अनुनासिक प्रतिबंधरूपस्य कार्यस्य प्रगृह्यत्वे कर्तव्य सिद्धत्वं तु न तत्कार्यस्याशा स्त्रीयत्वात्।

यथोद्देश पक्षांगी कोरणज्ञिपाद्याऽसिद्धत्वादनामिति त्रापकाच्चेतिभावः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्ययेति किम्? चामरादावित्त्वं माभूदिति। चुञ्चुप्चणपोर्यादित्वात् परनिमित्तयलोपस्य बहिरङ्गासिद्धित्वात्प्रत्ययादित्वाभावान्नेत्त्वम्।

न विभक्तौ (१।३।४)। 'हलन्त्यम्' (१।३।३) इत्यस्य निषेधोऽयम्। अनित्यमिदं थमोर्मकारपरित्राणार्थादुदित्करणात्। तेन 'किमोऽत्' (५।३।१२) 'क्व' इति सिद्धम्। प्राग्दिशीयत्वादयं विभक्तिः। अत एव दानीमो मस्य नेत्त्वमिति नव्याः। भाष्ये तु प्राग्दिशीयेष्वस्याप्रवृत्तावुदित्त्वं ज्ञापकमित्युक्त्वा 'दानीञ्च' (५।३।१८) इति सूत्रे 'लोपो व्योः' (६।१।६६) इति लोपेन यकारं प्रश्लिष्येत्सञ्ज्ञा वारिता। अन्यत्रानित्यत्वस्य फलाभावाच्चैवमेवोक्तम्। लोपस्यासिद्धत्वाच्च नान्त्यत्वमिति बोद्ध्यम्। विभक्तौ किम्? 'अचो यत्' (३।१।९७)।

अतो गुणे। (६।१।९७)। 'उस्यपदान्तात्' (६।१।९६) इत्यतः 'अपदान्तात्' इति 'एङि पररूपम्' (६।१।९४) इत्यतः पररूपमिति चानुवर्त्तते। पुरस्तादिति। अत एव 'नादिचि (६।३।१०४) इतीज्ग्रहणं चरितार्थम्। तद्धि 'रामाः' 'रामान्' इत्यादौ निषेधाभावाय। पररूपेण पूर्वसर्वणदीर्घबाघे हि तद्वैयर्थ्यं स्पष्टमेव। नोत्तरानिति। अनन्तरापेक्षयोत्तरान् व्यवहितानित्यर्थः।

एकवचनं सं (२।३।४९)। 'सुः सम्बुद्धिः' इत्युचितम्। 'सम्बोधने च' (२।३।४७) इत्यतः सम्बोधने इत्यनुवृत्तेः सप्तमीबहुवचने न दोषः सम्बुद्धौ अङ्गस्य गुण इति व्यवहारान्न तदन्तस्य सञ्ज्ञा। तस्मात्पारायणादावदृष्टार्थमेव न्यास इति बोद्धयम्। सम्बुद्याक्षिप्तस्येति। सम्बुद्धेः प्रत्ययत्वेन यस्मात्सं विहितस्तदादीत्यंशोपस्थितिः स चात्र योग्यतया पञ्चम्यन्त इति भावः। प्रत्यये गृह्यमाणे यस्मात्स विहित इत्याद्युपतिष्ठत इति 'प्रत्ययग्रहणे यस्मात्स विहितः'

षत्वस्येति इदमुपलक्षणं विसर्गसत्व योरपि। अनिष्ठायामिति ज्ञापक पक्षेऽपि ज्ञापक सिद्धस्यासार्व त्रिकत्वाद्बति घटितत्वा भावाच्च नासिद्धत्वमत्रेति भावः। अल्वृत्ति धर्मत्वेनेति। प्रगृह्यत्वस्येत्यर्थः अंगीकारादिति वर्णमात्रवृत्ति धर्मस्य तेनाति देशेप्यस्यातत्वेनै तद्धर्मस्य तेनाति देशांगीकारादित्यर्थः। इत्यचां संघिद्वयं पूर्णतामगात्।। स्तोः।। सितीति। स्तोरित्यत्रेत्यर्थः। शिति चेति श्चुरित्यत्रेत्यर्थः लुप्तविभक्तिके इति। सुपांलुग्घल्ङ्यादिलोपाभ्यामित्यर्थः। एवं ष्टुरित्यत्रषित्यपि बोध्यम् सौत्रं पुंस्त्व कल्पनं तुन उभयत्र तत्कल्पने गौरवाच्छास्त्रबाधा पत्तेश्चेति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(पा०भा०) इत्यादिपरिभाषार्थ इति 'अङ्गस्य' (६।४।१) इति सूत्रे भाष्ये स्पष्टम्। अनुमानरूपाऽवक्षेपस्तु नात्र, फलाभावात्। यथा पीनत्वानुपपत्त्याऽनुमीयमानरात्रिभोजनस्य पीनत्वोपपत्तिः फलं, न तथा एतत्सूत्रे तदनुमानेन सम्बुद्ध्युयपत्तिर्भवति। किञ्च प्रत्ययस्योत्पत्तावङ्गापेक्षत्वेऽपि ज्ञाने तदपेक्षत्वाभावेन शास्त्रे तदाक्षेपे मानाभावः। अत एव 'अङ्गस्य' इति सूत्रे तत्स्थाने 'प्रत्यये' इत्यधिकारः कार्य इति पक्षे 'प्राकरोत्' इत्यादौ उपसर्गात्पूर्वमडादिः स्यादित्याशङ्क्य 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेः' (प०भा०६) इति परिभाषोपस्थित्या समाहितं भाष्ये न त्वङ्गाक्षेपेणेति दिक्।

अङ्गस्य – उक्तार्थस्य। 'हल्ङ्याब्' (६।१।६८) इति सूत्राद्धलित्यनुवर्त्तते। हे कतरदिति। प्रकृत्यकारस्य टिलोपेनापहारादिति भावः। नन्वङ्गात्परस्याः सम्बुद्धेरवयवस्य हलो लोप इत्युचितम्। सम्बुद्ध्याक्षिप्तस्य सम्बुद्ध्यैवान्वयस्योचितत्वादत आह – कुलेतीति। अत्र परत्वात्पूर्वरूपे उभयत आश्रयणोऽन्तादिवद्भावाभावात् तत्स्वीकारेऽपि ह्रस्वसम्बुद्ध्योः पौर्वापर्यव्यवहारासम्भवात्, ताद्रूप्यानतिदेशाच्च ह्रस्वान्ताङ्गात्परसम्बुद्धेरभावान्मलोपो न स्यात्। एवञ्च लक्ष्यानुरोधादन्याक्षिप्तस्याप्यन्यत्रान्वय इति भावः। एतदर्थमेव 'हल्लुप्यते सम्बुद्धेश्चेत्' इति व्याख्यातम्, मस्य सम्बुद्धित्वाभावाद्। अर्द्धविकारेणैकदेशविकृतन्यायेनापि न सम्बुद्धित्वम्, एकवचनसञ्ज्ञासम्बुद्धिसंज्ञयोरुक्तपरिमाणनिष्ठतया तयोस्तेन न्यायेनालाभाच्च। मकारस्यादेशत्वाभावाच्च नात्र स्थानिवद्भावः। अत एव 'रामम्' इत्यादौ 'सुपि च' (७।३।१०२) इति दीर्घो न। न च सम्बुद्धित्वस्य सकारमात्रनिष्ठत्वेन स्थानिभूताल्धर्मत्वेनामः सम्बुद्धित्वाभावे कथं मस्य सम्बुद्ध्यवयवत्वमिति वाच्यम्, सुप्सञ्ज्ञाया उकारविशिष्टे सत्त्वेन तदुपस्थाप्ये जायमानैकवचनसञ्ज्ञाया विशिष्टे सत्त्वेन

भावः। तदर्थ इति विनापि प्रत्ययमिति सं शब्द लोपेनेतिभावः। अधिकृत मपीति। ययोर नुनासिक इत्येतदर्थमित्यर्थः। न संबध्यत इति। सामानाधि करण्येन विशेष्यतया न संबध्यते किंतु वैयधिकरण्येन विशेषणतया संबध्यत इत्यर्थः। पदस्येत्यपदां तस्य मूर्धन्य इत्यतः प्रागयमधिकार इत्यस्यायमर्थः। उत्तरत्रानुवृत्तमपि यत्र बाधकं तत्र वैयधिकरण्येनैव संबंध्यत इति। एवं ष्टुनाष्टुरित्यत्रापि न पदांतादिति ज्ञापकाद् द्वैयधिकरण्येनैव संबंध इति भावः। वैचित्र्यार्थ इति। तयोरकरणेपि प्रकृते न दोष इति बोधन रूपं वैचित्र्यमर्थो यस्येत्यर्थः। स्पष्टार्थमिति। समर्थ परिभाषात्वत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्बुद्धिसंज्ञायामित्सञ्ज्ञोकारविशिष्टस्यैवोद्देश्यत्वेनतस्यानल्विधित्वात्। एतेनाद्डादेशेनैव नपुंसकत्वाभिव्यक्तौ कुलेतीति व्यर्थमित्यपास्तम्।

एङ्ग्रहणे किमिति। 'हरे' 'विष्णो' इत्यादावङ्गाधिकारस्थात् परनिमित्तापेक्षाच्च गुणात्पूर्वं ह्रस्वान्तत्वादेव सिद्धिः। सेप्रभृतीनां सम्बोधने प्रयोगसत्त्वे एग्रहणेनैव सिद्धेः प्रत्याहारग्रहणं व्यर्थमिति प्रश्नः। हरेऽति। सामथ्यदिवात्र सन्निपातपरिभाषा न, गुणात्सम्बुद्धेरिति वक्तव्ये एङ्ह्रस्वग्रहणसामर्थ्याच्च। अत एव 'हे लक्ष्मि' इत्यादौ लोपसिद्धिः। परत्वादिति अभ्युच्चयः। नित्यत्वाच्चेति। चेनानवकाशत्वसङ्ग्रहः। नपुंसके 'त्रपो' इत्यादावस्यापि लुका बाघ इत्यन्यत्।

अमि पूर्वः (६।१।१०७)। पूर्वसवर्ण इत्यनुवृत्त्यैव सिद्धे पूर्वग्रहणं तु 'रामम् इत्यादौ द्विमात्रवारणाय।

लशकु (१।३।८)। समाहारद्वन्द्वः। अतिद्धिते किम्? 'कर्णललाटान्कलङ्कारे' (४।३।६५) कर्णिका। कित्त्वफलं त्वादिवृद्धिः स्यात्। आदिग्रहणाद् वृङः षाकनो न। तस्य कित्त्वे गुणो न स्यात्।

तस्माच्छ (६।१।१०३)। पुंसीति पञ्चम्यर्थे सप्तमी। पुंसो विहितस्येत्यर्थः, तत्र विद्यमानाद्विहितस्येत्यर्थो वा। तस्मादिति किम्? एतान् गाः पश्य। पुंसि किम्? मतीः।

अट्कु (७।४।२)। वाधितुमिति। तेन 'पर्याणद्धम्' इत्यत्र 'उपसर्गादसमासेऽपि (८।४।१४) इति णत्वसिद्धिरिति भावः। अयोगवाहानामिति। न विद्यते योगो वर्णसमाम्नाये येषां तेऽयोगाः अनुपदिष्टत्वादुपदिष्टैरगृहीतत्वाच्चेत्यर्थः। ते च ते वाहयन्ति प्रयोगं निर्वाहयन्ति

नोपतिष्ठते षण्णवतिरित्य त्रेतरेतर योगद्वंदे समाहार देवा द्विवचन नपुंसकत्वयोरापत्ति रत आह्। षडधिकेति। पृथक् पद इति। समासस्थदिक् संख्ये संज्ञायामेवेति नियमादप्ता प्तेरिति भावः। उपलक्षणमिदं वलयोरणि प्रवृत्तेरिति (मध्वाँश्चिनोषि कमलाँश्चि नोषि) दंतोष्ठस्थानप्रयत्नत्रयान्तरतमे वकारे वकारस्य दंत स्थान प्रयत्नोभयांतरतमे लकारे लकारस्य चारितार्थ्येन वकारेवस्यैव लकारे लस्यैव प्रवृत्तेरित्यर्थः। इति मतेनेद मिति यदातु यवादि गणे ककुदित्य स्यैव पाठ इति सिद्धांत मतं तदा यचि भं तसौ मत्वर्थे इति तात्पूर्वं दकार प्रश्लेषेण दांतस्य भत्वात्प्रकृते न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ते वाहाः। ते चानुस्वारविसर्गजिह्वामूलीयोपध्मानीययमाः। अत एव 'उरःकेण' इत्यादौ विसर्गव्यवधानेऽपि णत्वसिद्धिः। तदुक्तं भाष्ये – 'नार्थो नुम्ग्रहणेनानुस्वारे कृतेऽड्व्यवाये इत्येव सिद्धम्' इति। 'आदर्शेन' इत्यादौ तु नातिप्रसङ्गः अडतिरिक्तव्यवायात्। 'तस्माद्' इत्युपस्थितं निर्दिष्टग्रहणेतत्समभिव्याहारे अडादिव्यतिरिक्ताव्यवहितपरम्। तदुक्तं- 'णत्वेऽन्यव्यवाये प्रतिषेधो वक्तव्यो; न वाऽन्येन व्यवेतत्वात्' इति ग्रन्थेन। एतदुत्तरम् 'अटा व्यवायसत्त्वात्प्राप्नोत्येव, अटैव व्यवाये इत्यर्थात्' इत्यादि भाष्येमेकदेशिनोरुक्तिप्रत्युक्तिपरम्। 'चुटुतुलशर्व्यवाये न' इति प्रतियोगिज्ञानसापेक्षनिषेधबोधकगुरुन्यासेन सिद्धे 'अट्कुप्वाङ्' इत्युक्त्वा 'एतैरेव व्यववाये' इत्यर्थं वदता तस्यास्तदुक्तित्वध्वननात्। एतद्वार्तिकमतम्।

भाष्ये तु 'रषाभ्याम्' (८।४।१) इति सूत्रे 'ऋवर्णान्नस्य (का०वा०) इत्यस्य प्रत्याख्यानाय 'व्यवाये' इति योगं विभज्य अट्कुप्वाङ्नुमभिः इत्येतत् 'एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैः' इत्यर्थकं व्याख्यातम्। तदा तु 'आदर्शेन' इत्यादौ प्राप्तिरेव नेति बोद्धव्यम्।

णत्वे इति। णकारे इत्यर्थः। पदान्तस्य (८।४।३४)। 'न भाभू' (८।४।३४) इति सूत्रान्नेति वर्त्तते। अत्र सूत्रे 'अनन्तरस्य' इत्यादि व्यवस्थापकन्यायानामप्रवृत्तिर्बोद्धया, 'अपदान्तस्य' इत्यनुवर्त्तेतस्य भाष्ये प्रत्याख्यानात्।

यस्मात्प्र (१।४।१३)। 'यस्माद्' इति 'तदादि' इति तच्छब्दाकाङ्क्षापूरणाय। तदादीति। तत् प्रकृतिरूपमादिर्यस्येत्यर्थः। प्रत्यासत्तिन्यायलब्धार्थमाह – तस्मिन् प्रत्यय इति। 'गुणः कृतात्मसंस्कारः' इति न्यायेनात्रापि 'तस्मिन्' (१।१।६६) इति परिभाषाप्रवृत्तिः।

दोष इति बोध्यम् ननूदः परयोः स्थातंभो रादेलः स्थाने पूर्वसवर्ण इत्यर्थे ऽनुवादे परिभाषानुप स्थितेः परत्वाव्यवहित योर्लाभो न स्यादत आह् तस्मादितीति विधौ परिभाषेतित्विको गुणवृद्धी अचश्चेति द्वयविषयक मेवेति प्रागुक्तमेवेत्यलं न नु सत्यपि संभवे बाधनं भवतीतिन्यायेन पूर्वसवर्णे न सन्निपात परिभाषया चर्त्वस्य बाधात् कथं दथोश्चर्त्वमत आह् अत एवेति एवंच भाष्यप्रामाण्यादत्रतन्न्या यानित्यत्वमितिभावः फलंतु कुं द्वानित्यत्र संयो गांत लोपाभावः व्यर्थमिति सकारलो पस्येव पूर्वसवर्णे नैकत कारस्योत्थानस्यै तदसत्वे सत्वे च रूपस्य सिद्धेरिति भावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकृतिमात्रस्य तु व्यपदेशिवद्भावेन तदादित्वं बोध्यम्। स्त्री इयतीति। इदं शब्दाद्वतुपि वस्य 'किमिदंभ्यो वो घः' (५।२।४०) इतिघादेशे तस्येयादेशे 'इदं किमोः' (६।३।९०) इतीशि 'यस्य' (६।४।१८४) इति लोपे ङीपि 'इयती' इति रूपम्। न च तत्र परतः स्त्रीशब्दस्येयङाद्यापत्तिरूपो दोषो न, यस्येतिलोपस्याभीयत्वाद्सिद्धत्वेनात्र तदप्राप्तेरिति वाच्यम्; व्याश्रयत्वेनाभीयासिद्धत्वाप्राप्तेः। तत्र हि समानाश्रयत्वमसिद्धत्वाश्रयशास्त्रसम्बन्धिनिमित्तसमुदाया न्यूनानतिरिक्ताश्रयकत्वम्। अस्ति च यस्येतिलोपापेक्षया। 'स्त्रियाः' (६।४।७६) इति सूत्रेऽधिकस्य स्त्रीशब्दस्यापेक्षा। प्रत्यासत्त्याऽजादिप्रत्ययनिरूपिताङ्गे एवेयङ्प्रवृत्त्या स्त्रीशब्दस्य सुनिरूपिताङ्गत्वेऽपि न दोषः। विधिग्रहणादेव 'भनक्ति' इत्यादौ 'अतो दीर्घो यञि' (७।३।१०१) इति न। तदादिग्रहणं 'करोमि' इत्यादौ विकरणस्य गुणार्थम्। प्रत्ययविशिष्टस्येति। तथा सत्यङ्गेन प्रत्ययपरत्वालाभानापत्तौ 'वव्रश्च' इत्यस्यासिद्धिः। किञ्च 'राजपुरुषः' इत्यादौ 'न लुमता' (१।१६३) इति निषेधात्पूर्वपदे पदत्वाभावेन नलोपानापत्तिरिति भावः। ततोऽप्यधिकस्य वेति। 'देवदत्त ओदनमपाक्षीति' इत्यादौ देवदत्तादिशब्दोत्तरसुपं निमित्तीकृत्य लुङ्पर्यन्तमङ्गत्वात्तस्य लुङ्परत्वेन देवात्पूर्वमप्यडापत्तिः, अङ्गसञ्ज्ञायाः प्रत्ययनिमित्तत्वाभावेन लुङादिनिरूपिताङ्गस्येत्यर्थस्य दुर्लभत्वादिति भावः।

टाङसि (७।१।२)। अङ्गस्येति षष्ठ्या 'अतो भिसः' (७।१।९) इत्यतोऽनुवृत्तेनात इत्यनेन पञ्चम्यन्तेन सामानाधिकरण्यानुरोधात्पञ्चम्या विपरिणाम इत्याह-अकारान्तादिति। अकारात्परेषामङ्गसञ्ज्ञानिमित्तटादीनामित्यर्थ इति पक्षान्तरं भाष्ये। किञ्चादन्तादङ्गादित्यर्थेऽपि 'ब्राह्मणभिस्सा' इत्यादावतिप्रसङ्गः। ब्राह्मणेत्यस्यापि 'युवोरनाकौ' (७।१।१) इति

ज्ञापनदिति। एवं चास्य तदपवादत्वेनापवाद शास्त्रंभादुत्सर्ग शास्त्र संकोचस्यैवायवादेनोत्सर्गस्य सर्वत्रबाध पदार्थत्वात् प्रकृते एतादृश संकोचस्य ज्ञापना दित्यर्थः। ननु झयोइत्यस्य हकारत्परस्य झयः स्थाने इति झयोहस्यस्थान इति वार्थः कुतोनात आह्। झय इतिपंचमीति। होढ इत्यादिना ढादि विधानाद्धकारात्परस्य झयोऽसं भवात् द्वंद निर्देश एव कर्तव्ये व्यस्तोच्चारण सामर्थ्यात् कोटिद्वया संभवाच्चेति भावः। ध्वनितं चेदमिति। नेत्युक्ति रनुस्वारादि वाधनर्थेति हि तत्रोत्तया ध्वनित मितिभावः। ननुमश्चासौ पर इति कर्म धारयेनेत्येव सिद्धे परग्रहणं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूत्रभाष्योक्तरीत्याऽन्तर्वर्तिविभक्त्याऽङ्गत्वात्। अर्थवत्परिभाषया प्रत्ययग्रहणपरिभाषया वा प्रत्ययस्यैव भिसो ग्रहणे त्वेषामङ्गाधिकारे पाठो व्यर्थः। भिसः प्रत्ययस्यैव ग्रहणे हि प्रत्यासत्त्या तन्निरूपिताङ्गस्य ग्रहणमिति युज्यते वक्तुं, नान्यथा। इदमेव हि 'अतो भिसः' (७।१।९) इत्यत्राङ्गाधिकारस्य प्रयोजनं भाष्ये दत्तमित्यलम्।

सुपि च। (७।३।१०२)। 'अतो दीर्घो यञि' (७।३।१०१) इत्यनुवर्तते। यञीत्यनेनात्त्वात्तदादिविधिरित्याह– **यञादाविति।**

ङेर्यः (७।१।१३) चतुर्थ्येकवचनस्यैव ग्रहणं व्याख्यानादित्याह–ङेइत्येतस्येति। सन्निपातेति। उपजीव्यविरोधन्यायमूलैषा। सन्निपातः संश्लेषस्तन्निमित्तको यो विधिः स तं सन्निपातं यो विहन्ति स तद्विघातस्स्यानिमित्तमित्यर्थः। न च यञादित्वसापेक्षदीर्घस्य बहिरङ्गतयाऽसिद्धत्वान्नात्र सन्निपातविघात इति वाच्यम्; आरोपितासिद्धत्वेऽपि वस्तुतस्तद्विघातस्य जायमानत्वेन तत्प्रवृत्ते। किञ्चान्तरङ्गे कर्त्तव्ये बहिरङ्गासिद्धत्वेऽपि तत्र कृतेऽसिद्धत्वे मानाभावः। किञ्चातिदेशिकसन्निपातविघाताभावमादायैतदप्रवृत्तौ 'गौरि' इत्यादौ सम्बुद्धिलोपेऽपि स्थानिवत्त्वेन ह्रस्वनिमित्तविघाताभावात्तत्रैतस्या अतिव्याप्तिपरभाष्यासङ्गतिः। सन्निपातस्याशास्त्रीयत्त्वान्नात्र स्थानिवत्त्वमिति चेत्तत्रासिद्धत्वमपि कथमिति वद।

कार्यस्य निमित्तं ययोः सन्निपातस्तयोः सूत्रे उपादानमपेक्षितमिति तु नाग्रहः। अत एव 'दाक्षिः' इत्यत्राकारान्तप्रकृतीञ्सन्निपातनिमित्ताङ्गसंज्ञानया परिभाषयाऽल्लोपस्य निमित्तं न स्यादित्याशङ्क्यानित्यत्वेन समाहितं भाष्ये कृन्मेजन्तसूत्रे। न ह्यङ्गसंज्ञायामदन्तस्याङ्गसञ्ज्ञेत्युक्तमस्ति। न च कष्टायेत्यस्य 'अकृत्सार्व' (७।४।२५)

व्यर्थमतआह् यथासंख्य मपर इतीति एवं च कोटिद्वयं नेतिभावः। ह्योरिति क्तव्ये हेमे इति व्यस्तोच्चारणं कोटिद्वयबाधकमिति तु नात्र हे इत्यस्योत्तरार्थ त्वादितिदिक्। ननु समाक्षराणामित्येव किं नेत्यत आह व्याख्यानाच्चेति एचो यवांयाव इत्यादौ भाष्ये यथासंख्य करण रूपादित्यर्थः। परस्मैपदा नांणलित्या दौ क्रमेणपदज्ञाना भावादाह पदादुपस्थितिर्वेति ननुस्थानाख्यलौकि प्रमाण बोधित वाक्ये क्रमश्चासति बाधक इति न्यायात्परंपरया वा गृह्यत इतीदंसूत्रं व्यर्थमत आह् आद्यं ताविति। स्वरितेनेत्यप कृष्यत इति। एवं च स्वरितत्व युक्ता नां समसंख्याकानां यथासंख्यमित्यर्थः। अत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इतिदीर्घेणोपपत्तेरनित्यताज्ञापकत्वं कथमिति वाच्यम्, तस्यापि सन्निपातपरिभाषयाऽप्राप्तेः। विरोधाभावात् फले विशेषाभावाच्च परत्वेऽप्यकृदिति नोपन्यस्तम्। तस्याकृदित्यादिपर्युदासेनासुप्येव प्रवृत्तिरत्यन्ये।

झलि किमिति। 'उतो वृद्धिः' (७।३।८९) इत्यतो हलीत्येवानुवर्त्य सन्निपातपरिभाषया 'रामाणाम्' इत्यत्र न दोष इति प्रश्नः। झल्ग्रहणमेत्वे सन्निपातपरिभाषाया अप्रवृत्तिज्ञापनार्थम्। तेन 'सर्वेषाम्' इत्यादावेत्वसिद्धिरित्युत्तरम्। एतेन 'बहुवचने किम्? रामस्य' इति व्याख्यातम्। 'रामाभ्याम्' इत्यपि प्रत्युदाहरणं बोध्यम्। 'बहुवचने झलीक्' इति तु न सूत्रितम् 'ज्ञानयोः' इत्यादौ नुमापत्तेः।

जश्त्वमिति। बाधित्वेति शेषः। अवसाने चर्त्वस्य पदान्तजश्त्वा पवादत्वात्। द्वित्वे रूपेति। 'पूर्वत्रासिद्धमद्वित्वे' इति न्यायाच्चर्त्वोत्तरं द्वित्वं बोद्धयम्। तादेश इति। अन्यथा 'खरि च' (८।४।५५) इति चर्त्वेन सिद्धविदं व्यर्थं स्यादिति भावः।

ह्रस्वन (७।१।५४) ह्रस्वनद्याप इति पञ्चमी। 'आमि सर्वनाम्नः' (७।१।५२) इत्यत आमीति वर्तते। तच्च षष्ठ्या विपरणिम्यते 'नामि' (६।४।३) इति लिङ्गादित्याह – ह्रस्वान्तादित्यादि। आमत्र षष्ठीबहुवचनमेव; न तु ङेरामादीति स्पष्टं भाष्ये।

यत्तु नुडिति विभज्य सामान्येन नुङ् विधेयः। नद्याप इति दीर्घान्ताच्चेन्नद्याप एवेति नियमार्थमिति दीर्घेषु न दोषः। हलन्ताच्चेत् षट्चतुर्भ्य एवेति नियम इति हलन्तेषु न दोषः। एवञ्च ह्रस्वग्रहणं न कार्यमिति, तन्न, नद्याप इत्यस्य स्त्रीलिङ्गानाच्चेन्नद्याप एवेति नियमपरतयाऽपि व्याख्यातुं शक्यत्वेन नदीत्वास्वयोर्ह्रस्वेऽपि दृष्टत्वेन तत्वदुक्तनियमे

स्वरितत्वं च प्रत्येकमपेक्ष्यते अनुवृत्तौतु समुदायस्येति ङसिङसोश्चे त्यादौ ङसिङसोरिती समुदायोत्तर विभक्तिस्था च अङ् विभक्तिस्थाचश्चानुवृत्यर्थं स्वरित्वेपि न यथासंख्यमितिभावः। तत्रेति। यथासंख्याश्रयेविधौ इत्यर्थः। प्रतिपत्तिकालिकमिति। अतएव हलोयमामित्यादौ यथासंख्यं प्रवर्तत इति भावः। अत्रत्विति। कुकि टुकि चेत्वित्यर्थः। पूर्वत्रेतिशास्त्रबाधे गौरवादाहयद्वेति व्याख्यानादिति उभय निर्देश पंचमी निर्देशो बलीयानिति न्यायादित्यर्थः। वैयधिकरण्ये नान्वयादिति। आर्ध धातुकस्येडित्य त्रादि ग्रहणेन विशेषण विविभक्ति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुढतरमानाभावेन च 'मतीनाम्' इत्यादौ नुडनापत्तेः।

नामि (६।४।३)। 'द्रलोपे' (६।३।१११) इत्यतो दीर्घ इत्यनुवर्त्तते। अङ्गस्येति किम्? चर्मणाम्। ननु 'आमि' इत्येवास्तु, नित्यत्वात्पूर्वं दीर्घेऽपि ह्रस्वान्तान्नुडित्येतत्सामर्थ्यात् भूतपूर्वह्रस्वान्तत्वमादाय नुट्सिद्धेः। न च 'नृ च' (६।४।६) इति दीर्घविकल्पात् 'नृणाम्' इत्यत्र नुट् चरितार्थः' नृनद्याप इत्येव सिद्धेः। तदुक्तं भाष्ये –

'नैकमुदाहरणं योगारम्भं प्रयोजयति' इति। 'तिसृणाम्' इति 'षट्' (७।१।५५) इत्यत्र त्रेरित्यनुवृत्त्या सिद्धमिति भाष्ये एव स्पष्टम्। एतेन 'ऋन्नद्यापः' इति न्यासे भाष्यतात्पर्यमित्यपास्तम्। 'चतसृणां' प्रियचतसृणाम्' इत्यत्र 'षट्चतुर्भ्यः' (७।१।५५) इति सिद्धम्। गौणे तदप्रवृत्तौ तु न मानम्। बहुवचनन्तुलाघवार्थम्। द्विवचने हि 'चतुर्भ्याम्' इति गुरुनिर्देशः स्यात्, नैकमुदाहरणमिति प्रकृतसूत्रस्य भाष्यविरोधश्च। समाहारद्वन्द्वेन निर्देशे कार्ये बहुवचननिर्देशस्तदर्थ इति तु न युक्तम्; 'अस्थिदधि' (७।१।७५) 'तिसृभ्यो जसः' (६।१।६६) इत्यादौ व्यभिचारात्।

न च – 'अङ्गाधिकारे पञ्चम्या यदुच्यते गृह्यमाणविभक्तेऽस्तद्भवति' इति सर्वादिसूत्रभाष्याद् गृह्यमाणाद्विहितविभक्तेरित्यर्थकादस्य नुटो गौणेऽप्रवृत्तिः। 'षड्भ्यः' (७।१।२२) इत्यत्रापि विहितविशेषणमेवेत्याशयेन 'परमपञ्च' इत्यादौ लुगभावमाशङ्क्य 'षट्प्रधान एष समासः' इत्युक्तम्। समासस्य षट्प्रधानत्वेन संख्याप्रकारकसङ्ख्येयविशेष्यकबोधजनकत्वेन षट्त्व सत्त्वान्न दोष इति तदर्थः। 'ष्णान्ता' (१।१।२४) इत्यत्र लोके गणनायां प्रसिद्धानामेव ग्रहणमित्यत्र न मानम्। प्रकृतेऽपि तथैव, षड्भ्य इत्यादौ पञ्चम्या विरुद्धविभक्तित्वादङ्गस्येत्यनेन सम्बन्धायोग्यत्वाद्

त्वेवैयधि करण्यमेवेति ज्ञापनात् अतएवात्र तदादि तदंत विधिनेति भावः। ननु लक्ष्ये लक्षणस्येति न्यायात् ऽस्यचर्त्वं न स्यादत आह् लक्ष्य भेदादिति खर्पर झल्त्वा वच्छिन्नं ह्यस्य लक्ष्यं अतएव न संप्रसारणे संप्रसारण मिति चरितार्थमिति भावः। डस्य चर्त्वमिति। ननु स्वविधेयस्य स्वास्मिन्निमित्तत्वाभावात् चर्त्वंऽस्य दुर्लभमिति चेन्न संप्रसारण पूर्वत्वे समानांगग्रहणं शक ह्वर्थमिति वार्तिकस्य संप्रसारणस्थानि कस्यातथात्वादिदितितत्प्रत्ययाख्यान पर भाष्यस्य च प्रामाण्यात्स्व विधेयस्यापि स्वस्मिन्नाश्रयणेना दोषात् ज्ञापक सिद्धत्वेनासार्वत्रि कत्वेनास्य क्वचिदना श्रयणे न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विहितेत्येतदध्याहारेण प्रत्ययविशेषणतैवेति भाष्योक्तेः, इति गौणे नुटोऽप्रवृत्तिः, – इति वाच्यम्, 'नामि' (६।४।३) इति सूत्रस्योक्तभाष्यप्रामाण्यान्नुड्विधायके विहितपदानध्याहारेण षडादिभ्यः परस्याङ्गसञ्ज्ञानिमित्तस्यामो नुडित्यर्थेन गौणेऽपि प्रवृत्तेः। 'अतो भिसः' (७।१।९) इत्यादावङ्गस्येत्स्यैवमन्वस्यैवाङ्गसञ्ज्ञासूत्रे भाष्ये उक्तत्वात्। अत एव 'परमचतुर्णाम्' इत्यादौ नुट्।

यद्यप्येवं 'षड्भ्यः' (७।१।२२) 'अद्ड् डतरादिभ्यः' (७।१।२५) इत्यनयोरपि वक्तुं शक्यं, तथापि लक्ष्यानुसारात्तत्रविहितविशेषणम्। 'विरुद्धविभक्तित्वात्' इति भाष्योक्तयुक्तिस्त्वेकदेशिन इति बोध्यम्। 'अद्ड्डतरादिभ्यः' (७।१।२५) 'षड्भ्यो लुक्' (७।१।२२) इत्यनयोरेव सर्वादिसूत्रे भाष्ये उपन्यासाच्च। 'षड्भ्यः' (७।१।२२) इत्यादेः षडर्थगतसंख्याभिधायिजश्शसोरित्यादिक्रमेणार्थ इति कैयटोक्तं तु 'अदड् डतरादिभ्यः' (७।१।२५) इतिसूत्रे भाष्यविरोधादिभिर्दूषयिष्यते न च 'पदां' 'दताम्' इत्यादावतिप्रसङ्गः, ह्रस्वत्वं नाम-मात्राकालिकाच्त्वं, तत्र सामर्थ्याद्विशेष्यभूतमात्राकालिकत्वांशे एव भूतपूर्वगत्याश्रयणं न तु विशेष्यभूताच्त्वांशेऽपीत्यदोषात्; इति चेत्? न, नोपधायाः' (६।४।७) इत्युत्तरार्थत्वात्। तेन 'चमर्णाम्' इत्यादौ दीर्घाभावः सिद्ध इति दिक्।

परिभाषाविरोधादिति। सर्वत्रानित्यत्वाश्रयणे मानाभाव इति भावः। कृताकृतप्रसङ्गित्वात् 'नामि' (६।४।३) इति नित्यम्। न च विशेषाभावेन फलाभावान्न कृते तत्प्राप्तिरिति वाच्यम्, विशेषाभावेऽपि पर्जन्यन्यायेन शास्त्रप्रवृत्तेः 'इको झल्' (१।२।९) इति सूत्रे भाष्ये उक्तत्वात्। 'आयादयः' (३।१।३१) इति सूत्रे भाष्ये स्यादिभिः परत्वादायादि बाधमाशङ्क्य 'अनवकाशत्वादायादयः। न च 'गोपायति' इत्यादिरवकाशः

विसर्गद्वित्वे परविसर्गस्य न द्वित्वमितिभावः वैयधिकरण्येनैवेति। अपदांते यशांसीत्यादौ नश्चेत्यनुस्वार प्रवृत्तेर्न दोष इति भावः।

स्वरसइतितत्रहि विभक्तिकत्वा द्वैयधिकरण्यमुक्त मिति। ननु प्रकृते समान विभक्ति कत्वाद्वाच्यार्थ एव पदांतस्य नस्येत्यस्तित्वत्यत आह्-नांतस्य पदस्येतीति बलादिति, उभय निर्देशपंचमी निर्देशोबलीयानिति न्यायेनेति भावः। नन्वेवमचीतिसप्तमी निर्देशोव्यर्थोऽत आह्। सप्तमी निर्देशस्त्विति लाघवार्थ इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्रापि शपः स्यादेः प्राप्तेः। न च नास्ति विशेषः। अन्यदिदानीमिदमुच्यते नास्ति विशेष इति। यदुक्तम्-आयादीनां स्यादिभिरव्याप्तोऽवकाश इति, स नास्त्यवकाशः' इति भाष्योक्तेश्चेत्यपि बोद्धयम्।

आरम्भेति। यत्तु 'कतीनाम्' इत्यत्र 'षट्चतुर्भ्यः' (७।१।५५) इति नुटि सन्निपातपरिभाषायां अप्राप्तेः सावकाशत्वमस्त्येवेति, तन्न, न ह्येकमित्युक्तन्यायेन 'कतेर्नामि' इत्येव सिद्धे सामान्यसूत्रारम्भेत्यर्थात्। एवञ्च 'न तिसृचतसृ' (६।४।४) इत्यकरणेन लाघवमिति भावः। नुटीति तु नोक्तम्।

अपदान्तस्य (८।३।५५)। ष इत्येव सिद्धे मूर्धन्यग्रहणं 'इणः षीध्वम्' (८।३।७८) इत्यत्र ढविधानार्थं, 'रषाभ्याम्' (८।४।१) इत्यत्रानुवृत्त्यर्थञ्च। एवञ्च तत्र णग्रहणं, 'पदान्तस्य' (८।४।३७) इति च न कर्त्तव्यमिति भाष्ये स्पष्टम्।

इण्कोः (८।३।५७)। वर्गग्रहणञ्चर्त्वस्यासिद्धत्वात् 'स्त्रक्षु' इत्याद्यर्थम्।

आदेश (६।१।४५) प्रत्ययशब्दस्तदवयवपरो व्याख्यानात्, सातेः षत्वनिषेधाल्लिङ्गाच्च; तदाह – प्रत्ययावयवेत्यादि। विवृताघोषस्येति। विवृतत्वरूपाभ्यन्तरप्रयत्नवतोऽघोषरूपबाह्यप्रयत्नवतश्चेत्यर्थः। ठकारवारणायाद्यम्। ऋकारवाराणाय द्वितीयम्। रामस्येति। 'टाङसि' (७।१।१२) इतिसूत्रे सकारोच्चारणं तु 'इण्कोः' (८।३।५७) इत्यनुवृत्तावेव तात्पर्यग्राहकमिति भावः।

सर्वादीनि (१।१।२७)। तद्गुणसंविज्ञानो बहुव्रीहिः। आदिशब्दोऽवयवाची। तेन सर्वशब्दघटित उद्भूतावयवभेदः समूहः समासार्थ इति बहुवचनम् उद्भूतावयवभेद

मात्रार्धमात्रालाघवार्थ इत्यर्थः। ननु ङम इत्यस्य षष्ठ्यंतत्वमेवैचं चाचीति यथाश्रुतं कुतोनेत्यतआह्। ङम उत्तरस्येति। एतदर्थं तदादिविधिलाभार्थं एवेति अपीत्यर्थः। एतेन लाघवोत्तरार्थ त्वयोरपि तस्य सत्वादिदिमसंगतमित्यपास्तम्। ननु पद इत्यस्य मंडूकप्लुत्यानुवृत्तौविभक्ति व्यत्यय कल्पनापेक्षया लाघवमत आह। ङमंतं यत्पदमित्यर्थेपीति। निषेधसिद्धे य इति। अतद्धित इत्यस्य प्रत्याख्यानाय पदे व्यवाय इति सप्तमी समासाश्रयणे इत्यर्थः। एतेनपूर्वदंडिप्रियः इत्यादि सिद्ध्यर्थं मध्यम पदत्वानाक्रांतस्योत्तर पदस्येत्यर्थान्माषकुंभवापेनेत्यादौन दोष इत्यपास्तम् उत्तरपदस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यस्यारोपितावयवगतसंख्य इत्यर्थः। य तत्र वैयर्थ्यादप्रवृत्तावपि अवयवेषु प्रवर्त्तमानाऽविशेषात् सर्वशब्देऽपि भवति। सर्वनामानीत्यत्र 'पूर्वपदात्' (८।४।३) इति णत्वमत एव निपातनान्न। नाप्राप्ते णत्वे कृतस्यं निपातनस्य तद्बाधकत्वात् णत्वसहित मसाधु इति स्पष्टं भाष्ये। 'प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इतिवार्त्तिकात् शब्दरूपविशेष्यमादाय ज्ञापकात्तदन्तविधिरित्याह–द्वन्द्वे चेतीति। (१) प्रथमार्थे सप्तमी। द्वन्द्वः सर्वनामसंज्ञो नेति तदर्थः। न हि तदन्तविधिं विना (२) समुदाये सञ्ज्ञाप्रवृत्तिरस्ति, या निषिद्ध्येतेति भावः। ननु तदन्तस्यापि सर्वनामत्वे 'सर्वनाम्नः स्मै' (७।१।१४) इत्यादिषु सर्वनाम्नो विहितस्य ङेः स्मै इत्यर्थाश्रयणेनातिसर्वादौ दोषाभावादुपसर्जनप्रतिषेधो न कार्य इति (३) भाष्यसूचितं विरुद्ध्येतेति चेत्? न, 'प्रयोजनं सर्वनामाव्ययसञ्ज्ञायाम्' इति तदन्तविधिसूत्रस्थवार्त्तिक भाष्यविरोधेनास्य भाष्य-स्यै (४) कदेश्युक्तित्वात्। इत एव वाऽरुचेर्भाष्ये पक्षान्तरोपादानम्। न च ऋष्युक्तपक्षेषु नारुचिरिति भ्रमितव्यम्। वृद्धिसञ्ज्ञासूत्रे 'अपरितुष्यन् खल्वपि भवान् 'अनाकृतिः' 'लिङ्गेन वा' इत्याह' इति वार्त्तिककारं प्रति भाष्योक्तेः।

अकच्चेति। 'कुत्सिते' (५।३।७४) इतिसूत्रोक्तभाष्यरीत्या संख्या-कारकाभ्यां पूर्णार्थस्येतरान्वयेन सुबन्तादेव तद्धितोत्पत्तेः, प्रत्यासत्त्या सर्वनामप्रकृतिकसुबन्तात्तदर्थगतकुत्साविवक्षायां सर्वनामावयवटेः प्रागकजित्यर्था त्तदन्तसञ्ज्ञाऽभावे तदसिद्धिरिति भावः। एवमेव त्रलाद्यसिद्धिर्बोद्धया। एते नावयवनिष्ठसर्वनामत्वेन तत्सिद्धिरित्यपास्तम्।

जसः शी (७।१।१७)। दीर्घोच्चारणमुत्तरार्थं 'वारिणी' इति। अदन्तादिति– परस्येत्यनेनान्वेति। अत इत्यस्याङ्गविशेषणतया अदन्तादङ्गादित्यार्थः। सर्वनाम्न इति तु (१)

कार्यित्वं तत्रैवेति। पदत्व प्रयुक्त पदादिभिन्नस्य विधावितिपर्यु दासाश्रयणादितिभावः। एकदेशिन इति। अपदादि विधावित्यस्य प्रसज्यप्रतिषेधाश्रयंणे गौरवान्नपदांत न लुमतांगस्योक्ति चपदेषात्पदांतात्पदव्यवायेवीत्यादि सूत्रस्थ भाष्य विरोधाच्चेति भावः। अयमधिकार इति। तुग्रह्णात् नन्वेवमत्रग्रहणमधि कारपक्षे व्यर्थमत आह्। अत्रेतित्विति व्याख्यानादिति। अत्रानुस्वारपरोऽनु नासिकः पूर्वस्यतुवेत्येव सिद्धे पृथक् सूत्रकरण रूपादित्यर्थः।। मानाभावादिति। फलाभावादित्यर्थः। व्याख्यानादिति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विहितविशेषणम्। तस्य तु नाङः विशेष्यमावृत्तौ (२) मानाभावात्। तेन 'वर्णाश्रमेतराः' 'मासपूर्वाः' इत्यत्र न। अत एव 'विभाषा जसि' (१।१।३२) इति (३) चरितार्थम्। अङ्गसञ्ज्ञानिमित्त स्यादन्तात्सर्वनाम्नो विहितस्येत्यर्थस्तु न, 'ते' 'तेषाम्' इत्याद्यसिद्धेः। अत्वविधौ विषयसप्तमी तु न 'तस्मिन्' (१।१।६६) इतिपरिभाषाबाघे मानाभावात्। प्रागित्सञ्ज्ञाया इति। प्रत्ययादित्वज्ञानाभावात्तज्ज्ञानाभाव इति भावः।

परे तु अनुबन्धत्वयोग्यतयाऽत्रापि तन्निषेधप्रवृत्त्या शित्त्वादेव सर्वादेशः। इत्सञ्ज्ञायोग्यशकारवत्त्वमेव तत्सूत्रे शित्त्वम्। अत एव काणोर्विषये 'नानुबन्धकृतमसारूप्यम्' (प० भा०) इति विकल्पाभावः। (४) अन्यथा कादीनां कादेर्वाक्यार्थबोधोत्तरं प्रत्ययत्वज्ञाने इत्सञ्ज्ञादेः प्रवृत्त्या वाक्यार्थबोधरूपतत्प्रवृत्तिकालेऽनुबन्धज्ञानाभावेन विकल्पो दुर्वारः, पश्चादनुबन्धत्वज्ञानेऽपि जातिनिवृत्त्ययोगात्। यदि तत्र पश्चात्तज्ज्ञाने तन्निवृत्तिस्तर्ह्यत्रापि पश्चात्तत्त्वज्ञाने सर्वादेशत्वस्यापि निवृत्त्यापत्तिः। (१) ध्वनितञ्चेदं 'लुटः प्रथमस्य' (२।४।८५) 'अनेकाल्शित्' (१।१।५५) इत्यादिसूत्रेषु भाष्ये इति (२) प्राहुः।

अतः सर्वनाम्न इति। अदन्तादङ्गात् परस्य (१) सर्वनाम्नो विहितस्येत्यर्थः। तेन 'मासपूर्वाय' इत्यत्र स्मै न।

ङसिङ्योः (७।१।१५)। स्मात्स्मिनोः 'हलन्त्यम्' (१।३।३) इति न 'न विभक्तौ' (१।३।४) इति निषेधात्। यद्यपि इत्त्वप्रवृत्तिकाले न विभक्तित्वज्ञानं, तथापि विभक्तावित्यस्य विभक्तित्वयोग्ये इत्यर्थान्न दोषः। अत एव सूत्रे तुग्रहणं चरितार्थम्।

खखसानयोः सः सशर्परे विसर्जनीय इत्येवसिद्धेऽवसाने विसर्जनीय विधान ज्ञापक रूपादुत्तरत्रार्थाधिकारनुरोध रूपाद्वेत्यर्थः। प्रश्लिष्यवेति। सम इत्युत्तरं कानाम्रेडित इतिपाठ्यम्। एवं च तत्सूत्र द्वयेपि समः सुटीत्यत एव एकारानुवृत्तिरिति भावः। इदमिति। शरःखयइद मित्यर्थः। ननु पूर्वत्रासिद्धीयमद्वित्व इत्यनेनद्वित्व भिन्ने पूर्वत्र परमसिद्ध मित्यर्थकेन परस्यासिद्धत्व निषेधाद्विरोधाभावेन विप्रतिषेध परमित्यस्याप्रवृत्तत्वाच्चो भयोरप्येकवारमेव प्रवृत्यैकद्वित्रिरुच्चारण स्यैव साधुत्वस्य युक्तत्वेन पुनर्दित्वमशुद्धमत आह।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(२) आमि स (७।१।५२)। 'आज्जसेरसुक्' (७।१।५०) इत्यत आदिति वर्त्तते। पञ्चत्रिंशदिति। तेन सर्वार्थप्रतिपादकत्वेऽपि कृत्स्न सकलादिशब्दानां नेति भावः। सर्वविश्वौ बुद्धिस्था (३) नेकसंख्याकावयवारब्धसमुदाये (४) शक्तौ। तस्य समुदायस्या (५) नुद्‌भूतावयवभेदत्वे एकवचनं, यथा 'सर्वो लोकः' इति। तादृक्समुदायद्वयादिविवक्षायां द्विवचनादि– 'सर्वौ व्यूहौ' सर्वे व्यूहाः' इति। यदाऽप्यु (६) द्‌भूतावयव भेदसमुदायविवक्षा; तदाऽपि बहुवचनं–सर्वे घटाः' इति।

पूर्वपरावर (१।१।३४)। व्यवस्थाऽसंज्ञावर्त्तिन एवेमे सर्वादय इत्यर्थः। एवमुत्तरसूत्रद्वयेऽपि।

नित्यं द्विवचनान्त इति। द्विवचनान्त एवेत्यर्थः। अकजर्थ इति। ननु काकचोः को विशेषः? प्रत्ययस्वरचित्स्वराभ्यामन्तोदात्तत्वस्यैव सत्त्वात्। न च सुबन्तात्तद्धितोत्पत्त्या चित्त्वप्रयुक्तमन्तोदात्तत्वम् 'उभकाभ्याम्' इत्यादौ सुबन्तस्य, के तु प्रकृतेरति विशेष इति वाच्यम्, तद्धितविधौ प्रातिपदिकादित्यधिकारेण प्रातिपदिकस्यैव प्रकृतित्वात्। स च जायमानो न्यायात्सुबन्तात्पर इत्यन्यदेतत्। युष्मदस्मद्विषये तु वचनात्सुबन्तस्यैव प्रकृतित्वं, तस्यैव टेः प्रागकजिति बोद्‌ध्यम्। न चाकचि तन्मध्यपतितन्यायेन तस्योभग्रहणेन ग्रहणे उभकाववयवौ यस्येत्यर्थे उभकशब्दादयचि 'उभकयः' इति रूपं, के तु नेति विशेषः, 'कश्चेदानीं काकचोर्विशेषः' इति भाष्यप्रामाण्येन तेषामनभिघानादिति शङ्कते– न चेति।

द्विवचन परत्वाभावेनेति। अकचि तन्मद्ध्यपतितन्यायेनोभ शब्दस्य द्विवचनपरत्वं, के तु तेन व्यवधानान्न तस्य तत्त्वमित्यर्थः। 'उभादुदात्तः' (५।२।४४) इतिसूत्रे भाष्यकृताऽयचः प्रत्ययान्तरत्वेन व्याख्यानान्महाविभाषासम्बन्धस्यावश्यकत्वेन नित्यग्रहणमयोग्यं सद्

पूर्वत्रासिद्धत्वेनेति। पूर्वत्रासिद्धीयमद्वित्व इति तु नात्र प्रवर्तते तत्प्राप्तावंतरंगपरिभाषया यणोमय इत्यास्मिन्नंतरंगे वहिरंगस्याचो रहाभ्यामित्यस्यासिद्धत्वेना प्रवृत्तौ तु पूर्वत्रेत्यनेन यणोमय इत्यस्यासिद्धत्वेन रूपस्यतुल्यत्वात्फले विशेषाभावादिति भावः। नन्वम्परे इत्यत्र कर्मधारयाश्रयणेन खय्यमि चेति कोटिद्वयं कुतोनेत्यत आह्। अम्परइतीति। बहुब्रीहिरिति परग्रहण सामर्थ्यादिति भावः। व्यस्तोच्चारणं त्वम्पर इत्यस्य नश्छवीत्यत्रानुवृत्यर्थमितिबोध्यम्. ननु क पयोरितिन्यूनंतद्विधेयो विसर्गोप्यस्तीत्यत आह् कुप्वोरितीति नन्वीरनि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योगविभागेनोभशब्दाद् वृत्तिविषयेऽत्यन्तस्वार्थिकायज्विधानार्थम्। अयञ्च तद्विषये सुबुत्पत्तेः पूर्वमेव स्वार्थिकत्वेनान्तरङ्गत्वात्। अत एवायज्विशिष्टस्योभस्य सर्वनाम त्वात्सर्वनामप्रकृति कसप्तम्याद्यन्तत्वेन त्रलाद्युत्पत्तिः। अत्र नित्यशब्दस्य वाच्यार्थ विरोधान्महाविभाषाया असम्बन्धः। अयमप्याद्युदात्त एवोदात्तग्रहणा नुवृत्तेः। अयञ्च वार्तिकप्रामाण्याद्यत्रो (२) भशब्दस्यो (३) भयशब्दस्य वा द्विवचनविषयत्वा भावसम्भावना तत्रैव। अत एव 'उभयोर्वासः' इत्यादौ 'शयवास' (६।३।१८) इत्यलुकि नायच्। तद्ध्यवनयन्, वार्तिकमाह– उभयोऽन्यत्रेति। द्विवचनपरत्वाभावे इति। तत्परत्वविषयत्वाभावे इत्यर्थः। 'उभयो मणिः' इत्यादौ तु न 'लिट्यभ्यासस्योभयेषाम्' (६।१।१७) इति निर्देशेन योगविभागस्ये (१) ष्टसिद्ध यर्थत्वेन च तस्य क्वचिदप्रवृत्तेः। अतोरूपाद्यन्ते नायच्, रूपादेरस्मादनभिधानमेव वा। (२) अयच्यकच् तु न वाच्यः, (३) उपजीव्यत्वेन कस्यैव प्राप्तेः। अपवादस्त्व (४) न्यत्र चरितार्थः।

अत्रेदं चिन्त्यम्, अकज्विधावेवोभग्रहणेन सिद्धे सञ्ज्ञाप्रणयनं (५) किमर्थम्? अभिव्यक्तपदार्थकत्वात्संज्ञाव्यावृत्तिः, सर्वनामसाहचर्याच्च। अत एवोपसर्जनव्यावृत्तिरपि। 'उभयोऽन्यत्र' इति वार्तिके तयप्समानार्थकोऽप्ययज् गृह्यते 'उभयो मणिः' 'उभये देवमनुष्याः, इति भाष्ये तदुदाहरणात्। स्वार्थिकस्य च ग्रहणं, तदुपक्रमेण वार्त्तिकप्रवृत्तेः। एवञ्चावयवद्वयारब्धमणिद्वय विवक्षयोद्भूतावयवभेदविवक्षया वा द्विवचनमस्यासाध्वेव। एतन्मूलकमेवोभयस्यासर्वविभक्तित्वं 'तद्धितश्च' (१।१।३८) इतिसूत्रे कैयटेनोक्तं, तदाह– कैयट इति। हरदत्त इति। अत्रारुचिबीजं प्रागुक्त भाष्यविरोधः।

भाष्ये तूभशब्दपाठः प्रत्याख्यातः। कप्रत्ययस्याज्ञाताद्यर्थविशिष्टस्वार्थे विधानेन (१)

प्रकृतेघसेः कि च्चेतिव्युत्पा दिते क्षीर शब्दे चर्त्वस्यासिद्ध त्वात्खर्परत्वा भावोऽत आह्-क्षर-धातोरिति। अतएव निरुक्ते क्षीरमिति क्षरतेर्घसेर्वेत्युक्तम् ईत्वेऽच्प्रत्यय इति। बाहुलकादिति भावः। ननुशर्पर इत्यस्य बाधेपि तद्विहित विसर्गस्यैव कुप्वोरिति कुतोनेतिशंकते नचेति नन्वर्धाधिकारात्खरवसानयोरितिविहित विसर्गस्यैव तत्स्यादत आह् किंचेति एवं पूर्वत्रेति शास्त्रवाधकल्पनापेक्षयाऽर्था-धिकाखाघस्यैवोचित्या दितिभावः। षत्वापत्तेरिति इणः ष इत्यनुवृत्तिपक्षेइदं गणेकृत सत्वषत्वानामेव पाठ इतिपक्षेतु कांस्कान् संस्कृइति पाठेन तत्र तत्र निर्वहिपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वित्वसंख्याप्रकारकसंख्येयविशेष्यकबोधविषयार्थानुवादकत्वरूप द्विवचनत्वेन वार्त्तिके द्विवचनशब्देन तस्यापि ग्रहणमुभशब्दग्रहणवत्। अत एव उभयोरुभौ 'उभोभौ' इत्यादौ नायच्। तदुक्तं भाष्ये 'केऽप्यन्तरेण वचनं द्विवचनपरो भविष्यति। कथं? स्वार्थिकाः प्रत्ययाः प्रकृतितोऽविशिष्टा भवन्तीति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवति' इति। इति हेतोः, प्रकृतेः कादिप्रकृतेरुभशब्दस्य ग्राहकेण द्विवचनशब्देन स्वार्थिकस्यापि ग्रहणमिति तदर्थः। त्रतसिलौ तु विभक्तस्यन्तस्य स्वार्थे विहिताविति (२) तत्तत्कारकशक्तिप्रधानावेवेति न तयोरुक्तद्विवचनत्वमिति।

तस्मात् उभयशब्दात्। जसीति। अवयवद्वयारब्धसमुदायबहुत्वविवक्षायामित्यर्थः। अन्तरङ्गत्वादिति। (१) सर्वार्थबोधकत्वरूपार्थस्योभयत्रापि निमित्तत्वेन न तत्कृतं नित्यसञ्ज्ञाया बहिरङ्गत्वम्। अत एव सञ्ज्ञोपसर्जनप्रथमादिशब्दे न विकल्पः, अर्थकृतबहिरङ्गत्वस्यानाश्रयणाच्चेति भावः। इदमर्वाचामनुरोधेन।

परे तु अस्य (२) पक्षेऽभावबोधकतया 'निषेधाश्च बलीयांसः' इत्यनेनास्य प्राप्तिः। किञ्च न 'अन्तरङ्गं बलीयः' इत्यस्या अत्र विषयो युगपत्प्राप्त्यभावात्, सञ्ज्ञानां बाध्यबाधकभावाभावेन प्रातिपदिकसञ्ज्ञासमकालमेव (३) सर्वनामसञ्ज्ञाप्रवृत्तेः।

अत एव 'उभये' इत्यत्र सर्वनाम्नो विहितत्वेन (४) शीभावसिद्धिः। पूर्वापरेत्यादि तु पक्षे तदभावमात्रबोधकम्। 'असिद्धं बहिरङ्गम्' (प० भा०) इत्यपि न, अन्तरङ्गोत्तरं बहिरङ्गप्राप्ते। अन्तरङ्गे कर्त्तव्ये बहिरङ्गासिद्धत्वेऽपि तत्प्रवृत्युत्तरं बहिरङ्गप्रवृत्तेरनया (१) वारयितुमशक्यत्वात्। बहुशस्तथा दृष्टत्वात्। तदुत्तरमप्येतत्प्रवृत्त्या पूर्वादिष्विव पक्षे तदभावविशिष्टे साधुत्वबोधनस्य शक्यत्वात्। जसीति विषयसप्तमीतिपक्षेऽपि

पुंस्कोकिल इति वहुलक्ष्याणं पाठे गौरवापत्तेरितिबोध्यम्। नन्वतः क्रित्य त्रात इति निर्देशादिण इत्यस्य निवृत्येद मसंगतमत आह्। गणइति एवं चेष्विण इत्यादि फलितार्थ कथनमिति भावः। ननु शोभनोच्छ इतिव्युत्पत्तौत्वपदांतत्व मेवेत्यत आह्। एवं नञीति। ननु माङ्धातोरपि ग्रहणे प्रमाच्छदइत्यत्र नित्य तुगापत्तिरत आह्। आङःसाहचर्यादिति। ननु सेनासुरेत्यादावुत्तर सूत्रस्य वैकल्पिकत्वान्नानुप पत्तिरत आह्। व्याख्यानाद्वेति। व्याख्यानमेवाह। एओङिति। तत्रहि वर्णैकदेशावर्ण ग्रहणेन गृह्यंत इति पक्षे आलूय इत्यादौ ह्रस्वस्येति तुकमाशंक्य छेचेत्येव सिद्धे दीर्घादिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रातिपदिकादिसञ्ज्ञोत्तरमेवास्याः प्रवृत्तिस्तदुत्तरमेव तद्विषयात्, स्थानिवदतिदेशप्रापिताया (२) निरवकाशत्वाच्च, प्रत्यक्षस्य स्थानिवद्भावस्यानुमानिक्याऽनया (३) बाधायोगाच्च; सर्वनामसञ्ज्ञायामु (४) क्तयुक्त्या यथोद्देशपक्षस्यैवौ (५) चित्यात्। (६) अत एव 'तयादेशे उभयप्रतिषेधः। तयपो ग्रहणेन ग्रहणात् जसि विभाषा प्राप्नोति' इति स्थानिवत्सूत्रस्थं वार्तिकम् 'अयच् प्रत्ययान्तरम्' इति सूत्राशयप्रदर्शनेन भाष्ये प्रत्याख्यातं, न त्वन्तरङ्गन्याय बलेन। 'उभयी' इत्यत्र ङीप्तु 'टिड्ढा' (४।१।१५) इतिसूत्रे मात्रशब्दा दारभ्यायचश्चकारात्प्रत्याहाराश्रयणेन सिद्धः। अत इत्यनुवृत्त्या न 'कति' इत्यादौ नातिप्रसङ्गः। तयब्ग्रहणन्तु सूत्रे (७) ऽवयुत्यानुवादः। द्वित्रिशब्द प्रकृतिकायजन्तस्य जसः शीविषयेऽनभिधानमेव, पुंस्येव वाऽनभिधानमिति तदाशय इति वदन्ति।

तथापीहेति। 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति 'प्रयोजनं सर्वनामाव्ययसञ्ज्ञायाम्' इति च तदन्तविधिद्वये डतरान्तान्तेत्याद्यर्थे परमकतरस्य, व्यपदेशिवद्भावेन कतरस्य च (१) सञ्ज्ञा सिद्धेति भावः। तत्र मानमाह– केवलयोरिति प्रयोजनाभावात्। फलाभावादित्यर्थः। अदन्तादङ्गात्परस्य (२) सर्वनाम्नो विहितस्येत्येव 'जसः शी' (७।१।१७) इत्यादेरर्थादिति भावः। ननु उतरग्रहणेनैव सिद्धेऽन्यतरशब्दपाठो व्यर्थोऽतः आह–अन्यतरेति। किंयत्तद्भ्य एव तयोर्विधानादिति भावः। अनुरीति। पूःशब्दस्य (१) विशेष्यत्वेनेत्यर्थः। तद् ध्वनयन् स्त्रियामुदाहरति– अन्तरायामिति।

एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा।
साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते।।

इति केचित्। केवले– असहाये। तत्र संख्याऽन्यार्थासहायवाची 'ष्णान्ता षट्'

तुग्विधानं ज्ञापयति। दीर्घावयवस्य ह्रस्वत्वप्रयुक्तुक् न भवती त्युक्तम्।५४ ननु प्रकृतसूत्रे इकोयणचि सूत्रे च भाष्ये दीर्घात्वदांताद्वेत्येकमेवेति लभ्यतेऽत आह्।

योगविभाग इति। असामर्थ्येपीति। दण्डीच्छात्र इत्यादावित्यर्थः। इतिहलसन्धिः।। बहुब्रीहिरिति नतु कर्मधारयः। परग्रहणदुत्तर सामर्थ्याच्चेतिभावः।। व्याख्यानादिति अव्ययीभावस्याव्ययत्वेलुङ्मुख स्वरोपचाराः प्रयोजनमिति परिगणनादित्यर्थः। नन्विणित्यारं भात्पूर्वसूत्रा कारादुत्तर सूत्र विसर्गस्यैव ग्रहणेनगीः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(१।१।२४) 'बहुषु बहुवचनम्' (१।४।२१) 'एकादाकिनिच्च' (५।३।५२) इत्यादिसूत्रेषु भाष्ये स्पष्टमुक्तः। 'एको गोत्रे' (४।१।९३) इतिसूत्रशेषे भाष्ये प्रथमार्थोऽपि उक्तः। साधारणसमानार्थयोः संख्यावाचिन एवार्थतः पर्यवसानम्, यथा 'तेनैकदिक्' 'चैत्रमैत्रयोरेका माता' इत्यादौ। 'सर्वस्य द्वे' (८।१।१) इतिसूत्रे 'एकैकशः' इति भाष्य मुपादाय 'केचिदाहुरल्पार्थोऽप्येकशब्दोऽस्ति' इति वदता कैयटेन केचिदित्युक्त्या तदर्थकाभावो ध्वनित एव। एवं च प्रधानार्थे (२) न दृढं मानम्।

स्वाभिधेयापेक्षावधीति समस्तः पाठः। नियमेना (३) वधिसापेक्षेऽर्थे वर्त्तमानपूर्वादीनामित्यर्थः। दक्षिणा गाथका इति। उत्कर्ष स्यावधिसापेक्षत्वादत्र व्यवस्थाऽस्तीत्याग्रहे तु 'उत्तरे प्रत्युत्तरे च शक्तः' इति प्रत्युदाहरणं बोद्ध्यम्। उत्तराः कुरव इति। सुमेर्वववधिकपरदेशत्वरूपोपाधिविशिष्टकुरुषु उत्तरशब्दः शब्दं प्रवृत्तिनिमित्तीकृत्य वर्त्तते इति व्यवस्थाविषयत्वं बोद्धयम्। दिग्वाचकपूर्वादिशब्दानां (४) मध्याह्नसूर्यसंयोगिदे शावधिकोदयाचलास्ताचलसन्निहितदेशतात्कालिकसूर्यसम्मुखयावद्देशतत्कालिक तत्पृष्ठस्थयावद्देशरूपोपाधिविशिष्टदिशि तत्तच्छब्दं प्रवृत्तिनिमित्तीकृत्य प्रवृत्तिरिति उपाध्यन्तर्गततया व्यवस्थाऽस्त्येव मद्धयाह्ने सूर्यस्योदङ्मुखत्वात्। देशवृत्तीनां तत्तदवधिकोदयाचलसन्निहितत्वादि प्रवृत्तिनिमित्तमित्यन्यत्र विस्तारः।

अन्तरमवकाशावधि परिधानान्तर्द्धिभेदतादर्थ्ये।
छिद्रात्मीयविना बहिरवसरमद्धयेऽन्तरात्मनि च।। (अ० को०)

इतिकोशोक्तार्थान्तरव्युदासामर्थमाह–अन्तरं बहिर्योगेति। अयं त्रिसूत्र्या क्रियमाणः सञ्ज्ञाविकल्पो जसाधारे शीभाव एव, न त्वकजाद्युदात्तत्वादाविति बोद्धयम्।

काम्यतीत्यत्रतदप्राप्त्या काम्येरोरित्यस्येण इत्यत्रैव पाठे कर्तव्ये पूर्वसूत्रेपाठोव्यर्थोऽत आह् वाः काम्यतीति अनव्ययस्येत्यादिति। आदिना काम्य इत्यस्य ग्रहणम्। तेनदुष्करोतीति दुष्कृतं निष्कृत मित्यनयो स्तु गतिकारकोपपदानामिति सुबुत्पत्तेः प्राक् समासादपदादावित्यस्य संबंधेपि न दोष इति भावः। व्याख्यानादिति क्रियायोगेगति संज्ञाविधानेनात्रासंभवा दुत्तरत्र मंडूकानुवृत्तौ मानाभावाच्चेत्यर्थः। नषत्वमिति। अग्निः करोतीत्यादौ तु व्यपदेशिवद् भावेन निषेध इति बोध्यम्। षत्वापत्तेरिति अप्रत्ययस्येत्यस्य वैयर्थ्यापत्यातथा नार्थ इतिभावः। गीःकरोतीतिपुःकरोती

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न बहुव्रीहौ (१।१।२६)। चिकीर्षिते इति अध्याहारलभ्यम्। प्राचीनवृत्तिकृद्रीत्येदं व्याख्यानम्। नेदं सूत्रं बहुव्रीहेस्तत्त्वनिषेधकमुपसर्जनप्रतिषेधेन सिद्धे। प्रक्रियावाक्य इति। अलौकिके इत्यर्थः। न चालौकिके समासप्रवृत्त्यैकार्थीभावस्यापि तत्रैव कल्पनादुपसर्जनत्वादेव समास इव तत्रापि निषेधः सिद्ध इति वाच्यम्, तत्रैकार्थीभावस्यारोपेऽपि (१) स्वार्थ विशिष्टार्थान्तरबोधकत्वरूपोपसर्जनत्वाभावेन 'अतिभवकान्' इत्यत्रेव प्राप्तस्याकचोऽभावार्थ सञ्ज्ञानिषेध इत्यत्र तात्पर्यात्। लौकिके तु नास्य प्रवृत्तिस्तत्र समासस्य चिकीर्षितत्वाभावात्। अतिक्रान्त इत्यादिना पूर्वोक्तस्य लौकिकवाक्यस्य समासस्य च दृष्टान्तद्वयमुच्यते। (२) अकृतव्यूहपरिभाषा तु नास्त्येवेति भावः भाष्यकारस्त्विति।

अकच्स्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयम्।

इति भाष्योक्तेः वृत्तिकृद्रीत्येदं व्याख्यानमयुक्तमिति भावः।

ननु 'स्मृतिद्वयप्रामाण्याद्विकल्पोऽस्तु' कथं प्रत्याख्यानमत आह– यथोत्तरमिति। एतच्च 'धिन्विकृण्व्योर च' (३।१।८०) इतिसूत्रे भाष्ये (३) ध्वनितम्। एवञ्च वृत्तिकृदुक्तार्थकं नेदम्। तस्मादुपसर्जनप्रतिषेधानुवादकम्। यद्वा, वार्त्तिककृता तस्य कृतत्वात् सूत्रकृतेदमारब्धम्। सञ्ज्ञाया अन्वर्थत्वमपि भाष्यकृदूहितमेव न सूत्रकृदूहितमिति 'विभाषा दिक्' (१।१।२८) इति सूत्रे (४) कैयटे स्पष्टम्। सूत्रे सप्तमीनिर्देशः (५) प्रथमार्थ एव। अत एव वृत्तिकृदुक्तः प्रक्रियावाक्ये निषेध इत्यर्थो भाष्यकृता बहुव्रीहिपदस्य तदर्थवाक्यस्थपदलक्षणया साधितः। अन्यथा मूलोक्तरीत्या सिद्धे तादृशलक्षणाप्रयासो व्यर्थः स्यादिति तत्त्वम्।

त्यस्याप्युपलक्षणं उचितमिति, ननुचतुष्करोतीत्यादावेतस्यासिद्ध त्वादिदुदुपधस्येति नित्यं षत्वं स्यादिति चेन्न। इदुदुपधस्येत्यनुवर्त्ये दुदुपधस्य सुजं तांतस्येत्यर्थादनेनैव तद्बाधादिति भावः। इत्यादिति। आदिना चतुष्पादो र्निव्याऽपाच्चतुष्पादित्यनयोर्ग्रहणं नित्य षत्वापत्तेरिति पंचकृत्वः करोतीत्यादावतिव्याप्ति वारणेने दुदुपधस्ये त्यनुवृत्तेरत्रपक्षे चारितार्थ्यादितिभावः। प्रकरणे प्रकरणमसिद्धमिति पक्षे दोषमाह्। किं चेति। नन्वव्यवहित ग्रहणे मानाभावोऽत आह्। किंचास्येति। नन्वत्र सामान्यग्रहणे उत्तरत्रैतदंतर्गत विशेष ग्रहणेपि नार्थाधिकार वाधः। किंचार्थाधिकारेऽत्राप्ये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तद्नुगुणानामेवेति। प्राधान्येनोपस्थितिविषयप्रसिद्धस्वीय-सर्वार्थवाचकत्वसमानाधिकरण सर्वनामपदवत्त्वेन (१) बोधकमहासञ्ज्ञया सर्वार्थोपस्था पकसर्वादीनामनुकरणावश्यकत्वेने तरेषामनुकरणे मानाभावः। नामपदस्वारस्येन प्राधान्येनेत्यस्य लाभः। उपसर्जनं हि– (२) इतरविशेषणतयैवोपस्थापकमिति तेन तव्द्यावृत्तिः। पूर्वादिसङ्ग्रहाय स्वीयसर्वार्थेति। सञ्ज्ञाव्यावृत्तये 'अभिव्यक्त' इतिन्यायमूलकं प्रसिद्धेतीति भावः।

सर्वादिसूत्रस्य चायमर्थः–सर्वादीनि तदन्तानि चोक्तसर्वार्थवाचकत्व समानाधिकरणसर्वनामपदवन्तीति। तत्र प्राप्ताप्राप्तविवेकन्यायेन सर्वनाम पदवत्त्वांशे एव विधिः, सर्वार्थवाचकत्वस्य लोकतः सिद्धेः। एतेनान्वर्थसंज्ञोपस्थितसर्वार्थवाचकस्य विशेष्यतया सर्वादीनीत्यस्य तद्विशेषणत्वात्तदन्त विधिरित्यपास्तम्, एकपदोपस्थाप्ययोरर्थयोः परस्परमुद्देश्यविधेयभावेनान्वयस्याव्युत्पन्नत्वात्, रूढ्यर्थयोगार्थयोरन्यतर वियोगेनान्यत्रान्वयायोगाच्च। तदन्ते सर्वार्थवाचकत्वं त्ववयवद्वारा बोद्धयम्। एतेन तदाक्षिप्तस्य विशेष्यतेत्यपास्तम्, तद्विनाऽनुपपत्त्यभावेनाक्षेपायोगादाक्षिप्तस्य शाब्देऽन्वये मानाभावाच्च।

केचित्तु आवृत्त्या एकस्योद्देश्यताऽपरस्य विधेयतेति वदन्ति। परन्त्वाद्यः पक्ष (३) इतो लघुरिति बोद्धयम्। सन्निवेशादिति। तद्नुमानादित्यर्थः। अत्रोपसर्जनत्वमि (४) तरविशेषणत्वेनार्थोपस्थापकत्वम्। 'तदोः सः' (७।२।१०६) इतिसूत्रे अदस एव दस्य नान्यस्येति (१) नियमे 'द्वीयतेरप्रत्यये द्व इति प्राप्नोति, स्व इति चेष्यते; यथालक्षणमप्रयुक्ते' इति भाष्यं तु प्रकृतसूत्रनञ्सूत्रादिस्थानेक भाष्यविरोधादे (२) कदेश्युक्तिरिति न तद्विरोधः।

कार्थीभाव बोधक घटकयोरेव सुसोर्ग्रह्णे सामर्थ्य इतिव्यर्थं स्यादत आह्।

साहचर्याच्चेति– ज्ञाक सिद्धस्यासार्वत्रिकत्वादाह् क्वचिदिति, तेनष्यङः संप्रसारणमित्यादौ न इति भावः।। शब्दरूपं। यस्मात्प्रत्ययविधिस्तदादिरूपं। ज्ञापनेनेति। ननु परमसर्पिः कुण्डिकेत्यादौ सर्पिःशब्दस्य मध्यमत्वान्मध्यम पदत्वाना क्रांतोत्तर पदस्य पदत्त्वप्रयुक्ते कार्येकर्तव्ये प्रत्ययलक्षणनिषेधादत्रत्योत्तर पदस्य सर्पिष्कुंडिकाशब्दस्य परमशब्देन समासे तत्रत्य सर्पिः शब्दस्याशब्दस्यायुः शब्देन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयासमासे (१।१।३०) 'द्वन्द्वे च' (१।१।३१) इतिसूत्रस्थाकरोक्तरीत्या 'न बहुव्रीहौ' (१।१।२६) इतिसूत्रस्थाकररीत्या च (३) प्रथमार्थे सप्तमी। अयमपि। समासस्यैव निषेधो नावयवानाम्।

समुदायस्येति।

अकच्स्वरौ तु कर्त्तव्यौ (४) प्रत्यङ्गं (५) मुक्तसंशयम्।

इति भाष्योक्त्या एतत्प्रकरणविषयस्मृत्या एतत्प्रकरणस्थसप्तमी निर्देशानां (६) प्रथमार्थकत्वमिति तस्यावयवसञ्ज्ञानिषेधकत्वाभाव उचितः। किञ्चावयवमात्रस्य निषेधे 'वर्णाश्रमेतराणाम्' इत्यत्र सर्वार्थवाचकसर्वाद्यन्तत्वेन समुदायसञ्ज्ञायां (७) सुडापत्तिः। तस्य सञ्ज्ञानिषेधेऽपि सर्वार्थवाचकसर्वादित्वानपायात्। अवयवस्य, व्यपदेशिवद्भावेन समुदायस्य च द्वन्द्वे विद्यमानत्वेन निषेध तु अवयवस्य निषेधे फलाभावः। न च त्वच्छब्दस्य तान्तत्वे काकचोरविशेषेण फलम्, द्वन्द्वावयवमात्रे सुन्दरादिविशेषणान्वयाभाववत् (१) कुत्सादिविवक्षाया अभावात्, समुदाये तद्विवक्षायां समुदायोत्तरप्रत्ययेनावयगतकुत्सादेरपि बोधेनोक्तार्थत्वादवयवेभ्यः पृथक् तदनुत्पत्तेः। अन्यथा तव प्रत्येकं कप्रत्ययोत्पत्त्यापत्तिः। अत एवोक्तं भाष्ये 'अकज् हि न भवति' इति 'विभाषा जसि' (१।१।३२) इति सूत्रे। समुदायकुत्साविवक्षायामिति तदर्थः। (२) कृताकचा समासस्तु भवत्येव। तत्र सर्वार्थत्वादनेन विकल्पो भवत्येव। (३) 'त्वदधरमधुरमधूनि पिबन्तम्' इति जयदेव प्रयोगबलेनान्यार्थकत्वच्छब्दस्य सत्त्वेऽपि तस्य सर्वनामत्वे माना भावात्, बह्वसम्मतत्वाच्च। एतेन (४) 'न बहुव्रीहावितिवदस्यापि द्वन्द्वे चिकीर्षिते इत्यर्थः' इत्यपास्तम्, फलाभावात्। जसाधारे शीभावे एव विकल्प विधायकस्य 'विभाषा जसि' (१।१।३२) इत्यस्यासङ्गतेश्चेति

समासोत्तरं कामशब्देन समासे आयुः शब्दस्य पदादिवत्वेनोत्तर पदत्वात्समुदायोत्तर सुपाऽऽयुः शब्दस्य च पदत्वाकथं ज्ञापकमिति चेन्न। समासेन समासाद्यवयवरूप पूर्वदाक्षेपेण पदसंज्ञकोत्तर पदत्वानधिकरणेसुसंतस्य पूर्वपदस्य विसर्गांतस्य षत्वमित्यर्थाज्ज्ञापकत्वसंभवात्।

ध्वनितं चेदं सर्वं ज्ञापक परभाष्येण। अतएवेति, उपात्तविशेष्य सत्वेपिशब्दरूपं विशेष्यमादायतदंतविधेरेवेत्यर्थः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावः। उद्भूतावयवभेदसमूहस्य द्वन्द्वे विशेष्यतयोपसर्जने सञ्ज्ञाया अप्राप्त्या 'द्वन्द्वे च' (१।१।३१) इत्यपि 'न बहुव्रीहौ' (१।१।२६) इतिवदिति तत्त्वम्। अत एव 'गोस्त्रियोः' (१।२।४८) इति सूत्रे 'कुक्कुटमयूर्यौ' इत्यादौ ह्रस्ववारणाय (१) 'द्वन्द्वे न' इति वचनमारब्धमिति दिक्।

नाकजिति। समुदायनिष्ठकुत्साबोधकोऽकज् नेत्यर्थः।

प्रथमचरम (१।१।३३)। अत्र सूत्रे 'न' इति न सम्बध्यते; प्रथमादिष्वसम्भवात्। 'जसि' इत्यनुवृत्तेरर्थाधिकारादयमपि शीभावे एव विकल्पस्तदाह– जसः कार्यं प्रतीति। तयः 'संख्याया अवयवे तयप्' (५।२।४२) इति तदन्ता इत्यत्र (२) हेतुरुक्तः। द्वितीयतृतीयौ 'द्वेस्तरीयः' (५।२।५४) 'त्रेः सम्प्रसारणं च' (५।२।५५) इति साधू। अर्थवदिति। (३) प्रतिपदोक्तस्येत्यपि बोद्ध्यम् तेनान्नन्ते आद्युदात्तस्य 'द्वितीयाय भागाय' इत्येव, अनभावे तु स्मै भवत्येव।

जराया (७।२।१०१) 'अष्टन' (७।२।८४) इत्यतो विभक्ताविति, 'अचि र' (७।२।१००) इत्यतः अचीत्यनुवर्त्तते, तदादिविधिश्चेत्याह– अजादाविति। 'जरसौ' इत्यादौ तु व्यपदेशिवद्भावेन। विभक्तौ किम्? जराया इदं (४) जारम्। प्रतिपत्तिलाघवाय जराया (५) असुङ् न कृतः। पदाङ्गाधिकारे इति। पदमङ्गं च (१) विशेष्यं विशेषणेन तदन्तविधिरिति भावः। पदशब्देनोत्तरपदाधिकारः केवलपदाधिकारश्च गृह्यते इति 'येन विधिः' (१।१।७२) इत्यत्राकरे स्पष्टम्। निर्दिश्यमानस्येति। 'षष्ठी स्थाने योगा' (१।१।४९) इतिसूत्रमावर्त्तते, आवृत्तस्य चायमर्थः–(२) षष्ठयन्तमुच्चार्यमाणमेव स्थानेन युज्यते न प्रतीयमानमिति, तेनेदं सिद्धमिति भावः।

अधात्वभिहितमिति। धातोः प्रत्यय इति। सुप्सुपेति समासे ततोभिहित शब्देन कर्तृकरण इति समासेशाक पार्थिवादित्वात्प्रत्यय शब्दस्य लोपे धात्वमिहित शब्देन स्ववाचकः शब्दोलक्ष्यते। ततो नञ्समासे च प्रत्यासत्याषत्वमिमित्तक पवर्गघटित धातूत्तर प्रत्ययभिहित वाचकभिन्नं समानाधिकरणमसमर्थवदिति तदर्थस्तत्फलितार्थमाह। धातु सहचरितेति। नपुपूर्वपक्षाक्षेपितस्यशाब्देऽन्वय प्रतियोगित्वं नस्यादवृत्यनुपस्थित्वात् तस्यसमासाद्यावयवे रूढौ मानाभावाच्च। उपात्त विशेष्य सत्वे शब्द रूपं विशेष्य मादाय तदंतविधावुत्तर पदस्थस्येति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नन्वयं जरशब्दो न जराशब्दोऽत आह–एकदेशेति। स्थानिवत्सूत्रेण (३) इति भावः, जरा इत्युक्तपरिमाणस्य ग्रहात्। अनेन स्थानिबुद्ध्यैव कार्यप्रवृत्त्या 'निर्दिश्यमानस्य' (प० भा०) इतिपरिभाषाबाधाभावो बोद्धयः। 'येन विधिस्तदन्तस्य' इत्यस्य तु सञ्ज्ञासूत्रत्वात् सूत्रस्थजराशब्दो जराशब्दान्तपर इति तदन्ते आदेशप्रवृत्तौ परिभाषाविरोधः स्पष्ट एवेति दिक्। निर्जरसेति। अत्र 'स्वादिषु' (१।४।१७) इति पदत्वेन रुत्वं न, भत्वेन पदत्वबाधात्। सूत्रेषूत्तरस्थस्य पूर्वत्रापकर्षवदग्रे लेखो वैचित्र्यायेति बोद्धयम्। पक्षे इति। जरसादेशाभावपक्षे इति भावः। इदमर्वाचामनुरोधेन।

परे तु 'विभक्त्यादेशेभ्यः परत्वाज्जरस्' इत्यसङ्गतम्, विभक्त्यादेशानामेव पूर्वविप्रतिषेधेनेष्टत्वात्। अत एव 'जरायाः' (७।२।१०१) इति सूत्रे 'अजरांसि' इत्यत्र 'नुम्जरसोः प्राप्तयोर्विप्रतिषेधेन जरस्' इति भाष्योक्तं सङ्गच्छते। अन्यथा त्वद्रीत्या शिभत्वात्पूर्वमेव जरसः प्रवृत्तौ तदा सर्वनामस्थानत्वाभावाद् नुमा विप्रतिषेधविचारासङ्गतिः स्पष्टैव। मम तु पूर्वविप्रतिषेधेन जरसः पूर्वं शिभावे प्रवृत्ते तत्सङ्गतिः स्पष्टैव। अत एव 'टाङसि' (७।१।१२) इतिसूत्रे कैयटेनोक्तं–'भाष्यकारः सन्निपातपरिभाषया जरसादेशमनभ्युपयन्नतिजरेणातिजरादिति भाव्यं न त्वतिजरसि नाऽतिजरसादिति गौरवमुद्भावितवान्' इति। भवद्रीत्या पूर्वं जरसादेशे इनाद्यप्राप्त्या, तदभावपक्षे च तस्याप्राप्त्या 'सन्निपातपरिभाषया जरसादेशमनभ्युपयन्' इत्यस्यासङ्गतिः स्पष्टैव।

वृत्तिकारोऽप्याह– 'अतिजरसिन अतिजरसादिति केचिदिच्छन्ति, यथा तु भाष्यं तथा नैतदिष्यते इति लक्ष्यते' इति। नपुंसकद्वितीयैकवचनेऽपि लुग्बाधेन 'अतोऽम्' (७।१।२४) इत्यमि सन्निपातपरिभाषया जरसभावः। न च तत्र न अकारान्तसन्निपातकृत एवाजादिः,

---

ज्ञापकाभावात् परमसर्पिष्करोत्यादौषत्वं न स्यादत आह्। यदात्विति। ज्ञापकपरंभाष्यं त्वेकदेश्युक्ति। अतएव नित्यं समास इति सूत्रे भाष्येऽथा व्युत्पन्नं प्रातिपदिकं सर्पिरादि ततोमित्ये प्राप्ते इसुसोः सामर्थ्ये इति विभाषारभ्यत इत्युक्तं संगच्छते। व्याख्यानादिति, सामर्थ्य इत्यनुवृत्यैवसिद्धे उत्तरसूत्रे समास ग्रहण सामर्थ्यादित्यर्थः। कस्कादिषु पाठस्येति। अव्यपेक्षायांतस्य षत्वस्यासिद्धत्वाद प्राप्तत्वात्कस्कादिषु पाठस्य चारितार्थ्येन व्यपेक्षायाँ विकल्प एवोचित इति तदर्थ इतिभावः। नन्वनेन विकल्पेप्येतदभाव पक्षेव्यपेक्षायां कस्कादिषु चेति नित्यषत्वं दुर्वारम् नचैतद्बोधिताभा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किन्तु तदभावेऽपि। एषा तु सन्निपातलक्षणविधिं विना न यस्य प्रवृत्तियोग्यता तत्रैवेति अत्र भवत्येव जरसिति वाच्यम्, मानाभावात् 'टाङसि' (७।१।१२) इतिसूत्रेस्थेनातिजरेणेत्येतद्विषय कैयटेन विरोधाच्च। ध्वनितञ्चेदं 'जरायाः' (७।२।१०१) इति सूत्रे भाष्ये। तत्र हि पूर्वपक्षिणा 'अतिजरसं पश्येत्यत्र लुक् कस्मान्न' इति पृष्टे, परेण प्रथमैकवचनेऽप्यतिजरसं तिष्ठतीत्यत्रापि कुतो लुङ् न शङ्क्यते' इति पृष्टे, पूर्वपक्षिणा 'प्रथमैकवचनेऽम्भावोत्तरमेव जरस्, तत्र जरसि कृते सन्निपातपरिभाषया न जरस्' इतिपाठभेदेन विशेष उक्तः। ततः परेण 'यद्येवम् अतिजरसम् अतिजर सैरित्यत्र न प्राप्नोति जरस्' इति द्वितीयैकवचनादौ शङ्किते, सिद्धान्तिना-इष्टमेवैतदतिजरमतिजरैरिति भवितव्यमिति। अत्र विशेषोपपादनेऽन्त्यपाठ एव युक्तः। अन्यथा लुकः प्रथमैकवचने तेनाभावे उपपादिते द्वितीयैकवचनेऽपि तेन न्यायेन लुकोऽप्राप्तौ विशेषोक्तिरसङ्गतेति बोद्धयम्। एवं स्त्रियां जरसादेशे कृते 'याडापः' (७।३।११३) इत्यादीनामाकारप्रश्लेषेण वारणं विफलमेव तेषां परत्वात्। अतिखट्वशब्दे तेषां वारणाय तु प्रश्लेष आवश्यक इत्याहुः।

परे तु जरसादेशाद् विभक्तिसम्बन्धिकार्यमात्रं पूर्वविप्रतिषेधेन। तेन 'जराणाम्' इत्यादावामि पूर्वं नुटि जरसोऽभाव एव। एवं च 'ह्रस्वनद्यापः' (७।१।५४) इत्यत्राऽऽकारप्रश्लेषे न फलं, नापि मानम्। अत एव 'ङ्याब्ग्रहणेऽदीर्घः' इतिवज्जरसादेशस्य स्थानिवत्त्वप्रतिषेधो वार्त्तिककृता नाऽऽरब्ध (१) इत्याहुः।

परिभाषाया अनित्यत्वमिति। इनातोरिकारदीर्घोच्चारणाम्, एसि कर्त्तव्ये ऐस्करणञ्च तदनित्यत्वे मूलमिति तदभिमानः। षष्ठयेकवचने इति। एकसूत्रोपात्तत्वात्स्यादेशविषयेऽपि

वांशेन निषेधाश्च बलीया इति न्यायात्तत्प्राप्तषत्वस्यापि बाध इति वाच्यम्। एतदृष्ट्यातस्यासिद्ध त्वादिति चेन्न। प्रकरणे प्रकरणमसिद्धमितिमते एतद्ग्रंथस्य सत्वात्। इत्यर्थेत्विति। तुनाऽरुचिबोधिता। बाध्यसामान्य चिंताश्रयणे प्रमाणाभावात् प्रकरणे प्रकरणमिति पक्षस्य भाष्ये दुषितत्वाच्च नित्य षत्वमेव व्यपेक्षायामप्युचितमिति। इतिविसर्ग संधिः रुरेवेति। प्रक्रियालाघवायेति भावः। सर्वत्रसुग्रहण इति सौ च सुपिचेत्यादावित्यर्थः। राम इत्यादौ सुपि चेति दीर्घस्तु हयरयवडितिन्यासेन वारणीय इतिभावः। प्रथमैक वचने चारितार्थ्यादिति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्वविप्रतिषेध इति तद्भावः एतच्च भाष्येति। इनातोरिकारदीर्घोच्चारणप्रत्याख्यानपरभाष्ये त्यर्थः, इष्टमेवैतत्सङ्गृहीतमतिजरमतिजरैरिति भवितव्यम्' इति 'जराया' (७।१।१०१) इति–सूत्रस्थ भाष्येति चार्थ इत्यन्यत्र विस्तरः।

पद्दन्नो (६।१।६३)। आदेशैः (१) स्वानुरूपाः स्थानिन आक्षिप्यन्ते इत्याह–पाददन्तेति। 'अनुदात्तस्य चर्दुपधस्य' (६।१।५९) इत्यतोऽन्यतरस्यामित्यनुवर्त्तते। अत एव तुल्यास्यसूत्रादि भाष्ये 'आस्ये तुल्यः' 'पादेनोपहतं' 'मासेन पूर्वाय' इत्यादिप्रयोगाः 'हृदयस्य प्रियः' (४।४।९५) इति सौत्रप्रयोगाश्चोपपन्ना भवन्ति। 'ये च तद्धिते' (६।१।६१) इतिसूत्रस्थे 'वा केशेषु' (का० वा०) इतिवार्त्तिके वाग्रहणन्तु तत्र सूत्रे वाग्रहणासम्बन्धबोधकम्।

यद्यपि निशाशब्दस्य निश्शब्दप्रकृतिकत्वेन भागुरिमतसिद्धतयाऽऽपो वैकल्पिकत्वेन च वाक् वाचेत्युभयवन्निश्निशयोः सूत्रे निश्ग्रहणं विनाऽपि सिद्धिः, तथापि सुटि हलन्तस्यासाधुत्वबोधनायात्र ग्रहणमिति वृत्त्यनुसारिणः।

परे तु 'अनुदात्तस्य' (६।१।१६१) इतिसूत्रेऽन्यतरस्यामित्यस्य स्वरितत्वं नास्ति। अत एव 'शीर्षंश्छन्दसि' (६।१।६०) इति सूत्रे 'शीर्षन्नितिप्रकृत्यन्तरं द्रष्टव्यम्, आदेशत्वे हि छन्दसि शिरस्शब्दस्य प्रयोगो न स्यात्' इति इत्युक्तं भाष्ये। अन्यथा विकल्पानुवृत्त्याऽऽदेशत्वेऽपि दोषाभावेन तदसङ्गतिः स्पष्टैव। 'ये च तद्धिते' (६।१।६१) इत्यत्र चाऽऽदेशत्वाय शिरसो ग्रहणं कर्त्तव्यमित्युक्तं, 'वा केशेषु' इति च वक्तव्यमित्युक्तम्। तस्मात् शशादिविषयाणि प्रकृत्यन्तराण्येव पदादयः। एवं मांस्पृत्स्नवोऽपि। अत एव नस्पृतोः स्थानिवद्भावादाबन्तत्वमादाय 'नसां पृताम्' इत्यादौ न नुडादिः। 'नासिकाया नस्

अप्लुतादप्लुत इत्यनयोस्तु आगच्छतु देवदत्ता ३ अत्र स्नातु विष्ठतु देवदत्त आ३ग्निरित्यादौ चारितार्थ्यमितिभावः।

जश्त्वापवाद इति। सर्वत्रपदांते सकारस्य जश्त्व प्राप्त्या ढत्व विधाय कस्य वैयर्थ्यापत्त्या रुत्वं जश्त्वाप वाद इति भावः। नन्वेवं रुत्व शास्त्रस्य जश्त्वशास्त्रे सिद्धत्वाभावाय रुत्वशास्त्रे पूर्वत्रासिद्धमित्यस्यानुप स्थितौरुत्वस्य कमपि प्रत्यसिद्धत्वाभावेन संयोगांत लोपं परत्वाद्वाधित्वा रुत्वे यणः प्रतिषेधाज्झल तत्वाभावाच्च संयोगांतलोपाप्राप्त्या श्रेयानित्यादौ दोषोऽतआह् श्रेयानित्यादौत्विति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्तस्क्षुद्रेषु' (का० वा०) इतिवार्त्तिके आदेशत्वमेव, नासिकाया इत्युक्तेः। अत एव तद्विषये नासिकाक्षुद्रः' इत्यादि न। अत एव पदादिषु, मांस्पृत्स्नूनामुपसंख्यानम्' इतिवार्त्तिके स्थाननिर्देशो न कृत इत्याहुः।

प्रत्याहार इति। व्याख्यानादौटष्टकारेणेति भावः। (१) अक्लीबस्येति। पर्युदासपरतयाऽप्यस्य भाष्ये व्याख्यानात् लघुत्वाच्चेति भावः। प्रसज्यप्रतिषेधेन व्याख्यानेऽत एव ज्ञापकात्केषांचिदसमर्थसमासानां साधुत्वं बोद्धयम्।

स्वादिषु (१।४।१७)। सुत्र प्रथमैकवचनम्। आदिशब्देन कबन्तानां ग्रहणं (१) व्याख्यानात् तदाह– कप्प्रत्ययावधीति। (२) तदन्तेष्वित्यर्थः।

यचि भम् (१।४।१८)। समाहारद्वन्द्वे सौत्रत्वान्न टच्। यचीत्यनेन स्वादेर्विशेषणात्तदादिविधिः। असर्वनामेति। तेन 'सुपादौ' इत्यादौ पादः पन्न। भसञ्ज्ञा पदत्वकार्यप्रतिबन्धरूपेऽशास्त्रीयेऽपि कार्ये भवति, नपदान्तसूत्रस्थ भाष्यप्रामाण्यात्।

(३) आकडारा (१।४।१)। 'प्राक्कडारात्' (२।१।३) इति नावधिः; तत्पुरुषो द्विगुश्चेति लिङ्गात्, समावेशार्थ हि तदित्याह-कडारा इत्यादि। व्याप्त्यर्थकाऽऽङा 'आचार्थात्' इति वक्तुं युक्तम्। एकैवेति। (१) संख्यावाच्येकशब्दोपादानादवधारणं सम्पद्यत इति भावः। या परेति। द्वयोः सावकाशयोः परा, निरवकाशत्वे तु सैवेत्यर्थः। आभ्यामेव बाधसिद्धस्तु, न; अन्यत्र तव्यदादौ कृत्कृत्यप्रत्ययसञ्ज्ञादीनां समावेशदर्शनेन विरोधाभावाद् विप्रतिषेधाप्रवृत्तेः। लौकिकस्य तक्रकौण्डिन्यन्यायस्यापि लोके सञ्ज्ञाविषये (२) ऽदर्शनेन शास्त्रेऽपि संज्ञाविषयेऽप्रवृत्तेश्च। तेनेति। अनवकाशत्वेनेत्यर्थः।

अस्यरुत्वस्य असिद्धत्वात्संयोगांतलोपं प्रत्यसिद्धत्वाद्रुत्वशास्त्रोपस्थित पूर्वत्रासिद्धमित्यत्रत्य पूर्वपदेन जस्त्वाति रिक्तस्य ग्रहणेनाप्युपपत्तौ सर्वथारुत्वशास्त्रे पूर्वत्रेत्यस्यानुपस्थितावुत्तरत्र मंडूकानुवृत्तौ चन मान मितिभावः। व्याख्यानादिति। तस्माच्छसोन इति लिंगादित्यर्थः। पूर्वस्यादीर्थत्वादिति। रामान्‌हरी नित्यादौ इत्यर्थः। ननुयत्रपूर्वो दीर्घ स्तत्रैवेदं प्रवर्तेतेति चेन्न। शसिपूर्व इत्येव सिद्धे सामान्य सूत्र करणेन दीर्घाज्जसीत्यस्य नादिचीत्यस्य चारंभेण ह्स्वांतेप्येतत्प्रवृत्तिरिति ज्ञापनादिति भावः। स्पष्टं चेदं स्वादिष्विति सूत्रे कैयट इति। तत्रासर्वनाम स्थान इति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परोदाहरणं तु 'अपादानमुत्तराणि कारकाणि बाधन्ते, इत्याद्याकरे स्पष्टम्। विरोधाद्यभावेन विप्रतिषेधसूत्राद्य (३) प्रवृत्तावपि परत्वादेरन्यत्र बलवत्त्वेन दृष्टतयाऽत्रापि तेन व्यवस्था। अपादानादिसञ्ज्ञानां समावेशे तु तत्कार्ययोः (४) पर्यायापत्तिर्दोषः। भपदसंज्ञयोः समावेशे तु 'राज्ञः' इत्यादौ नलोपस्यापत्तिर्बोध्या। न च 'राजन्यः' इत्यादौ 'सुप्तिङन्तम्' (१।४।१४) इति पदत्वं दुर्वारम्, परया भसञ्ज्ञया तु न बाधस्तस्या अन्तरङ्गत्वादिति वाच्यम्, (५) समानावधिकाया अन्तरङ्गाया अप्यनया बाध्यसामान्यचिन्तयाऽपवादत्वेनैव बाधादित्याहुः।

आकडारस्थसञ्ज्ञासु च यथोद्देशपक्ष एवेत्यदद्रयङ्शब्दे निरूपयिष्यते। भपदसञ्ज्ञाविधावङ्गप्रकरणे भस्येत्यस्य पाठेनाङ्गमित्यनुवर्त्याङ्गं सत् पदं भवति, भं भवतीत्यर्थेन ताभ्यां तस्य (१) समावेश एव न पर्याय इति बोद्धयम्। पुरुषसञ्ज्ञापरस्मैपदसञ्ज्ञयोरपि 'णलुत्तमो वा' (७।१।९१) इति ज्ञापकात्समावेशः। गुरुलघुसञ्ज्ञे वर्णस्य, नदीघिसञ्ज्ञे तदन्तस्येति भिन्नावधिकत्वात्समाविशतः। उभे अपि वर्णस्येति पक्ष आकरे उपलभ्यमानोऽप्येकदेशिन एव समावेशानुपपादादिति दिक्। यलोप इति। 'हलि सर्वेषाम्' (८।३।२२) इत्यनेनेत्यर्थः।

अल्लोपोऽनः (६।४।१३४)। तपकरणं किम्? अनितेः क्विपि 'आनः' इत्यादौ लोपाभावाय। अन्त्वं त्वत्रैकदेशविकृतन्यायेनेत्यन्यत्र विस्तरः। पूर्वस्मादिति। 'अचः परस्मिन्' (१।१।५७) इत्यत्र 'पूर्वविधौ' इत्यस्यावृत्त्या पञ्चमीसमासाश्रयणादयमर्थो लभ्यते इति भावः। तेन (२) 'प्रत्यैषिषन्' इत्यादिसिद्धिः। अन्यथा जुस् स्यात्। अत एव 'उभे अभ्यस्तम्' (६।१।५) इति सूत्रे उभेग्रहणं यत्रोभे श्रूयेते तत्रैवाभ्यस्तसञ्ज्ञार्थम् 'ऐर्त्सन्'

प्रसज्य प्रतिषेध इतिपक्षे वागित्यत्र सुप्तिङंतमित्यस्य स्वादि ष्वित्यनेन परत्वाद्बाधे तस्याप्यसर्व नामस्थान इत्यनेन बाधेपदत्वाभावात्कुत्वं न स्यादि त्याशंक्य नोत्सहते प्रतिषिद्धं सद्धातु मितिभाष्य व्याख्यावसरे कैयटइत्यर्थः। ननु रोग्रहणादित्येवसिद्धे उकारानुबंधेति व्यर्थमत आह्। उकारेत्सं ज्ञकेति तत्फलमाह। तेनेति। ननु भो इत्यादि पूर्व कस्य रोरित्यर्थे प्रभोरिदमित्यादांवतिव्याप्तिः स्याल्लक्षणप्रतिपदोक्त परिभाषास्वीकारेतु विभाषा भवदिति निष्पन्नेष्वव्याप्तिः स्यादत आह्। इदमिति। वस्तुत इति च दीर्घे इति ग्रहोलिटीत्यत्राच इत्यस्योप स्थितावप्यजंतस्येट इत्यर्थादिट

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यत्राभ्यस्तलक्षणो जुस् मा भूदित्युक्ते शपैकादेशस्य पूर्वविधाविति पञ्चमीसमासेन स्थानिवत्त्वाज्जुसोऽप्राप्तेरसति प्रयोजने उभेग्रहणं सहार्थमित्युक्तम्। तेन उभे यत्र श्रूयेते इत्यर्थेऽपि 'प्रत्यैषिषन्' इति सिद्धये आवश्यकेन पञ्चमीसमासेन तत्सिद्धावुभेग्रहणं सहार्थमिति तद्भावः।

इति पक्षे त्विति। तुनाऽस्यानित्यत्वं सूचितम्। 'प्रविगणय्य' इति भाष्योदाहरणमपि तदनित्यत्वे एव सङ्गच्छते। अत एव 'हे गौः' इत्यत्र वृद्धेः स्थानिवत्त्वान्न सम्बुद्धिलोपः। पूर्वस्मान्निमित्तत्वेनाऽऽश्रितादिति व्याख्याने तु न मानम्।

(कि चित्तु पूर्वस्माद (१) व्यवहितपरस्यैव कार्ये स्थानिवत्त्वम्। 'प्रविगणय्य' इत्यादौ तु स्थानिवद्भावलब्धाकारस्यैव व्यपदेशिवद्भावेन लघुपूर्वत्वमादाय न दोष इति तदनित्यत्वे न मानमित्या (२) हुः)।

पूर्वत्रासिद्धे नेति। अतिदेशदृष्टया त्रिपाद्या असिद्धत्वेन न्यायसिद्धानुवादोऽयम्। तत्फलं त्वतिदेशान्तराणां वतिघटितानां त्रिपाद्यां प्रवृत्तिबोधनम्। अत एव (३) 'अमी' 'क्षीरपेण' इत्यादौ मीत्वणत्वे भवतः। अत्रैकारस्यादस्सम्बन्धित्वं; पे इत्यस्यैकाजुत्तरपदत्वञ्चान्तवद्भावाधीनम्। तस्य दोष इति। इदं वाचनिकमेव। 'न मु ने' (८।३।३) इति सूत्रे 'न' इति योगविभागस्तु भाष्ये न दृश्यते। अत एव सिद्धकाण्डं वार्त्तिककृताऽऽरब्धं, 'नलोपः सुप्' (८।२।२) इति सूत्रञ्च सूत्रकृता।

प्रकारार्थमिति। प्रकारः सादृश्यं, तच्च सुप्त्वेन। 'मांस्पचनी' इत्यादावपि 'न लुमता' (१।१।६३) इतिनिषेधानित्यत्वाच्छसादिपरत्वं बोद्ध्यम्। शब्दत्वेन सादृश्यमित्यन्ये, तन्न,

---

एव विशेष्यत्वान्न दोषइतिभावः। एवंह्लङ्यादि सूत्रेपि हलंतमपृक्तसंज्ञक सुतिसीतिलुप्यत इत्यर्थः। तेन राजेत्यादौ सर्वनाम स्थानेचेतिदीर्घोऽच कादित्यादौतिप्यनस्तेरितिदत्वमचकादिव्यादौ सिपि धातोरिति रुत्वं च सिद्ध यतीति बोध्यम्। ननु सुबंतस्यानयने विशेषणतयाऽलाश्रयणमत आह्। तत्प्रयुक्त इति।

नप्रत्ययवृत्ति धर्मलाभ इति। स्थानिभूताल रूप प्रत्ययवृत्ति धर्मलाभेनेत्यर्थः। ननुस्थानिवत्सूत्रेऽनलविधावित्युक्तेस्तस्या त्राप्रवृत्तावप्येतस्याप्रवृत्तौ मानाभावोऽत आह्। लक्षणेति। प्रत्ययेति। स्थानिभूतानल्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'वा शोकष्यञ्रोगेषु' (६।३।५१) इत्यस्य वैयर्थ्यापत्तेः, 'नासिकाया यत्तस्क्षुद्रेषु नस्' इति भाष्य पठितवार्त्तिकस्य (४) वैयर्थ्यापत्तेश्च। 'आसन्यं प्राणमूचुः' इत्यत्रापि तद्वदेव शसादि परत्वम्। अत्र 'सुप्रभृतिषु' इति वाच्ये 'शस्प्रभृतिषु' इत्युक्त्याऽन्यत्र क्वचिदेव प्रवृत्तिर्बोद्धयते। अत एव पद्हन्निशां ग्रहणं चरितार्थम्। तेषां द्विविधानामपि कोशसिद्धतया तत्र व्यवस्थार्थताया एव वक्तव्यतया सुप्प्रत्ययमात्रे प्रवृत्तौ तस्या असम्भवेन तद्वैयर्थ्यं स्पष्टमेव। प्रकारार्थत्वे प्रमाणमाह–भाष्ये इति। तत्र हि 'शस्प्रभृतिष्वित्युच्यते, अशस्प्रभृतिष्वपि दृश्यते–शलादोषणीक कुकद्दोषणी याचते महादेवः' इत्युक्तम्। आद्यस्याध्रिगुप्रैषे पठ्यमानस्य शलाकाकारे दोषणी इत्यर्थः। छान्दसः कादिलोपः। एतेन दोष इत्यकारान्तस्य दूषणवाचिनो दोषन्नादेश इत्यपास्तम्।

तेन पदङ्घ्रिरिति। न च कोशस्थपदादीनां पादाद्यादेशत्वे पादादिभ्यः पृथक्पदादिवचनं तत्र व्यर्थम्। न हि स्थान्यादेशयोः पृथगुपादाने प्रयोजनमस्ति, स्थान्युपादानेनैव तदर्थाभिधानसमर्थादेशस्याप्यर्थबोधनात्। अत एव नसाद्यादेशानां कोशेऽनुपन्यास इति वाच्यम्, पदादीनां भाष्यरीत्याऽनादेशत्वात्। तत्त्वेऽपि 'तृज्वत्क्रोष्टुः' (७।१।९५) इतिवद्व्यवस्थार्थमस्या वश्यकत्वेन सौ परतो हृदादीनां प्रयोगार्थं प्रकारार्थत्वस्यावश्यकत्वात्। स्पष्टं चेदं 'वा शोक' (६।३।५१) इति सूत्रे मूले।

(१) कोशे शब्दा अर्थपरा एव। शक्तिग्रहस्तु पदत्वहेतुका (२) नुमानेन सामान्यत एव। एवञ्च 'विष्णुर्नारायणः' (अम० को० १।१।१८) इत्यादौ विष्णुपदार्थाभिन्नो नारायणपदार्थ इति क्रमेण बोध इत्यादि मञ्जूषायां नामार्थवादे विस्तरेण निरूपितम्। 'एतत्पदममुकवाचकम्' इति शक्तिग्रहस्तु स्वस्वप्रसिद्धिमादाय तत्तत्पुरुषस्यानियतः

रूप प्रत्यय निमित्तकार्यस्य दीर्घाहो निदाघेत्यादावसुपीति निषेधस्येत्यर्थः। शास्त्रादिदेशपक्षे आह्। तन्निमित्तव्यवहारस्येति। प्रकृते सुप्तत्वराजेत्यादौ सुबंतत्वस्य चेत्यर्थः। सर्वेसर्व पदादेशा इति पक्षेदीर्घाह इत्यादे र्निर्वाहमाह्। एवमिति। अन्यत्रेति मनोरमायामित्यर्थः। इत्याहुरिति। अनेनारुचिर्बोधिता। वार्तिकेभवच्छब्दग्रहणस्य नोपयोग इति। व्याख्यानादिति, लोपः शाकल्पस्येत्येव भो इत्याद्यनुवृत्त त्येत्यादि वक्ष्यमाण रूपादित्यर्थः। ननु उइतीत्य त्रोञ इति प्रगृह्यत्वविकल्पात्पक्षे यणिमिथो वित्या दौधात्वनवयवस्यापिवकारस्य संभवाद्व कारानुवृत्तिः स्यादेवेत्यत आह्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पश्चान्मनसैव। 'अघ्न्ये देवि सरस्वति ईडे काव्ये विहव्ये एतानि तेऽघ्न्ये नामानि; इत्यादौ यत एतानि तव नामानि अतस्त्वदभिन्ना एषामर्था इति बोधः। अत एव 'नामन्त्रिते समानाधिकरणे' (८।१।७३) इतिसूत्र भाष्ये सामान्यवचनमित्यस्य इदं प्रत्युदाहरणं दत्तम्। अन्यथैकार्थबोधकत्वरूपसामानाधिकरण्यस्या प्यभावात्तद सङ्गतिः स्पष्टैव। एकशेषस्तु न, तथा सति तत्तच्छब्दस्वरूपस्य सम्यग् (१) बोधानापत्तेः। अनेकशब्दानां स्वरूपबोधनपूर्वमे कार्थबोधने कोशतात्पर्यात्। अत एव 'यत्तदेतेभ्यः' (५।१।३९) इत्यादौ पाणिनिनैकशेषो न कृतः। एतेन कोशे शब्दानां शब्दपरता, अत एवैकशेषो न। अर्थपरत्वन्तु न सम्भवति इतः पूर्वं शक्तिग्रहाभावात्। एते शब्दा एकार्था इति बोधः। एवञ्चात्र प्रकारार्थत्वाभावेऽपि न क्षतिरित्यपास्तमिति (२) दिक्।

संख्यावि (६।३।११०)। 'सायेभ्यः' इति वक्तव्ये पूर्वग्रहणमुत्तरपदे इत्यधिकृतस्य षठ्यन्तत्वलाभाय। एतेन 'व्यह्नप्रियः' इत्येवैतदुदाहरणामित्य पास्तम्।

विश्वपा इति। विश्वं पातीति विग्रहे 'आतोऽनुपसर्गे' (३।२।३) इति प्राप्ते वाऽसरूपन्यायेन 'आतो मनिन् क्वनिब्वनिपश्च' (३।२।७४) इति चेन विच्। स चाऽऽदन्तेभ्यो लोकेऽपि, 'कीलालप आगतम्' इति 'विभाषा पूर्वाह्ण' (४।३।२४) इति सूत्रे भाष्य प्रयोगात्। क्विपस्त्वादन्तेभ्यो भाष्यानुक्तक्विब्भ्योऽनभिधानमेव। अत एव 'यू स्त्र्याख्यौ' (१।४।३) इत्यत्र विजुक्तो भाष्ये, न तु क्विप्। अत एव 'शंस्थाः' इत्यादिप्रयोगेषु भाष्यकृता इत्वं न कृतमिति कचित्। अन्ये (३) क्विपमेवाहुः।

दीर्घाज्ज (६।१।१०५)। चेन 'इचि' इत्यनुकर्षः। 'दीर्घाच्छस्येव' इति नियमपरं 'दीर्घाच्छसि' इत्येव तु न सूत्रितम्, दीघदिव शसीतिविपरीतनियमापत्तेः। प्रत्याहारेषु

भाष्यानुसारिण इति अनभिधानाच्चेति। न पदांताः परेणः संतीति लण्सूत्रस्थभाष्येण लोपोव्योरिति सूत्रस्थभाष्येण व्योरिति सूत्रस्थ क्वानुप संख्यानमिति वार्तिकस्य वकारस्य चारंभ प्रत्याख्या नपर भाष्येण च शास्त्राविधेय वकारांतादी नामनभि धानाच्चेत्यर्थः। एतदपीति। अत्रापि पूर्वोक्तमेवमानं बोध्यम् अस्य हलि सर्वेषामित्यस्य।

असिद्धत्वादिति– भो इत्यादि पूर्वकस्य साहचर्येणापूर्वेपिलघु प्रयत्न एव लोपस्यैत प्राप्तत्वेनालघुप्रयत्नेऽप्राप्तत्वादित्यर्थः। तद्बाधादिति एवत्सूत्रारंभ सामर्थ्येन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जातिपक्षाश्रयणादत्र प्राप्तिः। न्याय्यत्वादिति। जसि पूर्वसवर्णदीर्घनिषेधस्य न्याय्यत्वादित्यर्तः। धातोः किं हाहानिति। अव्युत्पन्नमिदम्। अस्य क्रियाशब्दत्वे तु 'सान्' इति प्रत्युदाहरणम्।

परे तु 'क्त्वः' 'श्नः' इत्यादिसिद्ध्यर्थम् 'आतोऽनापः' इति वक्तव्यम् इत्युक्ते 'आत' इति योगविभागेन तत्संसाद्ध्य तत्प्रत्याख्यातं भाष्ये। एवञ्च साशब्दादेर्यद्यभिधानं तदा योगविभागेन लोप इष्ट एव। सूत्रे धातु ग्रहणमाबन्तनिवृत्त्यर्थमेव। भाष्यवार्त्तिककृतो रज्ञानकल्पनापेक्षयेदृशार्थ कल्पनस्यैवौचित्यात्। आबन्तादाचारक्विबेव न, तत्क्विबन्ताद्वा कर्त्तृक्विब् न अनभिधानादिति न तत्र सूत्रवार्तिकयोर्विरोधः। (१) अत एव 'प्रथमयोः' (६।१।१०२) इतिसूत्र भाष्ये पररूपं बाध्यसामान्यचिन्तया दीर्घमात्रस्य बाधकमिति पक्षे 'रामान्' इत्यादिसिद्ध्यर्थम् 'अतो दीर्घ' इति, 'सुपि च' इति चानुवर्त्तमाने 'बहुवचने भल्येत्' (६।३।१०३) इति सूत्रे बहुवचने इति योगविभागेन पररूपबाधकं दीर्घं विधाय 'रामाणाम्' इत्यादावनेन दीर्घे परत्वात्कृते 'अग्नीनाम्' इत्यादौ सावकाशस्य नुटोऽप्राप्तिमाशङ्क्य 'ह्रस्वनद्यापः' (७।१।५४) इति सूत्रे 'आज्जसेः' (७।१।५०) इत्यत आद्ग्रहणानुवृत्त्या समाधाय 'कीलालपाम्' इत्यादौ नुड्विधायके 'आतो धातोः' इत्यनुवर्त्य लोपेन नुड्बाधकेन समाहितम्। नुड्विधायके आब्ग्रहणं न कार्यमिति तदाशयः। अधात्ववयवाकारान्तानां लोपाभावे तु (२) तदसङ्गतिः स्पष्टैवेत्याहुः। क्त्वः श्न इति। क्त्वाप्रत्ययस्य इडित्याद्यर्थकं 'क्त्व इट्' 'श्नः शस्येत्त्वम्' इत्यादिप्रयोगस्थमत्रोदाहरणम्। एतेनाऽऽचारक्विबन्तात् कर्तृक्विपा एते प्रयोगा निर्वाह्या इत्यपास्तम्, आचारक्विबन्तप्रकृतिककर्तृक्विबन्तस्य भाष्ये क्वाप्यनुपन्यासेन तेभ्यः कर्तृक्विपोऽनभिधानस्यैव लाभाच्च।

साहचर्य बाधेन तत्प्रवृत्युत्तर मप्यस्य प्रवृत्या तद्बोधितामा वांशबाधादित्यर्थः। एवेति। तथाचमो इत्यादी नामोत इत्येव सिद्धत्वाद संबंध एव स्यादिति भावः। ननु उश्चइश्चवी नवी अवी तयोरव्योरि त्यत्र वलोपार्थमेव वकारानु वृत्तिरत आह्। अव्यपरे इत्यादिति एवं चाव्योरित्यत्र लोपो नैवेष्ट इति भावः। आदिना हयवरडिति सूत्रस्थाव्युपधादिति भाष्य प्रयोगस्य ग्रहणं क्वचिदिति पंचम्यंतात्परः प्रत्ययो यत्र कार्यांतरविधानाय परिगृह्यते तत्रेत्यर्थः। एवचोत्तमै काभ्यामित्यादिनिर्देशैर्व्यापकत्वात्प्रत्ययग्रहणे चापंचम्या इत्येव ज्ञाप्यते ननु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(१) जसि च (७।३।१०९) ह्रस्वस्य गुण इति वर्त्तते।

ह्रस्वस्य (७।३।१०८) 'सम्बुद्धौ च' (७।३।१०६) इत्यतः संबुद्धाविति वर्त्तते।

शेषो घ्य (१।४।७)। 'यू स्त्र्याख्यौ' (१।४।३) इत्यतो यू इति, 'ङिति ह्रस्वश्च' (१।४।६) इत्यंतो ह्रस्व इति च वर्त्तते। शेषपदार्थमाह– अनदीत्यादि। तदन्तमिति। अनुवृत्तयुभ्यां शेषपदार्थस्य विशेषणात्तदन्तलाभ इति भावः। ननु 'मत्यै' इत्यत्रानवकाशत्वान्नदीसञ्ज्ञैव भविष्यतीति शेषग्रहणं व्यर्थमत आह– एकसञ्ज्ञेति। अधिकारादिति। 'कडाराः कर्मधारये' (२।२।३८) इत्येत्पर्यन्तं तस्य बुद्धिस्थत्वादित्यर्थः। स्पष्टार्थमिति। स्पष्टतया तदन्तविधिलाभार्थमि (१) ति भावः। मात्रे इति। 'ऋतो ङि' (७।३।११०) इति तु यू इत्यनुवृत्तावेव तात्पर्यग्राहक मिति भावः।

आङो ना (७।३।१२०) पुंसीति तु नोक्तम्, 'अमुना कुलेन' इत्यत्र मुत्वस्यासिद्धत्वान्नुमनापत्तौ पुंस्त्वाभावेन नाभावस्याप्यनापत्तौ रूपासिद्धेः (२) 'न मु ने' (८।३।३) इति निषेधस्तु न; नुमि 'न मु टादेश' इति (३) वार्त्तिकविरोधात्। अत एव सूत्रकृता 'क्त्वि' इतिवत् 'नि' इति नोक्तम्। तथा सति तन्त्रेण नकारनिर्देशोऽपि सम्भाव्येत। आगन्तुनाऽकारेण तस्यापि ने इति निर्देशेन तन्त्रस्वीकारे त्वत्यन्तं ज्ञानगौरवमिति न किञ्चिल्लाघवमिति स्पष्टं भाष्ये। आङितीति। ङ्कारविशिष्टा सञ्ज्ञा न त्वस्य ङस्येत्त्वम्। अत एव 'हरिणा' 'मत्या' इत्यादौ न गुणः। एवम् 'औङ आपः (७।१।१८) इत्यत्रापि। अत एवासम्भवे एवापवादत्वमिति वार्त्तिकमतेऽपि 'रमे' इत्यादौ न याट्।

घेर्ङिति (७।३।११)। 'सुपि च' (७।३।१०२) इत्यतः सुपीति वर्त्तते। तेन 'पट्वी' इति

सप्तमीनिर्दिष्ट इत्यादि विशेष इतिभावः। ननु चोदाहरणमादरणीयमिति न्यायेन रात्रि शब्द परत्वेप्येतत्प्रवृत्तौ न बाधकमत आह्। नलोपः प्राप्ति पदिकांतस्येतीति। अक्षतेरिति। सर्वेसर्वपदादेशा इतिन्यायेनेतिभावः। ननु अहन् शब्दे रोसुपीति नित्येप्राप्तेऽनेन विकल्प विधानं सार्थकमिति कथं विसर्ग बाधोऽत आह् अनुवाद इति– ननुतत्पुरुषे रोरित्य स्यासिद्धत्वादनीय र्येवप्रवृत्तौ शास्त्र स्याल्प विषयता स्यादत आह्। चचारेत्यादौ चेति। आदिना केलिमरः संग्रहः। ननुणि जंतात्कर्मण्यणि वृत्तित्रयकल्पनमिति गौर वमत आह्। भाष्येत्विति। व्यधिकरणबहुव्रीहिरिति। सप्तमी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिद्धम्। न च 'घेर्ङि' इत्येव सूत्रं कार्यं, ङकारादावित्यर्थः, 'प्रबाहवा' इत्यत्र 'आङ्याजयारामुप संख्यानम्' (का० वा०) इत्याङादेशस्तु ङा इत्येव वक्तुं शक्यः, इति वाच्यम्; 'मत्याम्' इत्यादौ 'आण्नद्याः' (७।३।११२) इत्यस्यानापत्तेः, अल्विधित्वेन स्थानिवत्त्वाभावात्। इद्ग्रहणे त्वनुबन्धकार्यत्वात् स्थानिवत्त्वं स्पष्टमि (१) ति दिक्।

ङसिङ (६।१।११०)। एङो द्वित्वेऽपि अस्वरितत्वाद्यथासंख्यं न। [(२) 'ङितश्च' ★ इति तु नासूत्रि 'ऋत उत्' (६।१।१११) इत्यत्र ऋदन्तात् ङितोऽति परे पूर्वरूपमित्यर्थे 'जाग्रति' इत्यादौ दोषः स्यादिति। ङसोरित्येव सिद्धे ङसिग्रहणं स्पष्टार्थम्।

अच्च घेः (७।३।११६)। इदुद्भ्यामिति किम्? 'धेः परस्य ङेरौदच्च' इति, 'ङिप्रकृतेर्घेरौदच्च' इति वाऽर्थो मा भूदिति अदौतोस्तपरत्वं मुखसुखार्थम्। इत्सञ्ज्ञायां च 'तस्य लोपः' (१।३।६) इति तयोर्लोपः। न चौतो विभक्तित्वात् 'न विभक्तौ' (१।३।४) इति निषेधात् कथमित्सञ्ज्ञेति वाच्यं, मुखसुखार्थमित्यस्य तदेव प्रयोजनं न तु कार्यान्तरं, नापि प्रयोगे श्रवणमित्यर्थात्तत्वप्रतिज्ञयैव 'न विभक्तौ' (१।३।४) इत्यस्य तत्राप्रवृत्तेः। अत एव 'इद्वृद्धौ' (६।३।२८) 'पत्यावैश्वर्ये' (६।२।१८) इत्यादिनिर्देशाः (१) सङ्गच्छन्ते। यदि तूच्चारणार्थानां विनैव शास्त्रमपगमः स्यात्, तदा इत्सञ्ज्ञकानामपि तद्वदेव निवृत्तिरस्तु, किं तस्य लोप इत्येनन? स्वभावादस्योभयत्रापि समत्वात्। ध्वनितञ्चेदं 'तस्य लोपः' (१।३।६) इत्यत्र भाष्ये इति 'दिव औत्' (७।१।८४) सूत्रे निरूपयिष्यामः।

न चैवम् 'अग्नौ' इत्यत्रौतः स्वरितत्वापत्तिः, न च 'प्रत्ययाप्रत्यययोः' (प० भा०) इत्येव सिद्धे पुनः 'तिति प्रत्ययग्रहणं कर्तव्यम्' (का० वा०) इति वार्त्तिकादौपदेशिक प्रत्ययत्ववत्येव तत्प्रवृत्तिरिति वाच्यम्, तस्याः परिभाषाया लक्ष्यसिद्धये भाष्य कृता क्वाप्य (२) नाश्रयणात्।

विशेषण इति सप्तमी ग्रहणेन व्यांधिकरणानामपि वहुव्रीहिज्ञापनादिति भावः। व्याख्यानादिति। अच्परिभाषोपस्थित्या अच एवाणो ग्रहणे तयैवसिद्धेऽण् ग्रहण सामर्थ्या दित्यर्थः। स इति विरोध इत्यर्थः। ननु ङः सीत्यादावुभय निर्देशे निर्देशद्वयस्याप्यचारितार्थ्येन तन्मूलक परिभाषाद्वयस्याप्यचारितार्थ्या द्विप्रतिषेधाभावेन विप्रतिषेधेपरमित्यस्य प्रवृत्तिर्न स्यादत् आह्। प्रायेणेति। पुनर्धिर्भवत्येवेति। ता तङभाव पक्षे इत्यर्थः। ननु कार्यकालपक्षे परिभाषाद्वयस्यापि विधि सूत्रेणाकर्षवाद् विप्रतिषेध सूत्रस्याप्रवृत्तिरेवस्यादत आह्। त्रिपादीस्थेनेति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्पष्टञ्चेदं 'तित्स्वरितम्' (६।१।१८५) इत्यत्र कैयटे। 'अङ्गस्य' (६।४।१) इति सूत्रे भाष्ये तु तत्प्रत्याख्यानायैकदेशिना सोक्ता, न तु सिद्धान्तिनेति सुस्पष्टं तद्विदाम्। 'श्नान्नलोपः' (६।४।२३) इति सूत्रे भाष्येऽपि ध्वनितस्तद भावः, इति वाच्यम्, प्रत्ययग्रहणमित्यस्य विधानकालिक प्रत्ययत्ववद्ग्रहण मित्यर्थात्। अत एवाऽऽदेशेषु दित्त्वमाश्रित्य तत्प्रत्याख्यानेन फलभेदो नेति दिक्।

अनङ् सौ (१।८।६३)। साविति प्रथमैकवचनम् असम्बुद्धाविति पर्युदासात्। नकाराकारस्तू चारणार्थ इत्सञ्ज्ञकः।

(३) अलोऽन्त्यात्। (१।१।६५)। अवध्यवधिमतोः साजात्यादाह–पूर्वो वर्ण इति। अत एव 'शिष्टः' इत्यादौ शा इति समुदायस्य 'शास इत्' (६।४।३४) इतीत्वं न। (४) पञ्चम्यन्ताल्ग्रहणाच्च शस्य न।

सर्वनामस्थाने (६।४।८)। 'नोपधायाः' (६।४।७) इति 'ढ्रलोपे' (६।३।१११) इत्यतो दीर्घ इति चानुवर्त्तते।

अपृक्त (१।२।४१) अपृक्त इति पुंस्त्वमविवक्षित्तम्। अत एवापृक्तं हलिति सङ्गच्छते। अपृक्तप्रदेशेषु हल्ग्रहणेनैव सिद्धे सञ्ज्ञाविधानमदृष्टार्थम्।

हल्ङ्याप् (६।१।६८) सुतिसीति पृथक् पदम्। हलन्तादिति। सुतिसीनां प्रत्ययत्वेनोपस्थितस्य यस्मात्स विहितस्तदादेरित्यस्य विशेष्यत्वेन (१) तदन्तलाभ इति भावः। एवं ङ्याबंशे तदुपस्थित्या ङ्याबन्तान्तादित्यर्थो द्रष्टव्यः। हल्ङ्याब्भ्यः किमिति। 'रामः' इत्यादौ दीर्घान्तत्वाभावान्न दोष इति प्रश्नः। 'दीर्घात्किं निष्कौशाम्बिरतिखट्वः'

संज्ञानांत्विति। तुनाऽरुचिबोधिता कार्यकाल पक्षे संज्ञानां कार्य देशीयपरत्वे राज्ञ इत्यादौभपद संज्ञयोराकडारीय त्वाभात्सभावेशापत्त्याऽल्लोपोन इत्यत्र कार्यकाल संज्ञापरिभाषं भस्येत्युपस्थितमिदं भवति यचिभमितिष्यङः संप्रसारण मिति सूत्रस्थ भाष्य विरोधात् प्रगृह्य संज्ञाय मंतरंगत्वेन विप्रतिषेधस्या संभवा दनुपयोगाच्चा दसोमादिति सूत्रस्थं भाष्यमेक देश्युक्तमिति। परिभाषाणां त्विति। अव्यानामनेकार्थत्वात्तु शब्दस्याप्यर्थवत्वात् संज्ञानां ग्रहणं बोध्यम् परिभाषेति। एवं च् गुणानां च परार्थत्वादिति न्यायेन संज्ञापरिभाषयोर्व्यवस्थापिकेयं न स्यादिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यारभ्य 'संयोगान्तलोपस्यासिद्धत्वाद्' इत्यन्तोऽपपाठः, मनोरमायां दर्शनात्। सखेति। यद्यप्यत्रैव 'सख्युरसम्बुद्धौ' (७।१।९२) इति लेख उचितस्तथापि नान्तलक्षणदीर्घेणैव सिद्धेः 'अत उपधायाः' (७।२।११६७) इत्यपेक्षया नित्यत्वेन तस्यैवौचित्याच्चात्र नोक्तम्।

अचो ञ्णि (७।२।११५)। 'मृजेर्वृद्धिः' (७।२।११४) इत्यतो वृद्धिरित्यनुवर्त्तते, अङ्गस्येति चाधिकृतं, तदाह–अङ्गस्य वृद्धिरिति।

ख्यत्यादिति। उच्चारणार्थाकारेण कृतयणः प्रयोगस्थस्यानुकरणाद विशेषेणोभयोर्ग्रहणमित्याह–खितीत्यादि। ङस्यादिपरस्ताद्वशः खिखीति तीशब्दप्रकृतिक एव सम्भवतीति भावः। सुसखेति। 'न पूजनात्' (५।४।६९) इति निषेधाद् 'राजाहः सखिभ्यः' (५।४।९१) इति टच् न। समुदायस्येति। असखीत्यस्य (२) सखिभिन्नावयवाविति वर्णसंज्ञापक्षेऽर्थः। (३) अत्र पक्षे पर्युदासेन तद्भिन्नप्रातिपदिकान्त्येवर्णदिरेव ग्रहणात् 'कृतं सख्या' इति वाक्ये न दोषः। सिद्धान्तिसम्मते तदन्तसञ्ज्ञापक्षे सखिभिन्नावित्यर्थः। पर्युदस्यमानसमर्पकसखिशब्दे तदन्तग्रहणन्तु न, विशेष्यासन्निधानादिति भावः। एतत्सर्वं हरदत्तानुरोधेन।

'यस्येति च' (६।४।१४८) इति सूत्र भाष्यात्तु 'सखिशब्दस्य तदवयवे लक्षणया सख्यवयवभिन्नयोरिदुतोरित्यर्थः। यथा 'अत्वसन्तस्य' (६।४।१४) इति सूत्रेऽधातोरित्येतद्घटकधातुपदस्य 'पिण्डग्रः' इत्यादिसिद्ध्यर्थ धात्ववयवे लक्षणाऽऽकरे दृश्यते तदन्तसञ्ज्ञापक्षेऽप्यसखीति ख्वोरेव विशेषणं, ततस्तदन्तविधिः। 'उतश्च प्रत्ययाद्' (६।४।१०६) इतिवत्। ततश्च सख्यवयवभिन्नेवर्णाद्यन्तमित्यर्थः। तदन्तविधिश्च शेषपदार्थविशेषणतया। एवञ्च प्रकृते नैव घिसञ्ज्ञा' इति लभ्यते। तत्र हि भाष्ये 'इवर्णस्य

भावः। परिभाषयोरपि अपिनासंज्ञानां ग्रहणं बोध्यम्। इत्यादयोपीति। आदिना अनुदात्तंपदं समर्थः पदविधिरित्यनयोर्ग्रहणं। कैयण्दि मतेप्याह। स्थानिवत्वेनेति। अनंतर इत्यर्थ इति। नतु विहित इत्यर्थोऽनञ्समास इति। ज्ञाप कादितिभावः। अनंतर इतिव्याख्याने फलमाह् तेनेति। ननुगौणे व्यावृत्यर्थमेतत्तदोरित्यस्यार्थ परत्वमाश्रित्यैतत्तदर्थ संबंधीयत्तदर्थगत संख्यामिधायीयः सुरितिव्याख्येयम् एवं चानञ्समासइत्यस्य न वैयर्थ्यं परमस ददातीत्यस्यापि सिद्धिश्चेत्यत आह् गौणेत्वति एवं च गौरवात् फलाभावाच्च न तथाव्याख्येयमिति भावः। व्याख्यानादिति। उत्तर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ईति किमुदाहरणम्? अतिसखेरागच्छति। यद्यत्र लोपो न स्यात्तदा कृतदीर्घस्य पूर्वान्तवद्भावेन सखिशब्दत्वाद् अतिदेशविषये प्रतिपदोक्तपरिभाषाया अप्रवृत्त्योपसर्जनह्रस्वत्वे कृतेऽपि घिसञ्ज्ञा न स्यात्। लोपे तु लक्षणप्रतिपदोक्त परिभाषया न दोषः' इत्युक्तम्। भवद्रीत्या विशिष्टस्य सखिभिन्नत्वेन घिसञ्ज्ञा निर्बाधैवेति तदसङ्गतिः स्पष्टैव। न च लोपेऽपि लिङ्गविशिष्टपरि भाषया दोषः। सखिशब्दस्य तदवयवपरत्वेन प्रातिपदिकग्रहणाभावात्। प्रातिपदिकत्ववदुपस्थापक पदोपादानं हि प्रातिपदिकग्रहणम्। व्यत्यात्सूत्रे 'किमर्थं विकृतनिर्देशो 'न सखिपतिभ्याम्' इत्येवोच्येत, अतिसखेरित्यत्र मा भूत्' इति भाष्येऽपि ङ्यन्तप्रकृतिक एवायम्। विहितविशेषणानाश्रयणेनेव प्रतिपदोक्तपरिभाषानाश्रयणेनैवैतद् भाष्यं प्रवृत्तमिति न तद्विरोध (१) इत्यलम्।

पतिः समा (१।४।८)। एवकार इष्टतोऽवधारणार्थः। स्मृतिपुराणेषु 'पतये' 'सखिना' इत्यादि व्याकरणानिष्पन्नत्वेनासाध्वेव। त्रिशङ्क्वाद्य याज्ययाजनादाविव तपोमाहात्म्येनासाधुप्रयोगेऽपि ऋषीणां दोषाभावात् यज्ञे कर्मण्येवासाधुप्रयोगे दोषाच्च। अस्माकमपि स्मृतिपुराणाध्ययनविधिबलात् तेषां तपोबलाच्च यज्ञमध्येऽपि तदन्तर्गततत्पाठे दोषाभावः। स्वातन्त्र्येणेदृशं प्रयुञ्जाना अस्मदादयः प्रत्यवयन्त्येव। अत एव नदीसञ्ज्ञासूत्रे भाष्ये 'छन्दोवत् कवयः कुर्वन्ति' इत्युक्त्वा 'न ह्येषेष्टिरस्ति' इत्युक्तम्। 'यू स्त्र्याख्यौ' (१।४।३) इति सूत्रे हरदत्तग्रन्थे स्पष्टतरञ्चैतत्। समास इत्युक्तेः बहुच्पूर्वे न घित्वम्। अत एव 'पतिर्वृत्तावेव' इति (१) नासूत्रि। वर्णसञ्ज्ञापक्षे पत्यवयवेकार (२) इत्यर्थः। तदन्तसञ्ज्ञापक्षे पत्यवयवेकारान्त इत्यर्थः। सूत्रे पतिशब्दश्च तद्वयवेकारे लाक्षणिकः। एतेन 'शेषो घ्यसखिपती' 'पतिसखी समास एव' इति वा सूत्र्यतामित्यपास्तम्। 'यस्येति च'

सूत्रे तस्यैव संभवादित्यर्थः। प्रभृत्यंत एव पाद इति भ्रम निरासायाह। द्वादशेति। वृद्धैरिति एवं च मूल कारस्य नतत्संमतमितिसूचितम्। व्यर्थमिति सास्मा अरं स इत्यस्यासिद्धेर्विरोधायेदं व्यर्थमितितदर्थः। शाकपार्थिवादित्वा द्रोधशब्दस्यलो पस्तदाह। सर्वमेतीदति। इति स्वादि संधिः।। दुर्गायैनमः ।।हनूमते नमः।।

।।श्रीगणेशाय नमः।। अर्थवदधातुः।। आवर्तिते प्रत्यय पदइति आवर्तिते प्रत्यय इति समुदाये विद्यमानं यत्प्रत्यय पदं तत्रेत्यर्थः। यत्रेति। ईदूदेदित्या दावित्यर्थः। तद्विषय इति। विषय शब्दोऽनन्यभावे ज्ञापक साजात्यात्त थैवलाभादिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(६।४।१४८) इति सूत्रस्थ भाष्यरीत्या 'सुपतिना' 'सुसख्या' इत्यादीष्टासिद्धया तथा न्यासस्य (३) कर्तुमशक्यत्वादिति स्पष्टमेवेति दिक्।

नित्यं बहुवचनान्त इति। 'किमः संख्यापरिमाणे' (५।२।४१) इत्यनेन किंशब्दाद् बहुत्वसंख्यावच्छिन्नसंख्येयविषयप्रश्न एव डतिरितिभाष्ये स्पष्टत्वादिति भावः।

बहुगण (१।२।३१)। संख्याप्रदेशेष्वे तत्सञ्ज्ञाकरणज्ञानरूपप्रकरण सत्त्वेऽपि तन्मूलकृत्रिमाकृत्रिमन्यायस्य न प्रवृत्तिः कर्त्तरि कर्मेत्यादाविव। अत एव 'संख्याया अतिशदन्तायाः' (५।१।२२) इति शदन्तपर्युदासः सङ्गच्छते। न हि शदन्ता कृत्रिमा संख्याऽस्ति।, तस्मात्संज्ञाप्रदेशेषूभयगतिः। किञ्च लोकप्रसिद्धमहासंज्ञाकरणेन प्रदेशेषु लोकप्रसिद्धार्थ स्याप्यवगतिरिति स्पष्टं भाष्ये। अत एव 'पञ्चकृत्वः' इत्यादिसिद्धिः। एतन्यायोपयोगस्त्व भ्यासाम्रेडितादिसञ्ज्ञाविषये द्रष्टव्यः। सूत्रे बहुगणग्रहणन्तु तयो (१) र्नियत विषयपरिच्छेदहेतुत्वाभावे नासंख्यात्वात्। बहुत्वादि हि (२) त्र्यादिसंख्याव्यांपको (३) धर्मविशेषः। अत एव भाष्ये 'एतत्सूत्रमतिदेशार्थं यदयमसंख्यां संख्येत्याह' इत्युक्तम्। यत्तु भाष्ये 'एकादिकया चापि संख्यायते' इत्युक्तं, तस्यायमर्थः–बह्वादिकयाऽपि स्वव्याप्यत्रित्वादिसंख्यया संख्यानकरणम्। संख्यायते। कतिशब्दोऽपि संख्यानकरणीभूतार्थविषयप्रश्नार्थकतया संख्यानकरणम्। एवं वत्वन्तेऽप्यूह्यम्। यद्वा, चापिशब्दौ वाक्यालङ्कारे।य एकादिकया संख्यायते साऽपि प्रदेशेषु यथा गृह्येतेति लोकप्रसिद्धमहासञ्ज्ञाकरणमिति तदर्थः। एतेन 'अर्थान्तरवाचित्वे सति बहुत्ववाचिनश्चेत्संख्याकार्यं तर्हि बहुगणयोरेव' इति नियमार्थं तत्। तेन भूर्यादीनां न तेषां वैपुल्याद्यर्थान्तरवाचित्वात्। वैपुल्यं विशालता। विशेष्यविशेषणदलाभ्याम बहुत्ववाचिन

भावः। सोपिनिषेधोज्ञापक साजात्प्रत्यासत्याच यस्य प्रत्यय संज्ञाक्रियते तेन प्राप्त तदंतविधेरेवतेन यञिओ श्चेत्यत्र फकस्तद्धित संज्ञाविधानेपि यञिञ्भ्यां तदंत विधि र्भवत्येव। न च तत्र प्रातिपदिकादित्यनेनान न्वयादेव तदंत विधिः प्रातिपदिक विशेषणे तदंत विधौ तदाहि विधेरभावात् परमगार्ग्य शब्दात्फगापत्तेरिति दिक्।। आवर्तिते प्रत्यय पदइति। अवर्तिते प्रत्ययपद इति छेदः। यद्वाऽवर्तिते प्रत्ययपदे विद्यमाने प्रत्यय पदइति सामानाधिकरणेन संबंधः। यत्र संज्ञेति। येन प्रत्यय पदेन तदंत ग्रहणं यत्र विधौसंज्ञाविधानं तद्विषये इत्यर्थः। तेन परमगार्ग्यशब्दान्न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकशब्दस्य वह्वर्थमात्र वाचिनां त्र्यादीनाञ्च न व्यावृत्तिः। यद्वा 'अनियतसंख्यावाचिनाञ्चेद् बहु गणयोरेव' इति नियमः। अनन्तशब्दवदनन्तवाचिशतशब्दस्य संख्याकार्याभाव इष्ट एवे (१) त्यपास्तम्। सङ्घवैपुल्यवाचकयोर्नेह ग्रहणं परस्परसाहचर्येण त्र्यादिसंख्याव्यापकधर्मवाचिनोरेव ग्रहणात्। 'वतु' इति सानुबन्धनिर्देशो 'ब्राह्मणवत्' इत्यादिव्यावृत्त्यर्थः। डतिस्तद्धित एव वतुसाहचर्यादित्यलम्।

'ष्णान्ता' (१।१।१४) इत्यतः षडिति वर्तते, (२) संख्येति च प्रकृतं, तदाह–डत्यन्तेति। अत एव 'षट्कति' (५।२।५१) इति डडनुवादेन थुग्विहितः। अत एव सञ्ज्ञाविधावपि प्रत्ययग्रहणे तदन्तग्रहणम्। संख्येति किम्? (३) पतयः।

प्रत्ययस्य (१।१।६१)। अनेकसञ्ज्ञाकरणाद् आवृत्त्या विभक्तिवि परिणामेन च तद्भावितसञ्ज्ञाश्रयणम्, अतो न सङ्करः। तेन 'हन्ति' इत्यादौ 'श्लौ' (६।१।१०) इति द्वित्वं न, तदाह–लुक्श्लुलुप्शब्दैरिति। 'अदर्शनं लोपः' (१।१।६०) इत्यतोऽदर्शनमित्यनुवर्त्तते। प्रदेशेषु भाविसञ्ज्ञाविज्ञानान्ना (४) न्योन्याश्रयः। एकसञ्ज्ञाप्रकरणादन्यदेशस्थत्वेन लोपसञ्ज्ञया आसां समावेशः। तेन प्रत्ययलक्षणसिद्धिः।

षड्भ्यो (७।१।२२)। 'जश्शसोः शिः' (७।१।२०) इयतो जश्शसोरिति वर्त्तते। षड्भ्य इति (१) विहितविशेषणम्। तेन गौणे न। 'परमपञ्च' इत्यादौ तु विशिष्टस्यापि संख्याप्रकारक संख्येयविशेष्यक (२) बोधजनकत्वेन संख्यावाचितया षट्त्वमस्त्येवेति न दोषः। स्पष्टञ्चेदं 'षट्प्रधान एष समासः' इत्यादिना सर्वादिसूत्रे भाष्ये। कैयटस्य तु प्रमाद इत्यन्यत्र निरूपितम्।

फगितिभावः। एतत्संज्ञाफल भूतेति। अस्यार्थः। एतत्संज्ञाफलभूतं च विभक्तिश्च एतत्संज्ञाफल भूतवि भक्तीताभ्यामितरः स्ववृत्ति पदसंज्ञाविशिष्टावयवस्तत्समभिव्याहारानपेक्षयालोकेऽर्थ विषयक शक्ति ग्रहणान्यतर संबंधेन योबोधस्तज्जनकत्व मित्यर्थः। विभक्तिश्चैतत्संज्ञाफलभूत साहचर्याद्यस्य प्रातिपदिक संज्ञा प्रसंगस्तत् प्रकृतिकैव गृह्यते ताम्यामितरोपि पर्युदास न्यायेन यस्य प्रातिपदिक संज्ञाप्रसंगस्वद्वृत्ति संज्ञाविशिष्टावयव एव गृह्यते खट्वापवित्रममित्यादौ टाप् मप् प्रकृतिभूत खट्व पक्किम शब्दयोः प्रातिपदिकत्वायाह। एतत्संज्ञाफल भूतेति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्ययलोपे (१।१।६२)। (३) प्रत्ययस्येत्यनुवृत्त्यासिद्धे आद्यप्रत्य यग्रहणमवयवलोपे मा भूत्। तेन 'आघ्नीय' इत्यादौ नानुनासिकलोप इति स्पष्टं भाष्ये। इदमेव प्रत्ययग्रहणं ज्ञापकमवयवेऽपि प्रत्ययत्वव्यवहारस्य। एवञ्च 'आदेशप्रत्यययोः' (८।३।५९) 'इदुदुपधस्य' (८।३।४१) इत्यनयो र्लक्षणादि नाश्रयणीयं, 'सात्पदाद्योः' (८।३।१११) इति च चरितार्थम्।

(१) स्थानिवत्सूत्रेण सिद्धे इदं सूत्रं नियमार्थमिति भाष्यम्। प्रत्यय स्यासाधारणं रूपं यत्राश्रीयते तत्रैवेति। न चैवं 'दाधर्ति' (७।४।६५) इति सूत्रे 'तेतिक्ते इति किं निपात्यते? आत्मनेपदम्, नैतदस्ति 'अनुदात्तङित' (१।३।१) इत्येव सिद्धमिति शङ्किते तदनुसार्येकदेशिन एव तत्समाधानमित्यदोषादित्यन्यत्र विस्तरः।

(१) प्रत्ययलोपे प्रत्ययवदिति सिद्धे लक्षणग्रहणं प्रत्ययनिमित्तकमेव, न तु प्रत्ययस्थानिकमित्यर्थलाभार्थम्। तेन 'नखभिन्नः' इत्यादावैसादिकं नेत्येके। अतिदेशेनाहार्यतद्बुद्धिसम्पादनेऽप्यु (१) च्चारणप्रसङ्गरूपषष्ठ्यर्थाभावान्नैसादीति तव्द्यर्थमित्यपरे।

कार्यमिति। प्राधान्यात् कार्यातिदेशोऽयमिति भावः। 'इहापि परिवीरिति शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यति' इति भाष्येण तृज्वत्सूत्रे शास्त्रकार्यातिदेशयोरैक्यकथनेन चातिदिश्यमानकार्याणामुत्पत्तिदेश एव देश इत्यङ्गीकारात् 'परिवीः' इत्यत्र तुग्दीर्घौ पर्यायेण न; किं तु दीर्घ एव परत्वात्। अन्यथाऽनेनैवोभयोर्विधानात्परत्वाभावेन पर्यायो दुर्वार इति बोद्धयम्। तदाह–जसि चेति गुणे प्राप्ते इति।

अर्थ वत्सूत्रोक्तापि काकः श्येनायत इत्यादौश्येनसूयेत्यादेरर्थत्वायाह्। विभक्तीति। केवल प्रत्ययस्य प्रकृति समभिव्याहृत स्य कुंभकार इत्यादो कारेत्यादेः पंचनाव प्रियइत्यादौ पंचनावे त्यादे श्चार्थ वत्वाभावायाह। इतरेभ्या रंभ्यबोध जनकत्वमि त्यंतम्। मूलकेनोप दंशं भुंक्ते कारयायांचकारेत्यादानुपदंश मित्यादेः कारयामित्यादेश्चार्थवत्वायेतरपदार्थः स्ववृत्ति पदसंज्ञा विशिष्टावयवत्वेन विशेषणीयः। देव दत्तो गार्ग्य इत्यादौ देवदत्त सुगार्ग्येति समुदायस्य सुप्रत्यय प्राग्वर्तिनोऽर्थवत्वा भावायबोधः शक्ति लक्षणान्यतर संबंधेन विशेषणीय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न लुमता (१।१।६३)। लुशब्दयुक्ता लुमन्तस्तदाह– लुगित्या दि। अङ्गकार्यमिति। लुप्तप्रत्यये परतो यः पूर्वस्तत्प्रकृतिभूतो लब्धाङ्ग सञ्ज्ञकस्तदुद्देश्यकं यत्कार्यमाङ्गमनाङ्गं वे (१) त्यर्थः। तेन 'पञ्च' इत्यादौ पदसञ्ज्ञा भवति। राजपुरुषादौ भसञ्ज्ञा च न। अङ्गसञ्ज्ञा तु यथोद्देशत्वात् प्रत्ययसत्ताकाले जाता तिष्ठत्येव। तत्काले कार्याभावादप्रवृत्तावपि प्रत्ययलक्षणेन सा। तस्या लब्धाङ्गसञ्ज्ञककार्यत्वाभावेन निषेधाप्रवृत्तेः। स्पष्टञ्चेदं 'युवोरनाकौ' (७।१।१) इत्यत्र कैयटे।

न 'लुमता' (१।१।६३) इत्यस्यानित्यत्वादङ्गसञ्ज्ञायामप्रवृत्तिरिति (२) कश्चित्। अत एव पञ्चाभिः क्रोष्ट्रीभिः क्रीतं कुलमिति 'तद्धितार्थ' (२।१।५१) इति समासे ठको 'अध्यर्थ' (५।१।२८) इति लुकि 'लुक्तद्धित' (१।२।४९) इति स्त्रीप्रत्ययलुकि च 'पञ्चकोष्टु' इत्यत्र (३) तृज्वत्त्वम्। तदुक्तं भाष्ये तृज्वदितिसूत्रे-'न चापरं निमित्तमाश्रीयते, किं तर्हि? अङ्गस्य क्रोष्टुस्तृज्वदिति; अङ्गसञ्ज्ञा च भवति (४) प्रत्ययलक्षणेन' इति। न चोर दत्त्ववत् तृज्वत्त्वेऽपि परनिमित्ताश्रयणमिति 'पञ्चक्रोष्टु' इत्यस्यासिद्धिरिति वाच्यम्, 'उरत्' (७।४।६६) इत्यत्र शब्दतः परस्य निमित्तत्वानाश्रयणेऽपि (५) अङ्गसञ्ज्ञाद्वारोरदत्त्वस्यापि परनिमित्तकत्वेन स्थानिवत्त्वप्रवृत्तिरित्येव 'लिट्यभ्यासस्य' (६।१।१७) इति सूत्रस्थ भाष्याशयात्। नियमतः परबुद्धेः पूर्ववृत्तितया परनिमित्तत्वात्। अत एव 'चर्करीति' 'अजर्घाः' इत्यादा वत्त्वप्रवृत्तिः। 'अचिश्नु' (६।४।७७) इत्यादावजादिप्रत्यय इत्यर्थस्तु अङ्ग स्येतिषष्ठ्या 'निमित्ते' इत्यध्याहारेण तस्य विशेष्यतया यथाकथञ्चिदुपपाद्यः, आकडाराधिकारस्थेषु (१) कार्यकालत्वस्याभावाच्च। वस्तुतस्तु– एतेन कार्यकालपक्षेऽपि क्रोष्टुशब्दः प्रत्ययेऽङ्गसञ्ज्ञो भवति, अङ्गसञ्ज्ञकस्य च तस्य तृज्वत्त्वं स्त्रियामित्येवार्थः।

इत्यपलपितमिति विस्तरेण।। न चेति नहीत्यर्थः। तत्पूर्वोक्तमर्थ वत्वं प्रत्यस्यप्राति पदिकत्वेहि पचेरन्नित्यादौ नलोप टावाद्यापत्ति रिति भावः। अतएव सूत्रद्वये एवमर्थ वदग्रहणादेव। अतएवानुवृत्ति वैयर्थ्ये नेत्येवोक्तं नत्वर्थवद्ग्रहण सामर्थ्यादिति। अतएव सूत्र द्वये एवाहशार्थव त्वस्वी कारादेव। फलाभावेनेति। अस्मिन्पक्षे उत्तरत्र तद्धित ग्रहणं न कार्यमिति भावः। समास तद्धित नियमस्य निषेध मुखेनाह। अनेनेति। विधिमुखेनाह। नापीति नन्वेमर्थवत्पदव्यावर्त्यालाभोऽतआह्, दशेति अत्र स्वातन्त्रेणेति पूर्वभाग इत्यर्थः। गवित्ययमिति इद्रंप्राचामनुरोधेन। वस्तुतस्तत्रापि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'उरत्' (७।४।६६) इत्यादौ तु आवृत्त्याऽत्त्वं प्रति निमित्त ताऽपि 'वव्रश्च' इति लक्ष्यानुरोधात्! न तथा प्रकृते, लक्ष्यानुरोधादेवेति तदाशयः पदैकवाक्यतयाऽन्वयस्तु सञ्ज्ञासूत्राणां दुर्लभ इत्यन्यत्र निरूपितम्। तृज्वत्थम् नैमिति कमेव उरदित्या दौतुगति रुक्तैव 'चर्करीति' 'अजर्घाः' इत्यादौ तु 'न लुमता' (१।१।६३) इतिनिषेधानित्यत्वादत्त्वप्रवृत्तिः 'त्रपो' इत्यादौ गुणवत्। अङ्गाक्षिप्तप्रत्ययनिमित्तं लुकि भवत्येवेति तु भ्रुवे हितं भ्रूहितमित्यादावुवङापत्त्या चिन्त्यम्–इत्यपास्तम्।

त्रिषु सरूपा इति। 'ङे प्रथमयोः' (७।१।२८) इति सूत्रे 'युष्मान्' इत्यादौ 'तस्माच्छसो नः' (६।१।१०३) इत्युपन्यासपरेण भाष्येण 'स्वमोर्नपुंसकात्' (७।१।२३) इति सूत्रे शिशी नुमादिभिर्युष्मदा द्यादेशानां विप्रतिषेधपरेण वार्त्तिकेन, तद्भाष्येण च, 'न षट्' (४।१।१०) इति निषेधेन च लिङ्गसत्ताबोधनेऽपि लिङ्गबोधकप्रत्ययानुत्पत्त्या रूपे न विशेष इत्यर्थः। 'साम आकम्' (७।१।३३) इतिसूत्रस्थस्य 'अलिङ्गे युष्मदस्मदी' इति भाष्यस्य पदान्तरसन्निधानं विना लिङ्गविशेषो युष्मदस्म च्छब्दमात्रात् न प्रतीयते इत्यर्थ इति दिक्।

त्रेस्त्रयः (७।१।५३)। अयं न सान्तो 'निजां त्रयाणाम्' (७।४।७५) इति निर्देशात् त्रेर (२) यङ् न कृतः 'अयङ्यि' (७।४।२१) इत्यादावि वोच्चारणार्थत्वशङ्कावारणाय। केचिदिति। 'आमि सर्वनाम्नः' (७।१।५२) इति साहचर्यादिति भावः। वस्तुतस्त्विति। साहचर्यस्यासार्वत्रिकत्वा त्सूत्रान्तरस्थतदाश्रयणे दुढतरप्रमाणाभावाच्चेति भावः। न च गौणमुख्यन्या येनात्र नेति वाच्यम्, अप्रसिद्धत्वगौणलाक्षणिकत्वान्यतररूपगौणत्वाभावात्। अत एवोपसर्जनानां सर्वनामत्वनिषेध आरब्धो वार्त्तिककृता। इतरविशेषणतामात्रेण तत्त्वाभावात् (१) पदकार्य एव तत्प्रवृत्तेश्चेत्यन्यत्र विस्तरः।

सुबंतत्वाद्यत्र पूर्वोभागः सुबन्त तिङंत कृदंतान्यतमस्तस्य चेदित्यर्थः।। उत्तर भागोपि तथैव ग्राह्य इत्याह् तत्र पूर्व इति तेनपरमगार्ग्यमण इत्यादौ नियमाभावः। कटंकृतपूर्वीत्यादौ नियमश्चसिद्धः। इदमेवस्वातन्त्र्य पदेनाभिप्रेतमन्यथा मूलकेनोपदंशं कुंभकार इत्यादावितरानपेक्षत्वाभावेन यथाश्रुता संगतिः।। तत्र पूर्व इत्याक्षिप्त परेषामपि स्वातंत्रेण प्रयोगार्हार्थवतामेव ग्रहणात्पुत्र काम्येत्यादौ न दोषः। अतएवांग संज्ञासूत्रे भाष्ये प्रत्यय ग्रहणे यस्मात्सविहिस्तदादेस्तदंतस्य ग्रहणमिति परि भाषायाः फलनिरूपणावसरे देव दत्तो गार्ग्येति समुदायस्य यत्रंतत्वेन प्राप्तप्रातिपदिक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्विशब्दो नित्यं द्विवचनान्त इति। संख्यापरत्वेऽपीत्यर्थः। अत एव कस्य द्वित्वे इत्यर्थे 'कस्य द्वयोः' इति भाष्ये 'बहुषु' (१।४।२१) इति सूत्रे प्रयुक्तम्।

त्यदादी (७।२।१०२)। 'अष्टन' (७।२।८४) इत्यतो विभक्ताविल्यनुवर्त्तते, तत्फलं तत्कुलम्। सोर्लुक्यत्वं न। इष्टिरिति। भाष्यकार स्येति भावः। द्विपर्यन्तानां किमिति। युष्मदस्मदोरात्वयत्वलोपैर्बाधात् किमः कादेशविधानाच्च प्रश्नः। भवान् भवन्ताविति। (२) अभ्युच्चयाय।

ङौ तु सवर्णदीर्घ इति। इदं सम्भावनामात्रेण। एषां ङौ 'ईदुतौ च सप्तम्यर्ते (१।१।१६) इति सूत्रस्थ भाष्य प्रामाण्येनानभिधानात्।

क्विबन्तवातेति। 'ईत्वमवकारादौ' इतिवार्त्तिकस्य, 'पावानः' इत्यादीनां वनिपा साधनरूपस्य तत्प्रत्याख्यान भाष्यस्य च फलैक्यायेदृशेभ्यः क्विपो (३) ऽनभिधानमावश्यकमिति। 'धीवरी' 'पीवरी' इत्यादि तु 'ध्याप्योः सम्प्र सारणञ्च' क्विप् क्वनिप् च चेनेत्यर्थकात् 'जनसनखनां सञ्झलोः' (३।२।६७) 'घुमास्थागापा' 6।४।६६) इतिसूत्रभाष्यपर्यालोचनया सिद्धाद्वार्त्तिकात्सिद्धम्। धीद्धर्यायतेर्दधातेर्वेति 'क्विब्वचि' (का० वा०) इतिवार्तिकस्थभाष्ये दधातेर्वेत्युक्तिरे (१) कदेशिनः। 'शंस्थाः' इत्यत्र विजेवेति न दोषः। 'मीङ् माने' इतीकारान्तात् क्विबित्येके। वातप्रमीर्निःश्रृङ्गो मृगाकृतिर्जन्तुविशेषः बहुश्रेयसीति। 'ईयसो बहुव्रीहेर्न' (का० वा०) इति निषेधान्नोपसर्जनह्रस्वः।

यू स्त्र्या (१।४।३)। दीर्घयोरेव ग्रहणं (२) व्याख्यानात् 'वा छन्दसि' (६।१।१०६) इति पूर्वसवर्णदीर्घः। यू किम्? मात्रे। 'आण्नद्याः' (७।३।११२) इति न। स्त्रियमाचक्षाते

संज्ञाभावः फलत्वेनोक्त। यथाश्रुत मूलोक्तनियमेतु नियमेनैवतत्र तदग्राह्य। भाष्यासंगतिः स्पष्टैव।।

पुत्रकाम्येति। काम्येति समुदायस्याप्रत्ययावयवत्वादुत्तरस्तु तत्प्रकृतिकप्रत्ययोनेत्युक्तावपि न दोषः इतिभावः। फलनिरूपणा वसर इति। विशेष ग्रहण इत्यर्थः। सामान्य ग्रहणे फलंत्व र्थवत्सूत्रेऽप्रत्यय इत्यत्र परिभाषा प्रवृत्या समासस्याप्रत्ययांतत्वेनसिद्धे प्रातिपदिकत्वे कृत्तद्धितेति सूत्रे। तद्ग्रहणस्यनियमार्थत्वान्मूल केनोपदंशमित्यादौ कृदंतत्वात्प्राप्त प्रातिपदिकत्वाभाव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्र्याख्यौ। मूलविभुजादित्वात् कः। स्त्र्याख्यावित्युपस्थित स्त्रीवाचकशब्दस्य विशेष्यत्वात्तदन्तविधिरित्याह–ईदू दन्ताविति। 'आच्छीनद्योः' (७।१।८०) इत्यादौ नदीशब्दस्य तदवयवे लक्षणा बोद्धया। आख्याग्रहणान्नित्यत्वलाभस्तदाह–नित्यस्त्रीलिङ्गाविति। तत्फलन्तु ग्रामण्यादेर्व्यावृत्तिः। (३) नित्यस्त्रीत्वञ्च प्रवृत्तिनिमि त्तैक्ये (१) लिङ्गान्तरविशिष्टार्थानभिधायकत्वम्। ङ्यन्तकुमार्यादीनां क्वचि निर्वृत्तेन त्रिलिङ्गेन समानाकारतया नित्यस्त्रीत्वाभाववारणाय प्रवृत्तिनिमित्तैक्ये इति।

नन्वेवं बहुश्रेयसीशब्दस्य नदीत्वं न स्यात्, अत आह-प्रथमेति। अर्थान्तरसङ्क्रमात्पूर्वं विद्यमानं नित्यस्त्रीत्वमादाय तस्यार्थान्तरसंक्रममेऽपि नदीत्वं वक्तव्यमित्यर्थः। यथोद्देशे पूर्वप्रवृत्तसंज्ञामादावयैव कार्यम्। कार्यकालपक्षेऽपि 'कुमारी' इत्यादौ प्रकृति भूतकुमारीशब्दस्य नित्यस्त्रीत्वेन वृत्तावपि विशेषणतया नित्यस्त्रीलिङ्गरूपार्थबोधकत्वेन नदीसञ्ज्ञा। समासे तु स्पष्टैव तदवयवस्य तत्प्राप्तिः। तन्मात्रबोधकत्वनिवेशे प्राधान्येन तद्बोध कत्वनिवेशे वा न मानम्। तदुक्तं भाष्ये– 'अवयवस्त्रीविषयत्वात्सिद्धम्, अवयवोऽत्र (१) स्त्रीविषयस्तदाश्रया नदीसञ्ज्ञा भविष्यति' इति। (२) आकडारस्थसञ्ज्ञानां (३) कार्यकालत्वाभावात्। अन्यथा तत्तद्विध्येकवाक्यत्वा पन्नयोः कथं बाध्यबाधकभावः स्यादिति बोध्यमित्यपि केचित्।

हे बहुश्रेयसीति। ह्रस्वे कृते गुणस्तु न, प्रक्रियालाघवाय 'अम्बार्थानां ह्रस्वः' 'ह्रस्वनद्योर्गुणः' इत्येव वाच्ये ह्रस्वविधानसामर्थ्यात्। 'जसि च' (७।३।१०६) इत्यत्रैकदेशे स्वरित्वप्रतिज्ञया ह्रस्वपदस्यैवानुवृत्तिरिति भाष्ये स्पष्टम्। अम्बार्थानामपि गुणस्तु वक्तुमशक्यः,

---

इतिस्पष्ट मेव। अतएवोत्तर सूत्रपर्यंतमनुधावनं भाष्योक्तं संगच्छते। यजन्तत्वेन प्राप्तेति। अर्थवदित्यस्य पूर्वत्रक्लृप्तार्थकस्य कृत्तध्दितयोर्विशेषण सामर्थ्याच्छब्दरूपं विशेष्य मध्याहृत्य तदंत विधौकृत्तद्धितांतेत्यर्थेऽ र्थवदित्यस्यतद्वि शेषणत्वात्तदंशेपि तदंतविधावदंतं तद्धितांत मित्यर्थात्तत् प्राप्तिरिति भावः। यत्तुविकारागमादेशानां देशांशेनिराकांक्षत्वात् परश्चेत्यस्यानुप स्थितौ तत्संनियोगशिष्ट प्रत्यय संज्ञाया अप्रवृत्तिरिति तन्न श्नमकज्बहुक्ष्वप्रवृत्यापत्तेः। किंच लविषीयेत्यत्र विशेषविहितत्वात्परत्वा पूर्वं सीयुटि ततोलादेशेप्रत्यय संज्ञा संनियोगेनेटोविधे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'अनः क्लीवं जले शोके मातृस्यन्दनयोरपि'।

इतिरभसाद्युक्तानः शब्दस्याम्बार्थत्वेन गुणापत्तेः। ह्रस्वग्रहणे तु 'अचः' इत्युपस्थित्याऽजन्ताम्बार्थग्रहणान्न दोषः। तस्य नपुंसकत्वेऽपि 'हे वारे' इति-वत् पक्षे गुणः स्यादेव। गुणश्रुत्येक्परिभाषोपस्थितौ तु 'अम्ब' इत्यादावप्य नापत्तिः। अयं ह्रस्वः– 'अनन्तरस्य' इतिन्यायाद् 'ह्रस्वस्य गुणः' (७।३।१०८) इत्यस्यैव बाधकः। तेन 'मातः' इत्यत्र 'ऋतो ङि' (७।३।१०) इति गुणो भवत्येवेति दिक्।

आटश्च (६।१।१०)। 'न माङ्योगे' (६।४।७७) इतिसूत्रस्थ भाष्योक्ते 'अटश्च' इति न्यासे तु 'वृद्धिरेचि' ★६।१।८८) इति बोद्धयम्। अत्र अट तु वक्तुमशक्यः, 'अस्वपोऽहसन्' इत्यत्र वृद्धिवारणाय 'आटश्च' (६।१।१०) इत्यत्र धातावित्यपकर्षेण वृद्ध्यनापत्तेः। 'वृद्धिरेचि' (६।१।८८) इत्यस्य तु पररूपं बाधकमिति (४) बोद्धयम्। ङेरिति सप्तम्येकवचनं व्याख्यानात्। इह परत्वादिति। (५) सकृद्गतिन्यायाश्रयणादिति भावः। स्पष्टञ्चेदं ह्रस्वनद्यापः' (७।४।५४) इत्यत्र भाष्ये। यद्यपीह आम् अपवादो नद्यां सर्वथाऽनवकाशत्वात्। 'अपवादो नुग्दीर्घत्वस्य' इति 'दीर्घोऽकितः' (७।४।८४) इतिसूत्रभाष्ये उक्तत्वेनाऽऽगमादेशयोरपि तत्त्वसत्त्वात्, तथापि अनवकाशत्वेन बाघेऽपवादप्रवृत्त्यनन्तरमु (१) त्सर्गप्रवृत्तेर्न दोषः। अत एव 'न गणेरीत्वमपवादत्वाद्धलादिःशेषं बाधते किं तर्ह्यनवकाशत्वात्' इति 'गुणो यङ्लुकोः' (७।४।८२) इतिसूत्रे (२) भाष्ये उक्तम्। 'पादः पत्' (६।४।१३०) इतिसूत्रस्थं 'शब्दान्तरप्राप्त्याऽनित्ययोराडामोः परत्वादाम्' इति भाष्यं त्वेकदेश्युक्तिरिति बोद्धयम्।

अङ्यन्तत्वादिति। 'लक्षेर्मुट् च' (सू० ४४८) इत्यौणादि क'ई' प्रत्ययान्तत्वादिति

यमाद्युदात्तत्वं सीयुट एवस्यादत आगमानुदात्त्वं वक्तव्यमिति आद्युदात्तश्चेति सूत्रस्थभाष्य कैयटासंगतिः। तत्रवह्वुचः प्रत्ययत्व फलमीषन्न्यून उर्बहु स्तस्मात्क्यचि सर्वप्रतिपदिकेभ्य इति सुकि बहुष्यतीत्यत्र षत्वं आगमानुदात्तत्वं वक्तव्यमिति। यदागम परिभाषानित्यत्वबोधन द्वाराऽनुदात्तंपदमित्यनेनसिद्धानु दात्तत्वानुवाद कमिदम्। एवंसतीट आद्युदात्त्वसिद्धिः।

लिंगविशिष्टस्येति। इयंच प्रातिपदिक सामान्य ग्रहणे विशेष ग्रहणेच अनया परिभाषया ङ्याप् ग्रहणवैयर्थस्य भाष्ये शंकितत्वाद्वि शेषविषये बहुतरोदाहरणाच्च।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावः। कुमारीति। ह्रस्वविधायके शास्त्रीयोपसर्जनग्रहणाद् 'गोस्त्रियोः' (१।२।४८) इति ह्रस्वो न।

अचिश्नु (६।४।७७)। भ्रूशब्दोऽव्युत्पन्नं प्रातिपादिकं, भ्रमेर्डूप्रत्ययान्तो वा। 'इह 'य्वोः' इति धातोः समानाधिकरणं विशेषणं, तदाह– इवर्णोवर्णान्त धातोरिति। इत्यस्येति। इत्यन्तस्येत्यर्थः। तेन 'सुभ्रुवौ' इति सिद्धम्। आन्तरेति। स्थानत इति भावः। य्वोरिति किम्? वव्रे। अचि किम्? युयात्। इतीयङीति। सुधीशब्दे यण्नि षेधारम्भादत्र प्रकरणे 'धातोः स्वरूपग्रहणे' इति परिभाषाया 3) अप्रवृत्तिरिति भावः।

एरनेकाचो (६।४।८२)। धात्ववयवसंयोगपूर्वो न भवतीति। धात्ववयवसंयोगपूर्वभिन्न इत्यर्थः। तद्भिन्नश्च धात्ववयवपूर्व एवेति 'उदियौ' इत्यादौ न दोषः। असंयोगादित्येव धात्ववयवसंयोग भिन्नात्परस्येत्यर्थेन सिद्धे पूर्वग्रहणं (१) स्पष्टार्थम्। एः किम्? असंयोगपूर्वग्रहण मिवर्णविशेषणं यथा स्याद्, अङ्गविशेषणं मा भूदिति। तेन 'यवक्रियौ इत्यादौ नातिप्रसङ्गः। 'लुलुवतुः' इत्यादौ तु नातिप्रसङ्गः 'ओः सुपि' (६।४।८३) इति नियमात्। विपरीतनियमस्तु न, सुधीशब्दे अचि सुपि यण्निषेधारम्भात्।

कुमार्याविति। अन्तर्वर्तिभिक्त्या पदत्वाच्छाकलं त्वत्र न; (२) 'नः क्ये; (१।४।१५) इति निषेधात्। प्रधीरिति। 'प्रकृष्टं ध्यायति' इति विग्रहे नित्यस्त्रीत्वाभावान्न नदीत्वम्। 'प्रकृष्टा धीर्यस्य' इति विग्रहे तु नदीत्वम्। ग्रामणीरिति। अग्रग्रामाभ्यां नयतेरिति णत्वम्। 'गतिकारक पूर्वस्यैव' इति भाष्ये पठ्यते, स च नियमः। तेन गतिकारकपूर्वभिन्नस्य नेति फलति। तद्भिन्नञ्च तत्सदृशं सपूर्वपदमेव। तेन 'निन्यतुः' इत्यादौ यण्। तदाह– गतिकारकेतरेति। यत्त्वत्र गतिसमासो नित्याधिकारस्थ एव प्रतिपदोक्त्वाद् गृह्यत इति, तन्न,

---

ननुप्रातिपदिक ग्रहणे तत्प्रकृतिक लिंगबोधक प्रत्यय विशिष्टस्यापि ग्रहणमिति तदर्थाद्बहुव्रीहेरुधस इति सूत्रस्थासंगतिरत आह्। स्त्रीप्रत्यय सममिव्याहार इति। प्रातिपदिकं गृह्यते यस्मिन्कार्ये तस्मिन्कर्तव्ये स्त्रीप्रत्ययसमभिव्याहारे तत्प्रकृतौदृष्टाः प्राति पदिकत्व तद्व्याप्य धर्मविशिष्टे यस्माद्विहितः स्त्रीप्रत्यय स्तदा दितदंतेऽनेनातिदिश्यंत इति भावः। तस्यापि सुबन्तादुत्पत्तौतुपूर्वं सुपीनुणंतत्व रूपाधिक सापेक्षत्वेनेति। पूर्वं सुपिसमासाय संशब्द प्रयोगे सति कृद्ग्रहणपरिभाषया गति कारक समभिव्याहारे तद्विशिष्ट एव कृदंतत्व बोधनेन संशब्द विशिष्ट एवेनु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भाष्ये पूर्वपदग्रहणाभावेन समासो पस्थितेरभावेन विशिष्टरूपोपादान विषयप्रतिपदोक्तपरिभाषाया (३) अप्रवृत्तेः। अत एव नदीज्ञासूत्रस्थः 'प्रकृष्टा धीर्यस्य' इतिविग्रहाभिप्रायेण प्रवृत्तः 'प्रद्ध्यै ब्राह्मण्यै' इति भाष्य प्रयोगः सङ्गच्छते शुद्धधियाविति। 'शुद्धा धीर्यस्य' इति विग्रहः। 'शुद्धं ध्यायति' इति विग्रहे यणेव। आद्ये सत्त्व भूतार्थकधी शब्दार्थविशेषणत्वात् शुद्धत्वस्य कथमपि न कारकत्वमिति भावः। कथन्तर्हीति। 'दुर्ध्यायन्ति' इति 'दुष्टा धीर्ध्यानं येषाम्' इति, 'वृश्चिकाद् भीः' इतिविग्रहाभिप्रायेण प्रश्नः। दुःस्थितेति। दुःशब्दोपात्तदुष्टत्वस्य स्थितिक्रियाविशेषणत्वमिति भावः। प्रकृष्टा धीरित्यादौ प्रकर्षः प्रशब्दार्थो धीशब्दोपात्तधात्वर्थे विशेषणमिति यण् भवत्येव। यत्क्रियेति। या चासौ क्रिये (१) त्यर्थः। तं प्रति–तद्वाचकं प्रति। यद्वा यस्य धातोर्वाच्यया क्रियया युक्ता इत्यर्थः। नेहेति। ततश्च सम्बन्ध सामान्यषष्ठयैव समासः। 'भीत्रार्थानाम्' (१।४।२४) इति तु हेतुत्व प्रकारकबोधे तृतीयाबाधनार्थम्। विभक्तप्रकरणे तु न कृतं, कारकत्वप्रयुक्तकार्यानापत्तेरिति भावः। किञ्च हेतुत्वाविवक्षायां सम्बन्धत्वेन विवक्षया षष्ठीसूत्रारम्भेऽपीत्यपि बोद्धयम्। अभ्युच्चयेनाह– वृश्चिकसम्बन्धिनीति। अत्र पूर्वपदान्तर्गतोत्तरपद लोपः शाकपार्थिवादित्वात्।

(२) न भू (६।४।८५)। 'अनन्तरस्य' इति न्यायेन 'एरनेकाचः' (६।४।८२) इत्यनयोरेव निषेधः। सुपीति चानुवर्त्तते तदाह–सुपीति। लोपाविति। 'अतो लोपः' (६।४।४८) 'लोपो व्योर्वलि' (६।१।७६) इत्याभ्यामिति भावः। यलोपे निषेधादल्लोपो न स्थानिवत् (१) वेरपृक्तलोपात्पूर्वं वलि लोप इष्यते। स्थानिवत्त्वादिति। एवञ्च यणादेशे यलोपे 'सख्' इति स्यादिति भावः। अन्तर्वर्त्तिविभक्त्या पदत्वात् 'न पदान्त' (१।१।५८) इति निषेधस्तु न स्थानिवत्त्वस्य, 'नः क्ये' (१।४।१५) इतिसामान्यापेक्षनियमेनास्या पदत्त्वात्

णंतत्वादिनुणंत त्वं रूपं यस्मिन्प्रातिपदिके तद्रूपाधिक सापेक्षत्वेनेत्यर्थः। बहिरं गतयेति। समासात्पूर्वं संशब्दविशिष्टे प्रातिपदिकत्वाभावेनाप्राप्त त्वाद्बहिरंगयेत्यर्थः। प्राक्सुबुत्पत्तेः प्रत्ययेतु सुपःपूर्वं समासाप्राप्त्या संशब्दाप्रयोगात्कूटिन्नित्यस्यैवेनुण-तत्वेनाण्वि भक्तयोः प्राप्तयोः स्वार्थिकत्वेनां तरंगत्वा दणिततः सुपि ततःसमः प्रयोगे। समासे कूशब्दोकारस्य वृद्धिः स्यादिति भावः।।

प्राक्सुबुत्पत्तेः समासेतूक्त रीत्यैवेति। सुपः पूर्वसमासप्राप्तयासमः प्रयोगे उक्तरीत्या संविशिष्ट एवेनुणंतत्वेन तस्यच प्रातिपदिक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परपदस्थाजादेशस्यैव तेन स्थानि वत्त्वनिषेधाञ्च। क्विबपेक्षक्यच् सम्बन्धियलोपस्य यणि बहिरङ्गासिद्धत्वन्तु न अनित्यत्वात्। क्वौ लुप्तमिति। भावे क्तः। लोप इत्यर्थः। 'गोमत्यतेर प्रत्यये गोमान्' इति भाष्योक्तेरस्याप्यर्थस्य (२) क्वचिदङ्गीकारः क्वौ विधिं प्रति नेत्येव तु सार्वत्रिकमित्यन्यत्र विस्तरः।

अनङिति। 'अभिव्यक्तपदार्था ये' इति न्यायस्तु गौणमुख्यन्यायवत् (३) पदकार्यविषय एवेति भावः। दीर्घस्यापीति। प्रयोगस्थयकारान्तानु करणं, सूत्रेऽकारश्चोच्चारणार्थ इति भावः। लूनीरित्यादि। 'ल्वादिभ्यः' (८।२।४४) 'क्षायो मः' (८।२।५३) 'प्रस्त्योऽन्यस्तरस्याम्' (८।२।५४) इति नत्वमत्वे। 'शुषः कः' (८।२।५१) 'पचो वः' (८।२।५२) इति कत्ववत्वे।

व्याख्यानात् प्राधान्याच्च रूपातिदेशोऽयमित्याह–कोष्टृटशब्द इति। तच्चोदात्तऋकार विशिष्टमतिदिश्यते तृज्वदितिचकारोच्चारणात्। तेन 'क्रोष्टा' इत्यादौ 'उदात्तयणः' (६।१।१७४) इति स्वरसिद्धिर्बोद्धया। पक्त्रादेस्तु नातिदेशः अर्थत आन्तर्याभावात्। इदं सूत्रं 'स्त्रियाञ्च' (७।१।९६) इति च प्रयोगनियमफलकमिति बोद्धयम्।

अप्तृन् (६।१।११)। ननु व्युत्पत्तिपक्षे तृन्नन्तत्वातृतृजन्तत्वाद्वा दीर्घे सिद्धे नप्त्रादिग्रहणं व्यर्थम्, अत आह–नियमार्थमिति। (१) अन्येषा मुणादिव्युत्पन्नानां सञ्ज्ञाशब्दानां नेति। नेष्ट्रादयोऽप्युणादय एवेति भावः, तेषां 'तृन्' (३।२।१३५) इतिसूत्रस्थवार्तिकेन व्युत्पादनात्। नप्त्रादीत्यादि ग्रहणेन प्रशास्तृशब्दस्यैव ग्रहणमित्यन्ये। अव्युत्पत्तिपक्षे तु विद्ध्यर्थमेवेति बोद्धयम्। भाष्य प्रयोगादिति। एवञ्चोणादिष्वस्य व्युत्पादनमप्रामाणिकमिति भावः। पङ्कजादिपदवद्योगरूढोऽयम्। ये त्वौणादिकत्वमेवास्य स्वीकृत्य भाष्य प्रयोगादेव

त्वाभावादणोऽप्रादयांऽतरंगत्वात्पूर्वं समासे ततो विशिष्टा देवाणितिसिद्धमिष्टमितिभावः अन्यथौजसोः पूर्वे त्येव वदेदिति। ज्ञानमित्यादावमि पूर्व इत्यनेन प्रतिपदोक्त त्वाद्बाधेन कतरीदत्यत्र डित्वाद्दिलोपेन च सावसंभव इत्यर्थः। एतहरत्यादौ सुपिचेति दीर्घापत्तेरिति। हरयवडिति न्यासे तु सर्वदेत्यादौ सर्वस्य सुपीत्याद्युत्तत्वापत्तेः। तत्र भुक्तमित्यादौ सुपोधात्विति लुगापत्तिश्चेति बोध्यः:ध्यम्६७ रुत्वे एकदेशविकृत न्यायेन सुबंततया पदत्वाद्विसर्ग इति एकदेशविकृत न्यायेनेत्यस्य पदत्वादित्यत्रान्वयः एवंच रुत्वे कृतेसति राममित्यत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दीर्घत्वमिच्छन्ति, ते मान्याः। भाष्यकृताऽन्यप्रयोगस्योदाहरणत्वेन दानेऽप्यस्य भाष्यप्रयोगत्वाभावात्। 'ण्वुल्तृचौ' (३।१।१३३) इति भाष्ये तु 'तृचश्चकारो व्यर्थः। न च 'अप्तृन्तृच्' (६।४।१११) इत्यादौ विशेषणार्थः, तृ इत्येव सिद्धेः। न च तृ इत्युच्यमाने 'मातरौ' 'पितरौ' इत्यादौ प्राप्नोति। तत्र हि तृप्रत्ययो निरनुबन्धक इति वाच्यम्, नप्तृग्रहणस्य योनिसम्बन्धवाचिनाञ्चेदस्यैव नान्येषां योनिसम्बन्ध वाचिनामिति नियमात्' इत्युक्तम्। नेष्टृत्वष्टृहोतृपोतृणां तृन्नन्तत्वस्य प्रशास्तुस्तृजन्तत्वस्य 'तृन्' (३।२।१३५) इतिसूत्रे भाष्यवार्तिकयोरुक्त्वेन तेषाङ्ग्रहणं प्रपञ्चार्थमेव। एवञ्च यथान्यासे नियमफलं चिन्त्यम्।

क्रोष्टेति। अनङि 'सर्वनामस्थाने च' (६।४।८) इति दीर्घः, प्रथमोपस्थितत्वात्। 'क्रोष्टारौ' इत्याद्यर्थन्तु तल्लेखः। यद्वा विशेषविहित त्वाच्छीघ्रोपस्थितिकत्वेन स एव न्याय्यः।

विभाषा तृ (७।१।९७)। (१) अयमपि नियम एव 'तृतीयादावच्येवोभयम्' इति। तेन भ्यामादौ, शसि, 'क्रोष्टुपुत्रः' इत्यादौ च न दोषः। सर्वत्र (२) विशिष्टाभावस्य सुलभत्वात्। 'तृज्वत्क्रोष्टुः' (७।१।९५) 'स्त्रियाञ्च' (७।१।१६) इत्याभ्यां सर्वनामस्थाने स्त्रियाञ्च तृजन्तरूपविधानेन तयोः प्रयोगनियमार्थत्वं फलति। एतेन तृज्वत्सर्वनामस्थान एवेति नियमादिदं विद्ध्यर्थमिति परास्तम्। न चैवमपि क्रोष्टूनित्याद्यसङ्गतम्, अन्यत्र तृजन्तस्यैव प्रयोगेणाप्युक्तनियमस्य चारितार्थ्यादिति वाच्यम्, तृज्वत्क्रोष्टुरिति योगविभागस्यैवं सति वैयर्थ्यापत्तेः। न च 'तद्धितेष्वचामादेः' (७।२।११७) 'इको गुणवृद्धी' (१।१।३) इति सूत्रयोः 'क्रौष्टुः' 'क्रोष्ट्रीयाः' इति भाष्य प्रयोगासङ्गतिरिति वाच्यम्, ऋकारान्तस्यैव ऋषिवाचकत्वेनादोषात्। इदं सूत्रत्रयं तु

सुबंतताप्रयोज्यादे कदेशविकृतन्यायेन पदत्वाद्विसर्ग इत्यर्थः। अतएव विभक्त्यंतानामेकशेष इति। पक्षेद्वंद्व प्रतिषेधो वक्तव्य इत्याशंक्यानवकाश एक शेषो द्वंद्वं बाधिष्यत इति भाष्ये उक्तमिति नन्वनेन भाष्येण बाध्यसामान्य चिंतयाद्वंदबाधोस्तु। एवं चसहविवक्षायामेव एक शेष इत्यत्र न मानमत आहकिं चेति। साख साखोर्मिज इति। अस्मिन्प्रयोगे। आरंभ प्रत्याख्यानयोः फलाभेदाय पूर्वोक्त कल्पनमेवयुक्त मिति भावः। नन्वेकशेषस्य सहविवक्षायामेव स्वीकारे इदित इति गुरुनिर्देशात्तंत्रस्यापि सहविवक्षायामेवतत्प्रवृत्तत्वात् ब्राह्मणाभ्यांकृतं देहि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रृगालवाचिक्रोष्टुक्रोष्टृशब्दयोर्व्यवस्थार्थमित्यवधेयम्। तदुक्तं भाष्ये– 'तृज्वद्भावविषये 'एतत् तृजन्तं मृगवाचि' इति, तृतीयाद्यजादिविभक्तिषु तृजन्तं तुन्नन्तञ्च मृगवाचि' इति च। अनेन हि अन्यत्र तुन्नन्तमेवेत्यपि सूचितमिति दिक्।

ऋत उत् (६।१।१११)। तपरत्वं भाव्यमानस्यापि क्वचित्सवर्णग्राहकताज्ञापनद्वाराऽऽन्तर्यतो द्विमात्रनिवृत्त्यर्थम्। तेन 'अमू' (३) इत्यादिसिद्धिरिति 'छ्वोः' (३।४।१९) इति सूत्रे कैयटः। यत्तु तपरत्वं 'ढ्रलोपे' (६।३।१११) इति दीर्घबाधनार्थमिति; तन्न,

'सुपत्रपातिता बाणा ज्वलिता इव पन्नगाः।
नैऋतोरस्यभासन्त सवितू रश्मयो यथा'।।

इति रामायणप्रयोगविरोधात्, 'उरण् रपरः' (१।१।५१) इति सूत्रेऽण्ग्रहणाभावे 'ऊ रपर' इति भाष्यप्रयोगविरोधाच्च।

सस्यैवेति। संयोगान्तलोपेन सिद्धे नियमार्थम्। तेन 'ऊर्क्' इत्यादौ नेति भावः। (१) विपरीतनियमस्तु न, पुमान् स्त्रिया' (१।२।६७) इति (२) निर्देशात्।

'एरनेकाचः' (६।४।८२) इति सूत्रमेरितिपदरहितं सानुवृत्तावृत्तविशेषणं सवार्त्तिकञ्चानुवर्त्तत इत्याह–धात्ववयवेत्यादि, गतीत्यादि च। 'सकृल्ल्वौ' इत्यत्र क्रियाविशेषणत्वेन कर्मत्वाद्यण्।

'न भुसुधियोः' (६।४।८५) इति निषेधे प्राप्ते आह–वर्षाभ्वश्चेति। 'वर्षाभूर्दर्दुरि पुमान्' (अ० को०)। स्वार्थिक इति। स्वस्याः प्रकृतेरर्थः स्वार्थस्त्र भव इत्यर्थेऽध्यात्मादित्वाट्ठञ्।

पयोजरतीत्याद्यनिष्टष्टमेवस्यादन आह्। असहेति। नन्वसहविवक्षायाम् तंत्रंक्वदृष्टं तत्राह। नीलोत्पल स्पर्धिनेत्रेतनुर्वेति इष्टमेवेति एवं चैतत्साधनार्थमेकशेषस्यासहविवक्षायां स्वीकारोन कार्यः। साख साखोमिजइत्याद्यसिद्धे रितिभावः। गौरवमिति। एवं चेदित इत्यपेक्षयालाघवाभावात् न ज्ञापकमिति भावः। तंत्र परइति-एकशेषारं भवादिनाप्येवं व्याख्येयम्। सहवि वक्षायामेवैकशेषप्रवृत्तेः। ननुतंत्रस्य सारूप्ये एवप्रवृत्तत्वादे कशेषारंभः। तदारंभेत्वेक विभक्तावित्यत्रैक ग्रहणादेकस्यां कस्यांचिद्विभक्तौ सरूपाणां सर्वत्रैकशेषइत्यर्थान्मातृ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वारादिषु स्वग्रामस्वाध्याययोः पाठेन स्वशब्दादेश्चेदेतयोरेवेतिनियामार्थकेनै (३) जागमो न। पुनर्भूशब्दस्य रूढस्य नित्यस्त्रीत्वादाह–**यौगिक इति।**

इत्यूदन्ताः।

वर्णैकदेशानां वर्णग्रहणेनाग्रहणे रेफाभावादाह-ऋवर्णादिति। व्युत्पत्तिपक्षे इति। अव्युत्पत्तिपक्षेऽबादिष्वपाठाद्दीर्घशङ्कैव नेति भावः। व्युत्पत्तिपक्षे निरनुबन्धकतृप्रत्ययान्ता एवेति 'ण्वुल्तृचौ (३।१।१३३) इति भाष्यस्वरसः।

इत्यृदन्ताः।

वैकल्पिकेति। 'यत्तदेतेभ्यः' (५।२।३९) इत्यत्र त्यदाद्यत्वकरणादतिदेशस्य, 'क्षियः' (६।४।५९) इत्यादौ धात्वनुकरणे विभक्तिकरणेन वैकल्पिकत्वस्य च ज्ञापनादिति भावः। अनुकरणस्यानुकार्यशब्दस्वरूपमा त्रमर्थ इति प्रातिपदिकत्वम्। अनुकार्यञ्चानुकरणाद्भिन्नमेवेति 'मतौ छः' (५।२।५९) इति सूत्रे भाष्ये स्पष्टम्। ईषदानुपूर्वीव्यत्ययेऽपि वाचकसा दृश्यादर्थोपस्थापकत्वमिति अत्र कैयटे, 'प्राग्दीव्यतोऽण्' (४।१।८३) इत्यत्र भाष्ये च स्पष्टम्। अत एव 'किरः' इत्यादितः कृधातुरिति बोधः। 'भू सत्तायाम्' (धा० सू० १) इत्यादौ त्वित एव निर्देशात्कदाचिदनुकरणाद्विभक्त्यभावोऽपि। स च सूत्रेणष्वेवेति प्रामाणिकाः। गवित्ययमाहेति वान्तस्यैवानुकरणम्। अनुकार्यस्वरूपभङ्गभिया च (१) न वलोपः 'झलां जश्' (८।४।५३) इत्यादौ जश्त्वाभाववदित्याहुः।

इत्वे इति 'किरंश्च पञ्चभ्यः' (७।२।७५) इति निर्देशादधातुप्रत्ययेऽपि तत्प्रवृत्तिरिति

भातरावित्यादावप्ये कशेषमवृत्तिर्भ्यामादौ सारूप्यादत आह। एक विभक्त चित्यत्रेति। एवापकर्षसामर्थ्यात्तद् ध्वनयन्नाह्। एकस्यामपीति। नन्वत्रप्रमाणाभावोऽत आह्। ध्वनितं चेदमिति। एवंच सूत्रकोरणैवैकपद वैयर्थ्य बोधन द्वारा सूत्रवैयर्थ्यबोधित मितिभावः। द्विवहोरपीति। सरूप शब्दगत द्वित्व बहुत्वयोरपीत्यर्थः। तच्छेषाश्रयं विनासंभवात् तदाश्रययोरपि फलतीति भावः। वाचाटे नेत्व मिति अत्र टस्येत्वे स्त्रियां ङीष्फलंबोध्यम्। अतएव दानीम इति। प्राग्दिशीयत्वेन विभक्तित्वादेवेत्यर्थः। सुः संबुद्धिरित्यु चितमिति। एवं च मात्राकृतं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावः। कीरिति। कृधातुरित्यर्थः। गुणो नेति। 'ऋत उत्' (६।१।१११) इत्युत्वमप्यत एव न। अत एव 'ओ यङि' (८।२।२०) इति सूत्रनिर्देशः सङ्गच्छते।

इत्यदृदन्ताः।

अनङिति। ऋऌवर्णयोः सावर्ण्यादिति भावः। गमृनिमित। ऌवर्णस्य दीर्घाभावादृवर्ण एवेति भावः। ननु तुल्यास्यसूत्रे भाष्यकृता 'ऋति ऋ वा' (का० वा०) इत्यादिविधेययो रेफद्वयगर्भलद्वयगर्भयोरच्त्वदीर्घ त्वाङ्गीकारेणात्र द्विलकार ईषस्त्पृष्टो 'दुर्वारः, आमि च तथा धातृणाम्' इत्यत्र रेफद्वयगर्भोऽपीति चेत्? न, 'अकः सवर्णे' (६।१।१०१) इतिसूत्रे (२) उक्तोत्तरत्वात्। गम्लेति। यत्तु-लण्सूत्रे 'उरण् रपरः (१।१।५१) इत्यत्र अजिति वक्तव्येऽण्ग्रहणसामर्थ्येनाण्पूर्वेणैव इत्युक्तं भाष्ये, ऌकारस्य यणि हि तत्र लपरत्वार्थं परेणाण्ग्रहणं स्यादिति सामर्थ्योक्तिरसङ्गता। ऋकारस्य यणि तु 'रो रि' (८।३।१४) इति लोपेन न विशेष इति, तन्न, ऋकारांशे हल्रूपाऽणि रोरीति प्रवृत्त्या फलाभावेनाप्रवृत्त्या तत्साहचर्याद् ऌकारांशेऽपि हल्रूपाऽणि रोरीति प्रवृत्त्या फलाभावेनाप्रवृत्त्या तत्साहचर्याद् ऌकारांशेऽपि हल्रूपाऽण्यप्रवृत्तिरित्याशयात्। वस्तुत ईदृशानामभिधाने दृढं मानं चिन्त्यम्।

सेरिति। इना सहेत्यर्थः। इना सहेत्यर्तः। वोपसर्जनस्य' (६।३।८२) इति सत्वम्। एकादेशस्य पूर्वान्तवत्त्वेऽपि (१) लिङ्गाद्यन्वय्यर्थप्रतिपादकत्वात् अव्ययमिति महासञ्ज्ञयाऽस्यानव्ययत्वान्न विभक्तिलुक्। सादेशात्पूर्वमाद्गुणस्तु न, 'नेन्द्रस्य' (७।३।२२) इति ज्ञापकेन पूर्वोत्तरपदनिमित्तकार्यात्पूर्व मेकादेशाप्रवृत्तेः। न च 'नान्तः पादम् इतिसूत्रेस्थेन 'न चैङः पदान्तात्परो रस्ति' इति भाष्येण विरोधात्सावीदृशानां प्रयोगोऽनुचितः, सावपि पदत्वसत्त्वादिति वाच्यम्, योगविभागसिद्धस्य सौ पदत्वस्य क्वाचित्कत्वे नादोषात्।

पदकृतं सुप इति सूत्राज्ञान कृतंत्व स्मिन् न्यासे लाघवमितिभावः। संबोधने इत्यनुवृत्तेरिति। राम इत्यादौ संज्ञावारणाय यथान्यासेर्पिदमावश्यकमिति नैतत्कृतं गौरवमितिभावः। सप्तमीबहुवचनेति। इदमुपलक्षणं प्रथमैकवचनस्यापि नन्वस्मिन्न्यासे सामंत्रितमितिवन्महा संज्ञया संज्ञाविधावपि तदंत विधिः स्यात्। एकवचनग्रहणेतु तत्सामर्थ्यात्प्रत्यस्यैव संज्ञासिध्यतीत्यत आह्। संबुद्धावंगस्येति। तदादीत्यंशोपस्थिरिति। तदादीत्यत्र बहुव्रीहावप्येङंतांशे व्यपदेशिवद्भावात्तदादि पदेन। यस्माद्विहितस्यैव ग्रहणात् फला विशषण लाघवात्कर्म धारय एवाश्रीयते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सावप्रयोग एवेत्यन्ये। सय इति। नचास्यान्तर्वर्त्तिविभक्त्या पदत्वाद् 'एङः पदान्तात्' (६।१।१०९) इत्यादि दुर्वारमिति वाच्यम्, भाष्ये 'स्वादिषु' इति योगं विभज्य स्वादिषु पूर्वं पदमित्यर्थः। ततः 'अ सर्वनामस्थाने यचि'। सुबन्तमिति अनुवर्त्तते। अ यचीति प्रसज्यप्रतिषेधः, तेन (२) यजादौ सर्वनामस्थाने पूर्वं पदं न, मद्ध्ये चेत्सुबन्तं तदपि पदं नेति व्याख्यानेनादोषात्। आतिदेशिकस्याप्ययं निषेध इति स्पष्टमेव। (१) 'उत्तरपदत्वे चापदादिविधौ' इति प्रतिषेधाच्च। उत्तरपदस्य तद्घटितस्य वा पदत्वे कर्त्तव्येऽन्तर्वर्त्तिविभक्तेः प्रत्ययलक्षणं नेति तदर्थः। अतो न योग विभागमूलक प्रत्याख्यानेन फलभेद इति केचित्।

'इतोऽत्' (७।१।८६) इत्यतोऽनुवृत्तं सर्वनामस्थाने इति (२) प्रथमया विपरिणम्यते णिदित्यनेन सामानाधिकरण्यादित्याह– सर्वनामस्थानमिति। तत्र णितः कार्यस्यासम्भवात् णिति यत्कार्यं तदतिदिश्यते। शसेति। अचीत्यधिकारात्तद्धितशसो न ग्रहणमिति भावः। गामिति। परत्वादत्र वृद्धिस्तु न, अनवकाशत्वेन आत्वस्यापवादत्वात्। तदाह– ओतो णिदिति। सूत्रे तपरकरणेन गस्याविवक्षिततत्वमिति भावः। तेन 'चित्रगुः' इत्यादौ न दोषः। अन्यथाऽङ्गाधिकारे तदन्तविधेः सत्त्वेन स्थानिवत्त्वेन गोऽन्तत्त्वाद्दोषः स्यादेव। मम त्वोकारान्तत्वाभावादल्विधौ स्थानिवत्त्वाभावाच्च न दोषः।

परे तु 'गोतो णित्' (७।१।९०) इति सूत्रे भाष्ये तपरत्वं प्रत्याख्यातम्। 'चित्रगुः' इत्यादौ तु न दोषः, गोः पूर्वत्वणित्त्वात्वस्वरेषु स्थानिवत्त्वप्रतिषेधात्। 'हे चित्रगो' इत्यादौ तु लाक्षणिकत्वान्न दोष इति अत्रैव सूत्रे भाष्ये स्पष्टम्। 'द्योः सर्वनामस्थाने णित्त्वं वक्तव्यम्' इति 'औतोऽम्' (६।१।९३) इत्यत्र भाष्ये उक्तमित्याहुः। सुद्यौरिति। केवलद्योशब्दस्य स्त्रीत्वाद् बहुव्रीहिरुदाहृतः।

तत्साहचर्याद्हस्वां शेपि कर्मधारय एनेति हे कतरदित्यादौ न दोष इति भावः। ननु प्रकृतिं विना प्रत्ययाऽनुत्पत्ते स्तदनुपपत्तिस्तदा क्षेपिका स्यादेवेत्यत आह्। किं च प्रत्ययस्येतिभावः जाते तदपेक्षत्वा भावे न चेति। उत्पादक शास्त्रे तदाक्षेपेपिशास्त्रांतरे तदा क्षेपे न मानमिति भावः। अत एवेयन्मात्रमित्यत्र वत्वंतात्स्वार्थे मात्रच् सिद्धिः सम्बुद्धेखयवस्य हलोलोप इति। अमपक्षे हल्पदानुवृत्तेः कुलेत्यादेः सिद्धिः। अन्यथाऽकार लोपेम श्रवणापत्तिः। न चपंचमी समासेन कतरदित्यत्रापि दलोपापत्तिः। पंचमी समासानित्यत्वेनादोषात्। ननूभयत आश्रण इत्यस्य भाष्ये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विहितमिति। यदि तु वर्णग्रहणेऽपि प्रतिपदोक्तपरिभाषा प्रवर्तते तदा (१) व्यर्थोऽयं यत्नः।

स्मृतौरिति। स्मृत उर्येनेत्यर्थः। यत्तु एषामभिधाने 'अयवायावादिषु 'एकादेश उदात्तेनोदात्तः' (८।२।५) इत्यस्य सिद्धत्वं वक्तव्यं तत्स्थानिकायादीनामस्वरितत्वाय इतिवार्त्तिकव्याख्यावसरे 'अवादेशे नास्त्युदाहरणम्' इति 'स्वरितो वा' (८।२।६) इतिसूत्रस्थ भाष्य विरोधः। प्रकृते पूर्वपदप्रकृति स्वरेण स्मृतस्यान्तोदात्तत्वे शेषनिघातेन उशब्दस्यानुदात्तत्वात्तदेकादेशस्य 'एकादेश उदात्तेन' (८।२।५) इत्युदात्तत्वे 'स्मृतवा' इत्यादौ तदुदाहरण सम्भवादिति। तन्न; तृतीयादिष्वनभिधानेऽपि अन्यत्र तत्सत्त्वे बाधकाभाभावात्। न च 'गोतः' (७।१।९०) इतिसूत्रे 'द्योश्च वृद्धिर्वक्तव्या' इति वार्त्तिके द्योशब्दस्यैवोपादानादन्यौकारान्ताभाव इति वाच्यम्, उपलक्षणतया व्याख्यानेनादोषात्। परे तु ईदृशानामनभिधानेऽपि न क्षतिरित्याहुः।

रायो हलि (७।२।८५)। 'अष्टन आ' (७।२।८४) इत्यत आ विभक्तावित्यनुवर्त्तते।

इत्य (२) जन्ताः पुँल्लिङ्गाः।

रमेति। रमयतेः (३) पचाद्यच्, टाप्। एदादेशस्य (४) पूर्वान्तवत्त्वेन प्रातिपदिकत्वात्स्वादयः। (१) 'वाचा' इत्यादौ तु लिङ्गविशिष्टपरिभाषया तत्त्वात्ते।

आप इति पञ्चन्यन्तेन सामानाधिकरण्याददङ्गस्येति पञ्चम्या विपरिण म्यते, विशेषणेन तदन्तविधिरि (२) त्याह–आबन्तादिति। 'जसः शी' (७।१।७१) इत्यतः शीति वर्त्तते। रमे इति। 'यस्य' (६।४।१४८) इति लोपो न, अभत्वात्।

प्रत्याख्यानमत आह् तत्स्वीकारेपीति ननुपौर्वापौर्यघटित विशिष्टधर्मस्य स्थानिवत्सूत्रेणाति देशोस्तिवत्यत आह्। ताद्रूप्येति। ताद्रूप्यस्य ह्रस्वांतांगात् परसंबुद्धित्वस्यानतिदेशादृशास्त्री यत्वेन तस्यधर्म स्थस्थानिवत्सूत्रेणाप्राप्तेरिति भावः। अन्याक्षिप्तस्याप्य न्यत्रान्वय इति भावइति इदानीं ह्रस्वसंबुद्ध्योः पौर्वापर्या नाश्रयणादुभयत आश्रयणेप्यंतादिवत्व प्रवृत्तेः कुलेत्यादेः सिद्धिरिति भावः। नन्वर्धविकारे एकदेशविकृत न्यायाप्रवृत्तौ फलाभावोभाष्यकृता क्लृप्त इत्यादौ ऋकारांतर्गत रेफस्य लत्वे द्वित्वाद्यर्थमेकदेश विकृत न्यायेन चाच्त्वमिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्बुद्धौ च (७।३।१०६)। 'बहुवचने झलि' (७।१।१०३) इत्यत एदिति, 'आङि चापः' (७।३।१०५) इत्यत आप इति चानुवर्त्तते। एङ्ह्रस्वादिति। सम्बुद्धौ (३) प्रतिपदोक्तत्वेन शीघ्रोपस्थितिकतया हल्ङ्यादिलोपात् प्रथममेत्वेऽनेन सम्बुद्धलोप इति भावः। सन्निपातपरिभाषा त्वनित्यत्वान्नात्र प्रवर्त्तते।

आङि चा (७।३।१०५)। चेन प्रकृतम् 'ओसि' इति परामृश्यते। 'घेर्ङिति' (७।३।१११) इत्यतोऽनुवृत्तं ङितीति आप इति पञ्चम्या षष्ठ्या विपरिणम्यते इत्याशयेनाह– ङिद्वचनस्येति।

सर्वनाम्नः स्या (७।३।११४)। आबन्तात्परस्य (४) सर्वनाम्नो विहितस्येत्यर्थः। तेन 'मासपूर्वायै' इति सिद्धम्। अत्र ह्रस्वो न स्याटः, तस्य विधेयत्वेनोद्देश्यत्वासम्भवात्। नापि ङिद्वचनस्य, व्याख्यानात्। अत आपो ह्रस्व इत्याह– आपश्चेति। आबन्तस्य गणे पाठाभावेन सर्वनाम त्वाभावादाह–एकादेशस्येति। ग्रहणादिति। सर्वनामशब्देनेत्यर्थः। न चैवमप्याबन्तत्वाभावः। एकादेशनिष्पन्नस्याप्त्वाभावात्, अत एव 'खट्वा' इत्यादौ परादिवद्भावेनाप्त्वमाश्रित्याबन्तादिति सोर्लोप उक्तः, परादिवद्भावेन तत्त्वं तु न लभ्यम्, उभयत आश्रयणेऽन्तादिवत्त्वाभावादिति वाच्यम्, उभयत आश्रयणो तदभावस्य भाष्ये एकदेश्युक्त्वेऽपि सिद्धान्ति सम्मतत्वाभावात्। एतच्च तिङन्ते इण्धातौ वक्ष्यामः।

परे तु लिङ्गविशिष्टपरिभाषयाऽऽबन्तस्य सर्वनामत्वम्। आबन्तत्वन्तु परादिवद्भावेनेत्याहुः। सर्वस्यामिति। इह परत्वात्स्याटि कृते (१) सकृद्गतिन्यायात्सुण्न।

प्रतिपदोक्तस्येति। दिक्शब्दमुच्चार्य विहितत्वादस्य तत्त्वम्। योत्तरेति

वदतार्धविकारे ऋलृक् सूत्रेस्वीकृत श्चात् आह्। एक वचन संज्ञा संबुद्धि संज्ञयोरिति।

अक्तपरिमाणेति। तत्रैतन्न्यायाप्रवृत्तिस्तु सजुषमाचष्टे सगित्यादौ रुत्वाभावार्थभव श्यभंगी कार्येति भावः। भाष्ये स्वीकार श्चेक देशिन इति तत्वम्। सामर्थ्या देवात्रेति ग्रहण प्रत्याहार सामर्थ्या देवेत्यर्तः। ननुस्मृतो प्रभृत्यर्थं प्रत्याहार ग्रहणमत आह्। गुणादिति। अस्यापि। एङ्हस्वादिति लोपस्यायी त्यर्थः। एवंच प्राप्तस्यलोप स्यलुका बाधेन लोपाप्राप्तियोग्ये गुणस्य चारितार्थ्यमितिभावः। ननु प्रथमयोरित्ये व सिद्धे इदं सूत्रं व्यर्थ मत आह। राममित्या दाविति। आदिना

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'अनेकमन्यपदार्थे' (२।२।२४) इति बहुव्रीहिः। 'सर्वनाम्नो वृत्तिमात्रे' इतिमात्रग्रहणात्सम्प्रत्य सर्वनामत्वेऽपि पुंवत्त्वम्। योत्तरेति। यत्तच्छब्दाभ्यामुद्देश्यविधेयत्व प्रतीत्या योत्तरात्वप्रकारक ज्ञानविशेष्या सा प्रसिद्धपूर्वा यस्या इत्यर्थेनोत्तरापदस्य गुणवाचकत्वात्पूर्वनिपात इत्य (२) न्यत्र विस्तरः। स्पष्टार्थमिति। 'दिङ्नामानि' (२।२।२६) इत्यस्य बहुव्रीह्यधिकारे सत्त्वादिति भावः। अन्तरायै नगर्यै इति। अपुरीत्यस्य पूःशब्दार्थस्य (३) विशेष्यत्वे इत्यर्थ इति भावः। (४) अत्र मानमन्वेष्यम्।

हे अम्बेति। ह्रस्वे कृते 'सम्बुद्धौ च' (७।३।१०६) इत्येत्वं न, आ आबिति प्रश्लेषात्। व्यक्षरं यदीति पठित्वा व्यच्काम्बार्थकस्यैव ह्रस्व इति नियममाश्रित्य 'डलकवतां ह्रस्वो न' इत्यस्य भाष्ये प्रत्याख्यानात् (५) फलाभेदाय सामान्यतोऽपि वार्त्तिकमसंयुक्तविषयमित्याशयेनाह– असंयुक्ता इति व्यक्षरं यदीत्यस्याङ्गत्वाद् व्यक्षराम्बार्थकाङ्गस्य ह्रस्व इति नियमश रीरात् 'जगदम्ब' इत्यादौ (१) ह्रस्वो भवत्येव।

यद्यपि जरसादेशस्येति। एवञ्चेत्वशीनुड्याडामां नित्यत्वात्पूर्वमेषु क्वचिदजादित्वाभावात्क्व चित्सन्निपात परिभाषया जरसोऽनापत्तिरि (२) ति भावः। यद्यपि याडामोर्जरसपेक्षया (३) परत्वात् तयोः कृतयोराद्येऽजादित्व विघातादन्त्ये सन्निपातपरिभाषया न जरसः प्राप्तिः, एवमेत्वेऽपि; तथापि तत्र प्रश्लेषफलं दर्शयितुमाह– एवमिति। अत्र यद्वक्तव्यं तन् (४) निर्जरशब्दे उक्तम्।

स्वाश्रयमिति। स्वं श्रूयमाण आकारः। स्थानिवद्भावेनास्वमिति। न च ङ्याब्ग्रहणेऽदीर्घ आदेशो न स्थानिवदिति ह्रस्वे आस्वस्य विच्छेदात्कथं दीर्घे स्थानिवत्त्वेन तल्लाभः, ङ्याप्स्थानिको दीर्घभिन्न आदेशो न स्थानिवदिति तदर्थ इति वाच्यम्, 'याडापः'

तुम्यमित्यादेः संग्रहः। द्विमात्रेति। इदमुप लक्षणं राममित्यादौ त्रिमात्रस्यापि। कित्व फलं त्वादि वृद्धिः स्यादिति। नन्वादि वृद्धेः फलत्वे अप्रत्ययस्यजित्वेन वृद्धि स्वरयोः सिद्धौ ककारोच्चारणं व्यर्थमिति चेन्न। कित्स्वर नित्स्वरोः पर्यायापादनस्यापि वक्तुं शक्यत्वात्। एतान्गाः पश्येति। ननु शसोनुम् नुग्वास्तु अक इत्यनुवर्ततेऽकः परस्य शसोनुम् नुग्वाऽगमः स्यादित्यर्थः। सकारस्य संयोगांत लोपः संयोगादि लोपो वा भविष्यति पूर्वसवर्ण दीर्घानंतर मितिचेन्न। तितउनित्यत्रैकादेशोत्तरं परादिवत्वेन शस एक देशविकृतन्यायेन प्रकृतित्वस्य चसत्वात् सर्वत्राचः परस्मिन्निति स्थानिवत्वे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(७।३।११३) 'औङ आपः' (७।१।१८) 'आङि चापः' (७।३।१०५) 'ङेराम्नद्याब' (७।३।११६) हल्ङ्याब्' (६।१।६८) इत्येतेष्वाकारप्रश्लेषमाश्रित्य स्थानिवत्त्वनिषेधप्रत्याख्यातृ भाष्यनये शङ्कासत्वेनादोषात्। अत्र यत्रोदाहरणे सूत्रभाष्यवार्त्तिकानां फलभेद आपतात तेषामनभिधानम्, यथा अतिखट्वस्य अः अतिखट्वा इत्यादेः; वक्ष्यमाणरीत्या दीर्घात्पूर्वं फलाभावेन स्थानिवत्त्वाऽप्रवृत्तौ (५) फलभेदस्यैवाभावाच्च।

यत्त्वाकारान्तरं प्रश्लिष्याकाररूप एव यो न कदाचिद्रूपान्तरं प्राप्त इत्यर्थ इति, तन्न; मानाभावात् भाष्ये तस्यानुक्तेश्च। (१) आबन्तं यदङ्गमिति। 'प्रत्ययग्रहणे' (प० भा० २३) इति परिभाषयाऽतिखट्वस्य (२) नाबन्तत्वं, (३) यच्चाबन्तं खट्वेति, न तदङ्गमिति भावः। न चानयाऽऽबन्तग्रहणे तेनाङ्गविशेषणादाबन्तान्तं यदङ्गमित्यर्थाद् 'अतिखट्वाय' इत्यादौ दोषस्तदवस्थ इति वाच्यम्, अङ्गस्य विशेषणत्वात्। एतेन श्रुतमाकारमादाय स्मृतमनुबन्धमादाय आप्त्वानुसन्धानात्स्यादेव याडित्यपास्तम्। तस्य लाक्षणिकत्वाच्च।

ननु स्त्रीप्रत्यये वाचनिकस्तदादिविधिनिषेधो भाष्ये पठितस्तत्कथमस्य तत्र प्राप्तिरत आह–उपसर्जनेति। 'स्त्रीप्रत्यये चानुपसर्जनेन' (प० भा० २६) इति वचनस्यैव भाष्ये पाठादिति भावः। अत्रोपसर्जनत्वं (४) लौकिकमेव स्त्रीप्रत्यये शास्त्रीयोपसर्जनत्वासम्भवात्। यद्यपि स्त्रीप्रत्ययान्ते शास्त्रीयोपसर्जनत्वमस्ति तथापि न तेन 'प्रत्ययग्रहणे' इति तदादिनियमप्रसक्तिः। एतत्सर्वं व्याख्यादर्शाद्यनुरोधेन।

परे त्वस्याकारस्य लाक्षणिकत्वान्नात्र याट् वर्णग्रहणेऽपि तत्प्रवृत्तेः 'ओत्' (१।१।१५) इत्यादौ भाष्ये स्पष्टमुक्तत्वात्। न च 'खट्वायै' इत्यत्र याडनापत्तिः, सूत्रन्तु (५) 'निशायै'

नोभयस्य सत्वाच्च सत्यपि संभव इति न्याये पूर्वसवर्ण दीर्घस्य बाघ एव स्यादिति तस्यादिति वक्तव्यमेवेतिदिक् वार्तिक मतमिति एवं च वार्तिक मत एव णत्वार्थमयोगवाहानामट्सु पाठस्य प्रयोजनमिति भावः। तद्भवनयन्नाह। भाष्येत्विति। ननु वाक्य संस्कार पक्षे स्त्री इइयतीत्यवस्थायां स्त्रीईत्यस्येयति शब्दे परतोंग संज्ञायां यस्येति लोपे तस्याभीय त्वेनासिद्धत्वान्नेयङ्न तदायस्येति चेत्यवेक्षायास्त्रिया इतिसूत्रेऽधिकस्यायेक्षालोपस्यापि स्त्रीशब्दायेक्षत्वादत आह्। विधि ग्रहणादेव भंनक्तीत्यादाविति। ननुतदादि ग्रहणं विनापि अतोदीर्घ इत्यत्रारंभ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादौ चरितार्थमिति वाच्यम्, यस्य रूपस्य लक्षणप्रवृत्तिं विना न सम्भवस्तस्यैव लाक्षणिकस्य तत्परिभाषा विषयत्वात्। न चेह तथा। एकादेशतः प्रागपि तद्रूपसत्त्वात् पदाङ्गाधिकारे इति वार्त्तिकेनाङ्गस्य विशेष्यताया एवौचित्यबोधनाच्च। अत एवा (६) बन्तान्तं यदङ्गमित्यर्थाभिप्रायेण 'अतिखट्वाय' इत्येतत्सिद्धये अतिखट्व-ए इति स्थिते प्रवृत्तं 'ङ्याब्ग्रहणेऽदीर्घः' इति वार्त्तिकं व्याख्याय श्रुताकारस्मृतानुबन्धाभ्या माप्त्वेनाशङ्कां कृत्वा लाक्षणिकत्वेन समाधायाकारप्रश्लेषेण तत्प्रत्याख्याने एतत्परिहारायोपायान्तराकथनं भाष्ये।

किञ्च अङ्गस्य विशेषणत्वे वार्त्तिकस्य तत्प्रत्याख्यानायाऽवकार प्रश्लेषस्य च वैयर्थ्यं स्पष्टमेव। किञ्च खट्वाया अर्द्धेऽर्द्धखट्वायामित्यादौ याडनापत्तिः। किञ्चाऽऽकारप्रश्लेषपक्षेऽपि दीर्घोत्तरं स्वाश्रयाकारत्वं स्थानिवद्भावेनाप्त्वमिति शङ्काऽयुक्तैव, दीर्घात्पूर्वं स्थानिवत्त्वस्य फलाभावादप्रवृत्तौ स्थानिन्याप्त्वबुद्धेर भावात्तदादेशे दीर्घे तदारोपस्य दुर्लभत्वात्, परम्परया कार्यमादाय स्थानिवत्त्वप्रवृत्तौ मानाभावात्। 'याडापः' (७।३।११३) इति सूत्र भाष्येऽपि 'अतिखट्वायेत्यत्र स्थानिवत्त्वात् प्राप्तस्य याटः प्रतिषेधो वक्तव्यः, न वक्तव्यो ङ्याब्ग्रहणेऽदीर्घ इति स्थानिवत्त्वनिषेधात्। न च दीर्घत्वे आबसौ भूतपूर्व इति याट् प्राप्नोति, लाक्षणिकत्वात्। स्थानिवत्त्वे तु तत्सामर्थ्यान्नैतत्परि भाषाप्रवृत्तिः' इत्युक्तम्। यद्यपि स्थानिवत्सूत्रयाडापसूत्रस्थ भाष्याभ्यां हल्ङ्याप् सूत्रयाडाप सूत्रयोरेव प्रश्लेषो लभ्यते, तथापि भाष्यमुपलक्षणमि तरसूत्रविषयोदाहरणान भिधानं वेत्यनयोर्युक्तं सुधीभिर्विचार्यमि (१) त्याहुः।

व्रश्च (८।२।३६)। अत्र आजिसाहचर्याद् भ्राजिः (१) फणादिरेव। तेनान्यस्य 'विभ्राक्' इत्येवाहुः। छशौ वर्णौ ताभ्यां शब्दरूपं विशेष्यमादाय तदन्तग्रहणमित्याह– छशान्तयोरिति।

सामर्थ्यादंगस्ये संबंधे मूलोक्तं भवामि भविष्यामीत्यादि सिद्ध्यतीत्यत आह्। तदादि ग्रहणमिति। सार्वधातुकार्धधातुकयोरित्यस्यतुभवतीत्यादौ सावकाशत्वमिति भावः। न च तदादिग्रहणस्य विधिग्रहणा भावे वैयर्थ्यात्तत्सामर्थ्या द्विधि शब्दाध्याहारे सिद्धे विधि ग्रहणं व्यर्थ मितिवाच्यम्। तदभावे व्याप्तिन्यायाद्यः प्रत्ययो यस्मात् क्रियते तदादि यस्मिन्कस्मिंचित्प्रत्यये परतोंग संज्ञमित्यर्थे देवदत्त ओदनमपाक्षी दित्यादौदेवदत्तोत्तरं सुपोविधानाद्देवदत्तादेः पच्छब्दांतस्यलुक्यं गसंज्ञायां देवात्पूर्वमप्य डागमापत्तिः पुनर्विधि ग्रहणेतु तत्सामर्थ्यात् प्रत्यासत्या यस्माद्यः प्रत्ययः क्रियते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

छशयोरित्युक्तेऽपि न क्षतिरिति चिन्त्यम्। पदस्येति तु 'पृष्टम् इत्यादिसिद्धये व्यधिकरणमेव। अन्तादेश इति। 'अलोऽत्यस्य' (१।१।५२) इति वचनात्। अत्र 'झलो झलि; (८।२।२६) इत्यतो झलीति, पदस्येति, 'स्कोः' (८।२।२९) इत्यतोऽन्ते इति चानुवर्तते। 'छ्वोः शूड्' (६।४।१९) इत्यत्र क्ङितीत्यनुवृत्तेः 'प्रष्टा' इत्यादौ शादेशाभावाद् अशान्तत्वेन षत्वाप्राप्तौ छग्रहणम्। अत्रापि सतुङ्निर्देशो बोद्धयः। तस्यासिद्धत्वादिति। 'चयो द्वितीयाः' (का० वा०) इत्यस्य 'नादिन्या' (८।४।४८) इति सूत्रे भाष्ये पाठादिति भावः। टतयोरिति। धुडभावे टस्य, धुटि तस्येत्यर्थः। न भवतीति। जश्त्वात्प्राक् षस्य नेत्यर्तः। जश्त्वे तु प्राप्तिरेव नेति बोद्धयम्।

केचित्त्विति। 'एकाचः' (८।२।३७) इत्युत्तरसूत्रेऽनुवृत्त्या मध्येऽपि सम्बन्ध एवोचित इति भावः। जश्त्वेनेति। यत्तु 'जश् झशि' इति निर्देशात् शस्य न जश्त्वमिति, तन्न; अविकृतस्वरूपप्रतिपादने तात्पर्यादय स्मयादित्वेन भत्वाच्च तत्र तदप्राप्तौ न्यायसिद्धायां ज्ञापकत्वायोगात् 'उपदेशेऽज्' (१।३।२) इत्यादि (१) निर्देशैः कुत्वाद्यनापत्तेश्च। अत्र मते भाष्या नुग्रहो विचार्यः। 'मांसपृतना' (का० वा०) इत्यस्य 'पद्दन्न' (६।१।६३) इति सूत्रे उपसंख्यातत्वादाह– शसादौ वेति। स्त्रीत्वादिति। पुंस्त्वाभावादित्यर्थः। नात्वं नेति। स्त्रीत्वादित्यनुकृष्यते। अत एव पुंस्त्वाभावान्नत्वाभाव इति नोक्तम्। न हि पुंस्त्वाभावो नाभावे प्रतिबन्धको नपुंसकेऽपि तदङ्गीकारात्।

ङिति ह्र (१।४।६) अत्र वाक्यद्वयम्। आद्ये यू इति, स्त्र्याख्याविति, अस्त्रीति, इयङुवङ्स्थानाविति, वेति चानुवर्त्तते। अन्त्ये यू इति, वेति, स्त्रीवाचकावित्येतन्मात्रार्थकं स्त्र्याख्याविति च। तत्र ह्रस्वयोप्राप्ते दीर्घयोस्तु 'नेयङ्' (१।१।४) इति निषेधादप्राप्ते विभाषाः। इष्वादिष्वप्राप्ति माशङ्क्य 'ङिति ह्रस्वश्च' (१।४।६) इत्यत्र

तदादित स्मिन्नेव प्रत्यये परतोंग संज्ञमित्यर्थेनोदोषात्। ननु संप्रसारण इत्यत्र सामर्थ्यात्संप्रसारण मित्यस्य तदाश्रयं पूर्वरूप मित्यर्थः। एवंच वव्रश्चेत्यत्रोभयोरपि यणोः संप्रसारणे पूर्वस्य पूर्व रूपेनिषिद्धे यणि लक्ष्ये लक्षण न्यायेन पुनःसंप्रसारणा प्राप्तौ तद्व्यर्थमत आह्। किंच राजपुरुष इत्यादाविति। एषामंगाधिकारेपाठो व्यर्थ इति। एवं चैषामंगाधिकारे पाठ सामर्थ्यत्प्रत्यया प्रत्ययोरिति परिभाषायाअत्र शास्त्रेअना श्रयणमर्थव त्परिभाषाया अनित्यत्वञ्च ज्ञाप्यते। तत्फलंत्वनिस्मन् ग्रहणेषु वर्ण ग्रहणे चानयोरप्रवृत्तिरिति तेन प्रत्ययाप्रत्ययोरिति अर्थवत्परिभाषा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नित्यस्त्रीलिङ्गावित्येवंविधो नियमो नाश्रीयत इति कैयटस्तु ह्रस्वांशमात्रविषय इत्याशयेनाह– नित्यस्त्रीलिङ्गा विति। अत एवास्य दीर्घांशे निषेधविकल्पत्वं भाष्ये उक्तं 'यू स्त्र्याख्यौ' (१।४।३) इति सूत्रे। तत्फलं 'कटप्रुवे' ब्राह्मण्यै' इति, (१) लिङ्गांन्तरविशिष्टार्थाभिधायकत्वेन तत्त्वाभावात्।

परे त्वत्र विकल्पो भवत्येव आख्याग्रहणरहितस्यैवात्र सम्बन्धात्। यद्वा, स्त्र्याख्यावित्येतदेव स्त्रीवाचकावित्येतन्मात्रार्थकमत्र, शब्दाधिकारात्। तज्च ङिदाक्षिप्ताङ्गस्य विशेषणम्। अत एव 'प्रथमलिङ्गग्रहणं च; (का० वा०) इत्यस्यात्राप्रवृत्त्यन्वाख्यायके 'ह्रस्वौ चेयङुवङ्स्थानौ च प्रवृत्तौ स्त्रीवचनावेव नदीसञ्ज्ञौ भवतो न तु पुंवाचकाविति वक्तव्यम्, इति वार्त्तिके 'अतिशकट्यै ब्राह्मण्यै। क्व मा भूत्? अतिशकटये ब्राह्मणाय, अतिश्रियै ब्राह्मण्यैः श्रियै ब्राह्मण। क्व मा भूत्? अतिश्रिये ब्राह्मणाय, श्रिये ब्राह्मणाय' इति 'यूस्त्र्याख्यौ' (१।४।३) इतिसूत्रशेषे भाष्ये उक्तम्। एवञ्चास्य निषेधविकल्पत्वम् सम्भवि समुदायस्य केनापि प्राप्त्यभावात्। अवयवस्य प्राप्तावपि तस्यानेन विकल्पाभावात्, ङिदाक्षिप्ताङ्गस्यैवानेन विकल्पात्। एतच्च 'प्रवृत्तौ स्त्रीवचनौ' इत्यनेन सूचितम्।

अत एवात्र वाक्यद्वयेऽपि विधिविकल्प एव दर्शितः। एवञ्च 'अत्र नियमो नाश्रीयते' इति कैयटो वाक्यद्वयपर एवोचितः। उपक्रमे निषेधपर तया व्याख्यानं तु स्त्र्याख्यावित्यस्य नित्यस्त्रीत्वार्थकत्वमजानत एकदेशिनो 'यू इति ह्रस्वयोर्ग्रहणम्' इतिपक्षोपपादने उक्तिभूतमिति तन्नादरणीयम्।

यत्तु– 'दीर्घवाक्ये स्त्र्याख्याविति ईदूतोस्तदन्तस्य वा विशेषणं, पुनरङ्गेन तदन्तविधिः, अङ्गस्य च केवलस्त्रीत्वं विशेषणम्। एवं ह्रस्वघटितवाक्येऽपि

चौपगवैरित्यत्रैव ऐस्स्यान्न तु मध्यमैरित्यत्राकारस्याप्रत्ययत्वादनर्थकत्वाच्चेति न चोदनीयमित्यजलम्। चतुर्थ्येक वचनस्यैव ग्रहणं व्याख्या नादिति। अवयवे च प्राणीति निर्देशात्प्रतिपदोक्तत्वात् सर्वनाम्नः स्मै इत्यत्रार्थाधिकारानुरोधाच्चेत्यर्थः।। कार्यस्यनिमित्तमिति। वाचिह्रस्वश्चेत्येवसिद्धे वामि ङितिह्रस्वश्चेति सूत्रद्वयारंभेणास्याज्ञापितत्वात्। ज्ञापकस्य च स जातीय विषय त्वादित्यर्थः।

नच वाचि ह्रस्वश्चेत्यत्रोभयोरनुपादानात्कथं साजात्यादे स्तदर्थ लाभ इति वाच्यम्। सर्वानुवर्तकचकारोपादानात्। तन्मते इकोचि विभक्तावतोमिस ऐस्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्रियामित्येतन्मात्रमुभयोर्विशेषणम्' इति, तत्तु चिन्त्यं भाष्यात्त दलाभात्। 'नेयङुवङ् (१।१।४) इत्यत्र तु नेयङाद्याक्षिप्ताङ्गविशेषणं स्त्रीत्वं तदाक्षिप्तस्येयङादिविशेषणताया एवौचित्यात्, 'यस्याङ्गस्येयुवौ' इति भाष्योक्तेः स्त्र्याख्यावित्यस्य नित्यस्त्रीलिङ्गावित्यर्थकस्य यू इत्यनेनैव क्लृप्त सम्बन्धत्वाच्च। अत एव 'अतिश्रिये ब्राह्मणाय' इत्यत्रानेन निषेधादवयव नदीत्वप्रयुक्तमपि नदीकार्यं न।

ननु यथा 'खरकुट्यै ब्राह्मणाय' इत्यादौ लुबन्तस्य त्रिलिङ्गत्वेऽपि प्रथमलिङ्गग्रहणान्नित्यनदीत्वं भवतीति भाष्ये उक्तम् 'चञ्चा ब्राह्मणान् पश्य' इत्यादौ युक्तवद्भावेन स्वलिङ्गप्रयुक्त कार्याभावस्याप्यतिदेशान्न नत्वम्। स्पष्टं चेदं 'तस्माच्छसः' (६।१।१०३) इति सूत्रे भाष्यकैयटयोः। यद्वा, अतिदेशेन प्रकृतिलिङ्गप्रयुक्तेन कार्यातिदेशेन (१) तद्विरुद्धस्वाश्रयकार्या प्रवृत्तिः। स्पष्टञ्चेदं 'स्त्रियाम्' (४।१।३) इति सूत्रे भाष्ये। युक्तवद्भावादि प्रत्याख्यानेऽपि यथा दारादिशब्दैः पुंस्त्वेन स्त्रीरूपार्थस्य भानं, तथा प्रकृते स्त्रीत्वेन पुंसो भानमिति न नत्वम्, पुंस्त्वे वाच्ये नत्वमित्यर्थात्। न चैवं 'खरकुट्यै' इत्यत्रापि युक्तवद्भावेन नित्यस्त्रीत्वात्सूत्रेणैव सिद्धमिति वाच्यम्, स्त्र्याख्यावित्यस्य स्त्रीत्वविशिष्टमेव य आहेत्यर्थात्, न चायं तथा स्त्रीत्वेन रूपेण वस्तुतः पुंस्त्वविशिष्टस्याभिधानात्। यद्यपि पदार्थमात्रे शास्त्रीयलिङ्गत्र यमस्ति, तथापि व्यक्तिवस्तु पदार्थादि पदबोध्यत्वकाले तत्तल्लिङ्गोपजननेऽपि स्त्रीपदादिबोद्धयत्वदशायां तत्सत्त्वे मानाभावात्। प्रकृते तु 'ब्राह्मणाय' इत्यादिविशेष्यदर्शनेन तत्सत्तानुमानात्। स्पष्टं चेदं भाष्यकैयटयोः। एवं श्रीशब्दात्कनि लुपि 'श्रिये ब्राह्मणाय' इत्यादौ विकल्पापत्तिः। युक्तवद्भावेन स्त्रियामङ्गस्य वर्त्तनात्, अत्र सूत्रे नित्यस्त्रीत्वानिवेशाच्च; इति चेत्? न, सत्यभिधाने इष्टापत्तेः। भाष्ये दृश्यमानं 'श्रिये

बहूनित्रीणि अजरै रित्युदाहरणानि। नाग्रह इति। अस्या उपजीव्य विरोध न्यायमूलकत्वाज्ज्ञापकस्य भाष्यानुक्तत्वाच्चेति भावः। अकृत्सार्वेति दीर्घ णोपपत्तेरिति। न यासयोरिति ज्ञापकात्संनिपातलक्षण विधावुपात्त रूपस्य तद्विघातकविधावुपादात्रा एवं परिभाषायाः प्रवृत्तेरकृदित्यतदभावान्न परिभाषाप्रवृत्तिरितितदाशयः। तन्मते परिभाषाया उदाहरणंतु निकुचित इति तत्रहिकित्व निमित्तेन लोपे उपदाधिति कित्व प्रतिषेधाद्गुणाभावः। तस्यापीति। कृन्मे जन्त इति सूत्रे भाष्येपरिभाषायाः प्रयोजन कथना वसरे शतानीत्यादेरप्युदाहृतत्वेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्राह्मणाय' इत्यादि तु क्यजन्तात्क्विपि बोद्धयम्। विपरीतं नित्यस्त्रीत्वनिवेशवादिनो लुबन्ते 'श्रियै ब्राह्मणाय' इत्यादौ तदनापत्तिर्दोष (२) इत्याहुः।

यू किम्? मात्रे। यद्यपि यू इति दीर्घपरं, तथापि विभक्तिविपरिणा मेन य्वोर्ह्रस्वावित्यन्वयो बोद्धयः। एतत्सर्व (१) 'वामि' (१।४।५) इत्यत्रापि बोद्धयम्।

'इदुद्भ्यामौदच्चघेः' इति सूत्रे योगविभागेन व्याचष्टे– इदुद्भ्याम् (७।३।११७) अनदीसंज्ञकेषु 'अच्च घेः' (७।३।११९) 'औत' (७।३।११८) इत्याभ्यां बाधात्, 'ङेराम्' (७।३।११६) इति सूत्रान्नदीग्रहणानुवृत्तेश्चाह– नदीसञ्ज्ञकाभ्यामिति। मत्यामिति। सन्निपातपरि परिभाषाया (२) अनित्यत्वाद्यण्।

त्रिचतुरोः (७।२।९९)। 'अष्टन आ' (७।२।८४) इत्यतो विभक्ताविति वर्त्तते तत्फलं त्रिभार्यः। तृतीयान्तेन समासः। भार्यो भरणीयः।

अचि र (७।२।१००) अलोऽन्त्यपरिभाषयैव सिद्धे ऋत इति अनुवर्त्त मानतिसृचतसृ इत्यस्य षष्ठ्यन्तत्वकल्पनाय। अन्यथा त्रिचतुरोरित्यस्यैवानुवृत्त्यापत्तौ रादेशेन तिसृचतस्त्रोर्बाधापत्तिरिति दिक्। नुमचिरेति। अत्राचिरांशे 'न तिसृ' (६।४।४) इति निषेधो मूलम्। (३) एतेन स्त्रीत्वरूपार्थ विशेषविभक्ति सञ्ज्ञानिमित्ततिस्राद्यपेक्षया नुडन्तरङ्ग इत्यपास्तम्। अतो निषेधादेवार्थसञ्ज्ञा कृतबहिरङ्गत्वानाश्रयणम्। अन्यथा 'आम्' इतिप्रत्ययविशेषापेक्षत्वेऽपि सञ्ज्ञाऽर्थविशेषानपेक्षत्वेनान्तरङ्गत्वात्त्रयादेशे तदसङ्गतिः स्पष्टैव। वस्तुतः स्वरूपेणोपादाने न बहिरङ्गत्वं किन्तु केनचिद्विशेषधर्मेणोपादाने एवेति, विशेषापेक्षस्य बहिरङ्गत्वमेव न इति च रुद्धातौ निरूपयिष्यामः। तृज्वत्सूत्रे भाष्ये तु 'न तिस्रितिज्ञापकाद्

तादशानुगमस्याप्रामाणिकत्वात्न यासयोरितितुतदनित्यतामात्र ज्ञाकमिति भावः। अंसुप्येवेति। तेनोरुषेत्यादै न दीर्घ इतिभावः।

नुमापत्तेरिति वार्ण परिभाषया परत्वेन चेत्यर्थः। न चवार्ण परिभाषायाः। समान स्थानिकत्व एव प्रवृत्तेरंतरंगत्वा दुणएव भविष्यतीति न दोष इति वाच्यम्। एवंच गुणेंतरंगेबहिरंगस्येडागमस्येवासिद्धत्वापत्तेः। चर्त्वोत्तरं द्वित्वमिति। टाङसीतिसूत्रे आदीति छेदस्तेनादुण इत्यादौ तपर सूत्रं न प्रवर्तते। अत्रार्थे एवोसर्गा दृतीति तपरत्व लिंगमिति भावः। ननु ह्रस्वनद्याप इति पंचमी कुतः षष्ठी नेत्याह

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रादेशो नुड्विषये न। पूर्वविप्रतिषेधेन तु न सिद्ध्यति अपवादविषये विप्रतिषेधाप्रवृत्तेः। रादेशस्य सर्वापवादत्वात्' इत्युक्तम्।

त्रिचतुरोर्विशेषणादिति। स्त्रीनिष्ठसंख्यायां वर्त्तमानयोरित्यर्थ इति भावः। नेहेति। त्रिशब्दस्य पुंनपुंसवृत्तित्वेऽपि समुदायस्य स्त्रियां वृत्तेरङ्गविशेषणत्वे आदेशः स्यादिति भावः। आमि त्विति। तत्राऽऽम् षष्टीबहुवचनमेवार्थाधिकारादतो न ङेरामि (१) त्रयादेश इति बोद्धयम्। प्रियतिसेति। अङ्गविशेषणत्वेऽत्राव्याप्तिः स्यादिति भावः। प्रिया जस् त्रि जसिति स्थिते 'अन्तरङ्गानपि' इतिन्यायेन विभक्तिलुकि पुनः सुपि तदन्तविधिना निर्दिश्यमान परिपाषया त्रिशब्दस्यादेशः। ततो 'नद्यृतश्च' (५।४।१५३) इति कप्तु न, समासार्थालौकिकवाक्ये (२) ऋकारान्तोत्तरपदत्वाभावात्। 'ऋदुशन' (७।१।९४) इत्यनङ्। प्रियतिसृणी इत्यादि। अत्र नुमः परत्वात्तिस्रादेशे पुनः प्रसङ्गविज्ञानेन नुम्। 'न तिसृ' (६।४।४) इति ज्ञापकेन सामान्यत आगमविषये रादेशो नेति ज्ञाप्ते। 'प्रत्ययोत्तर' (७।२।९७) इति सूत्रे चेमौ भाष्ये प्रयोगौ।

द्वेरत्वे इति। बहिरङ्गासिद्धत्वन्तु 'न यासयोः' (७।३।४५) इति निर्देशेनानित्यत्वान्न प्रवर्त्तते। विभक्ताविति। 'युवोरनाकौ' (७।१।१) इत्यत्र भाष्ये पाठात्, ङ्याप्सूत्रे तत्परिभाषादोषेषु पाठाच्च। 'सख्यशिश्वी' (का० वा०) इति ङीप्। 'यस्येति च' (६।४।१४८) इतीकारलोपः।

लक्ष्मीरिति। 'कृदिकारात्' (ग० सू० ४।१।४५) इति ङीपि 'लक्ष्मी' इत्यपि। स्त्यायतोऽस्यां शुक्रशोणिते इति स्त्री स्त्यायतेर्ड्रट्, टिलोपयलोपौ, टित्वात् ङीप्। इयङीति। स्त्रीशब्दस्येकारान्त्वादियङेवानुवर्तते इति भावः।

नामीति लिंगादि ति सामान्ये न नुड्विधेय इति। आमित्यस्य षष्ठ्या वि परिणाम स्तु नामीति लिंगादिति भावः। षट्चतुर्भ्यश्चेत्यत्र चतुः शब्द साहचर्यात्षट् संज्ञकः७५ कृत्रिम संख्या वाच्येव गृह्यते तत्साहचर्याच्चतुः शब्दोपि हलंत एव गृह्यत इत्याह हलं ताच्चेदिति। अंगस्येतिकिं चर्मणामिति। अंगाधिकारे ऽतोभिस इत्यादेः पाठादर्थ वद्ग्रहण इत्यस्या अनित्यत्वादित्यर्थः।

नामाचष्टेप्रनानित्यपिप्रत्युदाहरणं बोध्यम्। षट्चतुर्भ्य इतिसिद्धमिति। अत्र पक्षे त्रिशब्द साहचर्याच्चतुः शब्दोऽजन्तोपि गृह्यते एदर्थमेव षडित्यत्र त्रेरनुवृत्तिरुक्ता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुणनेति। 'जसि च' (७।३।१०६) इति गुणः। 'आङो ना' (७।३।१२०) 'अच्च घेः' (६।३।११६) 'ह्रस्वनद्यापः' (७।१।५४) इत्ये तैरित्यर्थः। बाध्यते इति। स्त्रीशब्दस्येयङ् इत्यनेनान्वयः। नुम्– 'इकोऽचि' (७।१।७३) इति। पूर्वकारिकोक्तैर्बाधे सति यत्फलितं तदाह– ओस्याविति। अजादौ य इयादेशो विहितः स उपसर्जने पुंसि विद्यमानस्य स्त्रियाः स्त्रीशब्दस्यौसादिषु चतुर्ष्वेव, न त्वन्यत्र, गुणादिभिर्बा धादिति भावः। पुंवद्भावादिति। 'तृतीयादिषु भाषितपुंस्कम्' (७।१।७४) इत्यनेनेति भावः। ननु ह्रस्ववाक्येऽप्यस्त्रीत्यस्य सम्बन्धेन स्त्रीशब्दा वयवभिन्नह्रस्वेवर्णान्तादित्यर्थेन कथमत्र प्राप्तिरत आह– अस्त्रीति। तत्र बीजमाह– तत्सम्बद्धस्यैवेति। प्रसज्यप्रतिषेधस्तु न, वाक्यभेदाद्यापत्तेः। नन्वियङुवङ्स्थानावित्यनेनापि स्वस्य निषेधः किं नेत्यत आह– दीर्घस्यायमिति। तत्र ह्रस्वपदाभावादिति भावः। श्रयन्त्येतामिति श्रीः। 'क्विब्वचि' (का० वा० इत्यादिना 'वाग्' इत्यत्रेव कर्मणि क्विब्दीर्घौ। अङ्यन्त्वान्न सुलोपः।

नेयङु (१।४।४) ङद्वयोच्चारणं स्पष्टार्थम्। स्थानशब्दो भावल्युडन्तः। इयङुवङोः स्थानं स्थितिर्ययोरिति बहुव्रीहिः। सा च बाधकाविषये एव। तेन प्रकृष्टा धीः 'प्रधीः' 'प्रध्यै' इत्यादौ न निषेधः। सा चोपलक्षण व्याख्यानात्। तेन 'हे श्रीः' इत्यादौ निषेधसिद्धिः 'श्रियौ' इत्यादौ तत्स्थिति सत्त्वात्। यत्र नदीकार्याश्रयेऽङ्गे बाधकाबाधिते यङादिस्थितिः क्वचित् दृष्टा तस्य तदवयवस्य च निषेध इति (१) फलितम्। अत एव प्रकृष्टा धीर्यस्या; यस्य वा 'प्रधीः इत्यत्रावयवधीशब्दस्य नदीत्वं भवत्येव। तदुक्तं भाष्ये 'अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङुवङ्स्थानप्रतिषेधे यण्स्थानयोरपि य्वोः प्रतिषेधः प्राप्नोति, अवयवस्येयङुवङ्स्थानत्वात्। आध्यै, प्रध्यै। सिद्धं त्वङ्गरूपग्रहणात्। यस्याङ्गस्येयुवौ

न तु ह्रस्वनद्याप इत्यत्रेति भावः। ननु कष्टायेति निर्देशात् सुपि चेति दीर्घे कर्तव्ये परिभाषाया अनित्यत्वमित्यत आह् कृताकृत प्रसंगित्वादिति वस्तुत इत्यादि। ष्णांताषडित्यत्ररेफं प्रश्लिष्य षट्चतुर्भ्यश्चषट्त्रीत्यनयोश्चतुर्ग्रहणंन कर्तव्यं षड्भ्यो लुग र इति न्यासात्तु चत्वार इत्यादौ न लुगित्येवं वादी शंकते। यत्त्विति। साहचर्य प्रयोजकाभावादजंतयोरपिषट् शब्देन कति चतुरोस्तत्र ग्रहणादिति भावः। अप्रवृत्तेरिति। लौकिकैकदेशविकृत न्याये न कृतदीर्घेपिषट्त्वस्यस त्त्वात् सन्निपात विधाताभावेनेत्यर्थः। एतन्न्यायस्याशास्त्रीयेपिप्रवृत्तेरिति भावः। न तिसृ चतस्त्रित्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भवतस्तस्येदं ग्रहणम्। न चैतस्याङ्ग स्येयङुवङौ भवतः' इति। श्रियै इति। 'ङिति ह्रस्वश्च' (१।४।६) इति विकल्पः।

वामि (१।४।५)। आमीतिच्छेदः। प्रधीशब्दस्येति। प्रकृष्टं ध्यायीत्यर्थकस्येत्यर्थः। वृत्तिकारादीनामिति। अयं भावः– भाष्ये 'आध्यै' 'प्रध्यै' इत्यादावियङ्स्थानत्वान्निषेधमाशङ्क्य यत्र नदीकार्याश्रयेऽङ्गे इत्युक्तरीत्या समाहितम्। तत्र न बहुव्रीहिः, कबापत्तेः। किन्तु प्रकृष्टं ध्यायतीत्याद्यर्थकं तत्। तत्र (१) कैयटोक्तनित्यस्त्रीत्वाभावेन नदीत्वाप्राप्त्या भाष्यासङ्गतिः। अतः 'स्त्रीविषयावेव यौ यू नित्यम्' इत्यत्र भाष्ये एवकारो भिन्नकमः। नित्यमेव यौ स्त्रीविषयावित्यर्थः। नित्यमेवेत्यस्य पदान्तरं विनापीत्यर्थः। खलपूकटप्रूग्रामणीत्यादीनां क्रियाशब्दतया पुंसि मुख्या वृत्तिः। पुंसः खल्वयमुचितो धर्मः, शक्त्वाद्धयरहितत्वाच्च। अस्तेषां न पदान्तरं विना स्त्रीवृत्तित्वम्। ध्यानादि तु स्त्रीपुंससा धारणमिति। अत्रारुचिबीजन्तु सूत्रभाष्याद्यक्षरैरीदृशनित्यस्त्रीत्वालाभः। भाष्योदाहरणे बहुव्रीहिरेव। कप्तु न, ऋकारसाहचर्येण यस्य वृत्तेः प्राग्नदीत्वं तदुत्तरपदके एव तत्प्रवृत्तेः। धीशब्दस्येयङ्स्थानत्वेन प्राङ्नदीत्व निषेधात्। गतिपूर्वकत्वाद्यणपि सुलभः। 'आध्यै इति चिन्त्यमेतत्, क्रिया शब्दत्वेन (२) नित्यस्त्रीत्वाभावात्' इति कैयटस्तु चिन्त्य एवेति दिक्।

लक्ष्मीवदिति। स्त्रियामिति शेषः। पुंवद्रूपमिति। उक्तविग्रहे नित्यस्त्रीत्वाभावात् पुंसीव स्त्रियामप्यनदीत्वादिति भावः। प्रकृष्टाधीरिति विग्रह इति। ईदृशपदघटितविग्रहे इत्यर्थः। तेन कर्मधारये बहुव्रीहौ च सर्वलिङ्गेऽपि मतद्वयेऽपि लक्ष्मीवत्। 'प्रथमलिङ्गग्रहणञ्च' (का० वा०) इत्यवयवधीशब्दस्य नदीत्वात्। 'नेयङ्' (१।४।७) इति निषेधस्योत्तरीत्या

करणे नेति। यद्यपि यथान्यासेपि तिसृणामित्यत्र सन्निपातपरिभाषया दीर्घाप्राप्तेस्तिस्त्रित्यस्या करणं तथापि न तिसृचतसृ ग्रहणयोरकरणे नेत्यर्थः। दिगिति दिगर्थस्तु अनश्व इत्यादो दोषादज्ञापकमेवेति। स्त्रक्ष्वित्याद्यर्थमिति। आदिना प्राक्ष्वित्यस्य संग्रहः। लिंगाच्चेति। चोहेतौनतु समुच्चये। अनुवृत्तावेवेति। न तु षत्वाभावे। अमुष्येत्यादौषत्वानापत्तेः। महाविभाषा सम्बधस्यावश्यकत्वेनेति। तयदेशे उभय प्रतिषेधइति वार्तिक मते तयादेशस्यायचः सत्वात्तयबिधौतत्संबंधे बाधकाभावेन विग्रहस्य सत्त्वादत्रमतेपि फलाभेदाय तत्संबंधस्या

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राप्त्यभावादिति भावः। विशेष इति। लक्ष्मीशब्दापेक्षयेत्यर्थः। श्रीवदिति। स्त्रियामिति शेषः। विशिष्टस्यापीयङ्स्थानत्वेन ङिदामोर्विकल्पस्यान्यत्र निषेधस्य च प्राप्तेरिति भावः। पुंसि त्वीदृशबहुव्रीहावपि न नदीत्वं 'नेयङ्' (१।४।७) इत्यवयवस्य निषेधात्, समुदायस्याप्राप्तेश्च। पुंवदिति। 'सुष्ठु ध्यायतीति विग्रहे' इति शेषः, तस्य नित्यस्त्रीत्वाभावेन पुंसीव स्त्रियामप्यनदीत्वादिति भावः। इति विग्रहे त्विति। ईदृशपद घटितविग्रहके स्त्रीलिङ्गबहुव्रीहौ कर्मधारये चेत्यर्थः। तत्र बहुव्रीहाववयवस्य 'नेयङ्' (१।४।७) इति निषेधः, ङिति तु समुदायस्य विकल्प इति बोधयम्।

स्त्रियाञ्च (७।१।९६)। अत्र 'असम्बुद्धौ सर्वनामस्थाने' इति न सम्बध्यते आरम्भसामर्थ्यात्। ऋन्नेभ्य इति। तदन्तशब्दानां बहुत्वाद् बहुवचनम्। प्रातिपदिकविशेषणत्वात्तदन्तविधिः। स्त्रियामिति चाधिकारः। क्वासि हे सुभ्रु इति। रावणेन सीताऽपहारोत्तरं रामविलापोऽयम्। विधिना त्वया हापितस्त्याजित् सः 'हे सुभ्रु क्वासि' इत्येवं बहु विललापेत्यर्थः। 'नेयङ्' (१।४।७) इत्यनेनावयवस्य समुदायस्य च नदीत्वनिषेधात्प्रश्नः। प्रमाद इति। विरहपीडितत्वेनानवधानलक्षणोऽत्र प्रमादः। स च विरहपोषत्वात्काव्ये गुणः।

एकाजुत्तर (८।४।१२)। एकोऽच् यस्मिन्, तादृशमुत्तपदं यस्येति सूत्रे बहुव्रीहिगर्भो बहुव्रीहिः। उत्तरपदे इत्यनेनास्य वाक्यस्य समास पदघटितवाक्यैकदेशत्वानुमानात्समासो विशेष्य इत्याह– तस्मिन्समासे इति। आरम्भेति। 'प्रातिपदिकान्त' (८।४।११) इत्यनेन विकल्पेन णत्वे सिद्धे इत्यर्थः। पुनरिति। णग्रहणेऽनुवर्त्तमाने इत्यर्थः। यणमिति। 'दुन्कर' (का० वा०) इति यणमित्यर्थः। भेकजाताविति।

वश्यकत्वेनेतिभावः। रूपादे रस्मादनभिधा नमेवेति। केचिद्व चनपरतावक्तव्येति मते रूपादिष्वयचः प्राप्तेस्तत्प्रत्याख्यानेऽप्राप्तेरिति भावः। कथमिति। कस्याज्ञाताद्यर्थ मात्र बोधकत्वेन द्वित्व संख्याप्रकारक संख्येय विषयक बोधविषयार्थानुवादकत्वरूपद्विव चनत्वाभावादितिभावः। (प्रकृतितोविशिष्टाभवंतीति) अज्ञाताघर्थानांप्रकृत्यर्थ विशेषणतयैव बोधादज्ञाताद्यर्थविशिष्टेऽर्थेवर्तमा त्प्रातिपदिकात् कादयः प्रत्ययाभवंतीत्यर्थे विनिगमनाविरहात् सर्वार्थानुवादकत्वेनोक्त रूप द्विवचनत्वमितिभावः। ननु सर्वादीनी त्यस्यैवमहासंज्ञया सर्वार्थबोधकत्वनिमित्तता।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिली गण्डूपदी भेकी वर्षाभ्वी कमठी डुलिः। (अ० को० १।१०।२४)।
इत्यमरादस्य बाह्वादित्वेन वा ङीषिति भावः।

अन्ये त्वस्य गौरादिपाठान्नित्यमेव ङीष्। 'भेक्यां पुनर्नवायां स्त्री' इति यादवस्य– 'सुतः पुत्रः स्त्रियान्त्वमी। आहुर्दुहितरम्' इतिवत् नित्यङ्यन्तत्वेऽप्युपपत्तेरित्याहुः। गौरादित्वादिकल्पने मानाभावात् अमरे 'वर्षाभूः कमठी डुलिः' इत्येव पाठ इति सुबोधिनीकार इति माधवः। तदनुसारेण मूलं बोद्धयम्।

टाब्ङीपौ न स्त इति। (१) 'स्त्रियां यत्प्राप्नोति तन्न' इति व्याख्यानादिति भावः। स्वस्त्रादिषु मातृशब्दस्य ननान्द्रादिसाहचर्यात् (२) प्रसिद्धत्वाच्च ससम्बन्धिकजननीवाचकस्यैव ग्रहणम्। सन्निपातपरिभाषयैव तिसृचतस्त्रोर्ङीबभावे सिद्धे तदनित्यत्वज्ञापनार्थं तयोर्ग्रहणमिति केचित्। स्वस्त्रादिषु तिसृचतस्त्रोः पाठोऽनार्ष इति कृन्मेजन्तसूत्रस्थ भाष्यस्वरसः।

इत्यजन्ताः स्त्रीलिङ्गाः।

अतोऽम् (७।१।२४)। अत इत्येतत् अधिकृतस्याङ्गस्य विशेषणम्। 'स्वमोर्नपुंसकात्' (७।१।२३) इति चानुवर्त्तते। अम् लुग्वाबाधको (३) 'येन नाप्राप्त' (प० भा० ५८) इति न्यायात्। 'अम्' इतिच्छेदो (४) न तु 'म्' इति, 'ज्ञानम्' इत्यादौ 'सुपि च' (७।३।१०२) इति दीर्घापत्तेः। सन्निपात परिभाषया दीर्घ (५) वारणे तु 'हे ज्ञान' इत्यादौ सम्बुद्धिलोपस्यानापत्तिः मनिमित्तस्य प्रकृतिप्रत्ययसन्निपातस्य प्रत्ययलोपेन विनाशात्। अत एव 'एङ्ह्रस्वात्' (६।१।६९) इति सूत्रे 'ज्ञान! इत्यादौ मलोपाय, कतरद्' इत्यादौ लोपाभावाय चाङ्गाक्षेपव्यधिकरणान्वयहल्पदानुवृत्तय आस्थिता भाष्ये न तु 'म्' इतिच्छेद

अस्य तु तत्साहचर्यान्न संज्ञोपसर्जनयोः प्रवृत्तिः। एवं चैतस्य नार्थ निमित्तता अत आह्।

अर्थकृतेति। ननु निषेधाश्चवलीयांस इत्यस्य सामर्थ्य मूलकत्वं प्रकृते तु न सामर्थ्य द्वितयादौ सार्थक्यादत आह्। किंच नांतरंगं बलीय इत्यस्येति। बहुशस्त थादृष्ट त्वादिति। ग्रामणिनीत्यादा त्यर्थः। ननु प्रथम इत्यादौ सर्वनाम्नोविहितत्वात् सिद्धये जसीतिविषय सप्तमी। एवं चोमयोः समकालएवप्रवृत्तिरत आह्। जसीति विषय सप्तमीति पक्षेपीति। ननु जस्विषये उपह्नुताया नित्य संज्ञाया वैयर्थ्यमिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उक्त इत्यलं भाष्य विरुद्धकल्पनयेति दिक्।

'जसः शी' (७।१।१७)। इश्चाश्च यं तस्येत्यर्थो व्याख्यानात्। भस्येत्यधिकारः, चेन 'नस्तद्धिते' (६।४।१४४) इत्यतः 'तद्धिते' इत्यनुकृष्यते तदाह–भस्येत्यादि। भस्येति किम्? गर्गरूप्यम्। औङः श्यामिति। इत एव निर्देशादस्य नित्यस्त्रीत्वं बोद्ध्यम्। औङ इति स्वरूपकथनं 'सर्वे इत्यस्य भाधिकारेण सिद्धेः।

जश्शसोः (७।१।२०)। शस् अत्र सुबेध, (१) व्याख्यानात्।

नपुंसकस्य (७।१।७२)। 'इदितो नुम्' (७।१।५८) इत्यतो नुम् इति सर्वनामस्थान इति चानुवर्त्तते। अङ्गस्येति च प्रकृतम्। तच्च झलज्भ्यां विशेष्यते। नपुंसकस्येति गृह्यमाणस्याभावादङ्गस्यैव विशेषण्। 'अस्थिदधि' (७।१।७५) इत्यादौ तु गृह्यमाणस्यैव प्रकरणात् श्रुते (२) र्बलवत्त्वात्। अत एव 'त्रिचतुरोः' (७।२।६६) इत्यत्र स्त्रियामिति तयोरेव विशेषणामि त्याकरः। उपधादीर्घ इति। 'सर्वनामस्थाने चासंबुद्धौ' (६।४।८) इत्यनेनेति भावः। शेषमिति। कर्मणि घञ्। 'घञजपः पुंसि' (लिं० सू०) इति प्रायोवादः।

अदड्ड (७।१।२५)। दड्डेति पाठः। दस्य ष्टुत्वं, डस्य संयोगान्तलोपश्चाऽऽदेशस्वरूपभङ्गभिया न कृत इति (१) कैयटः। पञ्चभ्य इति अधिकव्यवच्छेदाय। अस्य सर्वाद्यन्तर्गणत्वात्।

परे तु डतरादिभ्य इति विरुद्धविभक्तिपञ्चम्यन्तत्वादङ्गस्येत्यनेनान्व यानर्हमिति (२) डतरादिभ्यो विहितयोः स्वमोरङ्ग संज्ञानिमित्तयोरित्यर्थ इति। सर्वादिसूत्रे भाष्ये स्पष्टम्। एवञ्च (३) 'परमकतरं कुलम्' इत्यादौ नादड्।

चेत्तर्हयत्रापितुल्यमित्याह। स्थानिवदितीति। नन्वंतरंग विषये विहरंगमसिद्धमित्येव परिभाषार्थः। एवं च तथाऽत्रापितयास्थानिवद् भाव प्रापितायाः परत्वाद्बाध एवे तिन दोषोऽत आह्। प्रत्यक्ष स्येति। एवंचोभयोस्तुल्यबल विरोध एव नेतिभावः।

ननु कार्यकाल पक्षे जसुत्पत्यनंतर मेवनित्य संज्ञायाः प्रवृत्त्योभयोः समकालत्व मेवेतिन दोषोऽत आह्। सर्व नाम संज्ञायामिति। उक्त युक्त्येति। सर्वनाम्नोवि हितत्वेन शीभाव सिद्धिरूपयेत्यर्थः। अयच् प्रत्ययां तरमिति भाष्यस्य द्वित्रिभ्यांतयस्येति सूत्र एव तयस्येति न वक्त व्यभित्याशयं मन्वान आह् द्वित्रिशब्द

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्तु कैयटेनार्थद्वारकं विधानमाश्रयितव्यम्। तेन 'परमकतरद्' इत्युक्तम्; तन्न, तस्य यदि डतराद्यर्थगतसंख्याभिधायिन इत्यर्थस्तदा पञ्चम्य न्तात्तादृशार्थप्रतीत्यसम्भवः। यदि षष्ठ्यर्थे पञ्चमी, तदा 'विरुद्धविभक्तित्वात्' इति भाष्यासङ्गतिः, विधानस्य सर्वथाऽनाश्रयणेनार्थद्वारकं विधानमिति तद्ग्रन्थासङ्गतिश्च। न चैतदर्थे उपसर्जनप्रतिषेधारम्भो व्यर्थः स्यादिति वाच्यम्, तत्प्रत्याख्यानायैवैतद्भाष्य प्रवृत्तेः। परमकतरादिव्यावृत्तयेऽवश्याश्रयणीय विहितविशेषणेनैवातिकतरादिव्यावृत्तौ स व्यर्थ इति तदाशयः। 'त्यदादीनामः' (७।२।१०२) इत्यत्र षष्ठयन्तत्वात्त्यदादीनामित्यर्थद्वारकं विभक्तिविशेषणम्, 'अस्थिदधि' (७।१।७५) इत्यादावङ्गं तथा तद्विशेषणं व्याख्यानादित्यपि तत्रैव भाष्ये स्पष्टमि(४) त्याहुः।

डित्त्वफलमाह– टेः (६।४।१४३)। 'ति विंशतेः' (६।४।१४२) इत्यतो डितीति वर्त्तते, भस्येति चाधिकृतम्। पञ्चम इति। डतो मटि भत्वाभाव इति भावः। अन्यतमस्येति। डतरादिष्वपाठादिति भावः। एकतरमिति। 'एकाच्च प्राचाम्' (५।३।९४) इति डजतरच्। एकतमस्य तु 'एकतमद्' इत्येव। परत्वादिति। नुमपेक्षयेति शेषः। शब्दान्तरप्राप्त्या झलन्ताजन्तलक्षण भेदाच्च नुमप्यनित्य इति भावः।

केचित्तु शिभावात्परत्वाज्जरसि ततः शौ झलन्तत्वान्नुमित्यर्थमाहुः। अत्र यद्वक्तव्यं तद् (१) निर्जरशब्दे उक्तम्।

सान्तमहतः (६।४।१०)। सान्तेति लुप्तषष्ठीकं पृथक् पदं संयोगस्येत्यनेन समानाधिकरण्। 'नोपधायाः' (६।४।७) 'सर्वनामस्थाने चासम्बुद्धौ' (६।४।६) इत्यनुवर्त्तते, तदाह– सान्तसंयोगस्येत्यादि। उपधाग्रहणञ्च पूर्वत्वमात्रोपलक्षणं

प्रकृतिकायजंतस्येति तदाशय इति। केनचिदुक्त इतिशेषः अत्रारुचिबीजंतु कर्तृ कर्मणोः कृतीति सूत्रस्थ धातोश्च द्वये७७ कृततिङश्चेति प्रत्यया इति भाष्य विरोध इति तस्मादुभादुदात्त इति सूत्रे तयस्येति नानुवर्तत इत्येव भाष्याशय इति तत्त्वम् नाम पदस्वारस्येनेति। नमंत्यन्यार्थं विशेषणी कुर्वंतीति व्युत्पत्तेरितिभावः। अभिव्यक्तेति न्यायमू लकमिति। अभिव्यक्तेति न्यायइवमूलभस्य तदित्यर्थः। सर्वनाम संज्ञायाः संज्ञाभूतेषुसर्वादिष्वप्रवृत्तिस्तु सर्वार्थ वाचकत्वा भावादितिभावः। एतेन परिभाषेन्दु शेखरेण सहास्य ग्रंथस्य विरोध इत्यपास्तम् ननु लोहितोष्णीषा इत्यादा वेक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पारिभाषिकार्थस्येहासम्भवात्। सर्वनाम स्थान इति सान्तसंयोगस्य विशेषणम्। अत एव 'हंसशिरांसि' इत्यादौ न दोषः। यद्वा 'अनन्त्यविकारेऽन्त्यसदेशस्य' (का० वा०) इति न दोषः।

मांस्पचन्या इति। मांसस्य पचनीत्यर्थः। 'मांसस्य पचियुड्घञोः' इत्यप्येतत्सिद्धार्थानुवाद एव। शब्दत्वेन न सादृश्यं, 'न लुमता' (१।१।६३) इत्यस्य च नित्यत्वमित्यभिमानः। वृत्ताविति। भाष्य स्वरसस्त्वनुवृत्ताविति भावः। मासश्छन्दसीति। मासस्तकारः स्याद्भादौ प्रत्यये छन्दसीत्यर्थः। 'माद्भिः शरद्भिर्दुरोदरं तव, इत्युदाहरणम्।

ह्रस्वो नपुंसके (१।२।४७)। क्लीबवदर्थे वर्त्तमानस्याजन्तस्येत्येव सामर्थ्यात्प्रातिपदिकलाभे प्रातिपदिकस्येत्येतत् (२) सत्त्वप्रधानस्येत्यर्थकम्। तेन 'काण्डे' इत्यादावन्तवद्भावेन प्रातिपदिकत्वेऽपि न ह्रस्वः। विभक्त्यर्थस्य संसर्गत्वेऽपि प्रकृत्यर्थापेक्षया प्राधान्यमस्त्येव। प्रथमाया अपि अन्या भिहितशक्तिरर्थ इति तत्रापि तत्संसर्ग को बोध इति तस्याः प्राधान्यम्। 'काण्डे तिष्ठतः' इत्यादावाख्यातार्थकर्त्तुः कर्त्तृक्रयाभावेन क्रियायामन्वये तदभिन्नप्रथमार्थस्यापि तेन सम्बन्धेनान्वयात्तस्य प्राधान्यम्। स्पष्टञ्चेदं भाष्ये। ज्ञानवदिति। दीर्घान्तत्वप्रयुक्तो न कश्चिद्विशेष इति भावः। 'श्रीपाणि' इत्यादौ 'एकाजुत्तरपदे' (८।४।१२) इति णत्वं भवत्येवेति बोद्ध्यम्।

इकोऽचि (७।१।७३)। सुपीति वक्तव्ये विभक्ताविति (१) चिन्त्यप्रयोजनम्। विभक्तौ किम्? मधुन इदं माधवम्। हे वारे हे वारीति। अत एव 'इकोऽचि' (७।१।७३) इति सूत्रस्थम् 'इह किञ्चित्त्रपो' इति, 'एङ्ह्रस्वात्' (६।१।६९) इतिसूत्रस्थं 'हे त्रपु' इति च भाष्यं सङ्गच्छते। वृद्ध्यौत्वेति। वृद्धयादीनां क्रमेण 'गावौ' 'हरौ' क्रोष्टा' 'हरये' इत्यवकाशः, नुमो

पदोपस्थप्ययोरपित थाऽन्वयादर्शादिदमयुक्तमत आह्। रूढयर्थ योगार्थयोरिति। एतेनेति। वक्ष्य माणेने त्यर्थः। ननु महासंज्ञाया अनुपत्तिरत आह्। आक्षिप्तस्येति इतर विशेषणत्वेनार्थो पस्थापकत्वमिति। नतु शास्त्रीय मेवेति भावः। प्रकृत सूत्रेति। न बहुव्रीहाविति सूत्रइत्यर्थः। तत्र ह्युपसर्जन प्रतिषेधेन। गतार्थत्वं स्वीकृत्य बहुव्रीहि पदस्यतदर्थोवाक्ये लक्षणाया आश्रयणात्प्रतिषेधभूत पूर्वस्योपसंख्यान मित्यस्य प्रत्याख्यानाच्च शास्त्रीयोप सर्जन ग्रहणे एक द्वावित्याद्यर्थ सूत्रस्या द्यपूर्वार्थ वार्तिकस्य चावश्यकत्वा -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'वारिणी' इति।

(२) तृतीयादिषु (७।१।७४)। भाषितः पुमान् येन शब्देनेत्यर्थे पीलुशब्देऽतिप्रसङ्गस्तस्माद्भाषितः पुमान् यस्मिन् प्रवृत्तिनिमित्तरूपेऽर्थे इति बहुव्रीहिः। भाषणक्रियया स्वकरणतयाऽऽक्षिप्तशब्दश्च क्लीबेन समानानुपूर्वीकः समानार्थश्च गृह्यते प्रत्यासत्तेः। ततोऽर्शआद्यच्। तत्फलितमाह–प्रवृत्तिनि मित्तैक्य इति। इकोऽचीति, नपुंसकस्येति चानुवर्त्तते। ते च तत्र षष्ठ्यन्ते, अत्रार्थात्प्रथमान्ते इक इति किम्? श्रीपेण। टादौ किम्? अनादिनी। अयञ्च ह्रस्वनुमोरभावातिदेशः क्लीबत्वविशिष्टार्थवाचकस्य पुंस्त्वविशिष्टार्थवाचकरूपातिदेशे क्लीबत्वरूपार्थ निवृत्तेस्तत्प्रयुक्तसर्वकार्या प्रवृत्तेरित्यन्यत्र विस्तरः।

अस्थिदधि (७।१।७५)। नकारादकार उच्चारणार्थः। अनङ उदात्तस्योच्चारणेन सिद्धावुदात्तग्रहणम् 'असति यत्ने उदात्तादिशब्दैरनुपात्तो गुणोऽविवक्षितः' इति (१) ज्ञापनार्थम्। 'त्रिचतुरोः' (७।२।९९) इति 'तिसृचतसृ' इत्यत्र द्वन्द्वप्रयुक्तेऽन्तोदात्ते कर्त्तव्ये आद्युदात्तनिपातनं (२) विवक्षार्थम्। निपातनं नामान्यादृशे प्रयोगे प्राप्तेऽन्यादृश रयोगकरणम्। वधादेशेऽपि हन्त्यनुरूपेऽन्तोदात्तेऽनुदात्ते वोच्चारणीये आद्युदात्तोच्चारणं विवक्षार्थम्। तदुक्तमसति यत्ने इति। परमास्थिशब्दादावन्तोदात्ते उदात्तगुणस्यापि स्थानित्वेनात्र तद्विवक्षायां न मानमिति भाष्ये स्पष्टम्। उदात्तत्वफलं 'दध्ना' इत्यादावल्लोपे उदात्तनिवृत्तिस्वरेण 'विभक्त्युदात्तत्वं, 'दधनि' इत्यादौ श्रवणञ्च। ज्ञापनफलन्तु तृन्तृजन्तानां भिन्नस्वरकान्तानाम्' 'ऋदुशन' (७।१।९४) इत्यनेन तत्स्वरकानङ्सिद्धिरिति दिक्।

तदन्तेति। आङ्गत्वादिति भावः। अत्रापि नपुंसकस्येति सम्बद्धयते। तेन धाञः

त्तदसंगतिरितिदिक्। ननु न बहुब्रीहवित्यत्रोक्तायाः

स्मृत्याः प्रकरण विषयत्वेनमानमत ताह। किंचेति। एतेनेति। अकच्स्वरौत्वित्यस्य प्रकरणे विषये स्वीकारेणेत्यर्थः। ननु सास्मृत-तिर्नबहुब्रीहावित्येत द्किविषयकैवास्तु। एवं च द्वन्दे चिकीर्षितः इत्यर्थे फलमस्तीत्यत ताह। जसाधारे शीभाव वेवेति। एषा-तुस त्रिपात लक्षण विधिं विनेति। वामिङितिह्रस्वश्चेति ज्ञापक साजात्यादिति भावः। मानाभावादिति। सति बाध के प्रमामाणा-सामान्ये पक्षपातात ज्ञापक स्यभाष्यानुक्तत्वाद्वक्ष्यमाणभाष्य टाङसीति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'आदृगमहन' (३।२।१७१) इति किप्रत्यये 'दधिना' इत्यादौ न। एतच्च (३) गृह्यमाणस्यैव विशेषणम्। तेन 'अतिदध्ना ब्राह्मणेन' इत्यादि सिद्धम्। सुधियेति। शोभनज्ञानवत्त्वरूपै (४) कप्रवृत्तिनिमित्त त्वात् पुंवत्। प्रधीशब्दे प्रकृष्टज्ञानवत्त्वमेकं तत्। मध्विति। मकरन्दमद्य-माक्षिकवाचिनः पुंनपुंसकयोः सत्त्वात् पुंवत्त्वम्। मृद्वीकाविकारवाचिनो नित्यनपुंसकस्य तु न। स च 'मार्द्वीकं मधु न द्वयोः' (अ० को० २।१०।४१) इत्यमरेणोक्तः। भाष्य मधोस्तृप्ता इत्यस्य लिङ्गव्यत्ययोदाहरणत्वन्तु माध्वीर्गावो भवन्तु नः' इतिलिङ्गसिद्धक्षीरवाचिन पुंसकमधुशब्दाभिप्रायेणेति (१) दिक्।

स्नुर्वेति। 'मांस्पृत्स्नूनां पदादिषूपसंख्यानम्' इतिवार्त्तिकेनेति भावः। पूर्वविप्रतिषेधेनेति। न च नित्यत्वादेव नुम्सिद्धः, किं पूर्व विप्रतिषेधेनेति वाच्यम्, तदन्ते नुमि कृतेऽपि अङ्गाधिकारे तदन्तविधेः सत्त्वेन 'यदागमाः' (प० भा० ११) इति न्यायेन नुम्विशिष्टस्य तद्ग्रहणेन ग्रहणात् सूत्रे षष्ठीनिर्देशाभावान्निर्द्दिश्यमानस्य नुमा व्यवधानमि (२) त्यस्याभावेन तृज्वत्त्वप्राप्तेः। सकृद्गतिन्यायान्न पुनस्तृज्वत्त्वम्। नन्वयं 'कृशक्रोष्टुने' इत्यस्यैव भाष्ये उदाहरणात्तृतीयादिष्वचीत्येतद्विषयक एव। अन्यथा प्रथमोपस्थित सर्वनामस्थानोदाहरणत्यागे बीजानापत्तिरिति चेत्? न, उदाहरणस्य सङ्कोचकत्वे मानाभावात् तदुक्तं 'न चोदाहरणमादरणीयम्' इति। उदाहृतातिरिक्तोदाहरणाभाव इत्येवंपरतया नादरणीयमिति तदर्थ-इत्याहुः।

सुल्वेति। अत्र शोभनलवनकर्त्तृत्वं प्रवृत्तिनिमित्तम्। पुंवत्त्वे ह्रस्वाभावेनाघित्वान्नाभावो न। नुमभावाच्च यण्। धातृ इति। अनङ् न 'न लुमता' (१।१।६३) इति निषेधात्। धारणादिकर्त्तृत्वं चास्यैकं प्रवृत्तिनिमित्तम्। हे धातरिति। 'ह्रस्वस्य गुणः' (७।३।१०८) इति

सूत्रस्थ कैयट विरोधाच्चतादृ नियमे मानाभावा-दिति भावः। अतएव ह्रस्वनद्याप। इत्यनेन जराणामित्यत्रपूर्वविप्र-निषेधात् पूर्वं नुटि जरसोऽभावादेव। ङ्याब्ब्ग्रहणेऽदीर्घ पूर्वविप्र-विषेधात् पूर्वं नुटि जरसोऽभावग्देव। ङ्याब्ग्रहणेऽदीर्घ इत्यधि करणेल्युट्। ङ्याप्घटिते। कार्ये दीर्घ भिन्नतादृशोह्रस्वा-देशो न स्थानिवदितितदर्थान्न। तेन जरसो ग्रहण मिति भावः। व्याख्यानादौटष्ट कारेणेति। स्वादिष्विति असर्व नामेति प्रतिषेधान्नागमो नापि टाटकारेणौटष्टकारवैयर्था पत्तेरितिभावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुणः।

एकइक् (१।१।४८) आदेश इति कर्मणि घञ्। ह्रस्वपदेन कर्मधारयः। (३) निर्द्धारणे सप्तमी, सौत्रमेकवचनं, तदाह– आदिश्येत्यादि। मध्ये इत्यपपाठः, तद्योगे षष्ठया एवौचित्यात्। एचां पूर्वभागोऽवर्णसदृशः, उत्तरस्तु इवर्णोवर्णसदृशः। तत्रोभयान्तरतमह्र स्वाभावात्पर्यायेणा वणदिः प्राप्तववर्णाभावायेदं, तदाह–इगेवेति। यथाप्राप्तमेव नियम्यत इति न यथासंख्यम्। ह्रस्व एच्तु नास्त्येव 'एओङ्' (मा० सू० ३) इत्यादौ दीर्घनिर्देशादिति स्पष्टं भाष्ये। न चार्द्धमात्राऽवर्णस्याद्ध्यर्द्धमात्रेवर्णोवर्णयोरिति उत्तरभूयस्त्वात्तत्सदृश इगेव भविष्यतीति नार्थः सूत्रेणेति वाच्यम्, अद्ध्यर्द्धमात्राऽवर्णस्यार्द्धमात्रे वर्णोवर्णयोरित्यस्यापि पक्षस्य 'प्लुतावैच' (८।२।१०६) इति सूत्रे विनिगमनाविरहेण भाष्ये उक्तया समप्रविभागपक्षस्यैव भाष्यकृत्सम्मतत्वादित्याहुः।

प्ररीणामिति। न च 'रायो हलि' (७।२।८५) इति विषयसप्तमी, इति प्रागेवाऽऽत्वम्, निर्दिष्टपरिभाषाबाधे मानाभावात्, आत्वे कृते नुडनापत्त्या हलादिविषयाभावेन पूर्वमात्वाप्रवृत्तेश्च। केचित्तु नुटो निमित्तस्य सन्निपातस्य दीर्घेण विनाशावश्यकत्वेन तद्विषये सन्निपातपरिभाषाया विषय एव न। 'नामि' (६।४।३) इति दीर्घस्तु 'सुपि च' (७।३।१०२) इति दीर्घं नित्यत्वाद् बाधते इति माधवाशय (१) माहुः। 'ग्रामणि कुलम्' इत्यादौ नपुंसकह्रस्वत्वे 'ह्रस्वस्य पिति' (६।१।७१) इति सूत्रेऽन्तरङ्गपरिभाषाया अप्रवृत्तिं वदन्ति, तेषामुपजीव्यविरोधान्न तुक् अजन्तत्वमुपजीव्य ह्रस्वप्रवृत्तेः। न चैवं सन्निपातपरिभाषा व्यर्था तस्या अप्युपजीव्यविरोध मूलकत्वात्। किञ्च तस्या अपि स एवार्थः। अत एव सन्निपातपरिभाषादोषनिरूपणावसरे 'वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यात्'

प्र्थमैकवचनमिति। असर्वेतिपर्युदासान्नसप्तमी बहुवचनमितिभावः। व्याख्यानादिति। आदि ग्रहण रूपात् अन्यथासुपीत्येव वदेदिति भावः। तेनव्यस्थेति। परत्वादिनेत्यर्थः। अयंभावः। एकेत्यनेन विरोधे वोधितेतत्र सूत्रादिनैव बाध-सिद्धिरितिभावः। तत्कार्ययोरिति सुप्तिङ्विभक्तयरित्यर्थःेवंच गां दोग्धीत्यत्र परश्वात्पंचमी गौदुह्यित इत्यमकर्मणिलकारयोः पर्यायापत्तिरितिभावः। नलोपा-पत्तिरिति। अल्लोपोनइत्यत्रा ग्दग्रहणंत्वान नित्यत्र लोपा-भावायेतिभावः। बाध्य सामान्येति, अत्रप्रमाणन्तु-प्रकृत्या के राजन्य इति निर्देश इति भावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्युक्तम्। न च 'न प्रत्ययः सन्निपातलक्षणः, अङ्गसञ्ज्ञाः, अङ्गसञ्ज्ञा तर्ह्यनिमित्तं स्यात्' इत्यग्रिम भाष्य विरोधइति वाच्यम्, तस्यैकदेश्युक्तित्वात्। अन्यथा 'शैवः' इत्यादावपि सा लोपनिमित्तं न स्यादित्यन्यत्र निरूपितम्। 'ग्रामणिपुत्रः' 'ग्रामणि कुलम्' इत्यादौ पूर्वोत्तर पदनिमित्ते ह्रस्वे बहिरङ्गपरिभाषयापि (तुग्वारणं) (६।१।७१) इत्यादौ तदुपन्यास एकदेशिन इति न तद्विरोध इत्यलम्।

इत्यजन्ता नपुंसकलिङ्गाः।

हो ढः (८।१।३१)। 'झलो झलि; (८।२।२६) इत्यतो झलीति, 'पदस्य' (८।२।१६) इति, स्कोः' (८।२।२६) इत्यतोऽन्त इत्यनुवर्त्तते। झलि पूरे पूर्वस्य (१) पदान्ते विद्यमानस्य हस्येत्यर्थः। डस्तु न विहितः।

(झषन्तत्वाभावेन भष्भावाप्राप्त्या) धुडित्याद्यसिद्धेः।

दादेर्धा (८।२।३२)। दादिग्रहणमौपदेशिकदादित्ववल्लक्षकं व्याख्यानादित्यभिप्रेत्य फलितार्थमाह–उपदेशे इति। एतच्च प्रकृतसूत्रे भाष्ये ध्वनितम्। तत्र हि घत्वस्यासिद्धत्वाड्ढत्वं प्राप्नोतीत्याशङ्क्यापवादत्वेन समाधाय 'अथवा एवं वक्ष्यामि-होढोऽदादेरिति। ततो धातोरिति। दादेरिति वर्तते, नेति निवृत्तम्' इत्युक्तम्। द्रुहेस्तु 'वा द्रुह' (८।२।३३) इत्यनेन ढत्वस्यापि विधानात्तत्र न दोष इति तदाशयः। तत्र धातोरिति-सूत्रे भाष्यकृत्कृतदादेरित्यनुवृत्तेः। (१) फलान्तराभावेन तद् उपदेशवद्दादिलक्षकं सामर्थ्यात्। अर्थाधिकारानुरोधाच्च पूर्वत्र निषेधसमर्पकेऽप्येवम्। अत एव नामधातुविषये 'दामलिड्' इत्यादौ ढत्वघत्वाभावौ सिद्धौ। एवञ्च तदेकवाक्यतयाऽपवादत्वपक्षेऽपि दादिपदस्योपदेश

यथोद्देशपक्षएवेति। आकडारेत्यारंभादित्यर्थः। नपर्याय यिति। न च पर्याय। इत्यसंगतं भ पदसंज्ञाभ्यां। नित्यमेवबाधादिसि-वाच्यं। [च्यम् नामीत्यारंभ सामर्थ्येनपर्याबोधनापादाना दित्यलं [लम् तेनोभयत्रेति। तेनेति, पंचमीमासेत्यनेन सामानाधिकरण मुभेग्रहणेनेत्यर्थं वा। व्याख्याने तु नभानभिति। प्रविगणय्येति न मानमित्यर्थः। भवतेर इत्यादि निर्देशोपि तदनित्यत्व एवं मान मितिबोध्यं। [ध्यम् अन्यथान धात्वित्यस्यप्रत्याख्याने। लोलुव। इस्यस्याप्यसिद्धिः स्यादितिभावः। इत्याहुरिति। अत्रारुचि बीजन्तु गुणानां च परार्थत्वादित्यनेनाव्यवहित

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कालिकदादित्व वल्लक्षकतोचिता। तदनन्तरं दादेरिति वर्त्तते इति भाष्य स्योक्ताशयमजानतो घो दादेरित्युच्यते कथमधोगिति शङ्कायाम् 'एकाचः' (८।२।३७) इतिसूत्रार्थमपि प्रसङ्गान्निर्णेतुं धातोरवयवो यो दा[illegible]रित्यर्थमुक्त्वा गर्दभयतेरप्रत्यये गर्द्धबित्यादौ भष्भा वायोत्तरसूत्रे आवश्यकं वैयधिकरण्यमुक्त्वा 'दोग्धा' इति तु व्यपवेशिवद्भावात्सिद्धमिति भाष्ये उक्तम्। तत्रोत्तरार्थं वैयधिकरण्यमावश्यक मिति वदता तस्येहानावश्यकत्वं सूचितम्। तेन च दादेरित्यस्योक्तार्थकत्वं सूचितमित्यन्यत्र विस्तरः।

'धुग्' इत्यादिसिद्धये (२) गो नोक्तः। औपदेशिकप्रायोगिकयोरौ पदेशिकस्य ग्रहणम्' इति परिभाषा तु तत्र तत्रोपदेशग्रहणं कुर्वत्सूत्रविरोधेन 'तरप्तमपौ घः' (१।१।२२) 'अत्वसन्तस्य' (६।४।१४) इत्यादिसूत्रस्थ भाष्यविरोधेन चाप्रामाणिकी। तत्र हि भाष्ये इदमुक्तम् 'इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते यत्रास्यैतद्रूपमिति, रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं त्रयोगं, तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते। कोऽसौ? उपदेशो नामेति'। अनुबन्धप्रस्तावात्सानुबन्ध केष्वित्युक्तं न्यायस्यान्यत्रापि तुल्यत्वादिति बोद्धयम्।

एकाचो (८।२।३७) 'झष् झषन्तस्य' इति (१) वक्तुं युक्तं भष्पदाशक्तिकल्पनेन लाघवात्। निवृत्तमिति। 'धुग्भ्याम्' इत्यादौ पदान्तत्वादेव सिद्धिरिति भावः। सामर्थ्यादिति। स्ध्वोर्ग्रहणस्येतरव्यावृत्त्यर्थत्वे तु तदनुवृत्तौ फलाभाव इति भावः। धातोः किम्? (२) तद्वाडित्या (३) दि। ननु दुहेर्घत्वे धात्ववयवमेकाज्रूपं दु इति, उघिति च, तत्राद्यो न झषन्तः, अन्त्ये न बश्, दुघिति तु नावयव इति कथं भष्भावः? अत आह-(४) व्यपदेशिवदिति। विशिष्टोऽपदेशो मुख्यव्यवहारः, सोऽस्यास्तीति व्यपदेशी (५) तेन तुल्यमित्यर्थः।

तादित्यर्थालाभः। प्रत्यैषिषन्नित्यसआसिद्धि र्भवतेर इति च तदनित्यत्वे मानं चेति। अति देशांत्रराणमिति। स्थानिवदादेशः अंतादिवच्च एकदेश विकृतमनन्यवत्स्थानिवदित्यस्यानुवृत्या प्रत्यय लोप इत्यादीनामित्यर्थः। वति घटिताना मिति। तेन वति घटित स्यासिद्धं बहिरंगमित्यस्य समानजातित्वा तिदेशबोधकस्य ऋलृ वणयोरित्यस्य चा प्रवृत्ति रिति भावः। नलोपः प्रातिपदिकांतस्य। प्रातिपदि कांतस्य नस्य लोप इति सूत्रार्थः। तेन बहु दण्डिकेत्यादौन लोप सिद्धिरितिबोध्यं [ध्यम् वार्तिकस्य वैयथार्पत्तेश्चेति। २ शब्दत्वेन सादृश्य ग्रहणे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदमाद्यन्तवत्सूत्रे भाष्ये स्पष्टम्। एकाचः किम्? दामलिट्। बशः किम्? क्रोत्स्यति। झषन्तस्य किम्? दास्यति। धुगिति। 'अत्वसन्तस्य' (६।४।१४) इतिसूत्रेऽधातोरिति निषेधेन (६) कारकं प्रत्यप्रधान भूतक्रियावाच कस्यापिधातुत्वादिति भावः। (१) न च 'धातोरुच्यमानङ्कार्यं तत्प्रत्यये भवति' इति परिभाषया कथमत्र घत्वादि? तत्प्रत्ययो धातुसंशब्दनेन विहितः प्रत्ययः, इति वाच्यम्, अस्य पदान्तनिमित्तत्वेन प्रत्ययनिमित्तत्वाभावात्। अत एव 'अप्रशान्' इति चरितार्थम्। अन्यथा 'मो नो धातोः' (८।२।६४) इत्यत्रापि तत्प्रवृत्तौ नत्वानापत्त्या तद्सङ्गतिः स्पष्टैव।

वा द्रुह (८।२।३३)। द्रुहेः प्राप्तेरन्येषामप्राप्ते रुभयत्र विभाषेयम्।

इग्यणः (१।१।४५)। यणः स्थाने इति। नन्वेवम् 'अदुहितराम्' इत्यादौ लस्योत्तमैकवचने इटि तस्य सम्प्रसारणत्वाद् 'हलः' (६।४।२) इति दीर्घापत्तिः, न च यथा संख्यसम्बन्धाददोषः ऋलृक्सूत्रे 'लृकारोपदेशः किमर्थः' इत्यादि भाष्य विरोधात्; इति चेत्? न, विधिप्रदेशेषु 'यण इक्' इत्येव सिद्धे सञ्ज्ञाविधानसामर्थ्येन (२) तद्भावितपक्षाश्रयणान्न दोषः। 'वाक्यस्य सञ्ज्ञा' इति पक्षे भाष्ये 'सम्प्रसारणस्य' (६।३।१३९) इत्यादौ सम्प्रसारणजातस्य सम्प्रसारणग्रहणेन ग्रहणम्' इत्युक्ततया तदेकवाक्यतयाऽत्र पक्षे तद्भावितस्य संज्ञेति भाष्ये सूचितम्। (३) तेन 'द्युभ्याम्' इत्यादावपि न दीर्घप्राप्तिः। (४) अत एव अक्षद्यूशचासावरुणश्च 'अक्षव्द्यरुणः' इत्या (५) दौ पूर्वरूपं न। समानाङ्गग्रहणं तु भाष्ये प्रत्याख्यातम्। तथा च भाष्यं– शकह्वर्थमित्यादौ पूर्वरूपाभावाय समानाङ्गग्रहणं कार्यम्। न कार्यम्; असम्प्रसारणत्वात् अन्योऽयं सम्प्रसारणा सम्प्रसारणयोः स्थाने एक आदिश्यते। यदि नेदं सम्प्रसारणम्। 'हलः' (६।४।२) इति दीर्घत्वं न प्राप्नोति। वचन प्रामाण्याद्ध विष्यति'

पदन्निति सिद्धे यत्तस्क्षुद्रेषु न शब्द स्यैव प्रयोग इत्यर्थे नैवास्य सार्थक्यान्नित्यत्वे सिद्धे नासिकाया। इत्येतद्घटित वार्तिकस्य वैयर्थापत्ते रिति भावः। अन्यत्रं सुटि अतएव सुटि प्रयोगस्य क्वाचित्कत्वादेव तस्यासंभवेनेतिं प्रकृत्यैकाजिति सूत्रस्थ भाष्येणैकाच् केभ्योणिचो नुट्सूत्र भाष्येण हलंते भ्याचार क्विपश्चानभिधानात्त्राप्रयोगार्थं तत्रेतिभावः तत्त्वेपीति। अनादेशत्वेपीत्यर्थः। चेनविजिति। आतोमनिनित्यत्र चेनानुवृत्तोन्येभ्यो पिदृश्यतं इत्यनेनात्रेति भावः। ननु क्वावुपसंख्यानमिति तत्प्रत्याख्यान भाष्याभ्यां लोपोव्योरिति वकार प्रत्याख्यान भाष्याच्च विचोः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति। 'न सम्प्रसारणे' (६।१।३७) इति निषेधोऽपि वचनप्रामाण्यात्पूर्व रूपोत्तरम्। न च यु उ अन् अस् इति स्थितेऽन्तरङ्गत्वाद्दीर्घे पूर्वरूपं न स्यादिति वाच्यम्, अन्तरङ्गपरिभाषाया अनित्यत्वेनेहाप्रवृत्तेः। न चैवं तत्र सवर्णदीर्घोत्तरं 'न सम्प्रसारणे' (६।१।३७) इति निषेधो न स्यादिति वाच्यम्, 'अचः परस्मिन्' (१।१।५७) इति स्थानिवत्त्वादिति दिक्।

वाह ऊठ् (६।४।१३२)। 'भस्य' (६।४।१३९) इत्यधिकारः। 'वसोः सम्प्रसारणम्' (६।४।१३१) इत्यतः सम्प्रसारणमित्यनुवर्त्तते, तच्चोठो विशेषणम्। तेन 'अलोऽन्त्यस्य' (१।१।५२) इति न। तदाह–भस्येत्यादि। ह्रस्व उठ् न कृतः वृद्ध्ययनापत्तेः। वृद्धिविधावपि ह्रस्वग्रहणे 'जनौः' इत्याद्यसिद्धिः। 'च्छ्वोः शूड्' (६।४।१९) इत्यत्रापि ह्रस्वकरणे 'अक्षद्यूः' इत्याद्यसिद्धिः, अतद्भावितत्वेन तस्यासम्प्रसारणत्वाद् 'हलः' (६।४।२) इति दीर्घाप्राप्तेः।

सम्प्रसा (६।१।१०८)। 'अमि पूर्वः' (७।१।१०७) इत्यतः पूर्व इति, 'इको यण् (६।१।७७) इत्यतः अचीति, 'एकः पूर्वपरयोः' (६।१।८४) इति चानुवर्तते तदाह– सम्प्रसारणादचीत्यादि। ऊठष्ठित्त्वम्, 'एत्येधति' इत्यत्र विशेषणार्थम्।

छन्दस्येवेति। छन्दसीत्यनुवर्त्तमाने 'वहश्च' (३।२।६४) इत्यनेनेति भावः। णिजन्ताद्विजिति। अनेन लोके विश्ववाट्शब्दस्य साधुत्वमा त्रमुच्यते, न त्वस्योठ्; (१) णिलोपस्य स्थानिवत्त्वात्, (२) अङ्गभसंज्ञाक्षिप्तप्रत्ययेन वाहो विशेषणात्। विज्ग्रहणं क्विपोऽप्युपलक्षणम्। 'वच्यादिभ्यो विहिते किति' इति व्याख्यानस्य 'अचः परस्मिन्' (१।१।५७) इत्यत्र काम्यच्सूत्रे च भाष्ये उक्तत्वेन ण्यन्तात्क्वौ सम्प्रसारणाप्राप्तेः, प्रतिपदोक्ततया क्विशब्दमुच्चार्य विहितविधेरेव 'क्वौ विधिं प्रति न स्थानिवत्' इत्यत्र ग्रहणेन णिलोपस्य स्थानिवत्त्वाच्च। तेन काम्यच्सूत्रोक्तविहितविशेषणपक्षत दितरपक्षयोर्न

सार्वत्रिकत्व बोधनादत्र विजुक्तोत आह। सचेति। तादृश भाष्याद्यकार ककाराभ्यां तेभ्यो धातुभ्य एव विचोऽनभिधान मितिभावः। [ऽन संकोचे प्रमाणमाह कीलालप आगेतमिति। ननु भाष्य प्रयो क्विपिसिद्धय तीत्यत्राह। क्विपस्त्विति। धीरित्येतत् सिद्धये भाष्यध्यायतेः किबंगीकारोत आह। भाष्यानुक्त क्विब्इति। अतएव, आदतंभ्यः। क्विपोऽनभि धानादेव। अतएवेति, क्विपोऽभावादेवेत्यर्थः। केचिदिति। भाष्यतत्वविद दित्यर्थः। आहुरिति। अत्रारुचि बीजंत्वात्व प्रसक्तिरिति अत्रेति गौर्या वित्यादाविति भावः। इचि पूर्वेणग तार्थत्वादाह। जसीति। लोपे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

फलभेदः। वस्तुतो 'विभाषा पूर्वाह्णापराह्णाभ्याम्' (४।३।२४) इति 'प्रष्ठौह आगतं प्रष्ठवाड्रूप्यम्' इति भाष्ये लौकिकविग्रहवाक्ये 'प्रष्ठौहः' इति प्रयोगादन्यत्रापि ण्विः। तदुक्तम्– इति पक्षे इति।

चतुरड्ड (७।१।९८)। 'इतोऽत्सर्वनामस्थाने' (७।१।८६) इत्यतः सर्वनामस्थाने इति वर्त्तते।

(३) सावन (७।१।८२)। 'आच्छीनद्योः' (७।१।८०) इत्यतो नुमनुवर्त्तते, आदिति च। तदाह– आदित्यधीति। विशेषविहितेनेति। यासुटा सीयुडिवेत्यर्थः। न बाद्धयते इति। उपजीव्यत्वादिति भावः। अमा चेति। 'अम्सम्बुद्धौ' (७।१।१९) इति विशेषविहिते नामेत्यर्थः, नुम उपजीवकत्वेन विरोधाभावात्, ततः प्राक् तस्याप्राप्तेश्चेति भावः। क्वचित्तु 'आमा च नुम्न बाध्यते' इति पाठः। तत्रायमर्थः। 'बह्वन ड्वांहि' इत्यादौ 'नपुंसकस्य' (७।१।७२) इति नुम् परत्वादामा बाद्धयेत, पुनः प्रसङ्गविज्ञानात्तु न बाद्धयत इति। दत्वं नेति। 'अनड्वांस्त्र इत्यत्र रुत्वं भवत्येव, तत्रोपदेशवैयर्थ्याभावात्। संयोगान्तलोपस्येति। हस्थानिकस्येत्यर्थः। एवञ्च नस्य प्रातिपदिकान्तत्वाभाव इति भावः। अनड्वानिति। अनः शकटं वहतीत्यर्थे वहेः क्विबनसि, अनसो डश्च, यजादित्वात्सम्प्रसारणम्।

ननु 'हे अनड्वन्' इत्यत्र सम्वुद्धिलोपेऽवश्यं प्राप्ते अम आरम्भादमोऽपवादत्वेन तद्विषये सम्बुद्धिलोपानापत्तिः। विषयभेदेऽप्यचिरादेशस्य नुडपवादत्वमाशङ्कितं सप्तमे भाष्ये; इति चेत्? न। प्रत्ययलोपविधायकैः प्रत्ययानुत्पत्ते रेवान्वाख्यानेनापवादत्वस्यैवासम्भवात्। ध्वनितञ्चेदं प्रत्ययलक्षणसूत्रे भाष्यकैयटयोः। एवमेव 'अतृणेट्' 'अनड्वान्' इत्यादेस्तत्सूत्रोदाहरणत्वमु (१) पपद्यते इति दिक्।

ननुड्विधायकेति, रामाणित्यादौत्वं तरंग परिभाषया सन्निपात परिभाषयावा न लोप इति भावः। आचार विबंतादिति। एवं चयोग विभागोव्यर्थ इति तदाशयः। नन्वाचार कि बंतात्कर्तरिक्विपो भाष्येऽनुपन्यासेपितदविरोधाच्छास्त्र प्रवृत्तेरबाधकत्वान्नाभिधाने मान मत आह। लाभाच्चेति। आतोधातोरातोनाप इति सूत्र वार्तिक न्यासाभ्यां ज्ञापितत्वादिति भावः। स्पष्टतयेति। गवां पत्यै इत्यादौ नदी संज्ञायाः सावकाशेप्युकार साहचर्यादि कारांत स्याप्यनदी संज्ञकस्यैव ग्रहणमिति भावः। तात्पर्यग्राहकमिति। तेन पित्रेत्यादौ नानेति भावः। एतेन प्रमाणफलोभय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सहे : सा (।३।५६)। 'अपदान्तस्य मूर्द्धन्यः' (८।३।५५) इत्यधिक्रियते। लोके त्विति। एतेन, तुराषाण्मेघवाहनः' (अ० को० १।१।४७) इति व्याख्यातम्। 'नहिवृति' (६।३।११६) इत्यनेन क्विबन्तसहावेव दीर्घविधानादाह– अन्येषामपीति।

दिव औत् (७।१।८४) ननु विधेयविषये उच्चारणार्थानामपीत्संज्ञो चिता; अन्यथा तान्तस्य विधानमित्यस्याप्यापत्तेः। ध्वनितञ्चेदमद्ड्सूत्रे भाष्ये। तत्र हि डित्त्वाभावेऽदादेशे पूर्वसवर्णदीर्घमाशङ्क्यानुनासिकोपध त्वादिति समाहितं, (२) न तूच्चारणार्थत्वादिति। किञ्च द्वितीयवर्णोच्चारणे सहायसम्प्रादनेन चरितार्थेषु तत्र तत्र विशेषणार्थेष्विव हलन्त्यसूत्राप्रवृत्तौ मानाभावः। अत एव 'तस्य लोपः' (१।३।९) इति सूत्रेऽनुबन्धानामेकान्तत्वपक्षे 'दिव औत्' (७।१।८४) इत्यादीनां सवदिशत्वापादनं भाष्ये कृतम्। 'तित्स्वरितम्' (६।१।१९५) इति सूत्रे च भाष्ये। 'तिति प्रत्ययग्रहणं कर्त्तव्यम्' इति वार्त्तिकस्य 'द्युभ्याम्' इत्यादौ तदभावः फलमित्युक्तम्। दित्त्वमाश्रित्य च प्रत्याख्यातं तदित्यन्यत्। किञ्चाऽऽदेशेषु सर्वत्र तकाराणामुच्चारणार्थत्वेनेत्सं ज्ञकत्वाभावात्तिति प्रत्ययग्रहणं व्यर्थमेव स्यात्। तथा विधेयविषय उच्चारणार्थानामप्यनुनासिकत्वेनेत्सञ्ज्ञा। अत एव 'वेरपृक्तस्य' (६।१।६७) इत्यत्रापृक्तग्रहणाभावे 'दर्विः' इत्यत्र लोपमाशङ्क्यानुना सिकपरस्य वेर्ग्रहणमिति भाष्ये उक्तम्। अत एव 'इदितो नुम्' (७।१।५८) इति सूत्रे भाष्ये धातोरित्यस्याभावे सिच इदित्त्वाद् 'अभैत्सीत्' इत्यादौ नुममाशङ्क्य सजादेशकरणेन समाहितं, न तु सच इकारस्योच्चार णार्थत्वादित्वाभावेन। ल्युडादावुकारस्यानाकाभ्यामेव निवृत्तिरिति न तस्येत्संज्ञा, अनुनासिकत्वाभावात्। अत एव नन्द्यादिभ्यो ल्युप्रत्यये 'नन्दना' इति टाबन्त प्रयोगो 'गाङ् लिटि' ओल८२।४।४९) इति सूत्रे भाष्ये। 'ल्युः कर्त्तरि पुंसि' इति त्वमरस्य

विषयक प्रश्नस्यापि समाधानमयुक्त मिति दिक्। अत्यंत ज्ञान गौरवमिति। अमुष्यै इत्यादौ तुन दोषः। ना साहचर्येण टानिमित्तक न कारस्यैव ग्रहणमिति भावः। ननु हरिणेइत्यत्र सत्यपि संभवेबाधनं भवतीतिन्या येन नादेशेन गुणबाधान्न दोषोऽत ताह मत्ये दात्योविति वार्तिक मतेपीति। तास्मिन्नेवात्र सप्तमीति भावः मत तित्यस्य एवात्र सतीति शेषो बोध्यः। अनापत्तेरिति ङे ङर्णमितिन्या सेतु ङस्येत्संज्ञालोपयो स्वीकारे ङस्योच्चारणेनार्ध मात्राधिक्येन सर्वत्र भूतपूर्व गत्या ङादित्व स्वीकारेण चगौ खापत्तिः स्यादितिभावः। ङसिङ सोश्च। ङितश्चेति ना सूत्रि। ॠत उत्इत्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रमादः।

अनुवादविषये तु हलन्त्यसूत्र भाष्योक्तरीत्या तेषां व्यवसितान्त्यत्वा भावेन फलाभावेन चेत्संज्ञाशास्त्राप्रवृत्ते रुच्चारणार्थ वर्णसहितसमुदायस्यत द्रहिते लक्षणा। विधौ तु नोचिता सा, 'न विधौ परः शब्दार्थः' इति न्यायात्। 'णौ गमिः' (२।४।४६) इत्यादीनां नुम् तु न, स्थानिवद्भावेन भाव्याति देशिकधातुत्वं गृहीत्वेकः सत्त्वात्। 'गमेरिड्' (७।२।५८) इतिवच्च नोपधालोपः। अत एव सुबुत्पत्तिः। अन्यथा 'हनो वध लिङि' (२।४।४२) इतिवत् सा न स्यात्। 'अस्तेर्भूः' (२।४।५२) इत्यत्रापि निर्विसर्ग एव पाठ इति केचित्। एवञ्चात्र 'तित् स्वरितम्' (६।१।१६५) इति स्वरितापत्ति रिति चेत्? न, दिव इकारस्योदात्तत्वेन स्रंसनधर्मिणो हलः स्थाने जायमानौकारस्यानुदात्तत्वेनेकारस्य यणि 'उदात्तस्वरितयोर्यणः' (८।२।४) इति स्वरितसिद्धया फलाभावात् तिति प्रत्ययग्रहणं कर्त्तव्यमिति वार्त्तिकेन तदप्राप्तेश्च। अन्तोदात्तं द्यौरिति तु द्योशब्दस्य बोद्धयम्।

अल्विधित्वेनेति। 'अनल्विधौ इत्यत्र पञ्चमीसमासस्याप्याश्रयणादिति भावः। पदान्त इति। 'एङः पदान्ताद्' (६।४।६६) इत्यनुवृत्तस्य विभक्तिविपरिणाम इति भावः। अयमुकारोऽन्तोदात्तो निपात्यते। तेन 'द्युभिरक्तुभिः' इत्यादौ पठयमानमन्तोदात्तत्वं सिद्धम्। अत्र यथा 'हलः' (६।४।२) इति। दीर्घो न, (१) तथा उक्तम्। उतस्तपरत्वन्तु 'भाव्यमानोऽप्युकारः सवर्णग्राहकः' (प० भा० २०) इत्यर्थं (२) ज्ञापनार्थमिति 'तित्स्वरितम्' (६।१।१६५) इति सूत्रे भाष्ये उक्तम्। 'द्युभ्याम्' इत्यत्र उठ् न, क्ङितीत्य (१) नुवृत्तेः। यत्तु अस्मात्तपरत्वात् 'कुरुतः' इत्यादावुदिति तपरत्वाद् गुणाभावो यथा स्थानिवत्सूत्रे भाष्ये उक्तः, तथा प्रकृते दीर्घाभाव इति कैयटः, तद् एतेन (२) परास्तम्,

---

ऋदंताङि्तोतिपरे रित्यर्थे जाग्रतीत्यादौ दोषापत्तेः। ध्वनित स्तदभाव इति नात्र लोप इति न्यासेनदितानंदक इत्यादौ दोषोद्भावनेनेति भावः। शेति समुदायस्येति। अलोंत्यस्येति परिभाषातु नानार्थक इति निषेधान्न प्रवर्तत इति भावः। पंचभ्यंताल् ग्रहणादिति लाघवादल नंत्ये उपधेत्येवसिद्धे इत्यादिः शस्यनेति अनंत्य विकारेंत्य सदेशस्येति परिभाषया प्रकृते आकारस्यैवेत्वं भविष्यतीति न दोष इति चेद्गणय तीत्यादौ गकाराकारस्य वृद्धि वारणाय पंचम्यं ताल्ग्रहण मितिबोध्यं। [ध्यम् नोपधाया इतीति। उपाधाग्रहणानुवृत्ति फलं तु कृत्सन माचक्षाते इतिण्यंतात्क्वौ टिणिक्वि लोपे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दीर्घस्य बहिरङ्गतया तेन व्यावृत्तेरशक्यत्वाच्च। अत एव 'ऋत इत्' (७।१।१००) इति तपरत्वेन चिकीर्षति' इत्यादौ 'हलि च' (८।२।७७) इति दीर्घस्य न व्यावृत्तिः। अत एव 'द्यूचः इत्यादौ 'चौ' (६।३।१३८) इति दीर्घसिद्धिः।

षट्चतु (७।१।५५)। रेफान्तस्य षट्संज्ञैव तु न कृता, 'चत्वारः' इत्यत्र लुगापत्तेः। तत्र 'रो न' इत्युक्तौ तु (३) पदलाघवाभावः। केचित्तु षडित्यादि षडाद्यर्थपरम्, अर्थात्परत्वञ्चामः शब्दद्वारकम्, सचार्थः प्रधान एवेति न गौणेऽतिप्रङ्ग इति; तन्न, शब्दद्वारकमित्यस्य शब्दनिष्ठ परत्वाद्यवधित्वस्य परत्वस्य वा अर्थे आरोप इत्यर्थः। एवञ्च गौणत्वात्तत्र सम्बन्धे तन्निरूपितसम्बन्धे च न विभक्तिः। परम्परासम्बन्देनान्वय इत्यपि न, प्रकृतिप्रत्ययार्थयोः साक्षात्सम्बन्धेन क्लृप्तस्यान्वयस्य भङ्गापत्तेः। अत एव 'गङ्गायां घोषः' इत्यादौ गौणाधारादावधिकरणत्वादिनिमित्ता विभक्तिः स्वरितत्वप्रतिज्ञादिना भाष्ये साधिता। अत एवेदृशस्थले षष्ठयपि न। अत एव स्त्रियाः पुंवत्' (६।३।३४) इति सूत्रे स्त्रिया इत्यर्थग्रहणमिति पक्षे भाष्यकृतोक्तं 'भाषितपुंस्कानुपपत्तिश्च, न ह्यर्थेन पौर्वापर्यमस्त' इति। दिक्शब्दयोगे इत्यस्य दिक्शब्दार्थान्वयभूतेऽवधित्वादौ सम्बन्धे पञ्चमीत्यर्थः। स च सम्बन्धो मुख्य एव साक्षात्सम्बन्ध एव च ग्रहीतुमुचित इति दिक्।

णत्वं द्वित्वमिति। ननु– 'पूर्वत्रासिद्धीयमद्वित्वे' इति णत्वात्पूर्वमेव द्वित्वं युक्तम्, 'वाक् वाक्क्' इतिभाष्योदाहरणसिद्धये वर्णद्वित्वेऽपि तत्प्रवृत्तेरावश्यकत्वात्। अन्यथा चर्त्वस्यासिद्धत्वात् (४) गस्यैव द्वित्वेऽन्त्यस्य चर्त्वे पूर्वत्र गश्रवणापत्तिः। अवसाने चर्त्वस्यासिद्धत्वात् खर्परत्वाभावेन तस्य चर्त्वसम्भावनाऽपि न। (१) न च कस्य द्वित्वेऽपि अवसाने चर्त्वस्यासिद्ध त्वाद्गकारे झशि परे पूर्वस्य जश्त्वे उक्तरीत्यैव चर्त्वाभावे गश्रवणं

कृत्स्ना वित्या दौ दीर्घा भावः। पृथक्पदमिति। नतु सुति सीत्यस्यापृक्त पदेन कर्मधारय स्तथा सत्यपृक्त पदस्य विशेषण त्वेन पूर्व निपातापत्तेः। प्रतिपदोक्त परिभाषाश्रयणेन नैवेति। लिंगविशिष्ट परिभाषयातिदिष्टं सखि शब्दत्वंतु प्रकृते न विभक्तौ लिंगविशिष्टग्रहणमिति निषेधात्। ननुशदंत पर्युदासेन संख्या या अतीतिसूत्र एव कृत्रिम कृत्रिम न्यायाप्रवृत्तिः स्यान्नतु सर्वत्रेत्यत ताह। किंचेति अततेव संख्याप्रदेशे उभय गतेरेव एतन्नयायेति। कृत्रिमा कृत्रिमन्यायेत्यर्थः। एवं वत्वंतेपीति परिमाणार्थकतयेत्यर्थः। ननुनियत विषय परिच्छेद हेतुत्वस्यैव संख्यात्व मिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुर्वारमिति वाच्यम्, 'न मु ने' (८।२।३) इतिवत् 'पूर्वत्रासिद्धीयम्' इत्यस्य द्वित्वे कृतेऽपि प्रत्यासत्त्या द्वित्वाश्रयस्य कार्य्ये कर्त्तव्येऽसिद्धत्वं नेत्यर्थ इति न दोषः। एतेन 'द्वित्वे परसवर्णत्वं सिद्धं वक्तव्यं संयन्तेत्यत्र त्रियकारकत्वार्थम्' इतिवचनसामर्थ्येन वर्णद्वित्वे तदप्रवृत्तिरित्यपास्तम्। एतदवयुत्यानुवाद रूपत्वात्;–इति चेत्? न, पूर्वत्रासिद्धीयमित्यस्य द्वित्वे कर्त्तव्येऽन्यदसिद्धं नेत्येवार्थो न तु द्वित्वस्याप्यसिद्धत्वं नेति तदर्थ इति णत्वोत्तरमेव। द्वित्वमिति भावः।

(२) रोः सुपि (८।३।१६)। अत्र खरीत्यनुवर्त्तते। तेन सप्तमीबहुवचनमेवात्र सुप्। एवञ्च 'खरवसानयोः' (८।३।१५) इति सिद्धे इतर निवृत्तिफलक एवैष विधिरित्याह– रोरेवेति। विपरीतनियमस्तु न, 'हलोऽ नन्तराः संयोगः' (१।१।७) इति निर्देशात्। द्वित्वे इति। 'अचो रहाभ्याम्' (८।४।४६) इत्यनेन।

'अचो रहा' (८।४।४६) इत्यतो द्वे इति, 'नादिनी' (८।४।४८) इत्यतो नेतिं च वर्त्तते। तदाह–न द्वे स्त इति। 'झरो झरि' (८।४।६५) इति लोपस्तु वैकल्पिकः।

प्रियचत्वार इति। आङ्गत्वात्तदन्तस्यापि 'चतुरनडुहोः' (७।१।९८) इति आम्। गौणत्वे त्विति। (१) अत्र यद्वक्तव्यं तत् 'नामि' (६।४।१) इत्यत्रोक्तम्। यत्तु–'ष्णान्ता' (१।१।२४) इत्यत्र संख्यापदानुवृत्तेः, तस्य च संख्याबोधकशब्दपरत्वात्प्रधानन्यानेन संख्यारूपार्थस्यानुपसर्जनस्यैव ग्रहणेनोपसर्जने षट्त्वमेव न। संख्यापदेन च संख्येयमुच्यते। अतः संख्येयपरपञ्चादौ तस्य प्रधान्यात् संज्ञा सिद्धा। यद्वा, षडित्यन्वर्था संज्ञेति न गौणे सा,- इति तन्न, 'प्रियतपञ्चा द्रौपदी' इत्यत्र 'न षड्' (४।१।१०) इति (२) डाब्निषेधानापत्तेः, आकडारसूत्रे भाष्येऽस्या डुसञ्ज्ञया व्यवहाराच्च, सर्वनाम सञ्ज्ञावदत्रोपसर्जन

नियमाभावे इदं संख्या संज्ञा सूत्रं व्यर्थं स्यादत ताह। यद्वेति। भूर्यादीना मित्ति। आदिना स्फिर भूयसोर्ग्रहणं नियमशरीरे लाघवायाह। यद्वेति। नन्वेवमनंत वाचि शत शब्दस्य संख्याकार्यं न स्यादिति चेदिष्टापत्तेस्तदाह व अनंत शब्दवदिति ननु संज्ञा विधाविति निषेधात्। संख्या संज्ञायां डतेरेव। सत्वेन। डत्यंतेत्य संगत मतऊाह। अत एवेति। संख्या संज्ञाया स्तदंत विधेरेवेत्यर्थः। डडनुवादेनेति। अन्यथा तस्य पूरण इत्यत्र प्रातिपदिकादित्यधिकारात् प्रातिपदिक संज्ञकात् संख्या वाचकाड्डित्यर्थेऽत्र तदप्राह्याऽसंगतिः स्पष्टैवेति भावः। ननुसंखाया संज्ञायां ज्ञापकात्तदंत विधावपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिषेधानारम्भाचद्च' सर्वनामासञ्ज्ञा सूत्रस्थेन 'षड्भ्यः' (७।१।२२) इति सूत्रविषये भाष्येण विरोधापत्तेश्चेत्यलम्।

कमलिति। 'तदाचष्टे' इति णिचीष्टवद्भावाट्टिलोपे कर्तरि क्विपि 'णेरनिटि' (६।४।५१) इति णिलोपः। वस्तुतो लण्सूत्रे 'न हि पदान्ताः परेणः सन्ति। ननु चायमस्ति कर्तृ हर्तृ' इति भाष्यात् 'भोभगो' (८।३।१७) इति सूत्रे 'वृक्षव् करोति' इति 'भाष्य स्यैकदेश्युक्तित्वात् कमल वृक्षव् इत्यादेर (३) नभिधानमेवोचितम्। यान्तास्तु नैव सन्ति, क्विपि 'लोपो व्योः' (६।१।७६) इति यलोपात्। णिलोपस्य स्थानिवत्त्वं तु न, यलोपे तन्निषेधात्।

प्रशानिति। शाम्यतेः क्विप्। 'अनुनासिकस्य' (६।४।१५) इति दीर्घः। अयं शान्तिसाम्यान्यतरवद्वाचकः सत्त्ववाचीति स्वरादिपाठेऽप्यस्य नाव्ययत्वम्। साम्यवाचिन्यसत्त्वार्थके तु स पाठः सार्थक इति दिक्।

विङभक्ताविति। 'अष्टन आ' (७।२।८४) इत्यतोऽनुवृत्तेरिति भावः। अकच्सहितस्यापीति। तन्मध्यपतितन्यायेन तस्यापि किं शब्दत्वात्। अङ्गानपेक्षत्वेनान्तरङ्गत्वादादेशात्पूर्वमकच्। (१) यद्यपि निर्दिश्यमान परिभाषया न प्राप्नोति। अत एव 'भिन्धकि इत्यत्राकचिधित्वं न प्राप्नोति' इति भाष्ये पूर्वपक्षं कृत्वा 'अन्तरङ्गत्वाद्द्वित्वेऽकच्' इत्याद्युक्तम्, तथापि आवृत्त्याश्रयणेन साकच्कस्या देश इति कैयटः।

इदमो मः (७।२।१०८)। 'तदोः सः सौ' (७।२।१०६) इत्यतोऽनुवृत्तेराह–साविति।

इदोऽय् (७।२।१११)। 'यः सौ' (७।२।११०) इत्यतः साविति वर्त्तते।

षड्संज्ञायां कथं तदंतवि धिरत ताह। अतएवेति। संख्या संज्ञाया तदंतविध्याश्रयेणन संख्येत्यस्य प्रकृतेऽनुवर्त मात्यदेवेइर्थः। दित्वं नेति। दमुपलक्षणं जुहोतीत्यादावुतोवृद्धि रिति वृद्धिर्हरीतक्याः फलानि। हरीतक्य इत्यादौ लुपि युक्तवदिति लिंगवचनेत्यस्यपि वार्तिक कारमतेनाह। प्रत्ययस्येत्यादिना। भाष्यकार मतेनाह। स्थानिवत्सूत्रेणेत्यारभ्य विस्तर इत्यंतेन। इहापीति। कार्यातिदेशेपी त्यर्थः। ननु राजपुरुषे भसंज्ञाया वार्तिकमते प्रत्ययलक्षणेनप्राप्रावपि भाष्य मतेऽल् विधि त्वादप्राप्तिरत आह आदाविति। आदिना। यशस्विनमाचष्टे यशाइत्यादेः संग्रहः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दश्च (७।२।१०९)। 'इह 'अष्टन' (७।२।८४) इत्यतो विभक्तावित्यनुवर्त्तते, साविदमो दस्यासम्भवात्; तदाह–विभक्ताविति।

हलादाविति। आपीति वर्त्तते। 'हल्यश्' इति वक्तुं युक्तम्। (२) अक इति पर्युदासादिदं गौणे न प्रवर्त्तते इत्याहुः। नन्विदोऽन्त्यस्य लोपः स्यादत आह– नानर्थके इति। इयमुपधासंज्ञासूत्रे भाष्ये स्पष्टा, फलानामन्यथोपपादनेन भाष्ये प्रथ्याख्याता च। प्रत्याख्याने 'अनापि' (७।२।११२) इत्यतोऽन् इत्यनुवर्त्य हलीति सप्तम्याः षष्ठीं प्रकल्प्यान एव 'लोऽन्त्यस्य' (१।१।५२) इति लोपो पररूपे 'चेष्टसिद्धिर्बोद्धया।

ननु दीर्घापेक्षया लोपस्य नित्यत्वात्पूर्वं लोपे आभ्यामिति स्थितेऽङ्ग स्याऽकाररूपत्वेनादन्तत्वाभावाद्दीर्घो न स्यादित्यत आह– आद्यन्तवदिति। 'आदिरन्त्येन' (१।१।७१) इति सूत्रोक्तरीत्याऽऽद्यन्तशब्दयोर्विशि ष्टशक्ततया तत्प्रयुक्तकार्याण्यसहाये न स्युरित्ययमारम्भः। एकस्मिन्निति। (१) असहाये इत्यर्थः। तदादितदन्तयोः क्रियमाणं कार्यं तदादौ तदन्त इवा सहायेऽपि स्यादित्यन्वयः। उपमेये सप्तमीदर्शनात्सप्तम्यन्तादिवार्थे वतिस्तदाह– आदाविवेति। एकस्मिन्नित्युक्तेर्दरिद्रातेरिवरणान्तलक्षणोऽज्न। आदिवत्त्वफलमौपगवेऽण आद्युतात्तत्वम्। कार्यस्य प्रधान्यादयमपि कार्यातिदेश एव। तदाह– कार्यमिति।

ननु इद ए इति स्थिते स्मैभावात्परत्वादनादेशे 'सकृद्गतौ' इति न्यायेन स्मै न स्याद्त आह– (२) नित्यत्वादिति। स्मै आदेशे तु न अनादेशो हलिलोपेन बाधात्, लक्ष्यानुरोधेन बाधकाबाधितकृताकृतप्रसङ्गस्यैवात्र ग्रहणात्।

कश्चिदिति नलु मतात्तस्मिन्नतिन्यासे वार्तिककार रित्यर्थः। तृजत्वमिति। स्त्रियां चेतिसूत्रेणेत्यर्थः। तृज्वादिति सूत्र इति। तृज्वत्वसूत्रेस्त्रियां चेतिसूत्रे इत्यर्थः। अर्थत तुरदत्वस्य परनिमितत्त्वं साक्षाचाछब्दत स्त्वंग संज्ञा द्वारा परंपरयेत्यर्थः। तत्रार्थतः साक्षादुरदत्वस्य पर निमित्त्वमाह। नियमतः पर बुद्धेरिति पूर्व वृत्तितयेति। पूर्वकाल वृत्तितयेत्यर्थः। अतएवेति। आक्षेपेण प्रत्यय इत्यस्योरदत्वे सात्क्षात्परनीमित्तत्वानंगी कारादेवेत्यर्थः। लिढ्यभ्यासस्येतिसूत्रस्थ भाष्य विरोधात् अत्रेति शेष इत्ति शेषः। एवं च नलुमतेतिनिषेधे कर्तव्ये साक्षाच्छवदतः पर निमित्तक विधेरेवाश्रयण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अकोऽकोरित्यनयोः फलमाह– ककारयोगे त्विति। 'अव्ययसर्वनाम्नाम्' (५।३।७१) इत्यकचीति भावः। अस्यानवयवत्वेऽपि तन्मध्य पतितन्यायात्तद्विशिष्टे प्राप्तिरिति बोधयम्।

इदमोऽन्वा (२।४।३२)। अनुदात्तत्वम् 'आभ्याम्' इत्यादौ 'ऊडिदम्' (६।१।१७१) इति 'सावेकाचः' (६।१।६८) इति वा विभक्त्युदात्त त्वाभावाय, उभयत्राप्यनुवृत्त्यपकर्षाभ्यामन्तोदात्तादित्यस्य सम्बन्धात्। एवञ्च 'आभ्याम्' इत्यादि सर्वानुदात्तम् 'ऐभिग्ने प्रेणा तदेषाम्' इत्यादौ तथा श्रवणात्। नन्वेवमप्यत्वे हलिलोपेनाऽऽभ्यामित्यादेः सिद्धावनुदात्तत्वेनैव सिद्धावश्विधानं व्यर्थमत आह– साकच्कार्थमिति। शित्त्वात्सवदिश इति भावः। (१) संज्ञोपसर्जनयोस्तु नेदम्, 'एतदस्त्रतसोः' (२।४।२३) इत्युत्तरसूत्र (२) साहचर्यात्। न च त्यदाद्यत्वेन सिद्धेऽकारविधानमेव साकचिसवदिशार्थं भविष्यति, किं चित्त्वेनेति वाच्यम्, (३) अन्यार्थतापत्तेः।

द्वितीयाटौ (२।४।३४)। पूर्वसूत्रादिदम् इति, 'एतदस्त्रतसोः' (२।४।२३) इत्यत एतद इति चानुवर्त्तते, तु प्रवर्त्तनाविषयत्वम्। तच्चेदमेवेति नाग्रहः। स्पष्टञ्चेदं (४) भाष्ये।

सुगण्ट्स्विति। 'ङ्णोः' (८।३।२८) इति टुक्। तस्यासिद्धत्वान्न जश्त्वम्। नलोप इति। नकारलोप इत्यर्थः। न चात्र प्रत्ययान्तत्वाद् 'अप्रत्यय' इति निषेधेन प्रातिपदिकत्वाभावात्कथं नलोप इति वाच्यम्, पर्युदासे यथोद्देशेन सिद्धेः। न च कार्यकालपक्षे दोषः, व्यवस्थितपक्षद्वयमध्ये एकतरपक्षेण लक्ष्यसिद्ध्या पक्षान्तरेण दोषदानस्य क्वाप्यदृष्टत्वात्। ध्वनितचेदं प्रगृह्यसंज्ञाप्रकरणे भाष्ये। न च-प्रसज्यप्रतिषेधे दोषः, तत्पक्षे लोपेनेव जातनिवृत्तेरपि तेन वक्तुं शक्यत्वात्; इति वाच्यम्, 'न ङिसम्बुद्ध्योः' (८।२।८) इति निषेधेन प्रत्ययलक्षणेन प्रत्ययान्तत्वमादाय निषेधाप्रवृत्त्या दोषाभावात्। स्पष्टञ्चेदमर्थवत्सूत्रे

मितिभावः। ननुकार्य काल पक्षेऽगसंज्ञा सूत्रस्यांगाधि कारे उपस्थित्या प्रत्यय इत्यस्यावृत्त्या चोर दत्वस्य चापि प्रत्यय निमित्तत्वं स्त्रियां चेति सूत्रेत्वावृ त्तिर्नाश्रीयत उरदत्वेनलुमतेति निषेधानित्यत्वंतु न युक्तं प्रकारांतरेण निर्वाहादत ताह। अंगाक्षिप्तेति। ननुत्रेरयङिति न्यासेङस्येत्संज्ञा लोपयोः कल्पनेन त्रादेशेऽधि कैकमात्रोच्चारेणन समत्वेपि त्रयादेशेत्रयो दशेत्यत्रत्य इव सांतत्वाभावे निर्देशाश्रयणेन गौरवात्रेरयङित्येव न्यासः कर्तव्य इत्यत आह। त्रेरयङ्नकृत इति शंका वारणायेति। एवं चाङ्पक्षेपि निर्देशाश्रयणमावश्यकमिति न त्रयादेशापेक्षयालाघवमितिभावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भाष्ये।

न ङि (८।२।८) ङौ तु छन्दसीति। 'राजनि' इत्यादौ भत्वान्नलोपाप्राप्तेः। राजनीवाचरतीत्यर्थे 'अधिकरणाच्च' इति क्यच् तु लोके ना स्त्येव, अनभिधानात्। अत एव 'परमे व्योमन्' इत्यादावयस्मयादित्वाद्भत्वेन सूत्रस्थङिग्रहणप्रत्याख्यानं भाष्योक्तं सङ्गच्छते इति भावः। सामर्थ्या दिति। 'न लुमता' (१।१।६३) इतिनिषेधानित्यत्वप्रतिपादनद्वारेत्यर्थः। एतदनित्यत्वबललब्धमेव 'वा नपुंसकानाम्' इति बोद्धयम्। न च 'परमेव्योमन्' इत्यत्र घोषत्वाल्पप्राणत्वादिसादृश्येन पूर्वसवर्णे दकारे 'स्वादिषु' (१।४।१७) इति पूर्वस्व पदत्वात्प्राप्तनलोपनिषेधेनेदं चरितार्थमिति वाच्यम्, 'अन्तरङ्गानपि' इति न्यायेन संयोगान्तलोपस्यासिद्धत्वेन च पूर्वसवर्णेऽपि लुक एव प्राप्त्या प्रक्रियालाघवाय लुक एवौचित्यमित्याशयात्। स्पष्टञ्चेदं भाष्ये। ङावुत्तरपदे इति। एतद्बललब्धमेव 'ङौ तु छन्दस्युदाहरणम्' इत्युक्तम्।

न चेति। पञ्चमीसमासेन प्राप्तिः। षाष्ठीमिति। 'वाह उठ्' (६।४।१३२) इत्यत्र ज्ञापितत्वेन तद्देशस्थत्वादिति भावः। कार्यकालपक्षेऽपि त्रिपाद्यां तदप्रवृत्तिः प्रगुक्ता। जञोर्ज्ञ इति। जञयोगे लोकवेदसिद्धता दृशध्वनेर्लिपिविशेषस्य चानुवादकमभियुक्तवचनं, (१) न त्विदं वर्णान्तरम्। शिक्षादावपरिगणितत्वेन तत्सत्त्वे मानाभावात्। अत एव 'तज्ज्ञानम्' इत्यादौ श्चुत्वसिद्धिः।

सुब्विधाविति। सर्वभिक्त्यन्तावयवयकः समास इति भाष्ये सपष्टम्। विधिशब्दो भावसाधनः, कर्मसाधनश्च। तत्र स्वरादिविषये भावसाधनः। मुब्विषये कर्मसाधनः। कृतीत्येतत्सामर्थ्यात्तुक एव विशेषणमित्याह– कृति तुगिति। 'पूर्वत्रासिद्धम्' इत्येव सिद्धेऽन्यत्र

अप्रसिद्धत्व गौण लाक्षणिकान्यतर रूपेति परिभाषायामीदृश गौणत्वस्यैव ग्रहणेनणिजंत त्क्विपि टिणिक्वि लोपेश्रृंग शब्दच्छृं गवृंदाम्यामित्यारकन् भवति पदकार्ये एव तत्प्रवृत्तेश्चेति। प्रातिपादिक प्रकृतिक सुप्तत्वसमानाधिकरण धर्मावच्छिन्ननिमित्तके पदस्यकार्ये एव गौण मुख्य न्याय प्रवृत्तेश्चेत्यर्थः आत्व यत्व लोपैर्बाधादिति। जातस्यापि परत्वेनात्वस्य पुनः प्रसंग धर्मावच्छिन्नानितित्तके पदस्य कार्ये एव गौण मुख्य न्याय प्रवृत्तेश्चेत्यर्थः आत्व यत्व लोपैर्बाधादिति। जातस्यापि परत्वेनात्वस्य पुनः प्रसंग विज्ञानेन प्राप्ते स्तैर पहारादित्यर्थः। अभ्युच्चयायेति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निवृत्तिफलकोऽयम्। तदाह– नान्यत्रेति। अन्यनिवृत्तिफलकसिद्धविषयकविधित्व मेव नियमत्वम्। अत एव पस्पशायां भाष्ये 'पञ्च पञ्च नखा भक्ष्याः' इत्यत्र 'भक्ष्यनियमेऽ (२) भक्ष्यप्रतिषेधो गम्यते' इत्युक्तम्। तदाह–इत्य सिद्धत्वादितीत्यन्यत्र विस्तरः। (१) सुब्विधिशब्देन सुप्त्वतव्द्याप्यधर्मावच्छिन्नोद्देश्यकविधेर्ग्रहणम्। एतेन 'दण्डिषु' इत्यादौ षत्वरूपसुब्विधौ अप्राप्तासिद्धत्विधानार्थमिदमि (२) त्यपास्तम्, वैरूप्यापत्तेश्च। सञ्ज्ञाविधौ 'दण्डिदत्तौ' 'दत्तदण्डिनौ'। अत्र नलोपे दण्डिशब्दस्य घित्वे पूर्वनिपातापत्तिः। इष्यते त्वनियमः। असिद्धत्वे तु घित्वाभावात्सिद्धयति। न च पूर्वनिपाते नलोपो, नलोपे च घित्वे पूर्वनिपात इत्ययुक्तम्। (३) यस्य पूर्वपदत्वे घित्वं भवति तत्पूर्वमेव प्रयोक्तव्यमिति सूत्रार्थान्न दोषः। न च घित्वे बहिरङ्गतया नलोपोऽसिद्ध इति वाच्यम्, सञ्ज्ञाकृतबहिरङ्गत्वस्यानाश्रयणात्। कृति तुग्विधौ-वृत्रहभिः। कृतीति किम्? (४) वृत्रहच्छत्रम्। अस्मादेव सञ्ज्ञाकृतं बहिर्भूतनिमित्तक सञ्ज्ञाकृतञ्च बहिरङ्गत्वं परिभाषायां नाश्रीयते। अन्यथा 'वृत्रहभिः' इत्यादौ बहिर्भूतभिस्निमित्तक पदत्वनिमित्तो नलोपोऽसिद्धः स्यादिति तद्वैयर्थ्यं स्यात्। भाष्ये तु सन्निपातपरिभाषया 'वृत्रहभिः' इत्यादौ तुकं व्यावर्त्येदं प्रत्याख्यातम्, पदत्वद्वारा लोपस्य भिस्सन्निपातनिमित्तकत्वात्। सन्निपात निमित्तकनलोपविषयाणां 'वृत्रहधनम्' इत्यादीनामनभि धानमिति तदाशयः। तदभावे कृतीत्यपि व्यर्थमेव। न च सन्निपातपरिभाषया तुङ्मात्रव्यावृत्तौ प्राप्तायां नियमार्थं कृतीति, 'कृति तुगेव न, अन्यस्तु भवत्येवेति' इति वाच्यम्, 'वृत्रहच्छत्रम्' इत्यत्र नलोपस्य सन्निपातलक्षण त्वाभावादिति दिक्।

राजनीति। 'विभाषा ङिश्योः' (६।४।१३६) इत्यल्लोपविकल्पः। प्रतिदिवेति।

अधिकोपन्यासेन समाधानस्य व्यापकत्व बोधननेन स्पष्ट प्रतिपत्तये इत्यर्थः। भाष्य प्रामाण्येनेति। ईकारान्त सप्तभ्या असंभव प्रतिपादन पर भाष्यं प्रामाण्येने त्यर्थः। आवश्यक मिति। अन्यथा प्रत्याख्यानपक्षे वर्णा दांगमितिन्यायेनापृक्त लोपात्पूर्वमीत्वं स्यादितिभावः ननु स्थः कचेति चेन क्विपोविधानाच्छंस्था इति भाष्ये उदाहृतत्वाच्च वार्ण परिभाषाया अनित्यत्वमेववार्तिक प्रत्याख्यान पक्षे प्रतीयते नत्वनभिधानमित्यत ताह। शंस्था इत्यत्र विनवैति चेन विजेब विधीयते इति सूत्र भाष्याभ्यां परिभाषानित्यत्वं नयुक्तमिति भावः। नन्वेवंवातप्रमी शभ्दस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कन्निन्तम्।

हलि च (८।२।७७)। 'र्वोरुपधायाः' (८।२।७६) इति सूत्रं, 'सिपि धातोः' (८।२।७४) इत्यतो धातोरिति चानुवर्त्तते। र्वोरिति च धातोर्विशेषणम्। पदस्येति सम्बद्ध्यमानमपि इक एव व्यधिकरणं विशेषणम्। तद् ध्वनयन्नाह– प्रतिदीव्न इति। अत्र वान्तस्य भत्वाभावात्, 'न भकुर्छुराम्' (८।२।७९) इति निषेधो न। धातोः किम्? अग्निः करोति।

न संयोगा (६।४।१३७)। अन्तग्रहणं (१) स्पष्टार्थम्, संयोगस्य वमाभ्यां विशेषणेन तदन्तलाभात्।

'सर्वनामस्थाने चासम्बुद्धौ' (६।४।८) इत्येव सिद्धेनियमोऽयमित्याह– शावेवेति। उपधाया इति। तेन 'अनुनासिकस्य' (६।४।१५) इत्यस्यापि नियम इति भावः। अत्र सर्वनामस्थानग्रहणं न सम्बद्ध्यते। (२) तेन 'वृत्रहणी' वृत्रघ्नः 'वृत्रघ्नी' इत्यादौ न 'अनुनासिकस्य' (६।४।१५) इति दीर्घः। इति निषेधे इति। एतत्फलभूते निषेधे इत्यर्थः। शिस्वोरिति वक्तव्ये 'सौ च' (६।४।१३) इति योगविभाग (३) उत्तरार्थः।

हो हन्तेः (७।३।५४)। ञ्णिन्नकारा (१) हस्यैव विशेषणम्। तत्र ञ्णिद्विषये येन नाव्यवधानन्यायेन द्वाभ्यां व्यवाये 'घातकः' इत्यादावेव, न तु हननीयतेर्ण्वुल्यनेकव्यवधाने। (२) इदं 'धातोः; कार्यमुच्यमानम्' (प० भा० ८८) इति परिभाषया धातुसंशब्दनेन विहितप्रत्यय एव। तेन वृत्रहणमाचष्टे 'वृत्रहयति' इत्यादौ न। ने तु परे 'वृत्रघ्नः' इत्यादावेव, स्थानिवत्त्वकृतव्यवधानेऽपि (३) श्रौताव्यवधानसत्त्वात्, न तु 'हननम्' इत्यादौ श्रौतव्यवधाने

क्विबंतस्यासि द्धिरेवस्यादृत ताह मीङ् मानइति। एकेइति। मुख्या इत्यर्थः व्याख्यानादिति। भाष्येवा छंदसीत्यनेनात्र पूर्व सवर्ण रूपादित्यर्थः। यू किमिति। स्त्राख्यो नदी नेयङवङ्स्थानवस्त्री वामिङिति ह्रस्वश्चेति वक्तव्यंङितिह्रस्व स्विति। ङि त्येव। ह्रस्वोनदीति नियमार्थं विपरीत नियमात्त्वाण्नद्या। इति निर्देशान्न। ह्रस्वनद्या हृत्याप ग्रहण ज्ञापकादा कारांतेषु नदीत्वं नेति ज्ञापना दाकारान्तेषु स्त्रीत्वा भावाददंतेषु नियमा दिदुदंतोश्च न दोष इति प्रश्नः केचिदिति। अत्रारुचि बीजं त्ववयव स्त्री विषयत्वासिद्ध मिति प्रकृत सूत्रस्थ भाष्यात्प्यङः संप्रसारणमिति सूत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति स्पष्टं भाष्ये।

'वृत्रघ्नः' इत्यादौ णत्ववारणाय 'हन्तेरत्पूर्वस्य' इति विभज्य व्याचष्टे– हन्तेरिति। 'उपसर्गादसमासेऽपि' (८।४।१४) इत्यत उपसर्गादिति वर्त्तते, रषाभ्यामिति च। तात्स्थ्यात्ताच्छब्द्यमित्याह– उपसर्गस्थादिति। प्रकृतोपयुक्तमाह– अत्पूर्वस्येति। अत इति सिद्धे पूर्वग्रहणं स्पष्टार्थम्। (४) अत्र उपसर्गात् इत्यस्य निवृत्त्या णत्वमात्रस्यायं नियम इत्याह– एकाजुत्तरेति। णत्वमपीति। अपिना 'प्रातिपदिकान्त' (८।४।११) इत्यस्य, 'कुमति च' (८।४।१३) इत्यस्य च सङ्ग्रहः। बाद्धयसामान्य चिन्ताश्रयणात्सर्वबाधः। इदमत्वपूर्वग्रहणं हस्थानिककवर्गाभाववद्धन्तेरुपलक्षणम्। अतो 'बहुवृत्रहाणि' इत्यत्र, प्राधानि' 'प्रघनाघनः' इत्यत्र च न दोष इत्यन्यत्र विस्तरः। यत्तु कार्यकालपक्षे बहिरङ्गदीर्घासिद्धत्वाद् 'बहुवृत्रहाणि' इत्यादौ न दोषः। 'प्राघानि' इत्यादौ यथोद्देश एव लक्ष्यानुरोधादिति, तन्न तत्पक्षेऽपि त्रिपाद्यां तत्परिभाषाया अप्रवृत्तेरुक्तत्त्वात् 'प्रघनाघनः' इत्यत्र दोषाच्च। माधवेनोक्तमिति। 'वृत्रघ्नः' 'वृत्रघ्नः' 'वृत्रघ्णः' इति रूपद्वयं तेनोक्तम्। तद्भाष्येति। 'कुव्यवाये हादेशेषु प्रतिषेधो वक्तव्यः। वृत्रघ्नः' सुघ्नः, प्राधानि। हन्तेरत्पूर्वस्येत्यत्पूर्वग्रहणं न कर्त्तव्यं भवति' इति भाष्ये– त्यर्तः। अत्पूर्वग्रहणस्य तादृशोपलक्षितार्थत्वे मानाभाव इति तदाशयः।

अनिनिति। एतञ्च 'येन विधिः' (१।१।७२) इति सूत्रे भाष्ये स्पष्टम्। अन्यत्र तु 'अलैवानर्थकेन तदन्तविधिर्न तत्समुदायेन' इति हन्ग्रहणे प्लीहन्ग्रहणं न।

मघवा ब (६।४।१२८)। षष्ठयर्थे प्रथमा, तृ इति च वर्त्तते। ऋ इदिति। तेनानेकाल्त्वाभावान्न सवदिशः।

स्थभाष्याच्चाकडारीय संज्ञानां कार्यकालत्वेपि न स्वदेशत्याग गिति नबाध्यबाधक भावांशेऽनुप्पपत्तिरि तिभावः। अंबेत्पादावप्यना पत्तेरिति। एवं च डलकवतां ह्रस्वोनेति वचनारंभादत्रेक् परिभाषानुपस्थिति रितिभावः। सप्तम्येक वचनं व्याख्यानादिति। स्त्रियामितिनिर्देशादित्यर्थः ननूङ्च गमदीनामिति निष्पन्न स्यभ्रूशब्दस्य धातुत्वादेवसि द्धिरत ताह। भ्रू शब्द इति। यण्निषेधारंभेणेति। यण इकोयणचीति यणोनिषेधस्तस्य कर्तेयङतस्यारंभेण प्रवर्तनेनेत्यर्थः। शाक पार्थिवादित्वात् कर्तृ शब्दकस्य लोपः। ननु वाचा सौक्रियेतिविग्रहे तं प्रतीत्यत्रतच्छब्द

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उगिदचाम् (७।१।७०)। अचामित्यञ्चुधातोर्ग्रहणं (१) व्याख्यानात्। नलोपिन इति। अकारलोपाकरणपूर्वकं नलोपकरणस्य विवक्षार्थत्वादिति भावः। अत्रोगित् (२) झलन्त एव व्याख्यानात्। तेन 'शमी' 'शमिनौ' इत्यादौ नातिप्रसङ्ग इति 'युवरोनाकौ' (७।१।१) इत्यत्र (३) भाष्ये स्पष्टम्। उपधादीर्घ इति। 'सर्वनामस्थाने च' (६।४।४) इत्यनेन। असिद्धत्वाभावकल्पने मानमाह– तथा चेति। निपातनादिति। 'वनो र च' (४।१।७) इति सूत्रे भाष्ये तु 'मघवन्शब्दोऽव्युत्पन्नं प्रातिपदिकम्' इत्युक्तम्।

मघशब्दादिति। धनार्थादित्यर्थः। भाषायामपीति। अपिना छन्दसि। 'मघवानमीमहे' इति मध्योदात्तं वनिपि बोद्धयम्। आकरे इति। 'केशाद्वः' (५।२।१०६) इति सूत्रे कैयटे इत्यर्थः। एवञ्च मतुपि 'अत्वसन्तस्य' (६।४।१४) इति दीर्घसत्त्वेन, त्रादेशे तदभावे, फलभेदे प्रत्याख्यानासम्भव इति भावः। नन्वेवमप्यन्तोदात्तस्य त्रादेशे वकाराकारस्योदात्तत्वं, मतुपि तु 'ह्रस्वनुड्भ्याम्' (६।१।७६) इति प्राप्तस्य मतुबु दात्तत्वस्य 'न गोश्वन्' (६।१।१८२) इति प्रतिषेधेन पित्त्वादनुदात्तत्वे घकाराकारस्योदात्तत्वमिति फलभेदोऽस्त्येवेति चेत्? न, त्रादेशपक्षे दीर्घवत् बहुलग्रहणेन घकाराकारोदात्तत्वस्याप्यङ्गीकारात्। तत्रैव मानान्तरमाह– हविरिति। 'मघवानृजीषी' इत्यस्याप्युपलक्षणमिदम्।

'अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत्।
मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनात्'।।

इत्यत्रत्यवार्तिकरीत्या मघवन्शब्दस्य लोकेऽसाधुत्वं लभ्यते। तथाच तृज्वत्सूत्रे भाष्यम्– 'अविशेषविहिता अपि शब्दा नियतविषया दृश्यन्ते इति' इत्यन्यत्र विस्तरः।

स्यत छाचकत्वे लक्षणेति गौरवमत ताह। यद्वेति किंचेति किंत्वित्यर्थः आरंभेपीति। अपिनाप्रत्याख्यानेऽभ्युच्च येन समुच्चयेननतु भेदेन समाधान द्वयमिति बोध्य सामान्यापेक्षेति क्ये सुबंतं यदीत्याकारकेत्यर्थः। ननुअलन्तं यदीति विशेषापेक्षेतिभावः। अस्यापदत्वादिति अन्यथा सुत्यावित्या दावि कोसवर्ण इति शाकलं स्यादितिभावः। ननुपदांतस्य स्यानेविधौनेत्यर्थेत्रपदत्वायावान्निषेधाभावेपि पदांते विधात्तव्ये नेत्यर्थे निषेधोदुर्वारः संप्रति पदत्वा भावेपि जायमानस्य यणः पदचरमावयत्वादत ताह। परपदस्थेति अनित्यत्वादिति। मलोपेकृतेऽकृते च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

छन्दस्येवेति। न च वनिबन्तस्य सम्प्रसारणे यस्येतिलोपे 'मघोनः' इत्यसिद्धिः। व्याश्रयत्वान्नाभीयासिद्धत्वं लोपे सम्प्रसारणस्य। नापि बहिरङ्गासिद्धत्वम्, तस्या वाह्ऊठ्सूत्रस्थतयाऽऽभीयत्वेना भीयान्तरङ्गस्य तदृष्टथाऽसिद्धत्वेनात्र तस्या अप्रवृत्तेः। अन्तरङ्गशास्त्राश्रय एव तदाश्रय 'इति समानाश्रयत्वमव्याहतम्;– इति वाच्यम्, निपातितान्तोदात्तमघवनशब्द मादाय सिद्धेः। 'एकादेश उदात्तेनोदात्तः' (८।२।५) इत्यस्य प्रवृत्त्या तत्र स्वरे विशेषाभावात्। छन्दस्यापाद्यरूपाभावान्नानिष्टापादनम्। अन्तोदात्तं त्विति। कन्यन्तत्वादव्युत्पन्नत्वाद्वा तत्त्वम्।

अन्नन्तानामिति। 'अल्लोपोऽनः' (६।४।१३४) इत्यपकृष्यते। तत्र नकारं प्रश्लिष्य नान्तानामित्यर्थः। तेन 'मघवतः' इत्यादौ नाल्लोपसम्प्रसारणे, 'धीवरी' इत्यादौ च नाल्लोपः। स्पष्टञ्चेदम् ऋऌक्सूत्रे भाष्ये। परे तु– नकारप्रश्लेषाभावेऽपि न दोषः, 'अलोऽन्त्यस्य' (१।१।५२) इत्यस्य सत्त्वेनानः स्थानित्वाभावेन स्थानिवत्सूत्रेणान्नन्तत्वालाभात्। 'सर्वे सर्वपदादेशाः' इत्यनेनापि मघवन्शब्दस्यैव स्थानित्वं, नानः। अर्द्धविकारे प्रत्यभिज्ञाऽभावान्नैकदेशविकृतन्यायावसरः। ध्वनितञ्चेदं 'श्वयुव' (६।६।१३३) इत्यत्र भाष्ये इत्याहुः। मघवतीति। पुंयोगेन स्त्रियां वृत्तौ 'उगितश्च' (४।१।६) इति ङीप्। विभक्तौ लिङ्गविशिष्टाग्रहणान्नुम्न।

शुन इति। ननु सम्प्रसारणे वार्णादाङ्गस्य बलीयस्त्वेन पूर्वत्वं बाधित्वा 'अल्लोपोऽनः' (६।४।१३४) इति लोपे 'शुनः' इति सर्वानुदात्तं स्यात्, उदात्तनिवृत्तिस्वरेणान्तोदात्तं वा स्यात्, पूर्वरूपेणाद्युदात्तमिष्यते, तत्र हि वकारस्थानिकोकारस्य स्त्रंसनधर्महल्स्थानिकत्वेनानुदात्ततया श्वन्शब्द स्यान्तोदात्त तयाऽकारस्योदात्तत्वेन तयोः

यणोऽप्राप्तत्वादित्यर्थः। एवंच समकाल प्राप्त्यभावेन पूर्वोपस्थि तिकमन्तरंग मित्यस्य विषयाभावा दितिभावः। गोमानिति भाष्योक्तेरिति अन्यथा कृत दीर्घस्यापि तत्स्थाना पन्न मिति न्यायेन स्थान्यचः पूर्वत्वा त्क्यचोऽकारस्य स्थानिववत्वेन नुम्न स्यादितिभावः गौणमुखय न्यायवदिति। अभिव्यक्त पदार्थो ये इति न्यायस्य गौणामुख्यन्याये एवांतर्भाआवादिति भावः। व्याख्यानादिति। कार्यशास्त्रनिमित्त व्यवहाराति देशेषु प्रतिपदोक्तस्य तृच्छदमुच्चार्य विहितकार्य स्यैव ग्रहणापत्तौ स्त्रियां चेत्यस्य वैयर्था दर्थातादातम्यति द्देश योरसंभव रूपा दित्यर्थः ननु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थाने जातस्यैकादेशस्योदात्तत्वात्। किञ्च लोपे स्थानिवत्त्वेन यण्प्रसङ्गः। 'अतेः शुनः' (५।४।९६) इत्यादिनिर्देशैस्तद्वारणे तु 'बहुश्वा' 'बहुमघवा' 'बहुयुवा' इत्यत्र 'अन उपधालोपिनः' (४।१।२८) इति ङीब्विकल्पापत्तिः 'मघोनः' इत्यादावन्तोदात्तप्रकृति के उदात्तनिवृत्तिस्वरापत्तिश्च, इति चेत्? न, वार्णपरिभाषाया अनित्यत्वेन क्वचिदप्रवृवृत्त्याऽदोषात्, श्वन्शब्दे आभीयतया सम्प्रसारणासिद्धत्वेन 'न संयोगाद्' (६।४।१३७) इति निषेधाच्च।

(१) न सम्प्रसारणे (६।१।३७)। अनुवृत्त्यैव निषेध्यसमर्पके लब्धे पुनः सम्प्रसारणग्रहणसामर्थ्यात्तन्मात्रनिषेध इति दूरस्थस्यास्य, व्यथो लिटि' (७।४।६८) इत्यस्य च निषेधः। न च व्यथिव्यद्ध्यादावस्य चारितार्थ्येन 'यूनः' इत्यादौ पूर्वं सवर्णदीर्घरूपैकादेशे तस्य 'अचः परस्मिन्' (१।१।५७) इति स्थानिवत्त्वेन सम्प्रसारणत्वेऽपि तेनैव स्थानिवत्त्वे नोकारव्यवधानात्कथं निषेध इति वाच्यम्, 'व्यथः' (७।४।६८) इति सूत्रे यग्रहणेनैव सिद्धया सम्प्रसारणग्रहणस्यैतन्निषेधकतयैव चारितार्थ्यस्य वक्तव्यत्वेन व्यवहितेऽपि प्रवृत्तेः, 'यूनस्तिः' (४।१।७७) इति निर्देशाच्च; इत्याशयेनाह– इति यकारस्येति। न च कार्यकालपक्षे 'इग्यणः' (१।१।४५) इत्युपस्थितस्य पदैकवाक्यतयाऽन्वये निमित्तस्य यणाऽन्वयेन येन नाव्यवधान न्यायेन पूर्वस्य सम्प्रसारणाप्राप्तेरिदं सूत्रं व्यर्थमिति वाच्यम्, तत्पक्षेऽपि सञ्ज्ञासूत्राणां वाक्यभेदेनैव सम्बन्धस्योक्ततया विधायकेषु यण इत्यस्याभावात्। अत्र चेदमपि ज्ञापकं बोद्धयम्।

ननु सकृत्प्रवृत्त्यैवोभयोः सम्प्रसारणे जाते निषेधो व्यर्थो निमित्तत्वानु पपत्तिश्चेत्यत आह– अत एव ज्ञापकादिति। तदुक्तं भाष्ये 'इहेङ्गितेन चेष्टितेन निमिषितेन महता वा

प्रतिपदोक्तपरिभाषाबाधेनथि स्त्रियां चेत्यस्य सार्थक्यमताह। प्राधान्याच्चेति ननुरूपाति देशेस्वराति देशोन स्यादत ताह। तच्चेति। उदात्तत्व विशिष्टा तिदेशे प्रमाणमाह। चकारोच्चारणादिति। तत्सामर्थ्यादित्यर्थः। तेन क्रोष्ट्रेत्यादाविति। क्रोष्ट्रेत्यादौतुनंदोषः। प्रतिपदोक्त परिभाषाया अप्रवृत्या शास्त्र कार्य व्यपदेशाति देशेष्वपि चित इत्यय प्रवृत्तेः क्रोष्ट्रे त्यादौतु शास्त्रद्याति देशेषु विभाषा तृतीया दिष्वचीत्यत्र तृतीया दिष्वचीत्युक्तत्वात् प्रत्यासत्या अच् तृतीयादि विभक्त् न्यतर निमित्तक कार्यस्यैवतेना तिदेशापत्या चित इत्यस्य स्वरस्यानापत्त्या दोष षिति भावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूत्रप्रबन्धेनाऽऽचार्याणाम भिप्रायो गम्यते, एतदेव ज्ञापयति परस्य पूर्वं भविष्यति' इति। 'लक्ष्ये लक्षणस्य' इति न्यायस्य तु नायं विषयः, कार्याश्रयवर्णभेदेन (१) लक्ष्यभेदात्।

अर्वणस्तृ (६।४।१२७)। न तु साविति। पर्युदास एव तूचितः, प्रत्ययत्वेन च सादृश्यम्। अनञ इति बहुव्रीहिः, 'वाजमर्वत्सु' इति प्रयोगात्, तत्पुरुषे ह्यनञः परस्यार्वण इत्यर्थेऽत्र न स्यात्। सुरत्र प्रथमै कवचनम्। अनञः किमिति। अनञ इत्यस्य कः शब्दो व्यावर्त्य इति प्रश्नः। उत्तरम्– अनर्वेति। यज्वन्शब्दसदृशोऽनर्वन्शब्दो व्यावर्त्य इत्यर्थः।

नन्विह निरनुनासिकोच्चारणेऽपि तपरसूत्रस्यानणीव विधीयमानेऽपि विद्ध्यर्थत्वान्नस्यान्तर तम्यादनुनासिकः स्यात्, तपरसूत्रेऽप्रत्ययग्रहणानुवृत्तावण्ग्रहणानुवृत्तौ च मानाभावादत आह– आआदिति। विशेष्यविशेषण भावेनान्वयान्न सवदिश इति भावः। भाष्ये त्वनुनासिकविधाने प्रतिपत्ति लाघवाय तस्यैवोच्चारणे कार्ये तदनुच्चारणात् शुद्धस्यैव विधानमित्युक्तम्।

केचित्तु इदं सर्वं 'गुणा भेदकाः' इति पक्षे। वृद्धिरादैच्सूत्र भाष्य सम्मते सिद्धान्तभूते 'गुणा अभेदकाः' इति पक्षे जातिपक्षे च तत्प्राप्तस्यापि सवर्णग्रहणस्याप्रत्ययग्रहणेन निषेधेनादोषात्। अत एव भाष्ये 'तपरस्तस्यापि सवर्णग्रहणस्याप्रत्ययग्रहणेन निषेधेनादोषात्। अत एव भाष्ये 'तपरस्तत्कालस्येति प्राप्नोति' इत्युक्तम्। अप्रत्यय इति च वाक्यभेदेन सर्वप्रतिषेधकम्, अण्ग्रहणस्य च तत्रासम्बन्ध इति तदाशयः। अत एव भाष्ये 'भाव्यमानेन सवर्णानां ग्रहणं न' इत्येव पठितं, न त्वणेति। एतदेवाभिप्रे त्याणुदित्सूत्रेऽनया परिभाषयाऽप्रत्ययग्रहणवैयर्थ्यमाशङ्क्याप्रत्ययग्रहणस्य तत्परिभाषाज्ञापकत्वमुक्तम्। तेन च तस्याव्यापकत्वं सूचितम्, अप्रत्ययग्रहणस्य मदुक्तरीत्या व्याख्यानञ्च सूचितम्। तेन

इत्यन्येइति। एवं च नेष्ट्रादि ग्रहणमत्र मते सूत्रे कार्य मितिभावः। तइति। हरिदीक्षिता इत्यर्थः। अन्य प्रयोगस्येति होतृपोतृ नेष्ठोद्गातार इत्यस्येत्यर्थः अस्योद्गातार इत्यस्य भाव्यमानस्यापीति। उकारस्येति शेषः। क्वचिदिति। अदसोसेरित्यत्रेत्यर्थः। तेन सनां शंसेत्यत्र तनादि कृञ्भ्य इत्यत्र च न सवर्ण ग्रहण मिति भावः। पुमान् स्त्रियेतिनिर्देशादिति। सवपरेशरीरत्येनन विसर्गस्य झरोझरीत्यनेन सस्य वालोपेपि तस्यासिद्धत्वानस्यापदातं त्वांदनुस्वारः स्यात् संयोगातं लोपेतु तस्य सिद्धत्वात् पदांतत्वात्नस्यानु स्वाराभावे निर्देश संगति रितिभावः। वाचक सादृश्यादिति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जातिग्रहणप्राप्तस्य गुणाभेदकत्वपक्ष प्राप्तस्य चानयाऽणनण्साधारण्येन निषेध इति सूचितम्।

वस्तुतोऽणुदित्सूत्रस्था प्रत्ययग्रहणज्ञापकत्वपर भाष्यस्य एकदेशानुमतिद्वारा परिभाषा बोद्ध्यते इत्यर्थः। प्रतीयते इत्यस्य विधीयत इत्यर्था प्रसिद्धया कैयटोक्तव्याख्या चिन्त्या। परिभाषायां सवर्णपदेन समानजातीयो भिन्नधर्मा उच्यते। तेन जशादिविधौ जत्वादिजात्याश्रयसर्वजकारादिग्रहणसिद्धिरित्याहुः।

एतेन पथीयतेः क्विपि पन्था इत्यादीत्यपास्तम्। अत्र शुद्धार्थ तदनुच्चारणस्यावश्यकत्वेन भाष्यासङ्गतेः। तस्मात्तदनभिधानमेवोचितम्। न च अदित्येवास्तु, नकारेकारयोरत्वे सवर्णदीर्घेण रूपसिद्धेः, पररूपं तु न, पथिमथ्यृभुक्षां लोपः, भस्य टेः, इतोऽत्सर्वनामस्थाने' इति न्यासेन नकाराश्रवणसिद्धावकारविधानसामर्थ्याद्; इति वाच्यम्, ज्ञानगौरवपरिहारेण स्पष्टार्थमाकारोच्चारणात्।

इतोऽत् (७।१।८६)। आदित्यनुवृत्त्यैव सिद्धेऽद्वचनम् 'ऋभुक्षणम्' इत्यादौ 'वा षपूर्वस्य' (८।४।६) इति दीर्घविकल्पे पक्षे ह्रस्वश्रवणार्थम्। इत इति अदिति च तपरत्वे मुखसुखार्थम् 'एरत्' इत्युक्तौ ततो लाघवाभावात्। अन्यथा विधेयेऽपि तपकरणात् 'कुरुतः' इत्वादौ गुणाभाववत् 'पन्थानौ' इत्यादौ दीर्घाभावापत्तिरित्यन्यत्र विस्तरः।

थोन्थः (७।१।८७) नो नुडिति नोक्तम्। इत्संज्ञायाः 'आद्यन्तौ' (१।१।४६) इत्यस्य चानुसन्धाने प्रक्रियागौरवात्।

भस्य टेः (७।१।८८)। भस्य किम्? पथिभ्याम्। सम्बुद्धौ नपुंसकानामिति। इदं 'न लुमता' (१।१।६३) इतिनिषेधानित्यत्वमूलकमित्युक्तम्। यद्यपि भाष्ये 'वा नपुंसकानाम्'

एकदेश विकृतस्यानन्यत्वादित्यर्थः। अत्र मतौच्छ इत्यत्र भुवोवुगि त्यादौ विभक्ति करणादाह। कदाचिदित। विभक्तय्भाव इति। सुपांस्वि तिलुकेतिभावः। सच सूत्रेष्वेवेति। नतु लौकिक प्रयोगेस्वित्यर्थः। छन्दोवत्सूंत्राणीत्यनेन सूत्रेष्वेव छां स्दसत्वातिदेशे न सुपां सुलुगित्यस्य प्रवृत्तेरितिभावः। प्रामाणिका इति। केचितु भूसत्ताय मिति निर्देशादेवलौकिक प्रयोगेपिक्वचिदनुकरणाद्विभक्त्य भाव कुर्वन्ति।

तदयुक्तं निर्देशास्यान्यथोपत्तया तादृशार्थे प्रमाणाभावादितिभावः। तदाह। गवित्ययमाहेनीति। उत्वमप्यत एवनेति। तपरकरणादेवोत्वमपि नेत्यर्थः। अत एवेति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्येव पठितं, तथापि सूत्रे ङिग्रहणस्य प्रत्याख्यातत्वेन, 'हे चर्मन्' 'हे चर्म' इति सम्बुद्धावेवोदाहृत्वेन च तावन्मात्रविषयताऽस्येति भावः।

ष्णान्ता (१।१।२४)। विशेष्यसाकाङ्क्षात् स्त्रीलिङ्गनिर्देशात् प्रकृतं सङ्ख्येत्याकृष्यते संख्याशब्देन च सङ्ख्याप्रकारकबोधजनकाः पञ्चादयो गृह्यन्ते, सङ्ख्येतिशब्दे बहुगणडतिषु च तदन्तत्वासम्भवात्। तदाह-संङ्ख्येति। सन्निपातेति। बाहरङ्गासिद्धत्वं न, संज्ञाया कार्यकालपक्षत्वेन समत्वात्। स्पष्टश्चेदं भाष्ये।

नोपधा (६।४।७) नलोपस्यासिद्धत्वात् 'नामि' (६।४।३) इतिदीर्घप्राप्तेरयमारम्भः नामीत्यस्याङ्गविशेषणतैव न्याय्या, नामः प्रत्ययत्वात्। एवञ्च 'पञ्चानाम्' इत्यादौ पकाराकारस्य दीर्घवारणायोपधाग्रहण्। नेति किम्? चतुर्णाम्। नामि किम्? चर्मणाम्। नलोप इति। 'ब्रुवः पञ्चानाम्' (३।४।८४) इति लिङ्गान्न सन्निपातपरिभाषाविरोधः।

'अष्टन आ (७।२।८४) अनणत्वान्नानुनासिक इति भाष्ये स्पष्टम्। जातिग्रहणेन गुणाभेदकत्वेन तु न सः, भाव्यमानत्वात्। शुद्धोच्चारणादिति तु नात्र वक्तुं शक्यम्, 'रायो हलि' (७।२।८५) इत्युत्तरार्थन्तस्य चारितार्थ्यात्। प्रश्लेषणेणापि न निर्वाहः, वाच्यवृत्त्याऽनुनासिकव्यावृत्तेस्तेनालाभात्। प्रत्युत तत्रापि गुणाभेदकत्वादेर्दुर्वारत्वेनाऽऽन्तरतम्यादनुनासिकस्यैव प्राप्तेः अश्लेषस्य पर्यायेण सकलाकारविधानार्थत्वं स्यात्। एवमन्यत्रापि बोद्ध्यम्। 'रायो हलि' (७।२।८५) इत्यतो हलीत्यपकृष्यते।

अष्टाभ्य औश्। (७।१।२१)। उङिति नु नोक्तम्, सकारस्योकारे 'अष्टा अ उ' इति

प्रकृतिवदित्यति देशस्य वै कल्पिकत्वेन पे इत्वस्या भावोदेवेत्यर्थः। ननुऋकारांशे फलाभावेपि साहचर्य भंगेन लृकारांशेप्रवृत्यर्थभेव ऋृकारेपि प्रवृत्ति रस्त्वित्यत आह। वस्तुत इति। ननु योग विभागे द्वितीय सूत्र सामर्थ्येन पूर्वसूत्रस्यान्यत्र क्वाचित्कत्वेप्यत्र तथा त्वेमाना भावोऽत ताह। साव प्रयोग एवेति। ननुयोग विभागेन सिद्धावापि वार्तिकपक्षे कथं सिद्धिरत आह। उत्तरपदत्वेचित। ननु तेनोत्तर पदस्य पदत्व निषेधेपि पूर्व पदस्य पूर्वांतवत्वेनोत्तर पदविशिष्टस्य वापदत्वे निषेधाभावोऽत आह। उत्तरपदस्य तद्घटित तस्यवेति। वार्तिकस्ये इशोर्थे प्रमाणमाह। अतइति।। इति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थिति इङिशीनामादूगुणः सवर्णदीर्घत्वात्' इति न्यायेनान्तरङ्गत्वात्सवर्णदीर्घे तत आदूगुणे 'अष्टौ' इत्यस्या सिद्ध्यापत्तेः। हलीत्यपकर्षे कृताकारादित्यनुपपन्नमत आह – कृतात्वेत्। कृतात्वानुकरणमित्यर्थः। लक्षणवशंसंपन्नत्वे हि तस्य वैकल्पिकतया लाघवादष्टभ्य इत्येव वदेदिति भावः। ज्ञापयतीति। अयं भावः– हलीत्यपकृष्यमाणं वाक्यभेदेन पुनर्विधानार्थम्। तेन 'अष्टन्' (६।३।१२५) इत्यस्य क्विचदक्ष्वपि प्रवृत्तिरिति। आत्वमिति। आत्वमात्रमित्यर्थः।

सूत्रे इति। दीर्घान्तादष्टनः पराऽसर्वनामस्थानविभक्तिरुदात्तेति तदर्थः। ज्ञापकादिति। तद्धि 'अष्टभिः' इति ह्रस्वेऽन्तोदात्तव्यावृत्त्यर्थम्। एवञ्च ह्रस्वव्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणमात्वैकल्पिकत्वे ज्ञापकम्। न च 'अष्टाभिः' इत्यत्र सावकाशस्य 'अष्टन' इति सूत्रस्य 'अष्टभिः' इत्यत्र परत्वाद् 'झल्युपोमत्तम् (६।१।१८०) इत्यनेन बाघे सकृद्गतिन्यायेन पुनरप्रवृत्तौ व्यर्थमेव तत्, न हि 'अष्टाभिः' इत्यत्र 'झल्युपोत्तमम्' इति प्राप्नोति, कार्यकालपक्षेऽनान्तत्वेन षट्त्वाभावात्, अल्विधित्वेन स्थानिवत्त्वाभावाच्च; इति वाच्यम्, पुनःप्रसङ्गविज्ञानबोधनद्वारा एतद्विषये यथोद्देशपक्षस्यैवाश्रयणबोधनद्वारा वा तद्विकल्पे ज्ञापकमित्याशयादित्य न्यत्र विस्तरः।

अष्टानामिति। हलीत्युक्तेरादौ नुट्, तत आत्वम्। यत्तु – सन्निपातपरिभाषयाऽत्र नात्वं, किन्तु 'नोपधायाः' (६।४।७) इति दीर्घे नलोपः। अन्तोदात्तत्वन्तु 'षट्त्रि' (६।१।१७९) इन्येव सिद्धम्। नलोपे तु न सन्निपातपरिभाषा, नलोपस्यासिद्धत्वात्' इति; तन्न, पूर्वत्र कर्त्तव्ये नलोपासिद्धत्वेऽपि तत्रकृतेऽसिद्धत्वे मानाभावात्, सन्निपातस्याशास्त्रीयत्वेन तस्य नलोपासिद्धत्वेनालाभाच्च, अरोपितासिद्धत्वेऽपि वस्तुतो नलोपे तद्विघातस्य जायमानत्वेन

केचिदिति। अत्रारुचि बीजंतु भाष्ये एताहर्थस्या करणादप्रामाण्येन से शब्द स्यानिभिधान मिति। अयवाया वादिस्विति। वृक्षायिदं कुर्मायायिदं वृक्षा वेतावित्यादि ष्वित्यर्थः। नन्वोपूचेति वक्तव्ये द्योश्चेति गुरु निर्देशं कुर्वतो वार्तिककारस्योप लक्षणतया व्याख्यानं नाभिप्रेतमत आह। परेत्विति। ईदृशानामिति। गोद्योशब्दातिरिक्तौकारां तानामित्यर्थः। इत्यंजंवाः पुलिंगाः। श्री दुंठिएजाय।।

श्रीं वन्दे। एकोदशस्य पूर्वांतत्वेनेति। नतु लिंगविशिष्टपरिभाषया लिंगवोधक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नलोपेऽपि तस्या दुर्वारत्वाच्च। अत एव 'गव्यिता' 'नाव्यिता' इत्यादौ सन्निपातपरिभाषया यलोपो न। अन्यथा 'यस्य हलः' (६।४।४९) इति यलोपस्य बहिर्भूततृज्निमित्तकत्वेन बहिरङ्गतयाऽन्तरङ्गावादेशं प्रत्यसिद्धतया निमित्तविघाताभावः स्पष्टेव। तस्मान्नलोपस्यापि परिभाषाऽनित्यत्वेनैव साध्यतया यस्यासिद्धत्वादात्वमेव युक्तं तदनित्यत्वेन। किञ्च षट्सञ्ज्ञासन्निपातेन जातस्य नुट आत्वे नलोपे वा न तद्विघातकत्वं, स्थानिवद्भावेन कृतात्वेऽपि षट्त्वसत्त्वात्। कार्यकालपक्षे तत्तद्विद्ध्येकवाक्यतापन्नषट्त्वस्य बहिरङ्गतयाऽऽत्वे कृतेऽनान्तत्वेन षट्त्वाभावान्नुट् न स्यादिति हलीत्यपकर्षः। दीर्घग्रहणाज्ज्ञापकादाकारान्तस्य षट्सञ्ज्ञाश्रयणे, अत्र यथोद्देशस्यैवाश्रयणेनान्तरङ्गत्वात् पूर्वं षट्त्वे नान्तसङ्ख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपस्य षट्त्वस्य स्थान्यल्धर्मत्वाभावेन स्थानिवद्भावादाकारान्ते आश्रयणे वा प्रतिपत्तिगौरवमिति बोद्ध्यम्।

वृत्त्याद्यनुसारेणाह-गौणत्वे त्वित्यादि। स्थानिवद्भावादिति। 'पूर्वत्रासिद्धे' इति तु 'तस्य दोषः' इत्यनेन निषिद्धमिति भावः। कार्यकालपक्षे। इत्यादि तु प्राचामनुरोधेनेत्युक्तम्। प्राध्यान्य एवेति। बहुवचननिर्देशात्। एवञ्च गौणे आदेशाप्रवृत्तौ तज्ज्ञाप्याऽऽत्वमपि नेति भावः।

परे तु –'ष्णान्ता' (१।१।२४) इति सूत्रे भाष्ये 'अष्टानाम्' इत्येतत्सिद्ध्ये हलीत्यकर्षमुक्त्वा तत्र पक्षे 'प्रियाष्टौ, प्रियाष्टा इति न सिद्ध्यति, 'प्रियाष्टानौ, प्रियाष्टानः' इति प्राप्नोति' इति शङ्किते 'यथालक्षणमप्रयुक्ते' इति समाहितम्। तत्र यथालक्षणमिति प्रतीकमुपादाय 'यस्य विशिष्टः प्रयोगो न स्मर्यते, नापि प्रयोगनिषेधस्मृतिः, तद् यथालक्षणमनुगन्त्वयं तदत्र माभूदात्वमित्यर्थः' इत्येकमर्थमुक्त्वा 'नैव वा लक्षणप्रयुक्ते

प्रत्यय ज्ञानाय स्याश्रयेणेनातिदेशद्वय स्वीकारे गौर वादिति भावः। वाचेत्यत्र टाप एवाभावादाह तत्रच भागुरिमतेनावेवर्तव इति। आदविति। आदिना दामेत्यादिडावंतसंग्रहः। अंगस्यातीति। यस्मात्प्रत्यय विधिस्तदादीत्यर्थः।।

प्रतिपदोक्तत्वेनेति। निखकाशत्वरूपेणेत्यर्थः। अनित्यत्वादिति। गुणात्संबुध्देरिति वक्तव्ये एङ्ह्रस्वग्रहण सामर्थ्यात्संबुद्धि लोपे तस्यानित्यत्वादिति भावः। व्याख्यानादिति। ङितइत्यस्यागमपक्षेया अवयव षष्ठयंतत्वेन स्थान षष्ठयन्तत्वासंभवरूपादित्यर्थः। सोर्लोपे उक्तइति। अंतादिवच्चेतिसूत्रे भाष्यकारैः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रवर्त्तते, प्रयुक्तानामेव लक्षणेनान्वाख्यानात्' इति व्याख्यानान्तरमुक्तम्। तत्रान्त्यव्याख्यानमेव ज्यायः, अप्रयुक्ते लक्षणाभावस्यैव योग्यता, न तु लक्षणप्रवृत्तेरित्यर्थसङ्गतेः आद्यव्याख्यायामप्रयुक्ते इति वाक्यशेषासङ्गतिः, प्रयुक्तेऽपि लक्षणानतिक्रमात्, प्रयुक्तानामिदमन्वाख्यानमित्यन्यत्र भाष्योक्तेश्च। किञ्च भाष्यकारस्य लक्ष्यैकचक्षुष्कतया इयमेव व्याख्योचिता, एकस्यैव प्रयोगस्य भाष्यफक्किकाव्याख्यानभेदेन साधुत्वासाधुत्वयोरनौचित्याच्च, न वा' (१।१।४४) इति सूत्रे भाष्ये पक्षभेदेनैकस्यैव साधुत्वासाधुत्वयोस्तिरस्काराच्च। अत एव हल्ङ्यादिसूत्रादावस्याप्रयुक्ते लक्षणाभाव इत्येव व्याख्याऽदृता कैयटेन। 'नाम्रेडितस्य' (६।१।९९) इति सूत्रेऽपि कैयटः – 'प्रयोगमूलत्वादस्य शास्त्रस्य प्रयोगाभावे न प्रवृत्तिः' इति। एवञ्चैषामनभिधानमेवोचितम्। अत एव 'अष्टाभ्य औश्' (७।१।२१) इति सूत्रे भाष्ये 'विभाषा आत्वं, यदयमात्वभूतस्य ग्रहणङ्करोति अष्टाभ्य इति। अन्यथा अष्टन इत्येव ब्रूयात्' इत्युक्तम्। कैयटरीत्या गौणे प्रवृत्त्यभावाय बहुवचननिर्देशस्यावश्यकतया तदसङ्गतिः स्पष्टैव। एवञ्च तत्प्रयोगविचारः सर्वोऽपि निष्फल एवेत्याहुः।

निरुपपादादिति। नुमोऽसमास एव विधानेन, सोपपदे 'चोः कुः' (८।२।३०) इति कुत्वेवैव सिद्धत्वेन क्विन क्विपि च विशेषाभावादिति भावः। कनाविति। इदमुपलक्षणमुच्चारणार्थेकारस्यापि ककारो गुणप्रतिषेधाद्यर्थः। नकारः 'क्विन्प्रत्यस्य' (८।२।६२) इत्यत्र विशेषणार्थ इति भाष्ये स्पष्टम्।

सन्निहित इति। तत्फलन्तु णिजादीनां सञ्ज्ञाऽभावः। अतिङ्किम्? 'रुरुदिव' इत्यादौ 'नेड वशि कृति' (७।२।८) इति निषेधो मा भूदिति। ज्ञापकेन निर्वाहस्तु व्याख्यानाद्वरं

एकदेश्युक्तित्वेपीति। व्यपवर्गापवर्ग साधारणे तदभावस्यैक देशयुक्ति त्वेत्यिर्थः। सिद्धांति संमतत्वा भावादिति। अव्यपवर्गे प्रकृते तदभावस्य सिद्धांति संमतत्वा भावादित्यर्थः। एक देशिमतेपि प्रकृते निर्वाहमाह। परेत्विति। सर्वनामत्विति। लिंगविशिष्ट परिभाषया सर्वादित्वाति देशात् सर्वादीत्यनेनेत्यर्थः। यथाश्रुतं युक्तं विभक्तौ लिंग विशिष्ट ग्रहणमिति निषेधादि तिभावः। अत्र मानमन्वेष्यमिति। न सोस्ति प्रत्ययो लोकेयः शब्दानुमादृते, अनुविद्धमिवज्ञानं सर्वं शब्देन भासत इति पूः शब्द संबद्धार्थस्यविशेष्यत्वेनेत्यर्थोऽयुक्त इतिभावः। (नेत्येवार्थोयुक्त) याडापः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

करणमिति न्यायाननुगृहीत इति सूत्राशयः।

युजेर (७।१।७१) 'जगिदचाम्' (७।१।७०) इत्यतः सर्वनामस्थाने इति, 'इदितो नुम्' (७।१।५८) इत्यतो नुमिति चानुवर्त्तते।

क्विनप्रत्यय (८।२।६२)। प्रत्ययग्रहणसामर्थ्यादतद्गुणसंविज्ञानो बहुव्रीहिः। न च तदभावे वस्य कुत्वापत्तिः, तथा सति 'क्विनो घः' इत्येव वदेत्, 'नशेर्वा' (८।२।६३) इत्यत्र घानुवृतावप्यदोषादिति बोद्धयम्।

चोः कुः (८।२।३०)। 'स्को;' (८।२।२६) इत्यतोऽन्ते इति, 'झलो झलि' (८।२।२६) इत्यतो झलीति चानुवर्त्तते, 'पदस्य' (८।१।१६) इति चाधिकारः। कुत्वस्यासिद्धत्वादिति। अतद्गुणबहुव्रीह्याश्रयणात्प्राप्तिः। सुयुगिति। 'सत्सूद्विष' (३।२।६१) इति क्विप्। 'धातुपाठेति। व्याख्यानादिति भावः। युगिति। 'क्विप् च' (३।२।७६) इति क्विप्। 'इहेति। 'सृजिदृशोः' (६।१।५८) इति सूत्रे 'रज्जुसृड्भ्याम्' इति भाष्यप्रयोगात्काम्यच्सूत्रे भाष्ये 'उपयट्काम्यति' इति प्रयोगात् 'क्विन् प्रत्ययस्य' (८।२।६२) इति कुत्वं नेत्यर्थः। परिमृडिति। 'धातोरुच्यमानं कार्यं तत्प्रत्यये' (प०भा० ८८) इति पभिषयाऽत्र सुब्निमित्तिका मृजेर्वृद्धिर्न। क्विब्निमित्तिका तु 'क्ङिति च' (१।१।५) इति निषेधान्न। परौ व्रजेः। 'क्विब्वचि' 'इत्युणादिपठितमिति मते ततः क्विब्दीर्घावनुवर्तते, व्याख्यानाच्च ताभ्यां पदान्त इत्यस्यासम्बन्धः, किन्तु षेणैवेत्याह-क्विबित्यादि।

विश्वस्य (६।३।१२८)। 'द्रलोपे' (६।३।१११) इत्यतो दीर्घ इत्यनुवर्तते। ननु षत्वादीनामसिद्धत्वेन राट्शब्दपरत्वाभावः, अत आह– पदान्तति। तेन 'विश्वराजौ' इत्यादौ

हलङ्याब्भ्य इत्यादावनयोरेव प्रश्लेष इति वक्ष्यमाणरित्यातु ह्रस्वेन बाधान्नेत्वमिति बोध्यं। [ध्यम् निर्जर शब्दे उक्तमिति। याडागमैत्वानां परत्वान्नुट्ष्योर्भा ष्यप्रामाण्येन पूर्वविप्रतिषेधेनेष्टत्वात्तेषु कृतेषु क्वचिदजादित्वाभावात्क्वचित् सन्निपातपरिभाषयाजरसोऽप्राप्ति रेव चतुर्षु प्रश्लेषफलं त्वतिखट्व शब्दे ह्रस्वनद्याप इत्यत्र प्रश्लेषस्य न फलं नापिमान मित्युक्तं तत्रेत्यर्थः। पदादयस्तु स्वतंत्रा एवनादेशा इति पद्दन्निति सूत्रस्थभाष्य स्वरसात् इति न तदर्थमपि ह्रस्व नद्याप इत्यत्र प्रश्लेष आवश्यक इतितदाशायः ननुङ्या ब्ग्रहणे आदेशो स्थानिवदित्युक्ते खद्वादिशब्दे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न, 'विश्वाराड्भ्याम्' इत्यत्र च भवति। 'आदित्यविश्ववसवः' (अ०को० १।१।१०) इत्यत्र तु न दीर्घः, 'नरे सञ्ज्ञायाम्' (६।३।१२६) इत्यतः सञ्ज्ञापदापकर्षणात्।

स्कोः सं (८।२।२९)। 'झलो लोपः' संयोगान्तलोपः' इति भाष्योक्तेरत्र झल इत्यस्यासम्बन्धः। तेन झलः परयोः स्कोर्लोप इति नार्थ इत्यन्यत्र प्रपञ्चितम्। झलीत्यनुवर्त्तमानं झलादिप्रत्ययपरम् 'झलो झलि' (८।२।२६) इत्यत्र 'उदःस्था' (८।४।६१) इत्यारम्भेण तदर्थकतयाऽर्थाधिकारात्। तेन 'पृथक्स्थाता' 'पयःस्थितिः' इत्यादौ न दोषः, सङीति वार्तिकाच्च। सनस्सकारमारभ्याऽऽमहिङो ङकारात्सङिति प्रत्याहारः। 'भूयास्ताम्' इत्यादौ 'व्यञ्जनपरस्य' इति न्यायेन लोपाभावेऽपि न क्षतिः।

केचित्त्वप्रत्यये संयोगादिलोपप्राप्तियोग्योदाहरणानामनभिधानमेवोचितम्। 'सङीति वक्तव्यं काष्ठशक्स्थाता' इति वार्तिकस्य प्रलाख्यानपरेणकाष्ठशगेवनस्तिकुतः काष्ठ स्थाता इति भाष्येण तथैव बोधनादित्याहुः।

प्रत्याख्यानमे कदेश्युक्तिः। सङीति वक्तव्यमेवेति परे।

'चोः कुः' (८।२।३०) इत्येतत् षत्वेनापवादत्वाद् बाद्ध्यते, क्विन्प्रत्यस्य' (८।२।६२) इत्यस्य तु क्विनविधानसामर्थ्यदिव न बाध इत्याहक्विन्नन्तत्वादिति। ऋत्विक्शब्दे। यज्ञसम्बन्धिपुरुषविशेष रूढ़ः।

त्यदादीनामित्यनुवृत्तेराह – त्यदादीनामिति। तेन 'आतपः' इत्यादौ न। तदोः किम्? यः। तोरिति तु नोक्तम् 'अनेषा' इत्यादौ नस्याप्यापत्तेः। न चु नुटो बहिरङ्गत्वेनासिद्धत्वं, बहिर्भूतसुनिमित्तकत्वेनास्यैव बहिरङ्गत्वात्। इदञ्च 'तस्मान्नुडचि' (६।३।७४) इति सूत्रे

सवर्ण दीर्घस्यापि स्थानिवत्व निषेधः स्यादत ताह। अदीर्घ इति। दीर्घ भिन्न इति खद्वा शब्दे सवर्ण दीर्घः। क्यजंत कुमारी शब्दे क्यजंत खष्टवाशब्दे चाकृत सार्वेति दीर्घ भिन्न इत्यर्थः। यडादि विधायक सूत्राणि तु डाबंते चरितार्थानीतिभावः। ननु लक्षण प्रतिपदोक्त परिभाषास्वीआरे याडाप इत्यादि सूत्रं व्यर्थं (सूत्रकरणमि व्यर्थः) स्यादित्यत आह। सूत्रं तु निशायै इति। तत्र हि हलंतादाविति भावः। ननु हलंताद्वाप् नास्त्येव ङ्याप्प्राति पदिकादिति सूत्रस्थभाष्य स्वरसादित्यत ताह। आदाविति। अदिना डाआबंत दामा शब्दस्य संग्रहः। अतएव। अंगस्य विशेष्यत्वादेव। नन्वति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भाष्ये ध्वनितम्। सौ किम्? तौ। अत्वसत्वे नेति। गणकार्यत्वादिति भावः।

ङे प्रथ (७।१।२८)। 'युष्मदस्मद्भ्यां ङसोऽश्' (७।१।२७) इत्यतो युष्मदस्मद्भ्यामिति वर्त्तते। ङे इति पृथक्पदम्। अत एव 'प्रथमयोरित्युच्यते। कयोः प्रथमयोः? विभक्त्योः। वचनयोस्तु न ग्रहणं 'शशो न' (७।१।२६) इति लिङ्गात्' इति भाष्यं सङ्गच्छते।

त्वाहौ (७।२।६४)। यद्यपि युष्मदस्त्वादेशः 'त्वमावेकवचने' (७।२।६७) इति सिद्धः, तथापि युष्मानतिक्रान्तोऽतित्वमित्यर्थमत्र विधानम्। न चैवं तत्रास्य चारितार्थ्यात्केवले परत्वात्त्वमाभ्यां भाव्यमिति वाच्यम्,

'त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः।'

इत्यस्य वक्ष्यमाणत्वात्। 'युष्मदस्मदोरनादेशे' (७।२।८६) इत्यतो युष्मदस्मदोरिति वर्त्तते।

शेषे (८।२।९२)। आत्वयत्वयोः प्रागुक्तत्वेन तद्विषयातिरिक्तविभक्तिरिह शेषशब्दार्थस्तदाह – आत्वयत्वेत्यादि।

स्पष्टञ्चेदं 'युष्दस्मद्भ्यां ङसः' (७।१।२७) इत्यत्र, प्रकृतसूत्रे च भाष्ये। अत एव 'साम आकम्' (७।१।३३) इति ससुट्कनिर्देशः सङ्गच्छते। एवञ्च शेषग्रहणं स्पष्टार्थं, विशेषविहिताभ्यामात्वयत्वाभ्यां स्वविषये बाधसम्भवात्। अन्त्यस्येति। अलोऽन्त्यपरिभाषयेति भावः। त्वाहादयोऽकारान्ता इतिवृत्त्याद्यनुसारेणाह अतो गुण इति। 'त्यदादीनामः' (७।२।१०२) इतिसूत्रभाष्यकैयटाभ्यां हलन्ता एवादेशा इति लभ्यते, तदा

खट्प्वायेत्यत्र उपायाकथनेनां गस्य विशेषणत्वमेवास्तु तत्र न किंचिद्बाधकमत् आह। किंचेति। ननु श्रविष्ठा शब्दाज्जातार्थेऽणि तास्यलुकि श्रविष्ठा शब्दावयवस्य लुक्तद्धितेति टापोलुकि फल्गुनी शब्दादणोलुकि लुक्तद्धितेति फल्न्यवयनस्यङी पोलुकि श्रविष्ठ फल्गुन्यो र्हलङ्यादि लो पादिवारणाय वार्तिक स्यतत्प्रत्याख्यानाया कारादि प्रश्लेष स्यचावश्य कत्वेन वैयर्था भावोऽत आहा किञ्चेति। ननु ह्वावा आश्चेति ज्ञापका दरकार ग्रहणे लक्षण प्रति पदोक्त परिभाषाया अप्रवृत्तिः। अत एव कृतात्वेभ्य आतोऽनुपसर्गेक इतिक आतोलोप इति वेति लोप स्तेषां क्विबंतानामातो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पररूपस्य प्राप्तिरेव न। यद्यप्युच्चारणार्थानामपीत्संज्ञालोपाभ्यां निवृत्तिः कार्या, तथापि 'अतो गुणे' (६।१।६७) इत्यस्याप्रवर्त्तनेन प्रक्रियालाघवमत्र पक्षे। इत्संज्ञालोपयोस्तु सूत्र एव प्रवृत्तिरिति न प्रयोगसाधुत्वज्ञाने गौरवम्। 'त्वाहौ सौ' (७।२।९४) इति गुरुनिर्देशस्तु 'श्वेतवहोक्थशस्' इतिवन्नार्थसाधकः। णिजन्तात्क्विपि युष्म् अष्म् इति प्रातिपदिकयोरादेशा एव नेति तदाशयः। 'मपर्यन्तस्य' इति भाष्यसम्मतश्चायमर्थ इत्यनुपदं स्फुटीभविष्यति। अन्तरङ्गत्वादिति। परनिमित्तानपेक्षत्वेन तत्वमिति भावः।

अलिङ्गे इति। एवञ्च स्त्रियामनयोरवृत्तेर्न टाबिति भावः। इदं 'साम आकम्' (७।१।३३) इत्यत्र भाष्ये स्पष्टम्। यद्वति। इदं 'त्यदादीनामः' (७।२।१०२) इति सूत्रे भाष्ये स्पष्टम्, 'साम आकम्' (७।१।३३) इत्यत्र च। मपर्यन्ताच्छेषस्येति। इदमुपलक्षणम्। तेन 'त्वम्' इत्यादौ लोपप्रवृत्तिवेलायां मपर्यन्ताच्छेषत्वाभावेऽपि न क्षतिः। ननु अदन्तत्वे आदेशानां 'वार्णादाङ्गम्' (प०भा० ५५) इति परिभाषया पररूपात्पूर्वमेव टिलोपे टाबभाव उपपादयितुमशक्यः। अकारस्य कार्यद्वयेऽपि स्थानित्वेन समानस्थानिकत्वमस्तीति चेत? न, हलन्ता एवादेशा इति कैयटेनात्रैवोक्तत्वेनादोषात्। शेष इत्यस्य सामर्थ्यात्तन्न्यायाप्रवृत्तिरत्रेत्यन्ये। तन्न, 'युष्मभ्यम्' 'युष्मत्' युष्माकम्' इत्यादौ टाब्निवृत्त्या चारितार्थ्यात्। तस्मादनित्यत्वात्तदप्रवृत्तिरित्येके। तदाह-अतो गुणे कृते इति।

अत्र वदन्ति – तत्तद्भाष्य प्रामाण्याच्छेषग्रहणससुट्कनिर्देशाभ्याञ्चास्य सूत्रस्याऽऽवृत्त्यार्थद्वये तात्पर्यम्। तच्च लक्ष्यानुरोधाद् व्यवस्थितम्। तेन भ्यमि टिलोपे युष्मभ्यमिति न। अत एव 'भ्यसो भ्यम्' (७।१।३०) इति सूत्रे 'यदि भ्यमादेशः, शेषेलोपोन्त्यलोप इति एत्वं प्राप्नोति। अथाभ्यमादेशः, शेषेलोपष्टिलोप

धातो रिति लोपश्च सिद्ध्यति। एवं चाति खद्वायेत्यत्र याट् दुर्वार इत्यत ताह। किंचेति। परंपरया कार्यमादायस्थानिवत्वाप्रवृत्ताविति। अतिखद्वायेत्यर्थः। माना भावादिति। मानस्य वार्तिकस्यारंभतत्प्रत्यख्यानयोः फलाभावा द्भेदादित्यर्थः। एतेन जगावित्यादौ परंपरया कार्यमादाय स्थानिवत्वा प्रवृत्तौ पदत्वं न स्यादित्यपास्तं। अत्रारंभ प्रत्याख्यानयोः फलभेदा [त् तथा कल्पनेति तत्र तथा कल्पने मानाभावात्। अंगस्य विशेष्यत्वे प्रमाणमाह याडाप इति सूत्रे भाष्येपीति। सुधीभि र्विचार्यमिति। उपलक्षतणत्वे स्थानिवत्सूत्र एव याडाप इत्येतद्विषये शंकासमाधा नाम्यां सिद्धौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यन्तस्योदात्तनिवृत्तिस्वरः प्राप्नोतीति, यथेच्छसि तथाऽस्तु' इत्येवोक्तं, न तु भ्यमादेशे टिलोपमादाय फलभेद उक्तः।

वस्तुतस्तु टिलोपो व्यर्थः। अत एव 'लिङ्गाभावाट्टिलोपवचनानर्थक्यम्' इति 'साम आकम्' (७।१।३३) इत्यत्र भाष्ये उक्तम्। अत्र लिङ्गाभावादित्युपलक्षणम्। 'शिशीलुङ्नुम्विधिभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन' इति 'नेतराच्छन्दसि' (७।१।२६) इतिसूत्रस्थभाष्यवार्त्तिकबलेन लिङ्गवत्त्वेऽपि सन्निपातपरिभाषया टाबभावस्योपपादयितुं शक्यत्वम्। अत एव सन्निपातपरिभाषया 'बुद्धौ' इत्यत्र टाबभावः कृन्मेजन्तसूत्रे भाष्ये उक्तः। शेषग्रहणं तु भाष्ये प्रत्याख्यातमेव। 'त्यदादीनामः' (७।२।१०२) इति सूत्रस्थं 'टिलोपष्टाबभावार्थः' इति तु वार्त्तिकैकदेशिवचमिति न दोषः। एतच्च भाष्यप्रदीपोद्द्योते निरूपितम्। अभ्यम् सूत्रे 'यथेच्छसि, तथाऽस्तु' इति प्रौढोक्त्या भ्यमितिच्छेदस्य प्रौढवादत्वं भगवतैव सूचितं 'त्वं यथेच्छसि, तथाऽस्तु, तत्र दोषोद्धारो मया सुकरः' इति तत्तात्पर्यात्। अभ्यमित्येव तु च्छेदो न्याय्यः। अत एव 'युष्मदस्मदोरनादेशे' (७।२।८६) इति सूत्रे 'न चाऽऽदेशो हलादिरस्ति' इति भाष्योक्तिः सङ्गच्छते इति। परमत्वामिति। आङ्गत्वात्तदन्तविधिरिति भावः। गौणेऽप्रवृत्तौ बीजाभावादाह-अतित्वमिति।

युवावौ (७।२।९२) द्विवचनशब्दोऽत्र यौगिको, व्याख्यानात्। द्वयोर्वचनं बोधनं, तत्र समर्थयोर्युष्मदस्मदोरित्यर्थो भाष्यप्रामाण्याच्चतद् गृह्यमाणयुष्मदस्मदोरेव विशेषणं, न तदन्तस्य। अङ्गाधिकाराद्धि तदन्तग्रहणम्; इत्याशयेनाह–द्वयोरुक्ताविति। एतत्फलं गौणोदाहरणेषु मूल एव स्फुटम्।

मपर्यन्तस्य किमिति। अधिकारसूत्रं किमर्थमित्यर्थः।

पुनयोडाप इति सूत्रे शंका समाधानकरणेनेतर सूत्र विषयोदाहरणानाभिधानमेव युक्तमितिभावः। फणादिरेवेति। ननु भ्राशतेरेव शांतत्वेनषत्वे विभ्राडितिरूपसिद्धौभ्राजृ ग्रहण व्यर्थ मितिचेन्न। भ्राजतेः क्विपिसुपि परम शब्देन समासे ततोणिचि टिलोपेऽवशिष्टस्यषत्वार्थं तत्सत्वादित्याहुः। अत्रमते केचिन्मते भाष्यानुग्रहः। 'भाष्यसंमतिः ''विचार्यः। ज्ञेय इत्यर्थः। एकाच इति सूत्रे धातुपद संबंध प्रदर्शनेन मध्येऽसंबंधे मानाभा वादिति भावः। ननु एक देशस्य स्वरित तत्वे क्लेशोऽत आह। यद्वेति। श्रियैब्राह्मण्यै इति। श्रीशब्दादिवार्थेकन् तस्य लुम्मनुष्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ननु समुदायाऽऽदेशत्वेपि 'ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच, अन्यत्र तु सुबन्तस्य टेः प्राक्' इति व्यवस्थाया युष्मदस्मद्विषये 'त्वयका' इत्यादिसिद्धये वक्ष्यमाणत्वादन्तरङ्गत्वाद् 'युवाम्' इत्येतत्सिद्ध्युत्तरमकजिति 'युवकाम्' इत्यत्र न दोषः, अत आह–त्व्येति। नन्वत्रापि 'अच्ये' इति न्यासेनैकारादेशेऽयादेशे च सिद्धेराह-युवकाभ्यामिति। हलन्ता आदेशा इति पक्षे तु 'त्वया' इत्यादेरसिद्धिरेव, मादेशस्य सवदिशत्वञ्च न स्यादिति बोद्धयम्।

नन्वेवमपि मान्तस्येत्येवोच्यतां, किं परिग्रहणेनेति चेत्? न, युष्मयत्यादेः क्विपि सुप्यादेशभावार्थं तत्सत्वात्। पर्यन्तशब्देन मान्तापेक्षयाशेषस्य लाभात्। 'कटिपर्यन्तं वासः' इत्युक्ते 'अग्रे किञ्चिदस्ति' इति नियमेन प्रतीतेः। एवञ्च मान्ताद्यत्राग्रे किञ्चिदवशिष्टं तत्रैव युष्मदस्मदोरादेशाः। अत एव भाष्ये अवधिद्योतनार्थं परिग्रहणं कर्त्तव्यम्। सान्तस्येत्युच्यमाने यत्रैव मान्ते युष्मदस्मदी तत्रैवादेशाः स्युः। क्व च मान्ते? युष्मयते रस्मयतेश्चाप्रत्यये' इत्युक्तम्। अवधिद्योतनार्थमित्यस्यान्तशब्दस्यावधिवाचकताद्योतनार्थमित्यर्थः, परयन्तशब्दस्य लोके तथैव प्रयोगात्, अग्रे किञ्चित्सत्वे देशकालयोरवधित्वव्यवहारस्य लोके दर्शनाच्च। तत्रैवेत्यस्य-'अनिष्टे एव' इत्यर्थः। परिग्रहणाभावे तु 'यतः पूर्वोऽस्ति, परश्च नास्ति सोऽन्त्यः' इतिभाष्योक्तेर्मान्तपदस्य मुख्यार्थत्वलाभायात्रैव स्यात्। क्वौ लुप्तमित्यस्य प्रवृत्तिश्च स्यात्। 'अभिव्यक्तपदार्था;' इति न्यायश्च पदकार्यविषय इति तदाशयः। अत एव भाष्ये प्रयोगदर्शनं न कृतम्।

यत्तु – परिग्रहणाभावे मान्ते यत्र ते तत्रैव स्यात् सामानाधिकरण्येनान्वयस्यौचित्यात्। सति तु तस्मिन् सामर्थ्याद्युष्मदस्मदोर्यौ मपर्यन्ताविति व्याख्यानाद् दान्ते, व्यपदेशिवद्भावेन

इतिलुप् यद्वा क्यजंतात् क्विप्० एवं श्रिये व्राह्म पायेत्यत्र क्यजतात् क्विषिति बोध्यं। तदाक्षिप्तस्येति। [ध्यम् इयङ द्याक्षिप्तस्यांगस्येत्यर्थः न्यायसिद्धेऽर्थेलिंगमाहाय स्यांगस्येति। नन्वंगस्येत्यस्येयङादि विशेषण त्वेपि स्त्र्याख्यावित्यस्यांगविशेषणत्वं स्यादेवेत्यत आह। स्त्र्याख्यावित्यस्येति। ननूभयाति देशे गौरवं स्यादत आह। यद्वेति। नन्वेतावतापि नित्य स्त्रीत्वाभाद्विकल्प्रो न स्यादत आह। अन्नसूत्र इति। यूक्तिमिति। पूर्व वाक्ये इयङुवङ् स्थानावित्यनेनैकाकारो कारयोरेव संभवादंत्ये ह्रस्वाकारस्य स्त्रियामवर्तनात्प्रश्नः। एतत्सर्वमिति। स्त्र्याख्यवित्यंगस्या

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

युष्मयत्यादेः क्विपि च सिद्ध्यति। 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' (प०भा० ३२) इति तु प्रत्ययविधिविषयमिति; तन्न, परिग्रहणस्य वैयधिकरण्येनान्वये मणिमन्त्रादिन्यायेन नियामकत्वकल्पनापेक्षयोक्तस्यैव न्याय्यत्वात्। तत्र हि सामानाधिकरण्यासम्भवाद्वैयधिकरण्यान्वय इत्यन्यत्। किञ्चात्र व्याख्याने 'अवधिद्योतनार्थम्' इति भाष्याक्षरास्वारस्यम्। 'मपर्यन्तस्य' (७।२।९१) इति च तद्गुणसंविज्ञानो बहुव्रीहिरिति दिक्।

अङ्गकार्ये इति। अङ्गाधिकारस्थे इत्यर्थः। मकारान्तरमिति। 'शसो न' (७।१।२९) इत्यनेन संहितया पाठे इति शेषः। परे तु शेषविभक्ति भूताऽमादि-युष्मदादिसन्निपातेन जातस्य लोपस्य तद्विघातकश्यादि निमित्त्वं नेति सन्निपातपरिभाषायैव श्याद्यभावः। सुटस्त्वाकमवयवत्वान्न तेन सन्निपातविधात् इति सकारनिर्देशः 'साम आकम्' (७।१।३३) इत्यत्र। एत एव कृन्मेजन्तसूत्रे 'ह्रस्वत्वं तुग्विधेर्ग्रामणि कुलम्' इतिसन्निपातपरिभाषाप्रयोजनव्याख्यावसरे 'यदा ह्रस्वमात्रस्य तुगागमो, न तदन्तस्य तदेदं प्रयोजनम्' इति व्याख्यातं कैयटेन। मूलोक्तं तु न युक्तं, भाष्यानुक्तेः। अत एव 'नेतराच्छन्दसि' (७।१।२६) इति सूत्रे 'नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन' इति वार्त्तिकं व्याख्याय 'तेषु कृतेषु पुनः प्रसङ्गात् शिशीलुग्विधयः कस्मान्न भवन्ति? सकृद्गतिन्यायात्' इत्युक्तम्। त्वद्रीया पुनः प्रसङ्गस्यैवाभावेन तदसङ्गतिः स्पष्टैव। अत एव च तत्र युष्मदादेर्विभक्त्यादेशस्य 'यूयं ब्राह्मणाः' इत्याद्यवकाशप्रदर्शनं कृतम्। अन्यथा तत्रापि जसःशीप्राप्त्या तदसङ्गतिः। 'यूयम्' इत्यादिप्रयोगकरणेन तत्र श्यादिशङ्कासमाधानाकरणेन च भाष्यकृताऽत्र सन्निपातपरिभाषाविषयत्वं सूचितम्।

भीत्यनेनाक्षिप्तस्यविशेषणंतच्च स्त्री वाचकावित्येतन्मा भार्थक मित्यर्थः। नन्वोदित्यस्याऽनदीसंज्ञकेष्वेव प्रवृत्तौन मान मेवं चेदुब्भ्र्याभौदित्य नमोः पर्याय एव स्यादिलत आह। नदी ग्रहणानुवृत्तेश्चेति०ङ्यापोरत्रासंभवात्तदेकदेश नदीग्रहजानुवृत्तेरितिभावः परिभाषाया अनित्यत्वादिति। वर्णाश्रयः प्रत्ययोवर्णविचालस्यनिमित्तं स्यादित्यनितेषुपरिगणित त्वदिति भावः। तत्र प्रत्ययवत्वस्यति देशिक स्यापि ग्रहणं स्त्रियमिति निर्देशादितिबोध्यं, ननु त्रिमार्य इत्यत्र सत्यपि तिस्रादेशे बहुब्रीहि समासे पुंवद भावेन तन्निवृत्ति सिद्धे र्विभक्ता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्गवृत्तपरिभाषया वारणमपि चिन्त्यं तस्याअङ्गसम्बन्धि कार्यविषयत्वात्। सूत्रभाष्यस्वरसोऽप्येवमेव। वस्तुतो नैषा लक्ष्यसंस्कारिका, 'द्वयोः' इत्यादिनिर्देशासङ्गतेः। अत एव भाष्ये 'किमेतस्या ज्ञापने प्रयोजनम्' इति प्रश्ने 'पिबेर्गुणप्रतिषेधो न वक्तव्यः' इत्येव प्रयोजनमुक्तं, न तु प्रयोगासिद्धिः प्रयोजनमुक्तमित्याहुः।

त्वमाविति। अत्रापि विभक्ताविति सम्बद्ध्यते। अन्यथा 'प्रत्ययोत्तरपदयोश्च' इति व्यर्थं स्यात्। तत्फलन्तु त्वं सुन्दरः पुत्रो यस्य युष्मत्सुन्दरपुत्र इति त्रिपदबहुव्रीहौ नादेश इति। अत्रैकवचनशब्दो यौगिको व्याख्यानात्। तदाह-एकस्येति।

अविभक्तिकमिति। व्याख्यानात्।

योऽचि (७।२।८९)। अनादेश इति किम्? त्वद्, मद्। 'पञ्चम्या अत्' (७।१।३१) इत्यदादेशः। आत्वविधायके च भ्यम् व्यावर्त्यः। वस्तुत उत्तरार्थमेव तत्। 'अभ्यम्' इत्येव च्छेदादिति भाष्ये स्पष्टम्।

हलादाविति। परिशेषलब्धम्। हलीत्यनुवृत्तौ तु 'योऽचि' (७।२।८९) इत्यज्ग्रहणं माऽस्तु

भ्यसोभ्य (७।१।३०)। अत्र यद्वक्तव्यं तदुक्तम्। पक्षद्वयेऽपीति। तत्रान्त्यलोपे द्वयोरकारयोः पररूपे 'एकादेश उदात्तेन' (८।२।५) इत्यभ्यम् आद्याकार उदात्तः। टिलोपेऽपि यत्रानुदात्ते वर्णे परे उदात्तो लुप्यते स वर्ण उदात्त इत्यर्थकेन 'अनुदात्तस्य च यत्र' (६।२।१६१) इत्यनेन स उदात्त एवेति न विशेष इति भावः।

नन्वाकमः पूर्वं लोपाभावेनादन्तत्वाभावात्सुडागमाप्रसक्तेः ससुट्कनिर्देशो व्यर्थः,

---

वित्यनुवृत्तेर्नफल मत आह। तृतीयायांतेन समास इति। तिसृचतसृ इत्यास्येति, तस्य पूर्व सूत्रे विधेयत्वेपि ऋत इत्येतत्सामर्थ्यादमानुत्योछेश्यातिप संभवतीति भावस्तदेव ध्वनयन्नाह। अन्यथेति। आभित्यादिति अदिना नामः संग्रहः। त्रयादेशिति। आदिना नामीति संग्रहः एवमेवतुल्य युक्तया नुरोपि तिस्त्रादेशत् पूर्वमेव प्रवृत्तिर्बोध्या०न च त्रयादेशे नुटोबाधः शंक्यः ''निजा त्रयाणामिति निर्देसेनाऽबाधकत्वकल्पनात्। तदसंगतिरिति। तिस्त्रादेशोत्तरं लक्ष्ये लक्षणस्येतिपुनदीर्घाऽप्रवृत्तौ नतिस्त्रीतिसूत्रे तिसृ ग्रहणं व्यर्थं स्यादित्यर्थः ननुतिस्त्रादेशस्य पेक्षत्वेन वहिरंगत्वादुभयोः समत्वेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूत्रासङ्गतिश्चेत्यत् आह-भाविन इति। आकमि शेषे लोपे कृते प्राप्तस्येत्यर्थः। अयं भावः – सामः प्रसङ्गे आकमित्यनेन सुडामोरत्र विषयेऽत्यन्तमप्रयोगो बोद्धयते। स्थान्यादेशभावविषये सर्वत्रैवमेव। यथार्द्धधातुकविषयेऽस्तेरप्रयोगो, भूप्रयोगश्च 'अस्तेर्भूः' (२।४।५२) इत्यनेन प्रतिपाद्यते, न तु सतो निवृत्तिः शब्दानित्यत्वप्रसङ्गात्। किन्तु प्रसक्तबुद्धेरेव निवृत्तिः। सकारबुद्धिप्रसक्तेश्च प्रकृते साम्प्रतिक्या असम्भवाद्भाविन्या ग्रहणं, सकारोच्चारणसामर्थ्यादिति प्रथमप्रवृत्त्यैव सुटो निवृत्तिर्न तु प्रवृत्त्यन्तरकल्पनयेति भाष्ये स्पष्टम्। तन्निवृत्तिश्चाऽऽमोऽभावात्। अत्र सामः स्थानित्वोक्त्या स्थानिवत्त्वेन सान्त्वमेव, न त्वाम्त्वम्। उक्तरीत्या च न स्थानिवद्भावप्रसक्तिः सैवाप्रसक्तिः ससुट्कनिर्देशेन बोद्धयते इति बोद्धयम्। अत एव 'अतित्वाकम्' इत्यादौ 'प्रत्ययोत्तरपदयोः' (७।२।९८) इति भाष्योदाहृते आकम्नुडभावौ सिद्धौ। आम्येन्व साम्त्वस्याहार्यारोपेणाऽऽदेशः। आदेशस्याम्त्वाभावाच्चात्र न नुट्। न च यत्र साम् भावी तत्रैवायम्, सामोभावित्वस्य सर्वथा दुरुपपादत्वात्, सान्त्वस्याशास्त्रीयत्वेनातिदेशालभ्यत्वादिति भाष्यविरुद्धकल्पना व्यर्थेति दिक्। ह्रस्वादिरकम् तु न कृतः, अन्त्यलोपेऽप्यकारस्यैत्वनिवृत्त्या चारितार्थ्येन पररूपापत्तौ युष्माकमित्यसिद्ध्यापत्तेः।

द्विवचनैकवचनशब्दयोरर्थपरतया व्याख्याने फलं दर्शयति– द्व्येकत्वेति। द्वित्वैकत्व विशिष्टावाचिनी इत्यर्थः। समासार्थो-मुख्यविशेष्यम्। अन्यसङ्ख्यः- युष्मदाद्यर्थगतसङ्ख्येतरसङ्ख्या युक्तश्चेदित्यर्थः। स्त इति। अर्थपरत्वाश्रयणादिति भावः। एते इति कर्तृपदम्,युवावाविति कर्मपदम्, एवं त्वमावित्यपि। पूर्वविप्रतिषेधत इति। विप्रतिषेधे पूर्व इति, सुप्सुपेति समासः। अत एव 'प्रत्योत्तरपदयोश्च' (७।२।९८) इतिसूत्रभाष्ये 'त्वमौ'

परत्वात्तिस्त्रादेशेनतिस्त्रित्यस्य सार्थक्येन संज्ञार्थकृत बहिरंग त्वानाश्रयणे मानाभावेनाति स्त्रिण इत्यत्र विभक्ति विशेषापेक्ष नुपेक्षयाप्रत्यसामान्यपेक्षस्येयङोऽन्तरंगत्वं दुर्वारमत आह। विशेषापेक्ष स्य बहिरंगत्वमेवनेति चेति। एवं चैतन्निषेध सामर्थ्या त्परिभाषायामंग शब्देन शब्द रूपमेव निमित्तं गृह्यत इति भावः। तत्रेति। त्रेस्त्रय इत्यत्रेत्यर्थः ङेरामिति। प्रियत्र्यामित्यत्रेत्यर्थः। अंतरंगे कर्तव्येबहिरंगस्यतिस्त्रद्यादेशस्यासिद्धत्वेनांतरंग बहिरंग भावनाक्रांते विषये एव कपः प्रवृत्यांऽतरंगबहिरंगत्वानाक्रान्त विषयश्चालौकिक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(७।२।६७) इतिसूत्रे 'शेषे' इत्यनुवर्त्य सुजसुडेङस्व्यतिरिक्तविभक्तावेताविति व्याख्यातम्। त्वमौ न चेति। अर्थपरत्वाश्रयणादेवेति भावः।य इति विग्रहे इति। एवं विग्रहे यादृगरूपाणि तानि वक्ष्यन्ते इति शेषः। अतित्वाकमिति। अत्र यथाऽऽकमनुङ्भावौ, तथा उक्तम्।

पदस्य (८।१।१६)। 'अपदान्तस्य मूर्धन्यः (८।३।५५) इत्यतः प्रागयमधिकारः। तत्फलन्तु 'राजानौ' इत्यादौ नलोपाभावः। इयं क्वचित्स्थानषष्ठी, कचिदवयवषष्ठी। 'हो ढः' (८।२।३१) इत्यादावाद्या, 'मादुपधाया' (८।२।६) इत्यादावन्त्या। तेन 'वृक्षवन्तौ' इत्यादौ वत्वसिद्धिः। अन्यथा मत्वन्तपदाभावान्न स्यात्। अत एव 'नलोपः' (८।२।७) इति सूत्रेऽन्तग्रहणं चरितार्तमिति स्पष्टं भाष्ये। 'त्रः सङ्ख्यायाः' इत्यत्र नलोपाभावस्तु 'झलाञ्जश् झशि' (८।५।५३) इत्यत्र जश्त्वाभाववद् बोद्धयः।

पदात् (८।१।१७)। 'कुत्सने च सुपि' (८।१।६९) इत्यतः प्रागयमधिकारः। 'अनुदात्तं सर्वम्' (८।१।१८) इत्यादिपदत्रयमापादसमाप्तेः। सर्वग्रहणन्तु 'तिङ्ङतिङः' (८।१।२८) इत्यादौ सर्वानुदात्तत्वस्य विनिगमनाविरहाल्लाभेऽपि स्पष्टतया तल्लाभार्थमित्याकरे स्पष्टम्। 'आदेः परस्य' (१।१।५४) 'अलोऽन्त्यस्य' (१।१।५२) इत्यनयोस्तु न प्राप्तिः, पदस्येत्यस्य 'अनुदात्त' 'तिङ्' इत्यादिश्रुतप्रथमान्तानुरोधेन प्रथमया विपरिणामेन स्थानषष्ठ्यभावात्। तत्र पादशब्देन ऋक्पादः, श्लोकपादश्चाविशेषाद् गृह्यते। अपादादिशब्देन पादान्तपादमध्यस्थवद् छन्दोहीनवाक्यस्थस्यापि ग्रहणं, 'ग्रामे कम्बलो मे 'स्वम्' इति भाष्यात्।

षष्ठ्यादीति। सर्वस्य पदस्येत्युभयाधिकारसामर्थ्यादिदं लभ्यते इत्यन्यत्र विस्तरः तौ चानुदात्ताविति। अनुदात्तत्वगुणविशिष्टयोर्विधानादिति भावः।

वाक्ये ऋकारांत्तोत्तरपद एव संभवतीत्याह। अलौकिकेत्यारभ्याऽभावादित्यंतेन। नतिस्त्रिति ज्ञापकस्य सामान्यापेक्षत्वस्याऽसतिबाधक इति न्यायेन सिद्धत्वेपिलिंगमप्याह। प्रत्ययोत्तरे तिसूत्रे चेति इमौप्रियसृतिसृणी प्रियतिसृपीत्ये तावेत्ये तौ। ननुयुवोरित्यत्रपाठेपिङ्याप्सूत्रे भाष्येलिंगविशिष्ट परिभाषायाः दोषाः खल्वपिसाकल्येन परिगणिता इत्युक्तेस्तत्पाठस्याऽप्रामाणिकत्वमत आह। ङ्याप्सूत्र इति० उपसर्जने पुंसीति पुंस्युपसर्जनं योऽर्थ स्तत्र विद्यमानस्येत्यर्थः ननुप्रसज्यप्रतिषेधेनव्याख्याने त्वसंबद्धत्वमेव नेति ह्रस्व वाक्य प्राप्त स्याऽस्त्रीति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उक्तविधयोरिति। पदात्परयोरपादादौ स्थितयोरित्यर्थः। द्वितीयायां त्वामयोरपवादत्वादाह-षष्ठीचतुर्थ्येकेति।

विभक्तिक्रमलब्धद्वितीयादिक्रमेणोदाहरति-श्रीश इति। दत्तादित्यनेन चतुर्थ्यन्तत्वं स्फुटीकृतम्। संवेद्योऽस्मानिति। नन्वत्र सन्ध्यभाव नवाक्षरत्वेनानुष्टुप्पादत्वानापत्तिः। सन्धौ तु उभयत आश्रयणेऽन्तादिवत्त्वाभावेन कथमादेशप्राप्तिरिति चेत्? न, संवेद्यो इत्येकादेशविशिष्टस्य पूर्वान्तवत्त्वेन पदत्वात्, स्मानित्यस्य चैकदेशविकृतन्यायेन द्वितीयान्तास्मच्छब्दत्वेन तत्प्राप्तिरित्याशयात्। सन्धिश्चान्तरङ्गत्वादादेशात्पूर्वमेव। आदेशे सति 'नः कृष्णः सर्वदाऽवतु' इति पादादित्वापत्त्योपजीव्यविरोधान्नाऽऽदेश इत्यन्ये। उभयत आश्रयणेऽपि तस्य स्वीकार इति इण्धातौ निरुपयिष्याम इति परे।

ननूक्तरीत्या षष्ठ्याद्यन्तानामेवाऽऽदेशा भविष्यन्ति, किं स्थग्रहणेन? अत आह-स्थेति। अहानौ स्थशब्द इति भावः। युष्मत्पुत्र इति। युवयोर्युष्माकं वा पुत्र इत्यर्थः। यद्यपि वृत्तौ सङ्ख्याविशेषानवगम इति भाष्ये स्पष्टं तथापि सम्बोद्ध्यत्वेनैवानेकव्यक्त्यवगतिर्न तु द्वित्वादेर्भानं, नाप्येकत्वस्येति त्वमौ न कृतौ। विग्रहे तु संङ्ख्याविशेषभानात् द्विवचनादि भवत्येव। तस्य लुक्यपि प्रत्ययलक्षणेन द्विवचनाद्यन्तत्वम्। अत एव 'बध्वोरगारं बध्वगारम्' इति प्रगृह्यसञ्ज्ञासूत्रे भाष्ये प्रयुक्तम्। वचनद्वयविषयसूत्रप्रत्युदाहरणलाभाय 'इति त्वत्पुत्रः' इति न प्रत्युदाहृतम्।

समानवाक्ये इति। निमित्तनिमित्तिनोरेकवाक्यस्थत्वे इत्यर्थकं 'समानवाक्ये' इति प्रकृत्य विधेया इत्यर्थः। निघातो नामानुदात्तः। एकतिङिति बहुब्रीहिः, एकतिङन्तघटितमित्यर्थः। तेन 'पचति' इत्येतन्मात्रस्य न वाक्यत्वम्। इदं

निषेधः स्यादेवेत्यत आह। प्रसज्य प्रतिषेधस्त्विति। तत्रेति। पूर्ववाक्य इत्यर्थः सा चेति। अस्त्रीति पर्युदासलब्धमिति भावः। व्याख्यानदिति। नेयङुवङोरस्त्रीत्येवसिद्धेस्थानग्रहण सामर्थ्यरूपादित्यर्थः। अंगरूप ग्रहणादिति, अंगेयद्रूपमियङ्सूदि घटितं तस्य ग्रहणादित्यर्थस्तदाह। यस्यांगस्येति। आभीति छेद इति। नत्वमिति फलाभावादितिभावः। ऋकार साहचर्येणेति। बहिरंगस्य तिस्रादेशस्याऽसिद्ध त्वेनृकारस्य काष्विषये तादृशस्यैव संभवात् तत्साहच र्येणेत्यर्थः सुष्ठुध्यायतीति विग्रहेसुष्ठुधीर्यस्या इतिविग्रहे च सुधीशब्दस्य भाष्यमते कैयप्मतेच

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वशास्त्रकार्योपयोगि एकवाक्यत्वलक्षणम्। तेन 'पश्य मृगो धावति' इत्यादौ लौकिकैकवाक्यत्ववत्यपि नाव्याप्तिः। समर्थसूत्रे भाष्ये स्पष्टमेतत्। अत एव 'तिङ्ङतिङः' (८।१।२८) इत्यत्रैतदाश्रित्य अतिङ' इति प्रत्याख्यातं भाष्ये। लौकिकवाक्यत्वञ्च –

सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता (अ०को० १।६।२)

इत्यमरेणोक्तम्। बाशब्दश्चेदर्थे। कारकान्वितक्रिया चेद्, बोद्धयेति शेषः। तेन निरर्थकशब्दसमुदायव्यावृत्तिः। सुप् च तिङन्तञ्च सुप्तिङन्ते, सुब्विशिष्टं तिङन्तं, तेषामेकशेषः। तेन कारकान्वितक्रियाबोधकसुबन्तचयतिङन्तचय-सुप्तिकन्तचयानां त्रयाणामपि वाक्यत्वलाभः। तत्र सुबन्तचयोदेवदत्तेन शयितव्यम्। द्वितीयं-पचति भवतीत्यादि। तृतीयं चैत्रः पचतीत्यादि।

(एतत्समानार्थकमेव 'तिङ्ङतिङः' (८।१।२८) इति सूत्रे 'अतिङ' इति वदत्सूत्रकाराभिप्रेतं वाक्यलक्षणम् 'अख्यातं सविशेषणं वाक्यम्' इति समर्थसूत्र भाष्ये उक्तम्। तत्राऽख्यातपदेन क्रियाप्रधानं लक्ष्यते। तेन 'त्वया शयितव्यम्' इत्यादेः सङ्ग्रहः। सविशेषणमित्यस्य साक्षात् परम्परया वा यद्विशेषणं, तत्सहितेत्यर्थः। तेन 'नद्यास्तिष्ठति कूले' इत्यादौ नद्यादेः समानवाक्यस्थत्वसिद्धिः। सविशेषणत्वेन विभागे साकाङ्क्षत्वं लब्धम्। एतदेवैकोद्देश्यकैकविधेयकत्वरूपैकार्यत्वगर्भमेकवाक्यत्वलक्षणं बोध्यम्। 'अर्थैक्यादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' (जै०सू०) इति जैमिन्युक्तेः। अनेन च 'ब्रूहि ब्रूहि' इत्यस्यासङ्ग्रहो, विशेषणानुपादानेन सविशेषणत्वाभावात्। वाक्यत्वफलं त्वत्र प्रश्नोत्तरे 'अनन्यस्यापि प्रश्नाख्यानयोः' (८।२।१०५) इत्यनेन वाक्यस्य टेः प्लुतसिद्धिः। अतः स्वशास्त्रपरिभाषितं लक्षणम् 'एकतिङ् वाक्यम्' इत्युक्तम्। अत एव एतदुदाहणं 'ब्रूहि ब्रूहि'

श्रीवद् रूपस्यैवसत्वान्मतांतरेपुंविदिति मूलमसंगमत पूर्वोक्त यत्तुदीर्घवाक्य इति मतरीत्या व्याचष्टेपुंवदिनीत्या रम्य विकल्प इति बोध्यमित्यंतेन। ननूत्तरपदेत्यने नाक्षि प्तस्य समास इत्यस्य शाब्द बोधेऽन्वयाभावात् समासे इत्यर्थालाभोऽत आह। उत्तर प्रदेत्येनेनास्येति। अनुमानादिति। एकदेशानुमानादि का जुत्तर पदस्यैकाजुत्तरपदे समासे इत्यर्थेलक्षणेति भावः। प्रिय पंचानं द्रौपदी मिसादौडाब निषेधायाह। स्त्रियामिति। नतु टाप्ङीपोरनुवृत्येदंलब्ध मिति भावः। भाष्यस्वरसिति। तत्रहि सन्निपात परिभाषा प्रयोजनावसरेतिस्त्रस्ति छंतीत्युदाहृतम्।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्येव भाष्ये दत्तम्। यत्तु-अत्रोदाहरणं देवदत्तेति विशेषणं पूरणीयमिति; तन्न, पूर्वलक्षणैनैव सिद्धेः द्वि प्रयोगस्य भाष्ये व्यर्थत्वापत्तेश्च। यद्यपि पदद्वित्वेऽवान्तरपदत्वमप्यस्ति। तथापि 'एकातिङ् इत्यस्य एकानुपूर्वीकैकतिङन्तवदित्यर्थ इति न प्रकृते दोष इत्यलम्।

ओदनं पचेत्यादि। समर्थपरिभाषा त्वत्र न प्रवर्त्तते, एकार्थीभावविषये एव तत्प्रवृत्तेरिति भावः। एते वांनावादय इति। इदञ्च 'सपूर्वायाः' (८।१।२६) इत्यत्र इत्यत्र भाष्ये स्पष्टम्।

न च वा (८।१।२४) चादयः समुच्चयविकल्पाद्भुतखेदावधारणार्थाः तेषामन्यतमेन योगे इत्यर्थः ननु तृतीयानिर्देशेनैव सिद्धे युक्तग्रहणं व्यर्थमत आह-युक्तग्रहणादिति। साक्षादिति। युष्मदस्मदर्थगतसमुच्चयादिद्योतकत्वे इत्यर्थः परम्परेति। स्वार्थाश्रयान्वय्यन्वयित्वादिरूपेत्यर्थः।

चेतसेति। 'अनालोचनार्थैः' इत्येव पर्युदासेन सिद्धे 'पश्यार्थैः' इत्येतद् इन्द्रियजन्यसकलज्ञानसङ्ग्रहार्थमिति भावः। परम्परेति। स्वान्वितान्वयित्वादिरुपेत्यर्थः। तदुक्तं भाष्ये 'पश्यार्थैश्च प्रतिषेधः 'समानवाक्ये' इति प्रकृत्य वक्तव्यः। इतरथा हि यत्रेव पश्यार्थानां युष्मदस्मदी साधनं, तत्र प्रतिषेधः स्यात्, ग्रामस्त्वां सम्प्रेक्ष्यगत इति। इह न स्यात् ग्रामस्तव स्व सम्प्रेक्ष्य गतः' इति। समानवाक्ये इति करणेन समानवाक्ये पश्यार्थैर्युक्ते युक्तयुक्ते च युष्मदाद्यर्थे आदेशप्रतिषेध इति कैयटः। एवञ्च 'न चवा' (८।१।२४) इति सूत्रे युक्तग्रहणं सपष्टार्थमेव। तदभावेऽपि प्रकृतसूत्रस्येव तस्यापि साक्षात्सम्बन्दे एव प्रवृत्तिः स्यात्। समानवाक्ये इत्येतत्सम्बन्धातु अस्य युक्तयुक्तेऽपि प्रवृत्तिरित्यन्यत्। अत एव 'देवदत्तस्य पुत्राद् यज्ञदत्तः पृथक्' इत्यादौ देवदत्तशब्दान्न पञ्चमीत्याहुः। भक्तस्तवेति। 'इह तव' इतस्य रुपेण सम्बन्धो, न तु साक्षाद्ध्यायतिनेति भावः।

इत्यजंताः स्त्रीलिङ्गाः।।

दीर्घापत्तेरिति। कष्टायेतिनिर्देशात्सुपि चेतिदीर्घविषये सन्निपात परिभाषायाऽप्रवृत्तेरिति भावः। ननुनिर्देशस्यचतुर्थ्येकवचन एव सन्निपात परिभाषायाऽप्रवृत्योपपत्तेरौत्सर्गिक प्रत्येष्टसिद्धिरत आह। सन्निपातेति। संबुद्धिलोपनाना पत्तिरिति। गुणात्संबुद्धेरिति सिद्धे एङ् ह्रस्व ग्रहणंतु प्रत्यय निमित्तक प्रत्ययादेश एव सन्निपात परिभाषायाः संबुद्धि लोपे अप्रवृत्ति ज्ञापकं स्यादितिभावः। इत्यर्थिति। न तु यकारस्येत्यर्थः व्याख्यानादिति। सूर्यतिष्येति सूत्रे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सपूर्वा (८।१।२६)। सहशब्दो विद्यमानवाची। अवधेरपि सम्बन्धित्वेन विवक्षायां षष्ठ्यर्थेऽन्यपदार्थे 'अनेकम्' (२।२।२४) इति समासो, 'बोपसर्जनस्य' (६।३।८२) इति सः, तदाह– विद्यमानपूर्वादिति। प्रत्ययग्रहणे तदन्तग्रहणमित्याह प्रथमान्तादिति ननु एते वां नावादयः' का०वा० इत्यनेनैव विकल्पसिद्धेः किमेतेनेत्यत आह-अन्वादेशेऽपीति। अत्र नेति निवृत्तं, तदाह-आदेशा वेति। तेनेति। भक्तत्वेनेत्यर्थः। प्रकान्तार्थत्वान्न यच्छब्दोपादानापेक्षेति भावः। स्पष्टञ्चेदं सप्तमोल्लासे काव्यप्रकाशादौ। अत्र 'हरिस्त्वाम्' इत्येकमुदाहरणम्। 'स माम्' इत्यपरम्। त्रायते इत्यस्य च मध्यमणिन्यायेन तन्त्रेणोभयत्रान्वयः। तेन स इत्यस्यापि समानवाक्यस्थत्वेन विद्यमानपूर्वत्वं बोध्यम्।

साऽऽमन्त्रितम् (२।३।४८)। 'सम्बोधने च' (३।२।१२५) इत्यतः सम्बोधने इति वर्त्तते। 'सा' इत्यनेन प्रथमा परामृश्यते। आमन्त्रणमामन्त्रितमिति महासञ्ज्ञा बलात्तदन्तविधिरित्याह-तदन्तमिति। अत एव है हे भो इत्यादीनामपि संज्ञासिद्धिः। अन्यथा 'अन्तरङ्गानपि' (प०भा० ५२) इति न्यायेन पूर्वं विभक्तिलुकि प्रथमाया अभावेन 'नखनिर्भिन्नः' इत्यत्रैसभाववदत्र संज्ञा न स्यात्। यद्यप्येषां सम्बोधने शक्तेः प्रातिपदिकार्थसूत्रेणैव प्रथमा, तथापि सम्बोधनविषयप्रथमासत्त्वान्न दोष। एतदर्थमेव 'प्रथमा' इत्यनुवर्तमाने सेति पदम्।

अन्ये तु 'सम्बोधने च' (३।२।१२५) इत्यस्य तत्र वर्तमानादित्यर्थे अन्यत्रेवात्रापि 'सम्बोधने च' इत्येव प्रथमाप्रातिपदिकोक्तत्वस्याव्यावर्त्तकत्वेन विभक्त्यप्रतिबन्धकत्वात्, तिङ्कृत्तद्धितसमासैः' इति परिगणनाच्च। सेति विधेयसमर्पिकाया अनुवाद्यत्वाय स्पष्टार्थमित्याहुः।

पुनर्यग्रहणादरूपादित्यर्थः। व्याख्यानात् जस्साहचर्यात्। अतएव। श्रुतेर्बलवत्वादेव। कर्माणिधञिति भावेधञ्यर्था संगतेरितिभावः। नन्वेवमप्यंगस्येत्यस्य निमित्तनिमित्ति भावबोधक षष्ठयंतत्वादुत्तरादिभ्य इत्यस्यार्थ पर त्वाद् विरुद्धार्थकत्वेन विरुद्धविभ्ति त्वादिति भाष्यस्य नासंगतिरत आह। विधानसामर्थ्यानाश्रयणेनेति। परम कतरदित्यादि सिद्धयर्थं विहित विशेषणस्य त्वयाऽप्युक्तत्वेनऽतराद्यर्थ संबंधिनोः स्वमोरित्यर्थकरणादितिभावः। निर्जरशब्दे उक्तमिति। अजरांसीत्यत्रनुम् जरसोः प्राप्तयोः परत्वाज्जरसिति भाष्येण विभक्त्यादेशाजपेक्षपापूर्व विप्रतिषेधेन भवंतीति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अविद्यमानवदिति। 'गोतो णित्' (७।१।९८) इतिवत् सिद्धे वत्करणमतिदिश्यमानविरुद्धस्वाश्रयस्यापि लाभार्थम्। तेन 'आम्भो देवदत्त' इत्यादौ 'आम एकान्तरमामन्त्रिमनन्तिके' (८।१।५५) इति एकान्तरत्वप्रयुक्तामन्त्रितनिघातनिषेधसिद्धिरिति स्पष्टं भाष्ये। न चात्र 'नामन्त्रिते समानाधिकरणे' (८।१।७३) इत्यनेन निषेधादविद्यमानवत्त्वमेव नेतिवाच्यम्, अस्य सम्बोधनमात्रद्योतकत्वेन विशेष्यवचनत्वाभावात्, देवदत्तस्यैव विशेष्यत्वाच्च।

इहेति। 'अग्ने तव' देवास्मान्' इत्यत्रादेशाः, 'अग्ने नय' इत्यत्र तिङ्ङतिङः' (८।१।२८) इति निघातः, अग्ने इन्द्र' इत्यत्र 'आमन्त्रितस्य च' (६।१।१९८) इति निघात इति विवेकः। अत्र पूर्वमित्यनेन परस्याऽऽक्षेपात् पूर्वं परस्य कार्येऽविद्यमानवदित्यर्थः। तेन 'देवस्मान्' इत्यत्र देवेत्यस्याऽऽमन्त्रिताद्युदात्तत्वं भवत्येव। पूर्वं किम्? पाहि देव। अत्राऽऽमन्त्रितनिघातो भवत्येव।

प्राचीनमिति। एवमेव 'लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि' इत्यादिसिद्धिः। नृसिंहाश्रम ते ख्यातिः इत्यादौ 'गेये केन विनीतौ वाम्' इत्यादाविव विभक्त्यन्तप्रतिरूपकनिपाताङ्गीकारेणादोषः। अयं समाधिः प्रकृतेऽपि, 'नः' इत्यस्य विभक्तिप्रतिरूपकत्वात्। अन्यार्थन्तु मूलोक्तकल्पनावश्यकत्वम्, तदाह-एवमिति। सर्वेषां निघात् इति। अस्य प्राप्त इति शेषः। तत्र यमुने सरस्वतीत्यनोर्बाधकाभावाद्भवति। शुतुद्रीत्यस्य तु न, पादादिस्थत्वात्।

एतेन 'आदिभ्यः' 'सर्वेषाम्' इति बहुवचनमसङ्गतमित्यपास्तम्।

तत्रोक्त मितिभावः। अंगांशेप्रत्ययस्योत्थिताकां क्षतयाह। यद्वेति। न दोष इति। अत्र पक्षे न संबंधि सांत संयोगांतस्य सर्वनाम स्थानेपरेदीर्घ इति सूत्रार्थादंत्यवर्णांत्य सदेशवर्णयोरितराव्यवधान एवानंत्य विकार इति परिभाषा प्रवर्तत इति न संप्रसारण इत्यनेतिज्ञापितेऽर्थेइतरस्य ज्ञापक साजात्याहदल्त्वाना क्रांतस्यैव ग्रहणाच्चेति भावः। अभिमान इति। सिद्धांतेतु न लुमतेत्यस्यानित्यत्वादभ शसदिपरत्वमेवेति भावः। क्लीववदर्थ इति। सूत्रेनपुंसक इत्यर्श आद्यजन्तमितिभावः। न ह्रस्व इति। लक्ष्येलक्षमस्ये तिन्यायेन तुन निर्वाह।। नाग्निर्दग्धं दहतीति न्यायेन पूर्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्ने तेजस्विन्निति। अनुदात्तं सर्वमित्यनयोः सम्बन्धानर्हत्वेन निवृत्त्या तत्साहचर्येणापादादावित्यस्याप्यविद्यमानवत्सूत्रे निवृत्तिरिति भावः। आमन्त्रिते किम? देव करोषि। सामान्यवचनं किम्? 'अघ्न्ये देवि सरस्वति इडे काव्ये' इत्यादौ पर्यायेषु निषेधो मा भूत। सामानाधिकरण्यश्चैकार्थविशेष्यकबोधजनकत्वमेव, न तु प्रवृत्तिनिमित्तभेदगर्भमिति दिक्।

सुपादिति। शोभनौ पादावस्येति बहुब्रीहिः। 'संङ्ख्यासुपूर्वस्य' (५।४।१४०) इत्यकारलोपः समासान्तः।

अञ्चेः सुपीति। निपातनैः साहचर्यादिति भावः।

अनिदिताम्। (६।४।२४) इत्संज्ञेकार वद्भिन्नानामित्यर्थः। अङ्गस्येत्यधिकारः।

अञ्चतेर्भस्येति। अल्लोपोऽनः' (६।४।१३४) इतिवद् अस्यापि प्रत्यञ्चमञ्चति तेन 'प्रत्यक्चा' इत्यादौ पूर्वाकारे न प्रवृत्तिः। अच इत्यञ्चतेर्लुप्तनस्य ग्रहणम् व्याख्यानात्। भस्य किम्? प्रत्यञ्चौ। लुप्तनस्येति किम्। पूजायां प्रत्यञ्चा।

चौ (६।३।१३८)। नेदं वर्गग्रहणं व्याख्यानात्, तदाह–लुप्तेत्यादि। अण इति। 'कर्त्तृचः' इत्यादीनामनभिधानमिति भावः। एवञ्चाणग्रहणमुत्तरत्र 'सम्प्रसारणस्य' (६।३।१३९) इत्यत्र 'तृतीयः' इत्येतद्व्यावृत्त्यर्थमावश्यकमिहापि सम्बद्ध्यते, न त्वत्रास्य व्यावर्त्यमस्ति इत्याकरे स्पष्टम्।

अकृतेति। तत्परिभाषाऽभावे तु 'चौ प्रत्यङ्गस्य प्रतिषेधो वक्तव्यः' इति वचनमेव भाष्योक्तं शरणम्।

ह्रस्वाप्रवृत्तेरिति भावः तस्याः प्राधान्यमिति। शक्तेः प्रधानान्य मित्यर्थः तस्य क्रियाकारकभावस्य प्रद्यु शब्देऽतिप्रसंग वारणायाह। समानानुपूर्वोक इति। शब्द प्रवृत्ति निमित्तपादाय पीलुशब्देऽति प्रसंगवारमायाह। समानार्थश्चेति। क्लीवत्व रूपार्थवृत्तेरिति। तदाकृशार्थक शब्दस्येत्यर्थः। तत्प्रयुक्तेति, नपुंसकत्व प्रयुक्तेत्यर्थः। सर्वकार्याप्रवृत्तेरिति। नेतिवक्तव्येपुंबद्वचन सामर्थ्यादि नंतरस्येति न्यायाप्रवृत्यानुम् ह्रस्वयोरुमयोर प्रवृत्तेरिति भावः। ननु हंतेरंतोदात्तत्वाभावेद्विधाऽदेशस्यांतोदात्तोच्चारम संगतमत आह। अनुदात्तेवेति।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विष्वग्दे (६।३।९२)। चात् 'आ सर्वनाम्न;' (६।३।९१) इत्यतः सर्वनाम्नः इत्याकृष्यते। सामर्थ्यादुपसर्जने प्रवृत्तिः। अप्रत्यये इति पाठेऽविद्यमानः प्रत्ययः, क्विबादिरित्यर्थः। वप्रत्यये इति पाठेऽप्यकारस्याविवक्षितत्वात् स एवार्थः। अद्र्यादेशसध्र्यादेशावन्तोदात्तौ निपातनादिति स्पष्टम् भाष्ये।

अदसो (१।१।१२)। 'असेः' इतीकार उच्चारणार्थः। अदस इत्यवयवषष्ठी। सग्रहणं तत्स्थानिकौकाररेफयोरप्युपलक्षणम्। तेन 'अदस्यति' अदोऽत्र' 'अदः' इत्यादौ न दोषः। दादिति किम्? अमुयोरित्यत्रान्तस्य मा भूदिति। समाहारद्वन्द्व इति। इदमर्वाचामनुरोधेन। वस्तुतोऽयुक्तमेतत्। उ स् ऊ स् इति द्वन्द्वे सुलोपे ध्यन्तत्वाद्ध्रस्वस्य पूर्वनिपाते नपुंसकह्रस्वसर्णदीर्घयोः प्राप्तयोर्दीर्घस्य शब्दान्तरप्राप्त्याऽनित्यत्वेन नित्यत्वाद्, अपरनिमित्तकत्वेनान्तरङ्गत्वाच्च ह्रस्वत्वे ततः सवर्णदीर्घे उ इतिरूपासिद्धेः। अत एव 'ऊकालः' (१।२।२७) इत्यत्र उकाल इति न कृतम्। तस्मात् 'दिव उत्' (६।१।१३१) 'ऋत उत्' (६।१।१११) इति च तपरत्वेन भाव्यमानोकारस्य सवर्णग्राहकत्वात्सिद्धमिति बोद्धयम्।

'ष्यङः सम्प्रसारणम्' (६।१।१३) इति सूत्रे भाष्ये 'अनन्त्यविकारेऽन्त्यसदेशस्य' (प०भ० ६५) इति परिभाषा पठिता। अन्त्यसदेशानन्त्यसदेशयोरेकप्रयोगे युगपत् प्राप्तावन्त्यसदेशस्यैवेति तदर्थः। अनन्त्यविकार इति च लिङ्गम्। तामर्थतः पठति – अन्त्यवाघे इति। अन्त्यस्य बाघे कार्याप्राप्तौ, अर्थादनेकानन्त्यस्य प्राप्ताविव्यर्थः। अन्यथा 'णो नः' (६।१।६५) इत्यादि 'नेता' इत्यादावेव स्यात्, न तु 'नमति' इत्यादाविति भाष्ये स्पष्टम्। 'अल्लोपोऽनः' (६।४।१३४) 'अचः' (६।४।१३८) 'सान्त' (६।४।१०) इत्यादावनेकक्लिष्टकल्पनापेक्षयेयं न्याय्या।

लिंगसिद्धेति गाव इति विशेष्य भूत चिह्न सिद्धेत्यर्थः। एच इक् ह्रस्वादेश, इतिह्रस्वादेश विधायके एच इगित्यस्योपास्थित्यै च इक् ह्रस्वो भवतीतिवाक्यार्थो यथास्यात्।। अन्यथाऽनेनापूर्वत्ववचः। स्थानेङ्ग् विधीयते एचोऽयवायाव इत्यादि ज्ञापकादस्य परिभाषात्वमेवे तिचेत् प्लुतविधायकेष्वव्यस्योपस्थितिः स्यात्। नन्वेवमपि ह्रस्वे इत्येवसिद्धे। आदेशग्रहणं व्यर्थमिति चेन्न। ह्रस्वविधायके एच इगित्यस्योपस्थितिनित्यस्यार्थे ह्रस्वो नपुंसके इत्यत्रैच इगित्यस्योपस्थित्या एजंतस्य नपुंसके विद्यमानप्रातिः पदिकस्य ह्रस्विक् भवतीत्येवतस्यार्थस्यात्तथाच

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किञ्च भसंज्ञायां कार्यकालपक्षाश्रयणमशक्यं परत्वेन पदसंबाधकत्वानुपपत्तेः। 'राज्ञः' इत्यादौ नलोपस्यासिद्धत्वात्पूर्वम् 'अल्लोपोऽनः' (६।४।१३४) इति लोपे पश्चात्प्राप्तनलोपैकवाक्यतापन्नपदत्वस्यैतदेकवाक्यतापन्नभत्वेन बाधायोगान्न लोपापत्तेश्च। तस्मादाकडारस्थसञ्ज्ञासु यथोद्देशाश्रयणमेवावश्यकमिति 'यजादिस्वादिपरो योऽन्' इत्यर्थस्य न तत्र लाभः। 'ष्यङः सम्प्रसारणम्' (६।१।१३) इति सूत्रस्थ– 'कार्यकालं सञ्ज्ञापरिभाषं, भस्त्येत्युपस्थितमिदं भवति यचि भमिति। तत्र यजादिपरतयाऽन्कारं विशेषयिष्यामः। अनाऽकारम्' इति भाष्यन्त्वे कदेश्युक्तिः, यजादिप्रत्ययस्याङ्गाशे उत्थिताकाङ्क्षतया तेनानो विशेषणायोगाच्च। अत एव सर्वफ्लानामन्यथासिद्धिं प्रदर्श्यापि 'तस्माद् यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा कर्त्तव्या' इति उपसंहृतं भाष्ये इति भावः।

अन्त्यसदेशस्येति। अन्त्येन समानो देशो यस्येत्यर्थः। तत्त्वञ्चान्त्यवर्णतद्वर्णयोरितराव्यवधाने भवति। 'चलीक्लृप्यते' इत्यादौ ऋकारान्तर्गतरेफस्योत्तराज्भागेन व्यवधानान्नात्यसदेशत्वसम्भव इति न तत्रैतत्परिभाषाप्रवृत्तिः। अत एव 'न सम्प्रसारणे' (६।१।३७) इत्युदाहरणीभूतस्य सूत्रं सार्थकम्। 'नैतस्याः परिभाषायाः प्रयोजनानि' इति तत्सूत्रस्य भाष्यस्य त्वयमर्थः – एतत्सूत्रसाध्यानि 'विद्धः' इत्यादीन्युदाहरणानि नैतस्याः परिभाषाय भवन्तीति। अन्त्यसदेशत्वाभावादिति च तद्भावः।

परस्यैवैति। द्रशब्दस्यैवेत्यर्थः। अः सेरिति। अत्र अकारेण आकारस्यापि ग्रहणं तेन 'अमूदृक्' इत्यादिसिद्धिः। तत्र हि 'आ सर्वनाम्नः' (६।३।६१) इति पूर्वपदान्तस्यात्वम्। त्यदाद्यत्वेति। त्यदादीनामत्व विषय इत्यर्थः पक्षे इति तत्र तन्त्रेणार्थद्वयेपि सूत्रतार्त्पयम्। तत्र

श्रीपमित्यादौह्रस्वोनस्यात् यथासंरव्यंचस्यादादेशग्रहणेतु केनचिद् विधीयमानेषु ह्रस्वेषु एच इगित्यस्योपस्थितिरित्येतत् स्वार्थतत्रतत्रैच इगित्यस्योपस्थितौवाक्यभेदेनाजंतस्य प्रातिपदिकस्य ह्रस्वो न पुंसकेवर्तमानस्य ह्रस्वोभवति एजंतस्य तु इक् ह्रस्वोभवतीतिनिपभ्यते गोस्त्रियोरित्यत्रतु स्त्रीप्रत्ययांतांत प्रातिपदिक ह्रस्वोभवतिगोशब्दस्य त्विक् ह्रस्वोभवतीतिनिझते तदाह। एचां पूर्वभाग इत्यारभ्य न यथासंख्यमित्यंतेन। ननु औपश्लेषिकाधिकरणेवनिर्दिष्ट परिभाषायाः प्रवृते वैंणयिकाधिकरणे तस्या अप्राध्यान बाधोवत आह। आत्वेकृते इति विषय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लक्ष्यानुरोधाद्यवस्था। अत्र प्रमाणमुपन्यस्यति – उक्तञ्चेति। लत्ववदिति। 'चलीक्लृप्यते' इत्यत्र यथा लत्वं रीगृकारयोर्भवति तथेत्यर्थः। अत्र अमुदयङ् इति रूपवादिमतं न्याययुतं, लत्वे उक्तरीत्यैतन्नायायाप्रवृत्तावपि अत्रैतदप्रवृत्तौ मानाभावात्। अत एव 'भाष्ये 'अदसोऽनोस्त्रेः' इतिवार्त्तिक प्रत्याख्यानाय 'अथवा अः सेः' इति पक्षमुक्त्वा 'यद्येवम् 'अमुमुयङ्' इति न सिद्ध्यति, 'अदद्र्यङ' इति प्राप्नोति, 'अदमुयङ्' इति भवितव्यम् अनन्त्यविकारे इति' इत्युक्तम्। अत्र 'इति प्राप्नोति' इत्युक्त्या तत्रासम्मतिरुक्ता। 'इति भवितव्यम्' इत्यनेन पृथक् मुत्वमिति पक्षे सम्मत्यभावो दर्शितः। 'इति भवितव्यम्' इत्युक्त्या च तत्र शब्देऽप्रयुक्तत्वं सूचितमित्याहुः।

विष्वग्देवयोः किमिति। चस्याप्युपलक्षणमिदम्। ननूत्तरपदाधिकारादञ्चुरूपे उत्तरपदे इत्यर्थाद् 'विष्वगञ्चनम्' इत्यादेर्व्यावृत्तौ व्यर्थमप्रत्ययग्रहणमत आह – अप्रत्ययेति। तेनेति। अन्यथा 'अतः कृ' (८।३।४६) इत्यत्र 'नित्यं समासे' (८।३।४५) इत्यतोऽनुवृत्तसमासग्रहणेनोत्तरपदाक्षेपेऽपि कृधातुरूपे उत्तरपदे इत्यर्थापत्तौ 'अयस्कृद्' इत्यादावेव स्यादिति भावः।

उद् ईत् (६।४।१३९)। अत्र 'अचः' (६।४।१३८) इत्यनुवर्त्तते।

समः स (६।३।९३)। 'समो मिङ्' इति' 'सम इक्' इति वा न कृतं, परिभाषाज्ञानकृत गौरवापत्तेः।

तिरसस्ति (६।३।९४)। 'अलोपे' इत्यत्र शकन्ध्वादित्वात्पररूपेणाकारः प्रश्लिष्यते। अस्य अलोपो लोपाभावो यस्मिन्नञ्चतावित्यर्थस्तदाह– अलुप्ताकारेति। तिरश्चेति।

एवनेति। नामीत्यारंभ सामर्थ्यात्सामाव्यत एव नुड्विषये सन्निपात परिभाषा न प्रवर्तत इति ज्ञाप्यत इतिभावः। माधवाशयमा हुरिति। अत्रारुचिबीजंतु श्नान्लोप इति सूत्रे श्नमः शकायेच्चारणाभावेनान्नलोप इति न्यासे यज्ञानामित्यत्रदीर्घनलोपयोः प्राप्तौ परत्वान्नलोपित्युक्तं भाष्ये। तदसंगतिरिरिति। सामान्यापेक्षत्वेन लोपापेक्षया सुपिचेति दीर्घस्य परत्वात्तस्मान्नामी त्यनेन दीर्घेकर्तव्ये एव नुड्विषये सन्निपात परिभाषया अनित्यत्वं नान्यत्रेत्यलं। समुदितप्रातिपदिकापेक्षेति। पदद्वयात्मक समुदितप्राति पदिकापेक्षे इत्यर्थः वर्ण मात्राश्रय इति। ह्रस्ववर्णमात्रंविद्यते यस्मिन्तद्वर्णमात्रमेकं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रुत्वेऽल्लोपस्य स्थानिवत्त्वं तु न, पूर्वत्रासिद्धीये तन्निषेधात्।

पूजार्थस्येति। पूजारूपार्थस्य गम्यत्वे इत्यर्थः। अत एवाव्याकुलं गच्छतीत्यर्थके 'अञ्चितं गच्छति' इत्यादौ नलोपो न। अव्याकुलगमनेन च पूजा गम्यते, न त्वञ्चतेरेव सोऽर्थ इति स्पष्टम् 'अञ्चोऽनपादाने' (८।२।४८) इति सूत्रे 'भाष्यकैयटयोः। 'प्राचः' इत्यादि चिरन्तनादिरूढ़स्येति बोद्धव्यम्। एतेन 'अञ्चतेर्गतौ' इति नियमेनैव सिद्धौ 'नाञ्चेः पूजायाम्' (६।४।३०) इति व्यर्थमित्यपास्तम्।

नलोपाभाव इति। ञोपधत्वबोधनद्वारेत्यर्थः। स्पष्टञ्चेदं 'परेश्च घ' (८।२।२२) इति सूत्रे भाष्ये। अपिना चसमवधाने 'चोः कुः' (८।२।३०) इति कुत्वाभावो, निरुपदात् क्विन् इति च निपात्यते इति बोद्धव्यम्। 'सङि' इति वचनाद्वा कुत्वाभावः। षत्वं, स्कोरितीति। सलोपे षत्वस्यासिद्धत्वात्सलोपे कृते षत्वम्। ब्रश्चेः क्विपि 'ग्रहिज्या' (६।१।१६) इति सम्प्रसारणे पूर्वत्वे शश्चुत्वस्यासिद्धत्वस्यात्सलोपः। सुवृट्त्सिवति। चर्त्वस्यासिद्धत्याद् 'ङः सि' (८।३।२९) इति वा धुट्। निपात्यन्ते इति। अतिप्रत्ययान्ता इति शेषः। तत्र पृषद्वृहतोर्गुणाभावश्च, गमेर्जगादेशश्च, महेः कर्मणि प्रत्ययश्च, निपातनात्। शतृवदिति। प्रत्ययग्रहणपरिभाषया शतृप्रत्ययान्तवदित्यर्थः। 'शतुरनुमः' (६।१।१७३) इति सूत्रे 'वृहन्माहतोरुपसंख्यानम्' इति तु पृषदादिव्यावृत्तये नियमार्थमिति बोद्धव्यम्।

अत्वसन्त (६।४।१४)। चस्त्वर्थे। अतु इति लुप्तषष्ठीकं पृथक्पदम्। अधातोरिति असन्तस्यैव विशेषणं तुशब्दात्। तदाह-धातुभिन्नेति। अत एव 'उगिदचाम्' (७।१।७०) इति सूत्रे गोमत्यतेरप्रत्यये गोमानिति प्रयोगो भाष्ये सङ्गच्छते। परमिति। अङ्गविशेषणतयाऽर्थसिद्धतन्दविधेरेवानुवादकमन्तग्रहणम्।

पदमाश्रयो यस्येत्यर्थः यथाश्रुतंतु न युक्तं प्रत्यय ग्रहणेयस्मात्प्रत्यय विधिस्तदादीत्यस्योपास्थितेः कृति तुग्ग्रहणाच्चेति। चेन नयति तत्कुलं नीत्यत्रांतरंग बहिरंग त्वानाक्रातत्वादित्यस्य संग्रहोबोध्यः। वदंतीति। अत्रारुचिबीजंतु ताम्यां परिभाषाया अनित्यत्वमेव ज्ञाप्यते तेन शिवोऽर्च्य इत्यत्राद्गुणसिद्धिरिति। नन्वेवं सन्निपात परिभाषायां सन्निपातः पूर्वापर संबंधो लक्षणं निमित्त यस्य उपजीव कस्यतस्यैवानुगमात्प्रकृते तद्‌विरहान्नतुग्वारणं स्यादत आह। किंचेति। स्याअपीति। सन्निपातपरिभाषाया अपी इत्यर्थः स एवार्थ इति। सन्निपातः संबंधमात्रं लक्षणं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वचनसामर्थ्यादुपधापदासम्बन्धेन चारितार्थ्यादित्यभिमानः। अयमभ्युय इत्याह–नित्यमिति। कृताकृतप्रसङ्गित्वमात्रेणेत्वर्थः। सामर्थ्यादिति। वाक्यार्थबोधकाले विरोधाभावेनोपधासम्बन्धे कृते सामर्थ्यात्पूर्वं दीर्घप्रवृत्तिरेव कल्प्यते इति भावः। धीमानिति। न चै कानुबन्धकपरिभाषया मतुपोऽत्राग्रहणम्, सूत्रं तु सर्वादिपठितेऽनुनासिकोकारविशिष्टे भवतुशब्दे चरितार्थमिति वाच्यं पकारादेः समुदायानुबन्धत्वेऽप्यतोद्ध्र्वनुबन्धकत्वाभावात्। अवयवानां नान्तरीयकतयासमुदायोपदेशे एव ऋषितात्पर्यमित्यर्थस्य 'आदेच उपदेशे' (६।१।४५) इतिसूत्रस्थ भाष्यसम्मत्वेन यदुपदेशप्रयुक्ता यस्येत्संज्ञा तस्य तदनुबन्धताया एव स्वीकारात्। न चोकारलोपेऽत्वन्तत्वस्याप्यभावः, उकारस्याश्रयणेन तदंशे भूतपूर्वगतिस्वीकारात्। एतेन तदाश्रयणे अतुबन्तमेतत् नात्वन्तमित्यपास्तम्, तदाश्रयणाभावात्। तस्मादनुनासिकोकारविशिष्टो च उपदेशे अत् तदन्तस्य प्रयोगस्थस्य दीर्घ इति सूत्रार्थ इति न दोषः।

नियमार्थमिति। धातोश्चेदुगित्कार्यं तर्हि नलोपिनोऽञ्चतेरेवेति नियम इति भावः। तेन 'उखास्रत् ब्राह्मणी' इत्यादौ नुम्ङीपौ न। न्यायप्राप्ताल्लोपाकरणपूर्वकं नलोपकरणस्य विवक्षार्थत्वमित्याशयः। यद्यपि अञ्चतेश्चेन्नलोपिन एवेति नियमेऽप्यञ्चतिग्रहणं चरितार्थ, तथापि भाष्य प्रामाण्येन सामान्यापेक्ष उक्तनियमो युक्त इति बोद्धयम्।

नन्वत्र धातुत्वात्कथं नुम्, अत आह – अधातोरिति। न चौपदेशिकधातुविषयक एव नियमोऽस्तु, किमनेनेति वाच्यम्, औपदेशिकत्वानन्तर्भाविण सामान्यापेक्षनियमज्ञापनार्थत्वात्। तत्फलं 'पूर्णध्वद्' इत्यादाविव 'गोमान्' इत्यादिनामधातौ 'उगितश्च' (४।१।६) इतिङीबभाव इति दिक्। क्यच्पक्षेऽल्लोपो न स्थानिवत्, कौ लुप्त्वात्।

यस्योपजीवक स्येति यथाश्रुतएवार्थ इत्यर्थः। ननु सन्निपातपरिभाषया तुग्वारणे कृन्येजंत इति सूत्रस्थभाष्यविरोऽत आह। ग्रामणिपुत्र इति। इत्यजंतानपुंसक लिंगाः।। हलन्तपु०लिंगः न्यायस्या सामर्थ्यरूपयुक्तेः।।अन्यत्रापीति। दादेरित्यादावपीत्यर्थः वक्तुं युक्तमिति। यथासंख्यत्व स्वरितत्वान्नेतिभावः कथमिति। पदत्वनिमित्त धातु शब्द मुच्चार्य विहित प्रत्यय परत्वाभावादिति-भावः। अत्र धुगित्यत्रधत्वादि। आदिनाभष्भावः। एवंचाधोगित्यादा वेवैतदुभयप्रवृत्तिः स्यादितिभावः। तत्प्रवृत्ताविति। परिभाषा परिवृत्ताविसर्थः नत्वानापत्त्येति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्राऽऽचारक्विब् अर्वाचीनमतेन। वस्तुतो हलन्तेभ्यस्तदभाव इति 'ह्रस्वनद्यापः (७।१।५४) इत्यत्र भाष्ये स्पष्टम्।

उभे अभ्य (६।१।५)। लक्ष्यानुसारेण गर्गदण्डन्यायादत्र समुदाये वाक्यसमाप्तिरित्याह- उभे समुदिते इति। द्वे इत्यनुवृत्त्यैव सिद्धे उभेग्रहणं स्पष्टार्थम्। यत्तु उभेग्रहणसामर्थ्यात्सहभावोपसर्जनद्वित्वविशिष्टार्थकं, तेन समुदिते इत्यर्थलाभ इति; तन्न, अशाब्दर्थत्वात् शब्दाधिक्यादर्थाधिक्यस्य बहुशो भाष्यकृतोपहसितत्वाच्च। ध्वनितञ्चेदं 'तदसति प्रयोजने उभेग्रहणं सहार्थं विज्ञास्यते' इति ग्रन्थेन भाष्ये। अत एव सूत्रशेषे भाष्ये गर्गदण्डनन्यायेनैतदर्थसिद्धिमाश्रित्य 'सहग्रहणं कर्त्तव्यम्' इति वार्त्तिकं प्रत्याख्यातम्। तुल्यन्यायात्तदर्थकत्वेन पराभिमतमुभेग्रहणञ्च प्रत्याख्यात्मेवेति सुधियो विभावयन्तु। तत्र द्य्वादिशब्दानामेकापायेऽप्रवृत्तेः 'ऐर्त्सन्' इत्यादावभ्यासलोपे कार्यकालपक्षे न सञ्ज्ञेति न जुस्। 'एकादेशात्पूर्वमायन्नादिषूपदेशिवद्वचनेनान्तरङ्गत्वादन्तादेशेऽपि 'सर्वे सर्वपदादेशाः' इति न्यायेन स्थानिवद्भावात् झित्वेन जुसापत्तिः। किञ्चैकादेशे जुसोऽपवादविषयस्य जायमानत्वेन 'प्रकल्प्य चापवादविषयम्' इति न्यायेन पूर्वमन्तिभावाप्रवृत्तौ एकादेशे जुसापत्तिः। यथोद्देशे पूर्वं समुदाये प्रवृत्तसञ्ज्ञायाः स्थानिवद्भावेनाभ्यासलोपे सत्त्वेऽपि पञ्चमीसमासेनैकादेशस्य स्थानिवत्त्वान्न तत्प्रवृत्तिः। अत एव 'प्रत्यैषिषन्' इत्यादौ न दोष इत्यलम्।

नाभ्यस्ता (७।१।७८)। बहुयोगव्यवच्छिन्नोपि नुम् इहानुवर्त्तते सामर्थ्यात्। तदाह- नुम्नेति। दाञः शतरि शपः श्लौ 'श्लौ' (६।१।१०) इति द्वित्वेऽभ्यासह्रस्वत्वे 'श्नाभ्यस्तयोः' (६।४।११२) इत्यालोपे 'ददत्' इति।

मोनोधातोरित्यत्रापि तथाऽर्थेऽजगन् नित्यादौ यङ्लुगंतेतस्य चरितार्थ्येन नत्वनापत्येत्यर्थः। ननु यङ्लुकश्छान्दसत्वादत्रपदस्येत्यनुवृत्तस्य-सामानाधिकरण्यासंभवाद्वैयधिकरण्येन पदावयवस्य मांतस्य धातोर्नकारोभवति धातुशब्द मुच्चार्य विहित प्रत्ययेपर इत्यर्था त्रत्यासत्तित्यागाच्च प्रकृतेक्विघर त्वानान्त्वे तत्संगतिः। अन्यथासूत्रमेव व्यर्थं स्यादि ति चेन्न। सूत्र वैयर्थेनाप्येतदर्थस्यैव ज्ञापनात् इत्यलं। भाष्य विरोधादिति। स्थानेतंरतम इति सूत्रे इकोयणचीत्युदाहृत्य यथासंख्येनापिसिद्धि रित्युक्ति रुक्तलृकार स्थापनकर्तृसिद्धांतिनः पूर्वपक्षिमतेतु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्यदादिषु (३।२।६०)। आलोचनमिह ज्ञानमात्रम्।

आस (६।३।६१)। 'दृग्दृश्वतुषु' (६।३।८६) इति सूत्रमनुवर्त्तते। षत्वापवादत्वादिति। 'कुः क्विन्यतः' इति न्यासेन दृष्ट इत्यध्याहारेण च बहुव्रीहिफले सिद्धे प्रत्ययग्रहणेनान्यपदार्थांशे वीप्सागर्भबहुव्रीहिणा लब्धं तादृशादिक्विन्नन्तविषये लक्षणचरितार्थमिति भावः। खकार इति। अघोषमहाप्राणशकारतुल्यत्वादिति भावः। कैयटेति। 'क्विन्प्रत्ययस्य' (८।२।६२) इति सूत्रस्थेत्यादिः। असिद्धत्वादिति। यद्यपि जश्त्वापवादोऽपि कुत्वं, तथापि शस्थानिकजश्त्वस्यैव, न तु स्वस्थानिकस्यापीति भावः। वस्तुत इदं चिन्त्यम्, प्रत्ययग्रहणस्य बहुव्रीहिमात्रफलकताया एव भाष्यकृतोक्तेः। तस्माद्दधृक्-अञ्चु-युजिक्रुङ्षु अस्य चारितार्थ्येन जश्त्वषत्वापवादता न युक्तेति। तदेतद् 'मते' इति वदता सूचितमिति दिक्।

नगिति। षडगकाः प्राग्वत्। नङ्भ्यामिति। 'मस्जिनशोः' (७।१।६०) इति नुम् तु न्, धातुप्रत्यये तद्विधानात्।

स्पृशोऽनु (३।२।५८)। अनुदके किम्? उदकस्पर्शः। अन्तोदात्तत्वमिति। नित्त्वादाद्युदात्त्वं प्राप्तम्। कुत्वस्य जश्त्वं प्रत्यसिद्धत्वादाह-कुत्वात्पूर्वमिति।

र्वोरू (८।२।७६) 'सिपि धातोः' (८।२।७४) इत्यतो धातोरिति वर्त्तते, तच्च र्वाभ्यां विशेष्यते। पिपठिषतेः क्विपि अतो लोपे प्रातिपदिकत्वात्सौ हल्ङ्यादिलोपे प्रत्ययलक्षणेन पदान्तत्वाद्रुः। रुत्वेऽल्लोपो न स्थानिवत्। पूर्वत्रासिद्धे तन्निषेधात्।

नुम्वि (८।३।५८)। 'इण्कोः' (३।८।५७) इति वर्तते। व्यवधानेऽप्राप्तेरिदम्।

स्थानेंतरतम इत्यनेन सिद्धेरितिभावः। ननु द्युभ्यामित्यादातिवोदितिपरत्वसामर्थ्यादेव न दीर्घोऽत आह।

अतएवेति। वचनप्राभाष्यादिति। हल इति सूत्रारंभसामर्थ्यादित्यर्थः वचन प्रामाण्यादिति। वचनस्याचः परस्मिन्निति स्थानिवत्वातिदेशिकस्य प्रामाण्यात्सत्वादित्यर्थः। अनित्यत्वेनेति। पंचमी समासानंगी कर्तृ मतेने दम्। तदंगी कारे तु दीर्घोत्तर मचः परस्मिन्नित्यनेन सिद्धेः परिभाषाया अनित्यत्वं नोपयुक्त मितिबोध्यम्। ननु यून इत्यादौपूर्वं सवर्णदीर्घेततोऽल्लोपोन इत्यकार लोपे पूर्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अयमप्यधिकारः। अत एव 'निंस्सव' इत्यत्र धातोः सस्य नानेन षत्वम्। व्यवायशब्दस्य प्रत्येकं सम्बन्धो व्याख्यानात्। तदाह-प्रत्येकमिति। अपिनाऽव्यवधानेऽपि। नुम्स्थानिकेति। प्रकृतसूत्रस्थं हयवरट्सूत्रस्थञ्च भाष्यमत्र मानम्। व्रश्चेति ष इति। सपादसप्ताध्यायीस्थकार्यप्रवृत्तियोग्यतायां त्रिपादीस्थस्याप्रवृत्तेर्हल्ङ्यादिलोपोत्तरं विविश्स् इत्यवस्थायां षत्वस्यासिद्धत्वात्संयोगान्तलोपे ष इत्यर्थः। कलोप इति। पदान्तसंयोगादिलोपस्य संयोगान्तलोपापवादत्वादिति भावः।

तडिति। तक्ष्णोतेः क्विप्। ण्यन्ताभ्यामिति। णिलोपस्य स्थानिवत्त्वात् 'तक्स्थाता' इत्यादौ संयोगादिलोपाप्राप्तेः 'काष्ठशगेव नास्ति, कुतः काष्ठशक्स्थाता' इति 'परेश्च घाङ्कयो' (८।२।२२) इतिसूत्रस्थ भाष्येण न विरोधः। तत्र झल्परसंयोगादादिलोपमाशङ्क्य तथोक्तम्। तस्य दोष इति। 'क्वौ लुप्तम्' इति तु न सार्वत्रिकमिति भाव इत्यन्यत्र विस्तरः।

कुत्वस्यासिद्धत्वादिति। पिपच् स् इत्यवस्थायाङ्कुत्वस्यासिद्धत्वात् तद्भावे 'स्कोः' (८।२।२९) इत्यस्याप्राप्तेः संयोगान्तलोपे इति भावः। दिधगिति। 'दादेः' (८।२।३२) इति घः। 'एकाचः' (६।१।१) इति भष्भावः।

विद्वानिति। 'विदेः शतुर्वसावदादित्वाच्छपो लुकि शतुर्ङित्त्वाद् गुणाभावे उगित्त्वान्नुमि 'सान्त' (६।४।१०) इति दीर्घे संयोगान्तलोपे तस्यासिद्धत्वान्नलोपो न।

वसोः (६।४।१३१)। प्रत्ययग्रहणे तदन्तग्रहणं, 'भस्य (६।४।१२९) इत्यधिकारः, तदाह-वस्वन्तस्येत्यादि। न च विदः शतुर्वसोरेकानुवन्धकत्वात्तस्यैव ग्रहणं स्यात् न लिडादेशक्वसोरिति वाच्यम्, वसुसादेशेन तस्यापि द्व्यनुबन्धकत्वादिति भाष्ये स्पष्टम्।

रूपाभावेपीष्टसिद्धेरिति चेन्न। विभक्तेरुदात्तनिवृत्ति स्वरापत्तेः अल्लोपस्य स्थानिय त्वेन यणापत्तेः। सप्तम्येकवचने लोपाभावपक्षेऽकारस्य श्रवणायत्तेश्च। णिलोपस्य स्थानिवत्त्वेप्यंगसंज्ञकावयव स्यवाहेरिव्यर्थात् स्यादेव प्रकृतेः संप्रसारणमिति केनचिदुक्तं तन्मतेप्याह। अंगसंज्ञेति। अतएव तन्मते प्रष्ठवाड्र प्यायेत्यादौ न संप्रसारममितिबोध्यम्। विचोऽसार्वमिकत्वादाह। विज्ग्रहणामिति। अचः पर स्मिन्नित्यत्र काम्य च सूत्रे च भाष्ये उक्त चेनेति। आद्येस्थानिवद्भावप्रयोजन खंडनावसरे याज्यत इत्यादौ संप्रसारणाभावय। अंत्ये उपपयट्काम्यतीत्यादौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदुष इति। सम्प्रसारणपूर्वत्वस्य 'षत्वतुकोः' (६।१।८६) इत्यसिद्धत्वे तु न, पदान्तपदाद्योरेकादेशस्यैव तेनासिद्धत्वात्।

सेदिवानिति। षद्लृधातोः भाषायां सद्' (३।२।१०८) इति लिटः क्वसौ द्वित्वे 'अत एक' (६।४।१२०) इत्येत्वाभ्यासलोपयोः 'वस्वेकाजाद्' (७।२।६७) इतीट्। अकृतेति। पे तु-पदावधिकेऽन्वाख्याने सदे वस् अस् इति स्थिते इट्सम्प्रसारणयोः प्राप्तौ प्रतिपदविधित्वेन शीघ्रोपस्थितिकत्वात् पूर्वं सम्प्रसारणे बलादित्वाभावादिटः प्रातिरेव नेति 'सेदुषः' इत्यादिसिद्धिरत्यकृतव्यूहपरिभाषा निष्फला। लक्ष्यानुरोधादत्र पदावधिकमेवान्वाख्यानमित्याहुः।

साहचर्यादिति। न च महत्यतेः क्विपि महतोऽपि धातुत्वसम्भव इति वाच्यम्, औपदेशिकधातुत्वासम्भवेन तत्साहचर्येणौपदेशिकधातुभिन्नसान्तसंयोगस्य ग्रहणमित्याशयात्। सुहिनिति। नान्तलक्षणदीर्घस्तु संयोगान्तलोपस्यासिद्धत्वान्न। हिसीत्यस्येदित्त्वात् 'अनिदिताम्' (६।४।२४) इति नलोपो न। ध्वदिति। ध्वंसु अवस्रंसने, क्विप्। अनिदित्त्वान्नलोपः। 'वसु' (८।२।७२) इति दत्वम्।

विवक्षिते इति। भाष्ये – 'असुङ्य्युपदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वात्' इत्युक्तेरिति भावः। वस्तुतो वचनमेव ज्यायः। विवक्षितसप्तम्यामपि विभक्तिबुद्धिनिमित्तकत्वेन बहिरङ्गत्वात्ततः पूर्वं 'परमपुमान्' इत्यादौ स्वरप्रवृत्तौ दोषात्। बहुपुंसीति। विभक्तौ लिङ्गविशिष्टाग्रहणान्नासुङ्। विभक्तिविवक्षाया लिङ्गकार्योत्तरमेव सत्त्वेन न ङीपः प्रागसुङिति भावः। पूत्र इति। पातेरिति पाठान्तरम्। 'स्त्रियाम्' (४।१।३) इति सूत्रे भाष्ये तु 'सूतेः सस्य षः, ह्रस्वः म्सुम्प्रत्ययः' इत्युक्तम्। वस्तुत

संप्रसारणाभावाय च भाष्ये उक्त त्वेनेत्यर्थः। ननु वचिस्व पीत्यत्र विहित विशेषणपक्षे एक वाक्यतया क्वौक्तुप्तमित्यस्यानाश्रयणेपि वाह ऊठ सूत्रे तदनाश्रमणे मानाभावे न णिण्जंतात् क्विपिविश्ववाट् शब्दस्य संप्रसारणं स्यादेवेत्यत आह। प्रतिपदोक्तयेति। तदितरेति। काम्यजितिचकारादित्वमाश्रित्योपपयट्काम्यतीत्यादौ संप्रसारणवारणरूपतदितरे त्यर्थः। न फल भेदिति। व्यंताद्यजेः क्विपि न फलभेद इत्यर्थः अंप्रवृत्तेश्चेति। चोहेतौ। नुम उपजीवकत्वेन ततः प्राक तस्या प्रवृत्तेनुमोऽप्रवृत्ते र्हेतोर्विरोधाभावादमानुम् न बाध्यत इत्यर्थः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उच्चारणार्थानामपीत्सञ्ज्ञावश्यकत्वादियमुक्तिर्निष्फला। पुमानिति। 'सान्त' (६।४।१०) इति दीर्घः।

उशनेति। वशेः कनसिः, ग्रहिज्या' (६।१।१६) इति सम्प्रसारणम्। अस्य सम्बुद्धाविति। एतच्च वृत्तौ वाचनिकं पठितम्। वशधातौ माधवस्तु –

'सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम्'।

इति श्लोकवार्त्तिकमित्याह। भाष्यानुक्तत्वादिदमप्रमाणमेवेति प्रामाणिकाः। उशना शुक्रः। अनेहा कालः। 'नञि हन एह च' (उ०सू० ६७३) इत्यसुन्, हन एहादेशश्च। सुव इति। आधातोरित्यस्य धात्ववयवभिन्नासन्तस्येत्यर्थ इति भावः। अन्यथा समुदायस्य धातुभिन्नत्वादीर्घः स्यादेवेति बोध्यम्।

अदस औ (७।२।१०७) अदस इति षष्ठी। 'तदोः सः' (७।२।१०६) इत्यतः साविति वर्त्तते। औत्वं त्यदाद्यत्वापवादः ननु 'सोर्डौ' इत्येवास्तु इति चेत्? न, असावित्यत्र टिलोपे कृते नित्यत्वात्सत्वं बाधित्वा त्यदाद्यत्वे 'असौ' इत्यसिद्धेः। असुक इति। 'अमुकः' इत्यादौ त्वव्युत्पन्नोऽदःशब्दपर्यायोऽमुकशब्द इत्याहुः।

एत ईत् (८।२।८१) बहुवचनशब्दो यौगिक इत्याह – बह्वर्थेति। तेन 'अमी' इति सिद्धम्। पश्चादुत्वेति। उत्वेत्युपलक्षणमीत्वस्यापि।

ननु मुत्वस्यासिद्धत्वात्कथं नाभाव इत्यत आह – न मु ने इति। कर्त्तव्य कृते चेति। एवञ्च ने इति विषयसप्तमीति भावः भाष्ये तु ने यत्कार्यं तत्रासिद्धत्वं नेत्यर्थेनैव नाभावोऽप्याक्षिप्त इति व्याख्यातम्। मु इति समाहारद्वन्द्वः। कृते चेत्युक्तेर्मुत्वे 'सुपि च' (७।३।१०२) इति

ननुङ्यापः सोरितिन्यासे राजेत्यादौ सोः संयोगांतलोपे तस्यासिद्धत्वान्नलोपाभावमाशंक्य नङि संबुद्धयोरिति संबुद्धि ग्रहणेन न लोपेकर्तव्य संयोगान्तलोपस्यासि द्धत्वंनेतिभाष्ये उक्तत्वेन तदेक वाक्यातया यथान्यासेन मुन् इत्यत्र नेति योग विभागे न संयोगांतलोप्रस्या सिद्धत्वाभावकल्पने नैतादृश लक्ष्याणामनमिधानेन च संयोगांत लोपस्यासिद्धत्वादिति मूल मसंगतमतआह। हस्यानिकस्येति। नङि संबुद्धयोरिति ज्ञापकेन विभक्ति स्थानिक संयोगांतलोपस्यैवासिद्धत्वाभावो ज्ञापयते न सामान्यत इति भावः। ध्वनितंचेदमिति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दीर्घो न। अमीभिरिति। 'नेदमदसोः' (७।१।११) इत्यैस् न।

इति हलन्ताः पुंल्लिङ्गाः।

नहो धः (८।२।३४)। 'झलो झलि' (८।२।२६) इत्यतो झलीति, पदस्येति, 'स्कोः' (८।२।२९) इत्यतोऽन्त इति चानुवर्त्तते। झलि परे पदान्ते विद्यमानस्येत्यर्थः। 'अलोऽन्तस्य' (१।१।५२) इत्येतल्लब्धं हस्येति। उपपूर्वात् णह बन्धने इत्यतः क्विप्। 'नहिवृत्ति' (६।३।१०६) इति पूर्वपदस्य दीर्घः। सोर्हल्ङ्यादिलोपे धत्वजश्त्वचर्त्वादि।

दलोपषत्वे इति। पूर्वपदातन्तस्य लोपो, धातोः सस्य षत्वम्। 'आदेशप्रत्ययोः' (८।३।५९) इति तु न षत्वं, पदाद् आदिरिति पक्षे 'सात्पदाद्योः, (८।३।१११) इति निषेधात्। हस्य घ इति। कैयटादिमते षत्वस्येव ढत्वस्यापि कुत्वेन बाधादिति भावः। 'उष्णिगञ्चु' इति निर्देशात्कुत्वस्य जश्त्वेनासिद्धत्वम्। स्वरीत्या तु ढडगका इति बोद्धयम्।

द्यौरिति। 'दिव औत्' (७।१।८४) इत्यौत्वं, यण्। चतस्र इति। परत्वादामं बाधित्वा चतस्रादेशे सकृद्गतिन्यायात्पुनराम् नेति स्थानिवत्सूत्रे भाष्ये। चतसृणामिति। 'न तिसृ' (६।४।४) इति दीर्घनिषेधः। सर्वाविदिति। सर्वाशब्दवदित्यर्थः। अत एव 'सर्वनाम्नो वृत्तिमात्रे' इति न पुंवत्त्वं, शब्दपरस्य कदाऽपि सर्वनामत्वाभावादिति भावः।

यः सौ (७।२।११०)। पुंस्यया बाधात्, क्लीबे सोर्लुका लोपात्, स्त्रियामिदम्। वागिति। वचः 'क्विब् वचि' इत्यादिना क्विप, दीर्घोऽसम्प्रसारण ञ्च।

अपो भि (७।४।४८)। 'अच उपसर्गात्तः' (७।४।४७) इत्यतस्त इत्यनुवर्त्तते। अबिति न प्रत्ययो व्याख्यानात्। दिगिति। दिश अतिसर्जने, क्विप्। षडगकाः प्राग्वत्। त्विष गतौ,

---

तत्रहिमाष्येहेऽनुड्वन्नितिप्रत्यय लक्षणस्योदाहरणं दत्तम्। तत्रकैयटः पूर्वं संबुद्धिलोपमाश्रित्येत दुक्तम्। यदि तु विशेषविहितत्वादम् संबुद्धाविति पूर्वं प्रवर्त्तेत तदा संबुद्धि लोपोन स्यादिति। एवमेव, प्रत्ययानुत्प्रत्तेरेव। ननुःश्नमः परत्वात्तिलोपे ततः पूनमितत इमितिन माष्यासंगतिरत आह। अनड्वानिति। उपपद्यत इति। अन्यथासुलोपात् परत्वादामिविशेष विहितत्वान्नुमि सुलोपाप्राह्याभाष्यासंगतिः स्पष्टैचेतिभावः। दिंगिति। दिगस्तु यः सुद्यौः पन्था इत्यादौ प्रत्ययलक्षणेना काराद्या देशोत्तरं सोरुत्पत्तिर्बोध्या। तदाहहलंतत्वाभावेन नानुत्पत्ति निर्मित्ताभावात्। विषम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्मात् क्विप्, जश्त्वचर्त्वे। जुषी प्रीतीत्यतः क्विप्। सहस्य सभावे सजूः। अमूभिरिति। अदन्तत्वाभावादेत्वाभावेन 'एत ईत्' (८।२।८१) इत्यस्याभावे मूत्वमेव।

इति हलन्ताः स्त्रीलिङ्गाः।

दत्वमिति। 'वसुस्रंसु' (८।२।७२) इत्यस्य पदाधिकारस्थत्वात्तदन्तेऽपि दत्वम्। एवमाङ्न्त्वादामपि। पूर्वपदस्येवेति। प्रत्यलक्षणेनेति भावः। अत एव राजपुरुषादौ नलोपादिसिद्धिः। उत्तरपदत्वे चेति। उत्तरशब्देनोत्तरपदं लक्ष्यते। उत्तरपदशब्दश्च समासरचरमावयवे रूढः। तेन तस्य पदत्वे तत्प्रयुक्तकार्ये कर्त्तव्ये लुमता लुप्ते प्रत्ययलक्षणं न। पदादिविधौ त्वयं निषेधो नेत्यर्थः। तेन 'परमवाचा' इत्यादौ न कुत्वं 'दधिसेचौ' इत्यादौ 'सात्पदाद्योः' (८।३।१११) इति षत्वनिषेधश्च। निरुपपदादेव विचि षष्ठीसमासोऽत्र। सोपपदाद्विचोऽनभिधानमिति कैयटः। सेचयतेः क्विबित्यन्ये। पदादिविधिश्च प्रतिपदोक्तत्वात् 'सात्पदाद्योः' (८।३।१११) इत्येव। तेन 'परमबुधौ' इत्यादौ भष्भावो न 'उत्तर पदादिः, कर्णो वर्ण लक्षणात्' इत्यादौ तूत्तरपदशब्दस्य समासचरमावयमात्रे रूढेर्न दोषः। अयञ्च निषेध उत्तरपदस्य कार्यित्व एवेति ङ्मुट्सूत्रे उक्तम्। बहुच्पूर्वके 'बहुवाचौ' 'बहुसेचौ' इत्यादावपि न दोषः, 'बहच्पूर्वस्य च पदादिविधा बेव प्रत्यलक्षणम्' इति वचनान्तारात्। पूर्ववार्त्तिकमपि 'उत्तरपदत्वे च पदादिविधौ' इत्येवमेव पठितम्। एतत्प्रत्याख्यानरकारस्तु गुरुतर इति न युक्त इति भाष्ये ध्वनितं प्रत्याख्यानोत्तरं पुनर्नञघटितैतद्वचनपाठेनेति न स लिखितः। उत्तरपदशब्देन मध्यमपदत्वानाक्रान्तोत्तरपदस्य ग्रहणं व्याख्यानात्। तेन 'पूर्वदण्डिप्रियः' इत्यादाववान्तरतत्पुरुषोत्तरपदेऽपि नलोपादिसिद्धिः। कादेशो नेति। इदंशब्दे 'यः सौ' (७।२।११०) इति च नेत्यपि बोद्धूयम्।

सदाम्या तु न निर्वाहः। यत्तदित्या दौनपुंसके पूर्वमत्वे लुकंबाधित्वामादेशेयं संतमित्य स्यापत्तेरित्यलम्। उच्चारणार्थानां हलामित्संज्ञायांयुक्तिमाह। किञ्चेति। तत्र भाष्य संमतिमाह। अतएवेति तित्स्वरितमितिच। ननु तद्वार्तिकं प्रत्याख्यातमत आहाद्वित्वमाश्रित्येति वार्तिक संमतिमाह। किंचेति। ननूच्चारणार्थाचामित्संज्ञायामदङ् सूत्रस्थं भाष्यं न प्रमाणं हेकतरदित्यत्र संबुद्धिलोपाभावार्थडित्वस्यावश्यक त्वेनाकारस्यापि श्रवणार्थमावश्यकत्वात्तत्रेत्संज्ञकस्यैवाभावादत आह। अतएव वेरिति। अत एवेदित इति च। ननूच्चारणार्थानामित्संज्ञायां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वक्तव्य इति। 'द्वितीयाटौस्सु' इति अत्र सम्बद्ध्यते। अयञ्च सामर्थ्याल्लुका लुप्तेऽपि भवति। एनादेशोऽपि 'एनम्' इत्यादिसिद्ध्यर्थं वक्तव्यः। येननाप्राप्तिन्यायेनैनतस्त्यदाद्यत्वापवादत्वेन तत्र कृते त्यदाद्यत्वाप्राप्तेः। अत एव भाष्ये 'नपुंसकैकवचने एनद्वक्तव्यः, कुण्डमानय प्रक्षालयैनत्' इत्युक्तम्। अत्र नपुंसककैवचने एनद्वक्तव्यः, कुण्डमानय प्रक्षालयैनत्' इत्युक्तम्। अत्र नपुंसकैकवचने इत्युक्त्याऽन्यत्रैनो वक्तव्य इति स्पष्टमेवोक्तं वार्त्तिककृता सिद्धान्तिना। अपवादत्वमजानत एकदेशिनो यद्येन दित्यादिरुक्तिः, यदिगर्भवाक्ये पूर्वपक्ष्युक्तित्वस्यैवौचित्यात्। भाष्यकृता तु फल्गुत्वान्नात्रोत्तरमुक्तम्।

सिद्धान्ती तु 'किमुच्यते नपुंसकैकवचने इति, सर्वत्र एनदेव वक्तव्यः' इत्येवंशब्दैः प्रत्याख्यानं कुर्यात्। अनयोरप्यादेशयोः 'एतदस्त्रतसोः' (२।४।३३) इत्येतत्साहचर्येणोपसर्जने न प्रवृत्तिः त्यदाद्यत्वेन सिद्धमिति भाष्यासङ्गतेश्च। एनतमादायैनादेशप्रत्याख्यानपरं 'यद्येनत्क्रियते' इत्यादि भाष्यं त्वेदकेदश्युक्तिरिति भाष्यप्रदीपोद्द्योते निरूपितम्। अन्वादेशविषये इदमेतदोः समस्यानबिधानमेव, 'यद्येनत्क्रियते, एनो न वक्तव्यः। कथमेनमित्यादि? त्यदाद्यत्वेन सिद्धम्। यद्येवमेतच्छितको न सिद्ध्यति, एनच्छितक इति प्राप्नोति; यथालक्षणमप्रयुक्ते' इति भाष्यात्।

ब्रह्मणी इति 'न संयोगात् (६।४।१३७) इति निषेधादल्लोपो न। रोऽसुपि अहर्भातीति। 'अहन्' (८।२।२८) इति रुत्वे 'अहो भाति' इति स्यादिति भावः। नलोपे प्राप्ते इति। न च नलोपेऽकारस्य रौ रे वा विशेषाभावेनान्यतरेणैवोपपत्तावुभयविधानसामर्थ्यदिव लोपो नेति वाच्यम्, सम्बुद्धौ नलोपनिषेधेन, अहर्गच्छ' इत्यादावुत्वाभावेन, 'दीर्घाहो निदाघ'

वपनितरेत्यावावुगितश्चेतिह्रस्वविकल्पस्य वाचिकेत्यादावुगितश्चेतिङीपश्चापत्तिरत आह।। ल्युडादाविति। उकारस्येत्वाभावे प्रमाणमाह।। अतएवेति। ननु हयवरेत्यादावुच्चारणार्थाकारस्येत्वांगीकारेऽच्पदार्थबोधात्पूर्वं हल् प्रत्याहार सिद्धे र्हलप्रत्याहारे उकार ग्रहणापत्तिरत आह। अनुवाद इति। ननु प्रातिपदिकत्वेन व्यवसितांतत्वमत आह। फलाभावेन चेति। इकः सत्त्वादिति। गमेरिडित्यत्राज्झ नेति सूत्र भाष्य प्रामाण्यान्निरनुबंधक परिभाषाया अप्रवृत्तेर्गच्छतेरिड् सिद्धे श्चादोषादिति भावः। नोपधालोप इति। प्रकृतिवदनुकरण मित्यस्यवैकल्पिकत्वेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादावुत्वसम्पादनेन च चरितार्थ्यात्। न च नकारोच्चारणसामर्थ्यलब्धेन नकारान्तानुकरणेन नान्तस्याहन्शब्दस्येति व्याख्यानान्नलोपो नेति वाच्यम्, 'दीर्घाहो निदाघ' इत्यादौसम्बुद्धौ प्रवृत्त्या भ्यामादौ व्यावृत्त्या च नकारस्य चारितार्थ्यात्तेन नलोपबाधे मानाभावादिति भावः।

आवर्तेति। आवृतौ मानं च 'रुपरात्रि' (का०वा०) इति वार्त्तिकमेव। अन्यथा नलोपेऽकारस्य रेफादेशेनैव सिद्धे तद्वैयर्थ्यं स्पष्टमेव। भाष्य प्रामाण्याच्च तस्य सम्बुद्धावप्रवृत्तिः। तज्ज्ञापकसिद्धवचनकल्पनापेक्षया आवृत्तिर्लघीयसीति भावः। आवृत्तस्य पदान्ते अहन् इति निपात्यते इत्यर्थः। इदमसम्भव एवापवादत्वमिति वार्तिकमते 'अहन्' (८।२।२८) इत्यस्य नलोपोत्तरञ्चारितार्थ्याभिमानेन। वस्तुतः सत्यपि सम्भवे बाधनं भवतीति भाष्यसिद्धान्ताद् रुत्वरत्वे नलोपापवादभूते एव, निषेधविषयेऽपि प्राप्तिमात्रेण येननाप्राप्तिन्यायविषयसत्त्वात्। निषेधेनापि तस्य बाघ इत्यन्यत्। एतेन सम्बुद्धौ चारितार्थ्यमित्यपास्तम्। ध्वनितञ्चेदम् 'अपवादो रूर्नलोपं बाधिष्यते' इत्यर्थक भाष्येण। एतदग्रे नलोपे कृतेऽकारे सावकाशत्वशङ्कातत्समाधानादिवार्त्तिकानुसारिणोरित्यलम्।

तदन्तस्यापीति। पदाधिकारस्थत्वात्। 'ग्रहणवता' (प०भा०) ३१) इति निषेधस्तु प्रत्ययविधिविषय इति 'असमासे निष्कादिभ्यः' (५।१।२०) इति सूत्रे भाष्यकैयटयोः स्पष्टमिति भावः तस्यासिद्धत्वादिति। अकृतव्यूहपरिभाषया दीर्घप्रवृत्तिः स्यादित्यभिमनेनेदम्। दीर्घस्तु परत्वाद्धल्ङ्यादिलोपात्पूर्वमेव बोद्धव्यः। सम्बुद्धौ त्विति। सुपोऽत्र हल्ङ्यादिलोपात् 'असम्बुद्धौ' इत्युक्तेर्दीर्घाभावे रुत्वे हशि च' (६।१।११४) इत्युत्वे आद्गुणः। स्रग्वीणीति। इन्ग्रहणेऽनर्थकस्यापि ग्रहणाद्दीर्घ इति भावः। बहुवृत्रहाणीति। अत्र यद्वक्तव्यं तदुक्तम्।

प्रकृतेऽभावांगीकारादितिभावः। अतएवेगंतस्यकृदंतत्वेन प्रातिपदिकत्वादेव। अन्यथा। इगभावे। सान स्यादिति। धातुत्वेनाप्रातिपदिक त्वादितिभावः। इति केचिदिति। अत्रारुचिस्तुप्रकृतिवदनु करमं न भवतीत्यनेनाधातुत्वात्सविसर्गपाठोपि साधुरेवेति। ननुविमलद्यौरितिबहुव्रीहौ न सिद्धिरत आह। तितीति। निपात्यत इति। ननु तितिप्रत्ययग्रहणं कर्तव्यमितिवार्तिकस्यद्युम्या मित्यादौ तदभावः फलमिति तित्स्वकितमिति भाष्ये उक्तम्। तद्विरुद्धं निपातितांतोदात्तत्व सामर्थ्येनैव स्वरितत्त्वात्तत्प्रवृत्तेरेतिचेन्न। जातेपि स्वरितत्वेतत्स्थानापन्नस्तद्धर्मं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पदान्ते कुत्वमिति। 'क्विन्प्रत्ययस्य' (८।२।६२) इत्यस्यासिद्धत्वाद् 'व्रश्च' (८।२।३६) इति षत्वे कुत्वमित्यर्थः। षत्वन्तु 'सृष्टम्' इत्यादौ सावकाशमिति भावः। भाष्यप्रयोगादिति। अनेन भाष्यप्रयोगेणानव्ययपूर्वपदे कुत्वाभावो बोद्ध्यते। तेन 'असृग्' इत्यत्र न दोषः। कुत्वापवाद इति। सृजियज्योः पूर्वोत्तरसाहचर्येण पदान्तेऽपि विशिष्य षत्वबोधनेन तत्सामर्थ्यात्कुत्वबाध इति भावः। अत एव 'उपयट्काम्यति' इति काम्यच्सूत्रस्थो भाष्यप्रयोगः सङ्गच्छते। निपातनादेवेति। निपातनेन ह्यनयोरपवादाप्रवृत्तिमात्रबोधनं, कुत्वन्तु स्वशास्त्रेणैव। एतेन निपातनादपदान्तेऽपि कुत्वापत्तिरिति निरस्तम्।

असृक्शब्दस्त्विति। इदमेव न्याय्यम्। ऊर्गिति। अयं पुल्लिङ्गोऽपि 'नपुंसकस्य' (७।१।७२) इति सूत्रे 'बहव ऊर्ज्जः' इति कैयटात्। नरजानामिति। 'बहूर्जि नुम्प्रतिषेधः' (का०वा०) इति वार्त्तिकरीत्येदम्। अचः परो यो झल् तदन्तस्य नुमिति तत्रत्य्याख्यातृभाष्यमते तु नुमोऽत्र प्राप्तिरेव नेति बोद्ध्यम्। न चैवं 'कुण्डानि' इत्यसिद्धिः। 'इकोऽचि' (७।१।७३) इति सूत्रेऽचः सर्वनामस्थाने इत्यनुवर्त्य अनुवृत्तिसामर्थ्यादिक इत्येतत्साहचर्याच्च सर्वनामस्थाने इति सप्तम्या षष्ठीं प्रकल्प्य वाक्यभे देनाजन्तस्य क्लीबस्यऽत्र नुन्विधानाददोष इति भाष्ये स्पष्टम्। 'काष्ठतड्क्षि' इत्यादौ 'दिव औत्' (७।१।८४) इति सूत्रभाष्योदाहृतेऽचः परझल्त्वजातेराश्रयणान्न दोषः। अन्त्यादिति। इदं वाचिनकमेव बहूर्ज्शब्दमात्रविषयकम्। बहूर्ज्जीति। श्चुत्वस्यासिद्धत्वादनुस्वारे परसवर्णो बोद्ध्यः। स्थानिवत्वादिति। 'क्वौ लुप्तं न' इति त्वसार्वत्रिकमिति भावः। स्पष्टश्चेदं 'दीधीवेवीटाम्' (१।१।६) इति सूत्रे कैयटे।

जायन्ते नव सौ तथाऽमि च नव भ्याम्भिस्भ्यसां सङ्गमे

लभतइतिन्यायेनोदात्तत्वनिमित्तकस्योदात्ता दनुदात्तस्यस्वरितस्येत्यनेन विभक्तेः स्वरितत्वस्य प्रवृत्तयोदात्तत्वस्य सार्थक्यात्। तथोक्तमिति। संप्रसारण संज्ञायांतद्भावित ग्रहणेनास्यासंप्रसारणत्वा दित्युक्तमितिभावः।

ज्ञापनार्थमिति तत्फलं त्वद्सोसे रिति। अत्रेतिभावः। ज्ञापितेतकारस्य चारितार्थ्यंतु दिवोणिचिक्विप्पूठिद्युम्यामित्यादौ-बोध्यम् ननुद्युम्यामित्यादौ स्वादिष्वितिपदत्वं बाधित्वा परत्वादूठिसृद्वतिन्यायेनपदत्वानापत्योत्त्वं न स्यादत आह। द्युम्यामिति। एतेन ज्ञापकपरतित्स्वरित मिति सूत्रस्थ भाष्येण। ननु तपरत्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षट्संख्यानि नवैव सुप्यथ जसि त्रीण्येव तद्वच्छसि।

चत्वार्यन्यवचःसु कस्य विबुधाः शब्दस्य रूपाणि तद्

जानन्तु प्रतिभाऽस्ति चेन्निगदितुं षाण्मासिकोऽत्रावधिः।।

इति प्राचीनस्य शुष्कप्रक्रियातार्किकस्य प्रश्ने तदनुसारेणैव श्लोकद्वयेनोत्तरमाह – गवाक्शब्दस्येति। शब्दपरत्वेनापूजार्थकत्वान्नस्य लोपः। भेदत इति। आद्यादित्वात्तसिः। भेदेनेत्यर्थः। नवेति। द्वन्द्वान्ते श्रूयमाणत्वात्प्रत्येकं नवेत्यर्थः। अग्रेऽपि प्रत्येकमेव सङ्ख्याऽन्वयः। गवागिति। सोर्लुका लुप्तत्वान्नुम् न, षण्णामिति। कुक्पक्षे त्रयाणां, गतौ त्रयाणामित्यर्थः। चर्त्वस्येति। तेन गतौ त्रयाणामाधिक्यं नेत्यर्थः।

कुक्पक्षे इति। पूजायामित्यर्थः। अश्वाक्षीति। सप्तविंशत्यधिका पञ्चशतीत्यर्थः।

यः शतेति। शतृप्रत्यय इत्यर्थः।

आच्छीन (७।१।८०) वेति वर्त्तते, उत्तरसूत्रे नित्यग्रहणात्। 'नाभ्यस्तात्' (७।१।७८) इत्यतो नेति तु नानुवर्त्तते निषेधस्य प्राप्तिपूर्वकत्वात्। अत्र च प्राप्त्यभावात्। नुम्ग्रहणन्तु स्पष्टार्थम्। शतुरवयव इति। परो यः शतेति तु नोक्तम् 'तुदन्ति' इत्यादावेकादेशे उभयत आश्रयणेऽन्तादिवद्भावाभावेन व्यपवर्गालाभेन च नुमभावापत्तेः। अवर्णश्च शतृभिन्नावयव एव गृह्यते शत्रकारेणाव्यभिचारात्।

शप्श्यनोः। (७।१।८१)। आदिति 'भाति' इत्यादौ नित्यनुमभावाय। अन्यथा प्रत्ययलक्षणेन स्यात्। आदित्युक्तौ तु वर्णप्राधान्यान्न प्रत्यलक्षणम्। 'न लुमता' (१।१।६३) इति निषेधस्तु प्रत्यासत्त्या लुप्तप्रत्ययनिमित्ताङ्गस्य कार्ये एवेति भावः। 'पचन्ति'

सामर्थ्याद्धल इतिदीर्घाभावे एव कल्प्यते नतु भाव्य मानोप्युकार इति कुतो नात आह। दीर्घस्येति। बहिरंगतयेति। संज्ञात्रयसापेक्ष तयोकारविधानकालेऽनुपस्थिततत्वेन चेत्यर्थः।। अतऽदित्यत्र तपरत्वे न कुहत इत्यायौ त्वनुपस्थितस्यापिगत्याबाधिति भावः। अतएव बहिरंगत्वेन त्रैपादिकत्वेन च दीर्घ स्यासिद्धत्वादेव। अतएव बहिरंगत्वेन त्रैपादिकत्वेन च दीर्घस्यासिद्धत्वादेव। अतएव बहिरंगत्वेन दीर्घस्यासिद्धत्वादेव दीर्घ सिद्धिरितित्वन्मते बहिरंग परिभाषाया अपिबोधेनदीर्घोन स्याद् गौर वंच स्याददिति भावः। परत्वस्येति। निरूपकता संबंधेन षट्संज्ञक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादिबहुवचने 'नपुंसक्स झलचः' (७।१।७२) इति नुम्। निरवकाशत्वमिति। इदं 'छदिरुपधिबलेर्ढञ्' (५।१।१३) इति सूत्रे 'शेषाद्विभाषा' (५।४।१५४) इति सूत्रे च भाष्ये स्पष्टम्। परे तु निरवकाशत्वरूपप्रतिपदोक्तत्वस्य बाधकताप्रयोजकत्वम्। प्रकृते तदभावेनाबाधकत्वेऽपि प्रतिपदविधित्वेन शीघ्रोपस्थितकतया पूर्वं प्रवृत्तौ नियामकत्वे बाधकाभावेन पूर्वं दीर्घे ततो नुमि 'स्वाम्पि' इत्येवेत्याहुः।

धनुरिति। 'र्वोः' (८।२।७६) इति दीर्घस्तु न; रेफान्तस्याधातुत्वात्। 'श्रेयांसि' इत्यादौ युगपद् द्वयोरन्त्यादचः' परत्वायोगाद्विरोधेन परत्वाज्झलन्तलक्षणे नुमि कृते उगिल्लक्षणो न, सकृद्गतिन्यायात्। किञ्च अन्त्यादचः परो मित्प्रयोक्तव्य इति 'मिदचः' (१।१।४७) इत्यस्यार्थेन द्वयोर्मितोरन्त्यादचः परप्रयोगासम्भवेन नात्र नुमद्वयप्रसक्तिः पुनः प्रसङ्गविज्ञानेऽपि। किञ्च सत्यपि नुम्द्वये परस्यानुस्वासे तस्य झल्ग्रहणेन ग्रहणात् पूर्वस्यानुस्वारे द्वयोरनुस्वारयोः श्रुतौ न विशेष इति 'नपुंसकस्य' (७।१।७२) इति सूत्रे भाष्ये स्पष्टम्।

इति हलन्ता नपुंसकलिङ्गाः।

स्वरादि (१।१।३७)। स्वरादीनामपि निपातसंज्ञैव तु न कृता, स्वरादौ निपाता आद्युदाताः' (सू० ४।८०) इत्यापत्तेः। एतेन चादीनामप्यव्ययसञ्ज्ञैव कार्येत्यपास्तमित्यन्यत्र विस्तरः। स्वरित्यादि। अनुकरणान्येतानि। तत्रेत एव निर्देशान्न स्वाद्युत्पत्तिः, तेन विसर्गादिकं न। स्वरादीनामनेकशक्तिप्रधानता स्वरागतः, स्वः स्थितः, स्वः पश्येत्यादिदर्शनात्। गणे च तन्त्रेण सर्वेषामुच्चारणम्। 'उच्चैः' इत्यादीन्यधिकरणशक्तिप्रधानानि शब्दशक्तिस्वभावात्। हिरुगादीनि क्रियाप्रधानानि। क्रियाप्राधान्यञ्चैषां क्रियायामेव विशेषणत्वेन। स्पष्टञ्चेदं

चतुःशब्दयोः स्थितस्येत्यर्थः परं परासंबंधेनेति। स्ववाचकवृत्तित्वसंबधेनेत्यर्थः। द्वित्वंयुक्तमिति समान पदाश्रयणत्वापेक्षयांतर्भूतवर्ण भयापेक्षद्वित्वस्यांतरंगत्वात्। तथा च पूर्वं द्वित्वेपूर्वनस्यणत्वेपि बहिरंगणस्यासिद्धतया परनस्य ष्टुत्वा भावेनतस्य श्रवणं युक्तमिति भावः। गश्रवमयत्तिरिति। चत्वशास्त्राविषयकत्वरूप संकोचे मानाभावात्। अतएवष्णान्ताषडिति निर्देशः संगच्छते। अनचिचेत्यादिद्वित्व विषयेत्वपवादस्य सिद्धत्वाद्रेफाविषयकत्वरूपसंकोच इतितदाशाय इतिदिक्। नदोषिति। शब्दांतरस्य च प्राप्नुवन्विधिरनित्य इति द्वित्वस्यानित्यत्वेन नित्यत्वात्पूर्वं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'तद्धितश्च' (१।१।३८) इति सूत्रे कैयटे। सायं, चिरं मान्ते अव्यये। 'सायञ्चिरम्' (४।३।२३) इति सूत्रस्थ भाष्यप्रामाण्याच्चिरमित्यव्ययमप्रामाणिकमिति परे।

वदिति। 'तेन तुल्यम्' (५।१।११५) 'तत्र तस्येव' (५।१।११६) 'तदर्हम्' (५।१।११७) इति विहितः। उपसर्गाच्छन्दसि' (५।१।११८) इति विहितस्य च्छान्दसत्वादेव न सञ्ज्ञा। वस्तुतः 'तद्धितश्च' (१।१।३८) इत्येव सिद्धेर्वद्ग्रहणं व्यर्थम्। अन्तराऽन्तरेणेति। अन्तरान्तरेण युक्ते' (२।३।४) इति सूत्रे भाष्येऽनयोर्निपातत्वोक्तेः स्वरादिष्वनयोः पाठः प्रक्षिप्तः।

अस्तीति। धनवानित्यर्थके 'अस्तिमान्' इत्यादौ धनवाचिनः सत्त्ववचनस्य विभक्तिप्रतिरूपकत्वेन न सिद्धिरित्यस्य पाठः विनिगमनाविरहेण विभक्तिप्रतिरूपकस्य शब्दतोऽर्थतश्च ग्रहणात्। तेनैवसिद्धिरिति तु मतुप्सूत्रे भाष्यकैयटयोः। सत्ताकर्त्तत्वेनैव धनबोधादस्ति कथञ्चिदर्थतः साम्यमिति तद्भावः। एवञ्चास्तीत्यस्याप्रामाणिकः पाठ इति तत्त्वम्। नमसिति। 'महसां नमसाम्' इति प्रयोगस्तु सत्त्ववाचकत्वे बोद्ध्यः। प्रताम् प्रशामिति। प्रतानिति नान्ताव्ययस्य पृथक् पाठसामर्थ्यादपदान्तत्वाच्चास्य नत्वाभावः। प्रशानिति नान्तपाठोऽसाम्प्रदायिकः। मान्तानुकरणे नत्वाप्राप्तेः, स्वरादौ रुत्वादिवत्। कृन्मेजन्तसूत्रस्थ भाष्यस्वरसोऽप्येवमेव। नञः स्वरादिष्वप्रामाणिकः पाठः। 'अव्यये नञ्कुनिपातानाम्' इत्यत्र पृथक् नञ्ग्रहणं तु 'अकरणिः' इत्यादौ परस्यापि कृत्स्वरस्य बाधनार्थमित्याकरः। एवं माङोऽपि स्वरादौ प्रक्षिप्तः प्राठः। यावत्तावच्छब्दावव्युत्पन्नौ।

उपसर्गविभक्ति (ग०सू०)। अत्र प्रतिरूपकत्वं विनिगमनाविरहादर्थतः। शब्दतश्च गृह्यते। 'गेये केन विनीतौ वाम्' इत्यत्रापि वामित्यस्य

कुत्व जपूत्वचर्त्वेषु कृतेबुद्धित्वादिति भावः। त्रियकारार्धी मितीति। अत्रयद्वक्तव्यंतत्पूर्वत्रासि द्धमित्यत्रोक्तम्। अनुवाद रूपत्वादिति।

अनुवादफलं त्वंतरंग परिभाषाप्राप्तासिद्धत्वस्यापिबाधादितिभावः। नामीत्ययोक्तमिति। षट्चतुर्भ्य इत्यस्य गौणेपि प्रवृत्तिरितिहि तत्रोक्त मितिभावः। ननुप्रधानाप्रधानन्यायोयत्रार्थस्य ग्रहणं स्त्रियामित्यादौनतुयधावायञ्चिदर्थोपसर्जनक शब्द-ग्रहणेप्यत एवास्थिदधीत्यादीनांगौणेपि प्रवृत्तिरुक्ताभाष्येऽत आह। यद्धेति। अन्वर्थ संज्ञेति। षडिवाचरतीति षडित्याचारक्विबंतप्रकृतिक कर्तृक्विबंता संज्ञा साच

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

युष्मत्प्रकृतिकविभक्त्यन्तसमानार्थत्वमस्त्येव। स्वरांशे तु नाऽर्थतोऽसम्भवात्। एतेन युगं घवतीत्यादिव्युत्पत्त्याश्रयणेन 'युगपत्' इत्यादीनां विभक्तिप्रतिरूपकत्वादेव सिद्दे तेषां गणे पाठो व्यर्थ इत्यपास्तम्। एवं तदित्यपि लुप्तषष्ठीकं विभक्तिप्रतिरूपकमव्ययम्। अत एव 'अविद्या तच्चितोर्योगः' तत्तदर्थविभागः' इत्यादौ 'त्यदादीनि' (१।२।७२) इति नैकशेषः। अवदत्तमिति। अत्र क्रियायोगेऽपि –

अवदत्तं विदतञ्च प्रदत्तञ्चादिकर्मणि।
सुदत्तमनुदत्तञ्च निदत्तमिति चेष्यते।।

इति भाष्यवचनोपसर्गत्वाभावबोधनद्वारा तादेशाभावो बोद्धयत इत्याशयः।

आकृतीति। 'अहः' इत्यहनीत्यर्थे। ओमिति च स्वरादिषु। तच्च अश्च उश्च म् चेति व्युत्पत्त्या शिवादिवाचकम्, 'अवतेष्टिलोपश्च' इति सिद्धं ब्रह्मण्यङ्गीकारे च। उभयोरपि स्वरादित्यं व्याख्यानात्। अन्त्ये 'कृन्मेजन्तः' (१।१।३९) इति तु न सिद्धयति 'च्विरव्ययम्' (सू० २३३) इत्युणादिपठितेन नियमादप्राप्तेः। उणादिव्युत्पन्नानाञ्चेच्चादिस्वराद्यपठितानां भवति, तर्हि च्व्यन्तानामेवेति तदर्थः। अन्यथा च्व्यन्तानां निपातत्वादेवसिद्धे तद्वैयर्थ्यं स्पष्टमेव। 'स्वरादिनिपातम् (१।१।३७) इत्यत्र निपातपदे गौणमुख्यन्यायाप्रवृत्तिः, अनित्यत्वात्। अन्यथा 'ओत्' (१।१।१५) इति प्रगृह्यत्वमिवेदमपि न स्यात्। एवमतिशयेन साधुरित्यर्थे साधीय इत्यपि।

सर्वशब्दोऽत्र 'सर्वः पटो दग्धः' इतिवद् अवयवकात्स्र्न्ये इत्याशयेनाह-यस्मात्सर्वेति। वचनत्रायात्मिकेत्यर्थः। नेति। किन्त्येवकचनमेवेत्यर्थः। ननु-

---

न षडर्थ सदृशाचरम कर्तृत्वेनेतर परिछेदकत्वमात्रस्वरूपेणार्थे नानुगतेत्यर्थः। प्रियपंचा द्रौपदीति द्रौपदी वाच कोयः प्रियपंचाशब्दस्तत्रेत्यर्थः। निषेधोदाहरणंतु प्रिय पंचानामितिबोध्यम्। नन्वतेवताप्यन्वर्थत्वाभावे न मानमत आह। आकडारसूत्रेभाष्य इति।>93> ननुसर्वनामपर्यायशिटशब्द वषट् पर्यायोड्डुशब्दोप्यास्त्वित्यत आह। सर्वनामसंज्ञावदिति। नन्वर्थत्वादेव सिद्धे उपसर्जनप्रतिषेधीनारंमेपि न क्षतिरत आह। सर्वनाभ संज्ञा सूत्रस्येनेति। नन्ववसानपरक स्यैव परायणं तस्यानमिधानमस्त्वेवं हिभौमगो इति सूत्रस्थभाष्यस्यैक देशमुक्तित्वकल्पनमपि न। एवं चौजसादिपरक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सङ्ख्याकारकबोधकैरेकवाक्यतया सुपां विधानम्' इति पक्षेऽव्ययार्थे सङ्ख्याकारकयोरभावात्कथं विभक्तिः? 'अव्ययादाप्सुपः' (८।४।८२) इति ज्ञापकाश्रयणे च सर्वाऽपि।

किञ्च विहितानां नियमपक्षेऽपि नास्योपपत्तिः, तत्पक्षे सर्वेष्वर्थेषु विधेयतया प्रधानप्रत्ययानुरोधेन गुणभूतप्रकृतिभेदकल्पनेन सर्वविभक्त्युत्पत्तौ लोपे नेव जातस्य निवृत्तिः। तन्निवृत्तौ च कल्पितगुणस्वरूपं स्वत एव निवर्त्तते। नियमश्च द्विविधः – अर्थनियमः, प्रत्ययनियमो वा। अन्त्योऽपि द्विविधः – प्रकृतार्थापेक्षः, सामान्यापेक्षो वा। तत्र कर्माद्यर्थयोग्यप्रातिपदिकाच्चेत्कर्मणि विभक्तिस्तदा द्वितीयैव। कर्मादिरहिते तद्योग्यप्रातिपदिकार्थे प्रातिपदिकात्प्रथमैवेत्यादिरर्थनियमः। अत्र पक्षे सर्वाः सप्तापि विभक्त्योऽव्ययेभ्यो, विभक्तीनामनियतत्वात्।

कर्माद्यर्थयोग्यप्रातिपदिकाच्चेद् द्वितीया तदा कर्मण्येव, न करणादौ; कर्मादियोग्ये तद्रहितप्रातिपदिकार्थे एव प्रथमा, न कर्मादौ; सङ्ख्यावदर्थयोग्यप्रातिपदिकादेकत्वादावेवैकवचनादि, न द्वितीयादावित्यादिः प्रकृतार्थापेक्षप्रत्ययनियमः। अत्रापि पक्षे सर्वाः सप्तापि विभक्तयोऽव्येभ्यो लभ्यन्ते।

अथ प्रातिपदिकाच्चेद् द्वितीया तदा कर्मण्येव, नान्यत्र; प्रातिपदिकाच्चेत्प्रथमा तदा मात्रग्रहणात्पर्युदासन्यायेन कर्मादियोग्यतद्रहितप्रातिपदिकार्थे एवेत्यादिः सामान्यापेक्षः प्रत्ययनियमः। तदाऽव्ययेभ्यो विभक्तिप्राप्तिरेव नेति पूर्वोक्तज्ञापकादेव सा, इति सर्वाऽपि। यद्यपि सुपां तिङां सङ्ख्याकर्मोभयार्थकत्वेन कर्मण्येव नान्यत्रेति वक्तुमशक्यं, तथापि 'कर्मण्येव, न तु तदभावे' इत्याकारो वक्तुं शक्यः। स्पष्टञ्चेदं सर्वं 'बहुषु' (१।४।२१)

यांतस्याप्युदाहरणं युक्तमित्यप्यम्यु पेत्याप्याह।। मांतास्त्विति। क्विपीति। विचस्तु लोपोव्योरिति सूत्र स्थक्कारस्य क्वायुपसंख्यानमितिवा तत्सूत्रस्थवार्तिकस्य च प्रत्याख्यानारंभाभ्यां नवयलोप योग्येभ्योऽनमिधानमितिभावः। ननु व्यंतात् क्विपि विचिवाणि लोपस्यस्थानिवत्वान्नयलोप प्राप्तिरत आह।। णिलोपस्येति। अंगानपेक्षत्वेनेति। अंगस्य संबंध्यनपेक्षत्वेनेति मध्यमपद लोपी समासः। एवं चांगनिमित्त प्रत्ययानपेक्षत्वेनेत्यर्थः। कैयट इति। अत्रारुचिस्तुकादेश विधान सामर्थ्यादेव निर्द्दिश्यमान परिभाषाया अकज्विषयेऽप्रवृत्तिरितिसामान्यतएव ज्ञाप्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादिसूत्रेषु भाष्ये। तत्र हि अर्थनियमे प्रकृतार्थापेक्षप्रत्ययनियमे च सप्तापि विभक्त्यः सम्पूर्णा उक्ताः। सामान्यापेक्षप्रत्ययनियमे च सुपोऽप्राप्तिरेवोक्ता। 'अव्ययादाप्सुपः' (८।४।८२) इति सूत्रे भाष्येऽपि स्फुटमिदम्, – इति चेत्।

अत्र 'तद्धितश्च' (१।१।३८) इति सूवे भाष्यकृतः – एकवचनम्' इत्येव सूत्रं कार्यम्। एकग्रहणञ्च न कार्यम्। विभक्तिविद्यावुद्देश्यतावच्छेदकावच्छिन्नादेकवचनमित्युत्सर्गः। तस्य द्वित्वबहुत्वयोरितरे बाधके भविष्यतः। एवञ्चैकत्ववत्यपि भविष्यति, अलिङ्गासङ्ख्येभ्योऽव्ययेभ्यश्चैकवचनम्। द्विवचनादिविधायक योर्दिबहुग्रहणसामर्थ्यान्महासंज्ञाबोद्ध्यैकत्वाभावेऽपि तत्प्रवृत्तेः। द्वित्वबहुत्वयोर्द्विवचनबहुवचनोक्तावर्थात् एकवचनस्य 'एकवचनम्' इत्येतद्ववचनं विनाऽपि द्वित्वाद्यभावे कर्मादौ सिद्धत्वेन सामर्थ्यादप्राप्तप्रापणार्थमेतदिति कर्माद्यभावेऽप्येतत्प्रवर्त्तते इति विनिगमनाविरहात्सर्वविभक्त्येकवचननमनेन। अत एव 'अव्ययादाप्सुपः' (८।४।८२) इति प्रत्याहारग्रहणं चरितार्थं, 'तृतीयासप्तभ्योः' (२।४।८४) इति च। प्रथमाऽपि मात्रग्रहणाद् यत्प्रातिपदिकार्थस्य कर्मत्वाद्याधिक्यसम्भावना तत्रैवेति तस्या अप्यप्राप्तिरव्ययेभ्यः।

'पचतिकल्पम्' इत्यादौ तु नानेन सर्वैकवचनं सर्वथाऽप्राप्तावेव तस्य विध्यर्थत्वात्। अत्र च न तथा, कर्तृत्वकर्मत्वसत्त्वेन क्रियायां स्वत एकत्वसत्त्वेन सर्वथा तद्प्राप्त्यभावादिति बोद्ध्यम्।

यत्तु-कैयटेन प्रथमातिक्रमे कारणाभावादनेकनियमबाधे गौरवाच्च प्रथमैकवचनस्यैवानेनोत्सर्गत्वं बोद्ध्यते इति 'तद्धितश्च' (१।१।३८) इति सूत्रे रूपप्सूत्रे

अन्वथेमइत्येव वदेतिति।

ननु पूर्वत्रानुवृत्तस्य सोरप्यत्रानुवृत्तिः स्यात्तथाचसौ विभक्तावे वैतस्य प्रवृत्तिः स्यादत आह।।साविदमोदस्येति। नन्वककारकस्येदम इदो लोपो हलादौ विभक्तावित्यर्थे इत इत्यादाविशाद्यादेशस्य साकच के चरितार्थस्य परत्वादनेन बाधे सकृदगति न्यायेनेशाद्वादेशो न स्यादत आह। अपीति वर्तत इति। इदानीं विभक्तावित्यस्य न फलमितिभावः। नन्दिदमाचष्टे इदूत तोभ्याभ्ययादेशे आभ्यामितिलोपे इम्यामिति भेदादत आह। अकइति। ननु यस्मालरोनास्तिसोंऽत्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चोक्तम्; तन्न, स्वादिसूत्रे प्रथमायाः प्राथम्येऽपि नियमशास्त्रपर्यालोचनया द्वितीयाया अपि तत्त्वेन तस्याविनिगमकत्वात्, 'निजां त्रयाणाम्' इत्यत्र त्रयाणाङ्ग्रहणेन 'आद्युदात्तश्च' (३।१।३) इति सूत्रे आदिग्रहणेन च पाणिनिना स्वशास्त्रे एतन्न्यायानाश्रयणज्ञापनाच्च।

अत्र प्रथमा सम्पूर्णाऽव्येभ्यः, प्रथमाया एवैकवचनम् इत्यादिपक्षान्तराणि अर्वाचीनग्रन्थे दृश्यन्ते, तान्यसङ्गतानि उक्तरीत्या तेषामुक्तिसम्भवाभावात्। घट इत्युक्ते एकत्वनिश्चयस्तु द्विवचनाद्यभावेन द्वित्वाद्यप्रतीतौ सङ्ख्यावदर्थत्वेन सत्वभूतत्वात्, प्रकरणाच्च। 'बुहुषु' (१।४।२१) इत्यादिसूत्रभाष्योक्तपक्षास्त्वेकदेशिनो, न सिद्धान्तिन इति तत्त्वम्।

असर्वविभक्तिरितिबहुब्रीहिलभ्यो विशेष्य इत्याह-तद्धितान्त इति। केवलस्य तद्धितस्य प्रयोगाभावेन फलाभावात्सञ्ज्ञाविधावपि तदन्तविधिरिति भावः।

नन्वेवमपि 'पचतिकल्पम्' इत्यादावतिव्याप्तिः उक्तरीत्या तेषामसर्वविभक्तित्वात्, उभयशब्दे चातिव्याप्तिः, ततो द्विवचनानुत्पादाद्; अत आहपरिगणनमिति। एवञ्च सूत्रं न कार्यमिति भावः।

तसिलादय इति। 'पञ्चम्यास्तसिल्' (५।३।७) इत्यारभ्य 'द्वित्र्योश्च धमुञ' (५।३।४५) इत्यन्ता इत्यर्थः। शस्प्रभृत्तय इति। 'बह्वल्पार्थाच्छस्' (५।४।४२) इत्यारभ्य 'अव्यक्तानुकरणाद्' (५।४।५७) इतिडाजन्ताः। यस्तु-'इवे प्रतिकृतौ' (५।३।९६) इत्यधिकारे 'प्रत्नपूर्वविश्वेमात्थाल्छन्दसि' (५।३।१११) इति थाल्, तस्य स्वरादौ 'आस्थालौ' इति पाठेनाव्ययत्वम्। तत्र 'इण आसिः' (उ०सू० ६७) इत्युणादिसूत्रविहित असिः। 'अयाः' इत्युदाहरणम्। आसिविधायके छन्दसीति नानुवर्त्तते। एवञ्च लोके

इत्यकारस्यांतत्वेऽर्थसहितस्यान्य पदार्थत्वेचेष्ट सिद्धाविदं व्यर्थमत आह। आदिरिति। ननूडिदमित्यादिना विभक्तेरुदातत्वेशेषनिधातेनेदमोऽनुदात्तत्वेसिद्धेऽनुदात्त इति व्यर्थमत आह। अनुदात्तत्वं त्विति। अन्यार्थतापत्तेरिति। मोराजीतिवदेमिरित्यादौविकारा भावार्थ तापत्तेरिति अर्थः। परत्वादुपधा दीर्घः।। हलङ्यादिलोपः। ततोनलोपिति।। मूलस्यततोदीर्घानंतरं नलोपः। हलङत्रादिलोपः यः प्राप्तोनलोपः सकृद्गति न्यायान्नेति योजनेतिभ्रमवारणाय न लोप इत्यस्थार्थमाह। नकारेति नस्य लोप इति षष्ठी समासः न तु निषेधार्थको नञ् तत इत्यस्य पुनः प्रसंग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विभक्तिरहितप्रयोगायाव्ययत्वमावश्यकम्। अत्र च स्वरादावासिपाठ एव लिङ्गम्। 'अयासावयसा' इति तु च्छन्दासम्।

अम् आमिति। 'अमु च च्छन्दसि' (५।४।१२) 'किमेत्तिङ्' (५।४।११) इति विहितौ। कृत्वोर्था इति। कृत्वसुच्सुज्धाः। तसिवती इति। 'तेनैकदिक्' (४।३।११२) 'तसिश्च' (४।३।११३) 'तेनतुल्यम्' (५।१।११५) इत्यादिविहितौ। एवञ्च स्वरादिषु वदिति पाठे फलं चिन्त्यम्। नानाञाविति। 'विनञ्भ्यां नानाञौ न सह' (५।२।२७) इति विहितौ।

कृन्मेजन्तः (१।१।३९)। कृद्यो मान्त इति। 'कारयाम्' इत्यामन्ते 'आमः' (२।४।८१) इति लुकेष्टसिद्धिरिति भाव इत्याकरे विस्तरः। कृदन्तस्य तु नैतद् विशेषणं गणे प्रशाम्शब्दपाठात्। अन्यथा श्रुत्या मान्तत्वेन प्रत्ययलक्षणात्कृदन्तत्वे चानेनैव सिद्धे तत्पाठवैयर्थ्यं स्पष्टमेव। तेन प्रतामौ, लवमाचक्षाणो 'लौः' इत्यादौ नातिप्रसङ्गः। न च 'आधये' 'हे आधे' 'कुम्भकारेभ्यः' इत्यादौ गुणे एत्वे च कृते एजन्तत्वेन सञ्ज्ञापत्तिः। न च बहिरङ्गत्वं गुणादेः, सञ्ज्ञायाः कार्यार्थत्वात्सञ्ज्ञाकार्यस्य तत्त्वेन सञ्ज्ञाया अपि तत्त्वात्; लिङ्गसंङ्ख्याद्यन्वयित्वेऽप्यव्ययीभावादाविवात्राप्यापत्तेः – इति वाच्यम्, सन्निपातपरिभाषया बाधात्। न च तया सन्निपातविघातकलुको बाधेऽपि सञ्ज्ञाबाधे मानाभाव इति वाच्यम्, एज्विषयसन्निपातनिमित्तकाऽऽत्वीयसन्निपातविघातकस्य 'क्ङिति च' (१।१।५) इति निषेधस्य तया निवृत्तावपि 'उपादास्त' इत्यत्र कित्त्वापत्तेः। कित्त्वफलन्तुक् तत्सन्नियोगशिष्टेत्वसिद्धिः। एवञ्च 'उपादिस्त' इति स्यात्। तत्र हि किदिति व्यपदेशातिदेश एव, इत्वप्रवृत्तिकाले कित्कार्यस्यातिदेशस्याभावात्। तस्मादनया सन्निपातविघातकशास्त्रस्येव तच्छास्त्रप्रवृत्तिनिमित्तातिदेशसञ्ज्ञानामपि निवृत्तिरवश्यं वाच्या।

विज्ञानात् हलङ्यादि लोपानंतर मित्यर्थ इति भावः। नङि संबुद्धरयोः। अधि चर्मेत्यादौ तु इदं न प्रवर्तते प्रत्यासत्या ङिनिमित्तक पदत्ववत्प्रातिपदिकांतं यच्छब्द रूपं तदंतस्यनस्यऽवै परतो लोपोनेत्यर्थात्तध्वनयन्वक्ष्यति। एतल्लब्ध मेवेति। अन्यत्रासंभावाच्चर्मतिलादौ चङवुत्तर पदइतिनिषेधेत्येतल्लब्धमित्यर्थः। सर्वविभक्तयंतावयक इति। सर्वविभक्तयंतार्थवाचक षष्ठयंतावमव्रक इत्यर्थः।

एकेदेशेन्वयासंभावदाह।।सामर्थ्यादितितुक् एवेति।। अन्यत्रासंभवादिति भावः। ग्रहणमिति। स्वरसाह चर्मादितिभावः। ननुविधिनियमसंभवेलाघवाद्वि धेरेव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साक्षात्परम्परया वा स्वसननिपातविघातकस्य स्वयमनिमित्तमिति परिभाषाऽर्थः। एतेनात्राकजादि स्यादित्यपास्तम्, अकजाद्येकवाक्यतापन्नाव्ययसञ्ज्ञायां गुणादेरसिद्धत्वाच्च। लुगेकवाक्यतापन्ना तु न गुणादितोऽन्तरङ्गा, उभयोरपि शब्दतः सुबाश्रयत्वात्।

अव्ययादा (२।४।८२)। 'ण्यक्षत्रिय' (२।४।५८) इत्यतो लुगनुवर्त्तते। विहितेति। अङ्गसञ्ज्ञायां विहितत्वांशप्रवेशेन विहितप्रत्ययनिरूपिताङ्गविशेषणादित्यर्थः। आप्सुब्भ्यामाक्षिप्ताङ्गस्याव्ययरूपस्यैव प्रत्यासत्त्या ग्रहणमिति भावः। तेन 'कुम्भकारेभ्यः' इत्यादौ सन्निपातपरिभाषयाऽव्ययसञ्ज्ञानिवृत्तिद्वारा लुङ्निवृत्तिपर भाष्येण न विरोधः।

अत्युच्चैसाविति। अत्राधिकरणशक्तिप्रधानस्यापि उच्चैस्शब्दस्य वृत्तिविषये शक्तिमत्प्रधानत्वाद् द्वितीयान्ततया 'अत्यादयः क्रान्ताद्यर्थे' (का०वा०) इति समासे अवयवभूतोच्चैःशब्दादव्ययात्परत्वेन लुक् स्यात्। समुदास्य तु नाव्ययत्वं लिङ्गाद्यन्वयित्वादित्यभिमानः। समुदायस्यापि तत्वमाशङ्क्य समाधत्ते– यद्यपीति। तदन्तेति। शब्दस्य विशेष्यत्वात्। 'प्रयोजनं सर्वनामव्ययसञ्ज्ञायाम्' इति वाचनिकस्तदन्तविधिरिति भावः।

न गौणे इति। अयं भावः – सामानाधिकरण्यसम्बन्धेन लिङ्गाद्यनन्वय्यर्थबोधकत्व-विशिष्टावयवपदवत्त्वेन हि अव्ययपदं बोधकमिति तादृशमहासञ्ज्ञाकरणात्तादृशार्थानां गणेऽनुकरणावश्यकत्वे इतरेषामनुकरणे मानाभावेन समुदायस्य नाव्ययत्वमिति। वस्तुतोऽत्रार्थस्य प्रधानाप्रधानन्यायेन सर्वनामसंज्ञासाहचर्येण च प्रसिद्धान्तरङ्गपदान्तरानपेक्षानुपसर्जनीभूतस्यैव लिङ्गाद्यनन्वयिनो ग्रहणेन-न समुदायस्य, नाप्यवयवस्य सञ्ज्ञा। अत एव भाष्ये सर्वनामसञ्ज्ञासूत्रस्थोपसर्जनप्रतिषेधानुवृत्या

ज्यायस्त्वेन साहचर्यस्य सर्वत्रानाश्रयणेन च दण्डिष्वित्यादौ न लोपस्यासिद्धत्वं स्योदेवेत्यत आह। विरूप्यापत्तेरिति। नलो पः सुविंति सूत्रे पूर्वत्रासिद्धमित्यस्य संबंधेन स्व रादिषु पूर्वत्रेत्यस्य संबंधः। सुब्विधिविषयेऽसंबंधइत्येवं रूप वैरुप्यापत्तेरित्यर्थः। सूत्रार्थादिति। संज्ञायांदत्तदण्डिनौ दण्डिदत्ताविति भाष्ये उदाहतत्वेनैतादृश सूत्रार्थादित्यर्थः। एतादृशार्थस्यफलं तु सुद्युपटावित्यादि बोध्यम्। संज्ञाकृतेति। अतिस्त्रय इत्यत्रेयङपेक्षया घेर्ङितीतिगुणेत्यर्थः। वहिर्भूतनिमित्तक संज्ञाकृतेति क्रोष्ट्रीत्यादौ संज्ञाकृतं चेति'' ङीबपेक्षयातृज्वत्वस्य बहिर्भूत सुब्निमित्तकांग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'अत्युच्चैसो' इत्यादावव्ययत्वाभावमुक्त्वा तत्प्रत्याख्यानरीत्यैवात्राप्येतत्प्रत्याख्यानमुक्तम्। एवञ्च विहितविशेषणमङ्गाक्षेपो वा व्यर्थ एव अव्ययात्परत्वस्याप्यभावात्। 'उच्चैरो' 'उच्चैराभ्याम्' इत्यादेरभिधाने तु न मानम्। अत एव भाष्ये एतन्नोक्तम्।

अलिङ्गत्वादिति। नन्विदं 'सदृशं त्रिषु' इति विरुद्धगत आह – लिङ्गेत्यादि। अयं भावः – यथोपक्रमोपसंहाराभ्यां ब्रह्मपराया अप्यस्याः श्रुतेर्भाष्यप्रामाण्यादत्रोपसंहारः, तथा तत्प्रामाण्यादेव लिङ्गाद्यभावपरताऽपीति। विभक्तिवचनशब्दौ कारकसङ्ख्यापरौ, प्रत्ययपरत्वेऽन्यतरवैयर्थ्यापत्तेः। लिङ्गेषु इत्यादि विषयसप्तमी। तत्तद्विषयं सादृश्यञ्च लिङ्गाद्यभावाश्रयत्वेन। लिङ्गाभावेन सादृश्यमव्ययीभावातिरिक्तविषये तस्य लिङ्गयोगसत्त्वात्। सङ्ख्याभावस्तु सर्वसाधारणः। तदभावादिसादृश्यादेव, यत् विविधं रूपं तन्न प्राप्नोतीत्यर्थः।

प्रसङ्गादाह – वष्टीति। वशेश्छान्दसत्वेनेह प्रयोगाश्चिन्त्यः। भागुरिः आचार्यः। अपिसाहचर्यादवेऽप्यादेरकारस्यैव लोपः। इदं भाष्ये न दृश्यते। निश्दिशोरिगुपधलक्षणं केऽदन्तत्वादेव टाप्। क्विनि 'दिक्' इत्यपि। अत एव 'ङ्याप्प्रातिपदिकात्' (४।१।१) इति सूत्रे 'आब्ग्रहणं न कार्यम्, अकारान्ताट्टाप् तत्रान्तवद्भावात्प्रातिपदिकत्वेनैव सिद्धम्। यस्तर्ह्यनकारान्तात् 'क्रुञ्चा' उष्णिहा' देवविशा' इति। अत्राप्यकारान्तादेव; क्रुञ्चानालभेत, उष्णिहककुभौ, देवविशमिति। अन्त्ये 'कप्रत्यय एवंविषयः' इत्युक्वा 'बहुराजेति डाबन्तार्थमाब्ग्रहणम्' इति भाष्ये उक्तं सङ्गच्छते। तस्माद् 'वाचा' इत्यसाध्वेवेति शिवम्।

इति अव्ययानि।

संज्ञाकृतं चेत्यर्थः। इदं तुग्ग्रहणं तद्भावे तुगभावे। ननुपदस्येत्यस्याप्यत्र संबंधेन हलि परे रेफवांतस्य धातोरूपधाया इक् तदंतस्य पदस्य दीर्घोभवतीत्यर्थे दधिशब्दपूर्वक रैशब्दाद्वाक् शब्दाच्चणिचि टि लोपेणिजंतादचोपति दधीर्यः दधीव्य इत्यादावेव स्यान्नतु प्रति दीव्रः गीयति इत्यादावत आह। पदस्येतीति। अतएव न मेति निषेधो न पदांत सूत्रे प्रतिदीव्र इति भाष्योदाहरणंच संगच्छते। हन् नीयतेरिति। हननप्रकृतिक क्यजंतात् हन् धातु प्रकृतिकानीपरंत प्रकृतिकाचार क्विबंलाद्वेत्यर्थः। ननु न कारेपरे कुत्व विधि यमान मव्यवहित नकारासंभवाद्येन नाव्यवधान न्यायेन हननमित्यादावपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्रियाम् (४।१।३) अचेतनखट्वावृक्षादिसाधारणं लिङ्गन्तु सत्त्वादीनां गुणानामुपचयापचयस्थितिरूपं क्रमेण पुंस्त्रीनपुंसकाख्यम् 'एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम्' इति भाष्योक्तेरर्थनिष्ठं केवलान्वयि, इयं व्यक्तिः, इदं वस्तु, अयं पदार्थः, इति त्रिविधव्यवहारस्य पदार्थमात्रे सत्त्वात्। केनचिच्छब्देन किञ्चिद्वस्तु एकैकविशिष्टमेव, केनचित्पर्यायेण लिङ्गाद्यविशिष्टं, केनचिल्लिङ्गत्रयविशिष्टमिति लिङ्गानुशासनादितो निर्णेयम्। तत्र

'स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः'

इत्यादिलौकिकलिङ्गासम्भवे शास्त्रीयं कार्यं शास्त्रीये उक्ते एव। तत्सम्भवे तु शास्त्रीयविशिष्टे लौकिके। शास्त्रीयमपि शब्दतो बुद्ध्यते, तथाऽनुभवात्। उपचयापचययोः स्थितेरपि सत्त्वेन तन्मात्रविवक्षायां 'सामान्ये नपुंसकम्' इति प्रवाद इत्यन्यत्र विस्तरः। अत इति। वर्णग्रहणात्तदन्तविधिस्तदाह–अकारान्तस्य चेति। वाच्यं यत् स्त्रीत्वमिति। तद्वाच्यार्थगतं यत्तद्वाच्यं स्त्रीत्वमित्यर्थः। एवं व्याख्याने फलमग्रे स्फुटम्। तन्न द्योत्ये इति। प्रत्ययार्थत्वे हि तस्य विशेष्यतापत्तिः। द्योत्यस्य तु विशेषणत्वमेवेति स्पष्टमाकरे। वागादिषु विनाऽपि टाबादिकं तस्य बोधाच्च। अत एव 'व्यावक्रोशी' इत्यादौ 'कर्मव्यतिहारे णच् स्त्रियाम्' (३।३।४) इति णचि 'णचः स्त्रियाम्' (५।४।१४) इत्यजि च ङीप्सिद्धिः, 'व्यतिलुनीते' इत्यादौ 'द्विर्बद्धं सुबद्धं भवति' इति न्यायेन समुच्चयस्य दृष्टत्वात्। टाप्स्यादिति। स चाधिकारात्प्रातिपदिकादेव, तच्चसन्निधानादजादिरूपमेव।

नन्वजादिष्वकारान्तपाठो व्यर्थोऽत इत्येव सिद्धेरत् आह-अजाद्युक्तिरिति। येननाप्राप्तिन्यायादिति भावः। एतेन ङीपि कृतेऽपि लिङ्गविशिष्टपरिभाषया टाप् चरितार्थ

स्यादत आह। नेत्वित्यारम्य स्पष्टं भाष्य-इत्यंतेन।

धृघातोर्यथाधर्मः धृतं घृणा इति त्रण्येव रूपाणि तद्वत्

असंजात विरोधि न्याये न परिभाषा सहकारेण वाक्यार्थे वृत्ते लक्ष्य संस्कार वेलायाम व्यवधान संभवेन सामर्थ्यात्स्थानिवत्वस्या प्रवृत्तिरिति तदाशयः। कुव्यवाये होदेशेष्विति। हादे शेषुसत्सु कवर्गव्यवाय इत्यर्थे प्रत्यासत्या हकारस्थानिक कवर्गव्यवाय इत्यर्थः, स्तुघ्न इति। स्तुचोहन्यते यत्रेति घञर्थेक विधानमिति कः। अंचु घातोरिति। नत्वचअचीत्यस्य अप्यच् प्रत्याहारस्येत्यर्थः। व्याख्या नादिति। ऋत्त्विक्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यपास्तम्। ननु प्रत्ययविधौ पञ्चगम्यायुक्तत्वेनाजादिभ्याष्टाप् स्त्रीत्वे द्योत्वे इत्यर्थ एव युक्तः, स्त्रीत्वञ्च प्रत्यासत्त्या प्रकृत्यर्थनिष्ठमेवेत्यत् आह-अजादिभिरिति। व्याख्यानादेतत् षष्ठ्यन्तमिति भावः। अन्यत्र तु स्त्रियामिति तदन्तस्यापि विशेषणं व्याख्यानादेव। एवञ्च पञ्च सुत्वानो यस्यां सा पञ्चसुत्वरीत्येव।

पञ्चाजीति। पञ्चानामजानां समाहार इति द्विगौ 'अकारान्तोत्तरपद' इति स्त्रीत्वे 'द्विगोः' (४।१।२१) इति ङीप्। अजादिभ्य इति व्याख्यानेऽमहत्वपूर्वग्रहणेनानुपसर्जनाधिकारेण च 'वनो र च' (४।१।७) इत्यत्रेवात्रापि तदन्तविधिसम्भव इति भावः। न च तदन्तविधावपि श्रुतत्वात्स्त्रियामित्यजादीनामेव विशेषणमिति वाच्यम्, अनुपसर्जनाधिकारेण तदन्तग्रहणस्येव स्त्रियामित्यस्य तदन्तविशेषणत्वमित्यर्थस्यापि बोधनात्। अत्र हीति। समासेऽजशब्दसत्त्वेऽपि समाहारनिष्ठं स्त्रीत्वं समुदायवाच्यं नाजशब्दमात्र वाच्यम् सामर्थ्येनाजादिमात्रवाच्यस्त्रीत्वस्यैव ग्रहणादिति भावः चटकेति। क्षिपकादित्वादित्वं न। ह्रस्व इति। असंज्ञायान्तु भ्रस्त्राफलेत्येव। 'सम्भस्त्रा' (का०वा०) इति, 'सदच्' (का०वा०) इति, 'मूलान्नञः' (का०वा०) इति च 'पाककर्ण' (४।१।६४) इति प्राप्तस्य ङीषो बाधनार्थम्। एवञ्च 'श्वेतफला' त्रिफला' इत्यप्यत्र बोद्धव्यम्।

शुद्रा चेति। जातिलक्षणङीषोऽपवादः। जातिश्चेद्वाच्येत्यर्थः। 'पञ्चशूद्री' इति समाहारे जातिवाचकत्वाभावात् शूद्रशब्दार्थगतस्त्रीत्वाभावाच्च न दोषः। जातिश्चेदित्यस्य कृत्यमाह – पुंयोगे त्विति। न चात्र गौणत्वं सदृशलाक्षणिकस्यैव गौणत्वात् गौणमुख्यन्यायस्य पदकार्यविषयत्वाच्चेति भावः। अमहत्पूर्वेत्यत्रापि जातिश्चेदिति सम्बद्ध्यते महत्वपूर्वो न टापं

सूत्रेंऽचेरेवप्रसिद्ध त्वान्नपुंसक स्येति सूत्रेपुनरच् ग्रहणाच्चेत्यर्थः। अकारलोपाकरणपूर्वकेति। अकार लोप करणेत्यकार लोपवन्नलोपस्याप्यविवक्षा स्यादितिभावः। व्याख्यानादिति। झल्ग्रहणाकर्षणादंचु साहचर्याद्वेत्यर्थः। नियत विषया इति धृधात्वादिर्वदातिभावः। न तुमधवा बहुल मित्य त्रांगाधिकारान्मधव तीत्यत्र पुंयोगेन स्त्रियां वृत्तीनांत लक्षणे ङीपि ततस्त्रादेशे न नांतत्व रूपनिमित्तस्य विनाशादकृतव्यूहा इतिपरिभाषया नांतलक्षणङी बेवन स्यादत आह्। उगितश्चेतीति। एवं च पूर्वं सुपि पंचभिः क्रोष्ट्रीभिरि तिसूत्रस्थभाष्य प्रयोगादंग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लभते जातिश्चेद्वाच्येति तदर्थः। तत्फलन्तु जात्यन्तरनिवृत्तिपरत्वे पूर्वञ्जातिमात्रविवक्षया महच्छब्दस्य शूद्रशब्देन मृगक्षीरकुक्कुटाण्डवत्समासे ततः स्त्रीत्वविवक्षायां महती शूद्रेत्यर्थे महाशूद्रेति टाबेव। अमहत्पूर्वेत्यत्र जातिरित्यस्यासम्बन्धेऽनुपसर्जनाधिकारेण प्रधानेन तदन्तविधिसत्त्वात् 'जातेः'(४।१।६३) इति ङीष् स्यात्। शूद्रशब्दे जातिवाचकत्वस्य, स्त्रीत्वे शूद्रशब्दार्थसमवेतत्वस्यापि सत्त्वेनात्र टाप् निर्बाध इति भाष्यप्रदीपोद्द्योते निरूपितम्। महाशूद्रीति। 'आभीरी तु महाशूद्री' (अ०को० २।६।१३) इत्यमरः। ब्राह्मणादुग्रकन्यायामाभीरः। नृपाच्छूद्रायामुत्पन्नोग्रजातिकन्या। अत्रानुलोमसङ्कराणां मातृजातिवृत्तित्वात्तत्र तां जातिमारोप्य शूद्रशब्दप्रयोग इत्ययं शूद्रशब्दोऽर्थवानेवेति शूद्रशब्दार्थसमवेतस्त्रीत्वमप्यत्रास्ति। तदर्थसमवेतस्त्रीत्वेऽपि शूद्रशब्दादेव टाप् स्यान्न तदन्तात्, 'ग्रहणवता' (प०भा० ३१) इति निषेधादिति तदन्तर्विधिज्ञापकता नासङ्गता। अत एव शङ्खस्मृतौ 'ब्राह्मणक्षत्रियवैश्यैः क्षत्रियावैश्याशूद्रासूत्पन्नाः क्षत्रियवैश्यशूद्रा एव भवन्ति' इत्युक्तमिति भावः।

यत्तु शूद्राभीरमित्यादौ सामान्यविशेषवाचित्वाद् द्वन्द्वाभावमाशङ्क्य 'आभीरा जात्यन्तराणि' इति 'त्यदादीनि' (१।१।७४) इति सूत्रे भाष्ये उक्तं, तत्तु अनारोपाभिप्रायेणेति न तद्विरोधः। अजरादिकृतिगणः। तेन 'न मुने' (८।२।३) इति सूत्रे 'टायामादेशः' इति भाष्य प्रयोगः सिद्धः। प्रथमाध्यायचतुर्थपादे 'चमसवदविशेषात्' (ब्र०सू० १।४।८) इति सूत्रे शाङ्करभाष्यवाचस्पत्ययोरजायां 'छागा' इति टाबन्तप्रयोगो दृश्यतेऽतश्छागशब्दोऽप्यजादिष्विति केचित्।

उगितश्च (४।१।६)। उगिच्छब्देन प्रातिपदिकस्य विशेषणत्तदन्तविधिः। प्रत्यविधाविति

संज्ञामात्राश्रयघिधौसन्निपात परिभाषाया अप्रवृत्तेस्त्रयादेशोत्तर मुगितश्चेतिङीवितिभावः। इदंप्राचामनुरोधने ''वस्तुतोऽकृत व्यूह परिभाषाया भाष्यानुक्तत्वादभावेन नांतलक्षणेङीपिवर्णाश्रयः प्रत्ययोवर्ण विचालस्यानिमित्तमिति सन्निपातपरिभाषाया भाष्येऽनित्यत्वेषु परिगणानात्र यादेश इतित्त्वम् न केवलं स्वरकृतो विशेषः किंत्वन्य कृतोपितदेवाह। किंचेति। यण् प्रसंग इति। मघोन इत्यत्रावादेशस्याद्युपलक्षणमिदमि त्यादिनिर्देशैरिति। आदिना यूनस्तिः श्वयुव मघोनामित्यनयोर्ग्रहणम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निषेधस्तु न 'उगिद्वर्णग्रहणवर्जम्' इत्युक्तेः तदाह-उगिदान्तादिति। भवतीति। 'व्यपदेशिवद्भावोऽप्रातिपदिकेन (प०भा०) ३२) इति निषेधस्तु सूत्रोपात्तान्तादिशब्दविषय एवेति भावः। भवतु इति उगितः प्रातिपदिकस्यापि सत्त्वात् 'प्रत्ययमात्रग्रहणाभावेन 'प्रत्ययग्रहणे' (प०भा०२३) इति परिभाषाया अप्रवृत्त्या निर्यवमती' इत्यादौ न दोषः। अञ्चतेस्तित्वति। नलोपिनोऽञ्चतेरित्यर्थः। नियमोऽपि नलोऽप्यञ्चतिविषय एवेति निरूपितम्।

व्यपदेशिवद्भावलब्धमर्थं स्पष्टप्रतिपत्तये आह-वन्नन्तादिति। नन्वेवं प्रत्ययग्रहणपरिभाषया 'बहुधीवरी' न सिद्ध्येदत आह-तदन्ताच्चेति। तत्परिभाषालब्धवन्नन्तेन प्रातिपदिकस्य विशेषणादिति भावः। सामान्येति। सूत्रेवनुबन्धानुच्चारणात्तदनुबन्धकपरिभाषाया विषयो नेति भावः। इदं 'मतुवसोः' (८।३।१) 'जाग्रो वि' (७।३।८५) इतिसूत्रेषु भाष्यकैयटयोः स्पष्टम्। इदं सूत्रं न ङीब्विधायकं,किन्तु 'ऋन्नेभ्यः' (४।१।५) इति प्राप्तङीबनुवादेन तत्सन्नियोगशिष्टरभावमजात्रविधायकम्, उभयविधौ गौरवात्। शर्वरीति। शृधातोः 'अन्येभ्योऽपि दृश्यते' (३।२।१७८) इति वनिप्। एतत्सिद्ध्यर्थमाह-हृश्ताद्विहित इति। अर्थवतो ग्रहणान्नेह 'मघोनी'। कनिप्रत्यान्तनिपातितस्येदम्।

बहुब्रीहौ वा (का०वा०)। 'अनो बहुब्रीहेः' (४।१।१२) इति प्रतिषेधे प्राप्ते इदम्। एतचच्व वार्त्तिकम् 'अन उपधा' (४।१।२८) इतिसिद्धङीबनुवादेन रादेशविधायकम्। अत एवेदमनुपधालोपिनि 'सुपर्वा' इत्यादौ नेति विकल्पोऽर्थसिद्ध। 'वनो र च' (४।१७) इत्येतत्तु 'ऋन्नेभ्यः' (४।१।५) इत्येतन्ङीब्विषयमेवेत्युक्तम्। पक्षे डाबिति। तेन द्विवचनेरूपत्रयम्।

इगंतेन। अभिप्रायसूचक शरीर भवव्यापारेण रोमांचेन निमिषितेनाक्षिव्यापारेण चेष्टितेन कामपरिस्पंदेन प्रथमैकवचन मिति एतदपि वाजमर्वस्त्वेति प्रयोगादेव ज्ञायत इति भावः। व्यावर्त्य इत्यर्थ इति। एवंच प्रत्युदाहरणंत्वनवार्णावित्या दिवोध्यम्६६ एतेनानर्वेति द्वचंन विकल मित्यपास्तम्। ननु प्रश्लेषस्य पर्यायेण सर्वाकार विधानेन चारितार्थ्यान्न तेनानु नासिक वारणं भविष्यतीत्यत आह्। भाष्ये त्विति। अष्ट न इति सूत्रेस्थे भाष्ये इत्यर्थः। केचित्त्विति। कैयटा दयइत्यर्थः इदं सर्वमिति आकार प्रश्लेष निरनुनासिकोच्चारण सामर्थ्याम्यां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृतसमासान्त इति। उत्तरसूत्रे ऋच्यभिधेयायां तस्यैव सम्भवेनार्थाधिकारानुरोधादिति भावः। तेन पादयतेः क्विबन्तस्य ग्रहणं न। द्विपदीति। द्वौ पादावस्या इति बहीब्रीहौ 'संख्यासुपूर्वस्य (५।४।१४०) इति पादशब्दान्तलोपस्ततो ङीपि पादः पत्।

टाबृचि (४।१।६)। पूर्वसूत्रप्राप्तङीपोऽपवाद इति प्राञ्चः, तच्चिन्त्यम्। 'शेषाद्विभाषा' (५।४।१५४) इतिसूत्रस्थभाष्यविरोधात्। तत्र हि प्रतिपदविहितसमासान्तानां कपो वैकल्पिकत्वेन कबभावे सावकाशत्वमुक्तं, तद्रीत्याऽस्यापि पूर्वसूत्रस्य वैकल्पिकत्वेन तदभावे सावकाशत्वात्। 'बहुब्रीहेरूधसः' (४।१।२५) इत्यत्रापि भाष्ये स्पष्टमेतत्। अत एव 'ङ्याप्प्रातिपदिकात्' (४।१।१) इति सूत्रे पादशब्दसमानार्थमकारान्तं पदशब्दमङ्गीकृत्यैतत्प्रत्याख्यातम्, 'श्रूयते च छन्दसि तस्याः सप्ताक्षरमेकं पदम्, एकः पाद इत्यर्थः' इति च भाष्योक्तं सङ्गच्छते। तदा हि ऋच्यपि 'एकपदी' एकपात्' इतीष्यत एव। एवञ्च 'एकपाद् ऋक्' इत्यस्य सूत्रमते सिद्धये 'टाबृचि' (४।१।६) इत्यत्राप्यन्तरस्याङ्ग्रहणमनुवर्त्यम्। पादन्तस्य ऋच्यनभिधानमिति तु न भाष्याशयः। ङीबन्तप्रयोगस्य सूत्ररीत्येष्टस्यासिद्ध्यापत्तेरिति बोद्धव्यम्। केवलापाच्छब्दस्य स्त्रियाम् ऋचि वा ऽसम्भवेनात्र तदन्तविधिः।

असिद्धत्वादिति। आपः परिगणितेष्वभाववान्न तत्र नलोपासिद्धत्वम्। इदञ्च कार्यकालपक्षे। अयं निषेधः 'प्रियपञ्चा द्रौपदी' इत्यादौ तदन्तेऽपि। 'स्त्रियां यत्प्राप्नोति तन्न' इत्यर्थात् 'अन उपधा' (४।१।२८) इति ङीबपि नेति बोद्धव्यम्। ध्वनितञ्चेदं भाष्ये। परे त्वत्र बहिरङ्गासिद्धत्वाप्राप्तिः नलोपस्य तत्वाभावात्। सञ्ज्ञाकृतबहिरङ्गत्वानाश्रयणात्। 'पञ्च' इत्यत्र तु स्त्रियां यत्प्राप्नोति तन्नेत्यर्थाश्रयणबलाद् भूतपूर्वषट्त्वाश्रयो निषेधः। अत एव

वारणमित्यर्थः। तत्प्राप्तस्यापीति। जात्यभेदकत्व प्राप्तस्यापीत्यर्थः। अपिनात्यदादीनामित्यादावणुदित् सूत्र प्राप्तस्य संग्रहः। अतएवाप्रत्यय ग्रहणेन जात्यभेदकत्वयोर्निषेधादेव! प्राप्नोतीति। तपर सूत्रस्य तु नाप्रत्यय इत्यनेन निषेधः।। तपर सूत्र स्यपर त्वात्तेनैव निषेधस्य बाद्य संभवात् गुणा अभेदक। इत्यस्य त्वजुदिदित्येव सिद्धेऽणग्रहणादेक देशानुमत्याऽनुवादादितिभावः। नन्वणुदित् सूत्रसंबद्धभप्रत्यय ग्रहणं कथं सर्वनिषेधकमत आह्। अप्रत्यय इति च वाक्य भेदेनेति।। सर्वेति अणुदित सूत्र जात्य भेदकत्वप्राप्त सर्वेत्यर्थः। तत्र निषेधे। अतएव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षट्सञ्ज्ञायां नलोपासिद्धत्वस्य न फलमिति 'नलोपः सुप्' (८।२।२) इत्यत्र भाष्ये उक्तमित्याहुः।

मनः (४।१।११)। न ङीविति। अयम्, 'अन' (४।१।१२) इति च उक्तरीत्या टाब्ङीपोरुभयोरपि निषेधः। एतेन 'सीमभ्यां' 'बहुयज्वभ्यां' 'बहुधीवभ्याम्' इत्यत्र डाबङीपोरभावे नलोपे टाब् दुर्वार इत्यपास्तम्।

डाबुभा (४।१।१३)। उभाभ्यांग्रहणाभावे सन्निहितस्थान एवानुवृत्तिः सम्भाव्येत। वचनसामर्थ्याद् डाब्निषेधयोः पर्याये सिद्धेऽन्तरस्यामिति स्पष्टार्थम्। भाष्ये त्वन्यतरस्याङ्ग्रहणं वाक्यभेदेन 'अनो बहुब्रीहेः' (४।१।१२) इत्यनुवर्त्य ततः पक्षे 'ऋन्नेभ्यः' (४।१।५) इति ङीबर्थम्। एवञ्च 'अन उपधा' (४।१।२८) इति सूत्रं नियमार्थमिति 'बहुधीवरी' इत्यत्र 'ऋन्नेभ्यः' (४।१।५) इती ङीबिति तत्सन्नियोगेन रेफादेशः सिद्ध्यतीति बहुव्रीहौ वेति वचनं प्रत्याख्यातम्। 'अन उपधा' (४।१।२८) इति 'ऋन्नेभ्यः' (४।१।५) इत्यस्यैवानुवाद इति नियमस्य विधिमुखेन प्रवृत्तावपि न दोषः।

अन उ (४।१।२८)। 'बहुब्रीहेरूधसः' (४।१।२५) इत्यतो बहुब्रीहेरिति 'सङ्ख्याऽव्ययादेः' (४।१।२६) इत्यतो ङीबिति चानुवर्त्तते। अनुपसर्जनादित्यनुवृत्तमप्यत्र न सम्बद्ध्यते तस्य गृह्यमाणविशेषणतया गृह्यमाणस्य चान्नन्तबहुब्रीहाव नुपसर्जनस्यासम्भवात्। ध्वनितञ्चेदं 'वनो र च' (४।१।७) इति सूत्रे भाष्ये। तत्र हि 'अनो बहुब्रीहेः' (४।१।१२) इत्यनन्तरम् 'उपधालोपिनो वा' इति न्यासो दर्शितः। विद्ध्यर्थमिदम्। अन्यतरस्याङ्ग्रहणं तु अनुपधालोपिसुपर्वेत्यादौ सावकाशयोर्डाप्प्रतिषेधयोरुपधालोपिन्यनवकाशेन ङीपा बाधो मा भूदिति। अन्यथा विधानसामर्थ्येन त्रयाणां पर्यायसिद्धौ तद्वैयर्थ्यं स्पष्टमेव।

निषेधेऽण् ग्रहण संबंधादेव। तेन। अण् ग्रहण संबंधेन। तस्याः परिभाषायाः व्यायकत्वं सर्व निषेधकत्वरूपम्। मदुक्त रीत्या व्याख्यानं चेति प्रतीयतोविधीयत इति व्याख्या नंचेत्यर्तः। सिद्धांतमत माह्। वस्तुतइति, तत इतोदित्यस्माल्लाघवाभावादिति। फलाभावेन तपरसूत्राप्रवृत्येकारादिमात्रस्य शक्तयभावात् प्रक्रिया कृतस्य नपुंसकेपिनुममोः प्रवृत्या प्रमाणकृतस्य च लाघवाभावादित्यर्थः। अन्य थाऽन्यतर कृते तपर करणाभावे लाघवे। कुरुत इत्यादाविति। अतउत्सार्व धातुक इत्यत्रोदिति तपरत्वाभावे नपुंसक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ककारादिति। अनेन वर्णमात्रं विवक्षितम्, अकार उच्चारणार्थ इति सूचयति। न च 'कारिका' इत्यत्राकारेण व्यवधानादाप्परककाराभावेनेत्वानापत्तिः, एकादेशेऽपि 'अचः परस्मिन्' (१।१।५७) इति स्थानिवत्त्वाद् व्यवधानमेव। आपि परतोऽकारस्य कात्पूर्वस्येत्यर्थेऽपि निर्दिष्टपरिभाषोपस्थितेव्यर्वहिते न प्राप्नोतीति वाच्यम्, आनन्तर्यांशोपस्थितावपि 'येन नाव्यवधानम्' इति न्यायेनाकारव्यवधानेऽपि प्रवृत्तेः। रथकट्यादौ च नातिप्रसङ्गः। क इति सङ्घातग्रहणे तु एतिका' इत्याद्यसिद्धिः अकच्यकारस्योच्चारणार्थतया कशब्दाभावात् 'न यासयोः' (७।४।४५) इति ज्ञापकेन वर्णग्रहणमित्येव ज्ञाप्यते। अकज्विधायकस्थमकारवैशिष्ट्यमादायेत्वप्रवृत्तिज्ञापकत्वाश्रयणे तु गौरवम्, तावताऽपि प्रत्ययस्थत्वांशानुपपत्तेश्च।

न च वर्णग्रहणपक्षे एतिका इत्यादावकारद्वयव्यवधानादित्वाप्राप्तिः, द्वयोरकारयोरेकादेशे टापा सहैकादेशस्य स्थानिवद्भावादेकेनैवाकारेण व्यवधानात्। पुनः स्थानिवत्त्वन्तु न; लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तेः। टापा सहैकादेशस्य स्थानिवत्त्वं बिना पूर्वैकादेशस्य स्थानिवत्त्वन्तु वक्तुमशक्यं, तस्य टाबेकादेशेनापहारेणादर्शनात्। अत एव 'न यासयोः' (७।३।४५) इतिनिषेधसार्थक्यम्।

स्थग्रहणन्तु स्पष्टार्थं, केवलककारस्य प्रत्यस्याभावात्। असुप इति बहुव्रीहिणा नाङ्गविशेषणम् 'बहुचर्मिका' इत्यादावित्वानापत्तेः, प्रत्ययलक्षणेनाङ्गस्य सुब्वत्त्वात्। 'न लुमता' (१।१।६३) इति तु नात्र लुमता लुप्ते प्रत्यये यदङ्गं तस्य कार्ये तन्निषेधप्रवृततेः। इदन्तु टाप्यङ्गमिति दिक्।

सर्विकेति। 'अव्ययसर्वनाम्नाम्' इत्यकच्। कारिकेति। करोतेर्ण्वुल्। नौशब्दात्स्वार्थे

त्वात्सोर्लुकाऽर्धमात्रालाघवेनोच्चारणे कर्तव्ये तपरत्व सामर्थ्याद्गुणाभावस्तत्रेति भावः। उपधाग्रहणमिति। नन्वनंत्य विकारेत्य सदेशस्येति परिभाषया पकाराकारस्य दीर्घो न भविष्यत्युपधाग्रहणं व्यर्थ मिति चेन्न। तदनि त्यत्वस्यानेन ज्ञापनात्। तदोःसः सौधात्वादेः षः सः णोन इत्यादौ न तत्परिभाषायाः प्रवृत्तिरितिभावः। न संनिपात परिभाषा विरोधादिति। पंचानामिति लिंगात्सन्निपातलक्षणो विधिस्त द्विघातस्यसाक्षादेवा निमित्तं न परंपर याऽनिमित्त मित्यर्थः। नन्वेवं कृन्मे जंत इति सूत्रस्थभाष्यस्य कुंभ कारेभ्यइत्यादौ सन्निप्रातपरिभाषायाः प्रवृत्ति पर भाष्य विरोध

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कः। सुपः परो नेति प्रसज्यप्रतिषेधेन व्याख्याने फलमाह-बहुपरिव्राजकेति। पर्युदासे हि समुदायस्य सुब्भिन्नत्वेन सुबन्तभिन्नत्वेन च ततः परत्वादित्वं दुर्वारमिति भावः। परिपूर्वाद् व्रजेर्ण्वुलि बहुव्रीहौ सुपो लुक्यपि प्रत्ययलक्षणेनापः सुवन्तात्परत्वं बोद्धयम्। कटुकेति। आपा सह सवर्णदीर्घात्पूर्वं वार्णादाङ्गस्य बलीयस्त्वादपवादत्वाच्चान्त्यककारादुत्तरस्याकारस्येत्वं स्यादिति भावः। मामिकेति। कस्य प्रत्ययस्थत्वाभावादप्राप्ते वचनम्। ममेयमिति विग्रहे 'युष्मदस्मदोरन्यतरस्याम्' (४।३।१) इत्यणि 'तवकममकावेकवचने' (४।३।३) इति ममकादेशे आदिवृद्धिः। नरानिति। कै शब्दे इत्यस्य 'आदेच उपदेशे' (६।१।४५) इत्यात्वे 'आतोऽनुपसर्गे' (३।२।३) इति के 'आतो लोप इति च' (६।४।६८) इत्यालोपः।

न यासयोः (७।३।४५)। प्रत्ययस्थादिति प्राप्ते निषेधोऽयम्। यकेति। यत्तदोरकच्। त्यदाद्यत्वे टाप्। सन्निपातपरिभाषाऽस्मादेव निषेधान्निर्देशाच्चानित्येति तद्विरोधात्कथं टाबिति न शङ्क्यम्। त्यकनश्चेति। 'मृदस्तिकन्' इति इत्वभूतनिर्देशेन ज्ञापकेनास्येत्वं वारयितुं शक्यमिति भाष्यकृतः। पञ्चभिर्मृत्तिकाभिः क्रीत इत्यर्थे 'पञ्चमृत्तिकः' इत्यस्यानभिधानमिति तदाशयः। अत्र त्यिकनि कर्त्तव्येऽकारोच्चारणादित्वं नेति न वक्तुं शक्यं 'पञ्चोपत्यको ग्रामः' इत्यादावकारश्रवणानापत्तेः टापो लुकि प्रत्ययलक्षणं स्थानिवत्त्वञ्च न उभयोरपि 'न लुमता' (१।१।६३) इत्यनेन निषेधात्। अत एव 'कति' इत्यादौ वार्त्तिकमतेऽपि न गुण इत्यन्यत्र विस्तरः।

आशिषि बु (का०वा०)। आशिषि विहितस्य बुनोऽस्येत्वं नेत्यर्थः। जीवतादित्यर्थे 'आशिषि च' (३।१।१५०) इति वुन्। देवदत्तशब्दादनुकम्पायां कनि 'अनजादौ च विभाषा लोपो वक्तव्यः' (का०वा०) इति दत्तशब्दस्य लोपः। 'देवदत्तिका' इत्युपन्यासस्तु

इतिचेन्न। भाष्य प्रामाव्येन सन्निपात लक्षण विधेः सन्निपात जन्यस्य सन्निपात जन्य जन्यस्य वा ग्रहणेपि सन्निपात जन्य जन्य जन्य ग्रहणेमाना भावादिति भावः। नानुनासिक इति। अणु दित्सूत्रेणेति भावः। अन्यत्रापीति पथि मथीत्यत्रापीत्यर्थः।। असिद्धयापत्तेरिति। ननु प्रक्रिया लाघ वायोशित्येव वक्तव्ये उङ्गि धान सामर्थ्यादंत रंग परिभाषाया अप्रवृत्तौनित्यत्वात्पूर्व गुणे ततो वृद्धौ रूप सिद्धेरिति चेन्न। एवमपिशसि आतोघातो इत्यारंभात् इति योगविभागेना कारलोपेऽष्टा वित्यसिद्धयापत्तेः। लाघवादिति। मात्रिकाकारोच्चारणेन प्रकृति वदनुकरणं भवती

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दत्तलोपमभिव्यङ्क्तुम्। ध्रुवकेति। 'ध्रुस्थैर्ये' (धा०सू०) पचाद्यचि कुटादित्वाद् गुणाभावे उवङ्, ततष्टाप्यज्ञातार्थे कः, 'केऽणः' (७।४।१३) इति ह्रस्वः, पुनष्टाप्। चटे संज्ञायां क्वुन्। वार्त्तिकोक्ता गणा आकृतिगणाः। तेन कन्यकाध्रुवकाऽलकेष्टकादयः साधवः। उदीचान्त्विति। अत्रापि शकुनाविति सम्बद्ध्यते। तेनान्यत्र नित्यमेवेत्यम्।

सूतका पुत्रि (का०वा०)। पुत्रकेत्यकारसहितः पाठोऽपपाठः, कैयटाद्यसम्मतेः। सूतशब्दात् स्वार्थे कन्। वृन्दशब्दात् 'श्रृङ्गवृन्दाभ्यामारकन्' इति मत्वर्थीय आरकन्। वृन्दारकशब्दो मुख्यवाची त्रिलिङ्ग इति भावः। ङीन इति। शार्ङ्गरवादित्वाज्जातस्येति भावः। अन्यत्रसूतकादौ।

उदीचाम् (७।३।४६)। यकपूर्वत्वञ्चाव्यवहितमेव। एवं 'प्रत्ययस्थात्' (७।३।४४) इति सूत्रे कात्पूर्वत्वमपि 'उदात्तस्वरितयोः' (८।२।४)। इत्यादाविवानुवादेऽपि निर्दिष्टपरिभाषाप्रवृत्तेः। तेन कृशराशब्दात्के ह्रस्वे इत्वविक्लपो न। नेत्यनुवृत्तावपि निषेधविकल्पे विधिविकल्पस्य फलितत्वादाह-इद्वेति। आतः किमिति। 'उदीचां यकपूर्वायाः' इत्येवास्तु। य-क-पूर्वस्त्रीबोधकाकारस्येत्यर्थः। साङ्काश्यके च नातिप्रसङ्गः। प्रत्ययवयवत्वेनाकारस्य स्त्रीबोधकत्वाभावात्' इति प्रश्नः। 'बहुलक्ष्यसंस्कारानुरोधादवयवष्ठ्येव स्यात्। न च प्रतिपदोक्तस्त्रीप्रत्ययस्यैवात्र ग्रहणं विशिष्य तदनुपादानात्' इत्युत्तरम्। स्त्रीप्रत्यस्य किमिति। यकपूर्वाया इति स्त्रीलिङ्गनिर्देशः किमर्थ इति प्रश्नः। धात्वन्तेति। धात्वन्तयकारककारपूर्वयोरकारयोरित्यर्थः। इत्वमिति शेषः।

भस्त्रैषा (७।३।४७)। इयमपि निषेधविकल्प इत्याह-अत इति। अत्राप्यातः स्थान

तित्यति देशानाश्रय णेन चेतिभावः।

पर्याय शब्देषुलाधव गौरव चर्चा नाद्रियत इति वैकल्पिक केष्वपि भावानुष्ठान स्यौचित्य क्लेशाधिक्यात् धर्माधिक्याग्येति चार्थ बोधनाय यत्र प्रयोगः प्रक्रियागौरवाभावश्च तद्विषयकमितितत्त्वम् ननुपूर्वत्रेत्यस्य वाचिकादिसिद्ध्यर्थ विषय सप्तमी त्वावश्यकत्वेनेदम संगतमत आह्। सन्निपातस्येति। ननु सन्निपात परिभाषायाडि तिह्रस्वश्च वामि इति सूत्र द्वय करणेन ज्ञापितत्वान्नुडेक वाक्य तापन्नत्वाच्चसपाद सप्ताध्यायी स्थत्वात्परिभाषादृष्टयैव न लोपस्यासिद्धत्वमत् आह।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यनुवर्त्तते। तदन्तेति। 'येन विधिः' (१।१।७२) इति सूत्रे 'त्यदादिविधिभस्त्रादिग्रहणञ्च प्रयोजनम्' इति भाष्यात्। अपिना नञ्भिन्नपूर्वाणामपूर्वाणाञ्च सङ्ग्रहः। अत्र नञ्पूर्वाणामपीति स्पष्टार्थम् 'पदाङ्गाधिकारे तस्य च' इति सिद्धेः। उपसर्जनार्थमिति। एवञ्चानुपसर्जने 'आदाचार्याणाम्' (७।३।४६) इत्यात्वं भवत्येव, उपसर्जनेऽस्य चारितार्थ्येन बाधे मानाभावात्। अन्यस्य-अनुपसर्जनस्य। उत्तरसूत्रम् – 'अभाषितपुंस्काच्च' (७।३।४८) इति।

अन्तर्वर्त्तिनीमिति। न एतद् सु इति स्थिते अकचि कृते अकृते वा नञा तत्पुरुषे 'अन्तरङ्गानपि' इति न्यायेन त्यदाद्यत्वात्प्राक् सुपो लुकि ततोऽकचि वा पुनर्विशिष्टात्सुपि त्यदाद्यत्वे टापि समासात्पूर्वोत्पन्नसुपः पर एव टाबिति भावः। बहुव्रीहौ तु 'प्रियैतत्का' 'प्रियैतकत्का' वा, कबभावे 'प्रियैतकत्' इत्येव। सर्वथा नेत्वप्राप्तिः। अनेषकेति। अज्ञाता एषा एषका, न एषकेति विग्रहः। पूर्वं नञ्समासे अज्ञाता अनेपा इति। असम्भवादिति। 'एषाद्वा' इति निर्देशात् सञ्ज्ञोपसर्जनयोरप्राप्तेरिति भावः। अकजर्ह इति। एवञ्च तदकारस्याऽऽतःस्थानिकत्वाभाव इति भावः। अर्थान्तरे त्विति। आत्मज्ञातिधनेष्वित्यर्थः।

स्वो ज्ञातावात्मनि स्वयं त्रिष्वात्मीये स्वोऽस्त्रियां धने। (अ०को० ३।३।२१०) इति कोशादिति भावः। कप्रत्ययान्तत्वादिति। तत्र च नान्तर्वर्त्तिविभक्त्या सुपः परत्वं, केन व्यवधानादिति भावः। 'संज्ञापूरण्योश्च' (६।३।३८) इति निषेधे सञ्ज्ञाया अपि भाषितपुंस्कत्बोधनेन सञ्ज्ञाभूते न 'अभाषितपुंस्काच्च' (७।३।४८) इत्यनेन सिद्धिः आत्मीयत्वपुरस्कारेणैव सञ्ज्ञाकरणादिति बोद्धयम्। नित्यमेवेति। तत्र ह्यकचि कृते आतःस्थानिकत्वाभाव इति भावः। एवमत्यन्तस्वार्थिककान्तेऽपि नित्यमेवेत्वम्।

आरोपितासिद्धत्वेपीति। परिभाषाया अनित्यत्वेनेति। पंचानामितिनिर्देशान्नुड् विषये परिभाषाया अनित्यत्वेनेत्यर्तः। तदनित्यत्वे न शमामष्टानामिति निर्देशास्तदनित्यत्वेन। नन्वात्वे तदनित्यत्वस्य भाष्योक्ता नित्यत्वपरिगण ने ऽभावादात्वं तदनित्यत्वेन न युक्तं किंतु नोपधाया इति दीर्घे न लोप एव युक्तः। नलोपेतु न सा प्रवर्तते षद्त्वस्यसन्निपात जन्यत्वेनुटः सन्निपात जन्यत्वेपिन तयोः साक्षात् सन्निपात नाशक नलोपेनिमित्त्वं पदत्वस्यनलोवे साक्षान्निमित्तत्वेपितस्य सन्निपात जन्यत्व संन्निपात जन्य जन्यत्वान्यत रत्वाभावादत आह्। किंचेति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अकचोऽत्यन्तस्वार्थिकापवादत्वाभावात्। निःस्वकेति। स्वस्या निष्क्रान्तेति विग्रहः उपसर्जनह्रस्वः, टाप्, अज्ञातादौ कः।

अभाषित (७।३।४८) 'स्त्रीविषयाच्च' इति नोक्तम्। स्त्रीनपुंसकदामशब्दाड्डापि अज्ञाता दामा 'दामिका' 'दामाका' 'दामका' इत्यसिद्ध्यापत्तेः। विहितस्येति व्याख्याने फलमाह-बहुव्रीहेरिति। अविद्यमाना खट्वा यस्या इति विग्रहे पाक्षिककबभावे 'गोस्त्रियोः' (१।२।४८) इत्युपसर्जनह्रस्वेऽखट्वशब्दादापि सुप्यज्ञातादौ के सुब्लुकि 'केऽणः' (७।४।१३) इति ह्रस्वे पुनष्टाप्यभाषितपुंस्काद्विहिताकारस्थानिकाराभावेनैतद्विकल्पाप्राप्तावुत्सर्गेण नित्यमेवेत्वं, परविशेषणत्वे तु तादृशखट्वशब्दात्परत्वेन दोषः स्यादेवेति भावः।

शैषिके कपीति। न खट्वा सु इत्यवस्थायां कपि सुल्लुकि प्रत्यय लक्षणेन भागद्वयस्य सुबन्तत्वात्समाससंज्ञायां 'समासान्ताः' (५।४।६८) इतिशास्त्रबलात्कबन्तस्यैव समासत्वेनोपसर्जनस्त्रीप्रत्ययान्तस्मासरूपप्रातिपदिकाभावाद् 'गोस्त्रियोः' (१।२।४८) इति ह्रस्वाभावे 'केऽणः' (७।४।१३) ज्ञात ह्रस्वे 'न कपि' (७।४।१४) इति निषिद्धे 'आपोऽन्यतरस्याम्' (७।४।१५) इति ह्रस्वे कपः प्राग्वर्त्तिनः खट्वशब्दात्परस्यापोऽभाषितपुंस्काद्विहितत्वेन तत्स्थानिकाकारस्यायं विकल्पः, ह्रस्वाभावे तु 'अखट्वाका' इति, इति भावः।

अयमेवेति। आचारक्विबन्तप्रकृतिककर्तृक्विबन्तानामनभिधानमेव स्त्रियाम् एतद्भाष्यप्रामाण्यात्। पञ्च स्त्रीगोव्यक्तयो धनं यस्य स 'पञ्चगवधनः' इत्यत्रार्थवत्सूत्रोक्तार्थवत्त्वाभावाट्जन्तस्य प्रातिपदिकत्वाभावेन न ङीप्। आपिशलिना

नलोपेवेति।। इवार्थे वा शब्दः नलोप इवेत्यर्थः। स्थानिवद्भावेनेति। स्थानिसदृशो लौकिकैकदेशवि कृतन्यायेन तत्स्थानापन्न इति न्यायेन वाभावस्तेने त्यर्थः। स्थानिवत्सूत्रस्य त्वशास्त्रीयकार्यत्वान्न प्राप्तिरिति भावः। नन्वाकारां तस्यषट्त्वे हलीत्यस्यायकर्ष एव मास्तु कृतेआत्वें तरंगत्वाज्जातस्य षट्त्वस्य स्थानिवद्भावेना कारांते आश्रयणेन नुट् सिद्धेरत आह्।। कार्यकालपक्षइति बहिरंगतयेति।। प्रतिपदोक्तत्वा पेक्षयेत्यर्थः। आत्वे कृते शीघ्रोपस्थितिकत्वेन प्रतिपदोक्तत्व रूपांतकरंगत्वे नेत्यादिः।। आकारांत षट्त्व संज्ञाश्रयण इति।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रोक्तमधीते आपिशला ब्राह्मणी इत्यत्र तु न ङीप् प्रोक्ताणः स्त्रियामवर्त्तनात्। अध्येत्रण्तु लुप्तः, अण् योऽकार इति व्याख्यानेन वर्णाश्रये प्रत्ययलक्षणाभावात्। अद्ध्येत्रर्थगतस्त्रीत्वमादाय तदण्निमित्तकस्य न प्राप्तिः। स्त्रियामित्यस्य गृह्यमाणविशेषणत्वात्तदण एतत्स्त्रीत्वेऽवर्त्तनात्। अत एव काशकृत्सिना प्रोक्तां मीमांसामधीते काशकृत्स्ना ब्राह्मणी इत्यत्रापि न ङीप्। प्रोक्तार्थगतस्त्रीत्वमादाय तु पुनर्न ङीप्, लक्ष्येलक्षणस्येति न्यायात्। तस्माद् 'बहुकुरुचरा' इत्येव तद्यावर्त्त्यम्। तत्र च तदन्तविधिं विना प्राप्तिरेव न। ज्ञापिते तु तदन्तविधौ प्राध्यान्यादेतदारम्भाच्च स्त्रियामिति ङीप्प्रकृतिविशेषणमेव। अत एव धीवान्मतिक्रान्ता 'अतिधीवरी' इति सिद्धम्। एवञ्च 'आपिशला' इत्याद्यप्यस्यैव व्यावर्त्यम्। अनुपसर्जनादिति च सामर्थ्याद् गृह्यमाणविशेषणेवेति भावः।

तदन्तविधिमिति। अण्णन्तादेः प्रातिपदिकविशेषणत्वेनाण्णन्तान्तमित्येवंरूपमित्यर्थः। अन्यथा प्रत्ययविधौ प्रतिषेधात्स दुर्लभः स्यात्। प्रत्ययग्रहणपरिभाषालभ्यस्य तु नायं निषेधः प्रातिपदिकादित्यनेन सहानन्वयापत्तेः तत्फलं कौम्भकारेयसिद्धिः। अन्यथा कुम्भकारेय इत्यापद्येत। कुम्भेन समासे ङीपि कुम्भविशिष्टस्यापत्येन योगे कार्यर्थे तदयोगस्य वक्तुमशक्यत्वात् कदाचित्ततोऽपि ढकि कुम्भशब्दोकारे वृद्ध्यभावस्याप्यापत्तेः। निष्कृष्यैकार्थीभाव एव वृत्तिनिमित्तमिति तु वक्तुमशक्यम्। 'तद्धितार्थ' (२।१।५१) इत्युत्तरपदे समासविधानात्समुदायेनैकार्थीभावेऽवयवेनापि तस्यैव सत्त्वात्। कृद्ग्रहणपरिभाषायाः कृन्मात्रग्रहणे प्रवृत्त्या न तया विशिष्टादेव ङीबुत्पत्तिं प्रत्याशा।

न च तदन्तग्रहणेऽपि कारशब्दस्य व्यपदेशिवद्भावेनाण्णन्तात्वात्ततोऽपि कदाचिन्ङीपि

भौतपूर्विकं नान्तसंख्या वाचकत्वमादायेत्यर्तः।। पूर्वंषट्त्व इति। भविष्यति किञ्चि दनेन प्रयोजनमित्यभिसंधि मात्रेणेत्यर्तः।। समाहितमिति'' भाष्य इतिशेषः ।।व्याख्यांतर मुक्तमिति।। कैयट इति शेषः।। क्विनिक्विपिचेति।। चोभिन्नक्रमः।। सोपपदे क्विनि क्विपि विशेषाभावाच्चेति अर्थः।। लाघवान्नि रूपपदादेव क्विन्विन्विधीयत इतिभावः।। गुण प्रतिषेधाद्यर्थ इति।। आदिना यजेः संप्रसारणस्य प्राच इत्यादौ नलोपस्य संग्रहः।। संज्ञाभाव इतिओ।। कर्तृकरणइतिणि जंतादिभिः समासोन यगादिष्वकृत सार्वेतिदीर्घ सिद्धिश्च भवतीतिभावः।। ननुरुरुदिवैत्यत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुम्भकारेयो दुर्वारः। किञ्च समुदायान्ङीप्यपि स्त्रीप्रत्यये तदादिनियमाभावेन केवलादपि कदाचिड्ढकि स दुर्वार इति वाच्यम् एतदधिकारादेव ज्ञापकादसहाय एव व्यपदेशिवद्भावप्रवृत्तेः, अर्थवत्सूत्रोक्तार्थवत्त्वाभावेनाणन्तस्याप्रातिपदिकत्वाच्च, तदादिनियमाभावेनाधिकस्य कार्यं बोद्धयते, न तु न्यूनस्येत्यदोषाच्च। अन्यथा तदन्तग्रहणे फलाभावेन तद्वैयर्थ्यं स्पष्टमेव। एतदेवाभिप्रेत्यात्र भाष्ये उक्तं 'समासे च कृतेऽवयवादुत्पत्तावयवस्य वृद्धिः स्यात्' इति। 'येन विधि;' (१।१।७२) इति सूत्रे च प्रत्ययग्रहणे तदादितदन्तविधेः प्रयोजनं 'गार्ग्यायणः' 'परमगार्ग्यायणः' इति उक्तं भाष्ये। तत्रैकदेशात्प्रत्ययाभावे परमश्चासौ गार्ग्यायण इति तदर्थोवाच्यः। तथा सति नैव परमगार्ग्यात्प्रसक्तिरिति तत्प्रयोजनत्वोक्तिरसङ्गता स्यात्। मम तु परमगार्ग्यस्यापत्यमित्यर्थेऽप्युक्तन्यायाद् गार्ग्यशब्दादेव प्रत्ययो न तु परमगार्ग्यात्, तथा सति 'पारमगार्ग्याण इति स्यात्' इति तत्प्रयोजनत्वोक्तिसङ्गतिः। कैयटोऽपि 'तदादिनियमावश्यकत्वप्रदर्शनाय परमगार्ग्याण इत्युपन्यासः' इत्युक्तवान्। यत्तु सर्वादिसूत्रे भाष्ये 'अनुपसर्जनादित्येष योगः प्रत्याख्यायते' इत्युक्तं', तत्त्वत्र वार्तिककृता तस्य प्रत्याख्यानात्तदभिप्रायकमिति भाष्यप्रदीपोद्द्योते विस्तरः।

टिड्ढा (४।१।१५)। ठेत्येव सिद्धे ठक्ठञोरुपादानं ठन्ञिठयोर्व्यावृत्त्यर्थम्। अदन्तमिति। प्रत्यासत्त्या टिदाद्यवयवाकारान्तमित्यर्थः। तेन 'पञ्चाश्वा' इत्यादौ ठग्निमित्तोऽपि न ङीप्। कुरुचरीति। कुरुषु चरतीत्यधिकरणे उपपदे चरेष्टः। टितोऽप्रत्ययस्यापि सत्त्वात्प्रत्ययग्रहणपरिभाषाया अप्रवृत्त्याऽत्र टिदन्तत्वं कुरुचरशब्दस्येति बोद्धयम्।

क्रादि नियमेन न दोषोऽत आह्।। आदाविति।। आदिना रुदिवेत्यादेः संग्रहः।। चस्य कुत्वापत्तिरिति। निर्दिश्य मान परिभाषया किबादिषु सावकाशं वृरपृक्तास्येति।।

लोपं विशेषविहितत्वात्वाधित्वेत्यर्थः। ग इत्येवेति।।

एवंच कुग्रहण सामर्थ्यान्निर्दिश्य मानपरिभाषाया अप्रवृत्याक्विन् इत्यस्यासिद्ध त्वेन च न कुत्वेन वलोप बाध इति भावः।। व्याख्यानात्।। प्रतिपदोक्तत्वरूपात्।। कुत्वेनति।। तादृश भाष्य प्रयोगादव्ययपूर्वपद भिन्नस्य कुत्वं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वक्ष्यमाणेति। वचेर्लृटः शानच्। टित्वादिति। स्थानिवत्त्वेनेत्यादिः। 'न ल्यपि' (६।४।६९) इति लिङ्गाट्टित्वादेरशास्त्रीयस्याप्यतिदेशः; अनुबन्धकार्ये 'अनल्विधौ' इतिनिषेधाप्रवृत्तिश्चेति भावः। ङित्वेनेति। लिङ्गादेशानां स्थानिवत्त्वेनैव सिद्धे तद्वैयर्थ्यं स्पष्टमेव। तद्धि अवयवेऽचरितार्थतया समुदायोपकारकम्। न चेदं ङित्त्वं 'स्तुयात्' इत्यादावनिग्लक्षणवृद्धिनिषेधार्थमिति वाच्यं विनिगमनाविरहात् उत् औदिति वक्तव्ये वृद्धिग्रहणेन स्थानिनिर्देशेऽपीक्परिभाषोपस्थित्यातस्या अपि इग्लक्षणत्वाच्च।

नन्वेवं 'ब्रूयात्' इत्यत्र ब्रुव ईट् प्राप्नोति लाश्रयानुबन्धकार्यस्य तदादेशेष्वभावेऽपि तिपः पित्त्वस्य तदादेशे तातङ्यभावकल्पने मानाभावादत आह–श्न इति। क्वचिदिति। लक्ष्यानुरोधेन च व्यवस्था।

परे तु यासुटो ङित्त्वं न ज्ञापकं 'पिदर्थं ङित्वम्' इति भाष्यात्। 'सार्वधातुकम्' (१।२।४) इति सूत्रेऽपिदित्यावर्त्य प्रसज्यप्रतिषेधसिद्धेन 'ङिच्च पिन्न, पिच्च ङिन्न' इत्यनेन 'हलः श्नः' (३।१।८३) इतिसूत्र भाष्योक्तेन पित्सु ङित्त्वाप्रसक्तेः। शानचः शित्त्वमपि तत्सूत्रे एव भाष्ये प्रत्याख्यातम्। हेरपित्त्वस्य तातङो ङित्त्वस्य वैयर्थ्यापत्तिश्च ज्ञापकत्वे दूषणमप्युक्तं भाष्ये। तस्माद् 'वक्ष्यमाणा' इत्यादौ सत्यभिधानेऽजादिषाठाट्टाप।

यत्तु 'क्ङिति च' (१।१।५) इतिसूत्रभाष्ये यासुटो ङिद्वचनस्य न इदादेशानां ङित्त्वमित्यर्थे ज्ञापकतोक्ता, तत्तु वार्तिकमतम्; ङिच्च पिन्नत्यादेस्तेनानुक्तेः। यदपि 'गाङ् लिटि' (२।४।४९) इति सूत्रे ङित्वं सानुबन्धकादेशेऽनुबन्धास्थानिवत्वस्य ज्ञापकमुक्तं वार्त्तिककृता; तदपि 'प्रयोजनाभावात्' इत्यादिना भाष्ये दूषितमित्याहुः।

नेत्यर्थः।। मत इति मतांतरेतु परौव्रजेः क्विपदीर्धैषिस्तु पदांतइति पाठ्यमिति बोध्यम्।। व्याख्यानाच्चेति। श्रुतानुमित योरिति परिभाषाणाद सांनिध्याद्वेत्यर्थः।। षेणैवेति। श्रुतत्वात्सानिध्याद्वेत्यर्थः।। झलेः परयो रिति। झलःपर योझेलि पदांते च संयोगस्याद्यो स्कोरित्यर्थः।। अत्रार्थ सूत्रोदाहरणं तुक्रिमिस्त्रिव्योः क्विबंतयोस्तच्छब्दोपपदयोः समासे ततोणिचिटिलोपे क्विपिणि लोपे सुपितत्स्त्रित्यत्र पदांते संयोगसत्वात्। तत् क्रत् त्स्त्र शब्दापाचार क्विबंतात् क्तिचितत् क्रतिततत्स्त्रति रित्यत्रझलपरसंयोगस्य सत्वात्कोर्लोपेतत्र तित् त्रूतिरिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निरनुबन्धकस्य स्त्रियां वृत्तेरसम्भवात्सानुबन्धकस्य ढको ग्रहणमित्याह-सौपर्णेयीति। सुपर्णीशब्दादपत्ये 'स्त्रीभ्यो ढक्' (४।१।१२०) इति ढक्। स्पष्टञ्चेदम् भाष्ये। ऐन्द्रीति। 'साऽस्य देवता' (४।२।२४) इत्यण्। ऊरुदघ्नीत्यादि। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। सङ्ख्याया अवयवे तयप्। मात्रजिति मात्रशब्दादारभ्यायचश्चकारेण प्रत्याहार इति 'उभयी' इति सिद्धिः। तत्र ह्यच् प्रत्ययान्तरम्। अत एवोभयशब्दस्य जसि सर्वनामत्वविकल्पो नेति 'नवेति' (१।१।४४) इत्यत्र भाष्ये स्पष्टम्। आक्षिकीति। 'तेन दीव्यति' (४।४।२) इति ठक्। 'तदस्य पण्यम्' (४।४।५१) इत्यधिकारे लवणाठ्ठञ्। यादृश्यां 'त्यदादिषु दृशः' (३।२।६०) इति कञ्। इत्वरीति। 'इण्नशजि' (३।२।१६३) इति करप्। अनुबन्धद्वयोपादानं स्पष्टार्थं वरज्व्यावृत्तेरन्यतरेणापि सिद्धेः चौरीति। चुरा शीलमस्या इत्यर्थः।

नञ्स्न (का०वा०)। तरुणतलुनयोः 'वयस्यचरमे' (का०वा०) इति ङीपि सिद्धेऽपि गौरादिपाठात्परत्वात्प्राप्तेन ङीषा बाधाभावाय पुनरत्र ग्रहणम्। तयोश्च स्वरे विशेषः। एतौ हि 'त्रो रश्चलो वा' (उ०सू० ३४१) इत्युनन्तत्वादाद्युदात्तौ। स्त्रीपुंसाभ्यां नञ्स्नञौ। 'प्रहरणम्' (४।४।५७) इत्यधिकारे शक्तियष्ट्योरीकक्। 'आढ्यसुभग' (३।२।५६) इति ख्युन्।

यञश्च। (४।१।१६)। 'प्राचांष्फ' (४।१।१७) इत्यत्र यञ एवानुवृत्तये योगविभागः।

हलस्त (६।४।१५०) हल इति पञ्चमी, यस्येति सूत्राद् 'ईति' इत्यनुवर्त्तते, 'सूर्यतिष्य' (६।४।१४६) इत्यतो 'य उपधाया' इति च। यलोपेऽल्लोपस्याभीयासिद्धत्वाद्यस्य ईकारपरत्वाभावाद्वचनसार्थक्यायोपधाग्रहणानुवृत्तिः। अनपत्याधिकारस्थादिति। अपत्याधिकारस्थभिन्नादित्यर्थः। यञ्शब्देन व्याख्यानादपत्याधिकारस्थस्यैव ग्रहणिति भावः।

चेति। यदितुयणः प्रतिषेध इति पक्षैक वाक्यतयाऽत्र पक्षेएतादृशानामनभिधानमेषेत्युच्यते तर्हि तदुपपदाभ्यांक्ष मिस्कमिभ्यां क्विवादिषुपूर्वोक्त प्रकारेण बिद्धं तहतत्क्वूताष्टिः तत्क्तिरिति (तत्क्षू तत्स्क् ततः किचि) चेति बोध्यम्। पदांते संयोगांतलोपस्त्वे तदारंभ सामर्थ्या दत्रनेतिभावः।।

नार्थ इति। तथासति भृडित्यादो भ्रष्टे त्यादौ चलोपोनस्यात्। तक्षिरक्षिभ्यां व्यंताभ्यां क्विपि तगित्यादि सिद्ध्यर्थं तस्यदोष इति स्थानिवत्वारं भे पूर्वोक्तोदाहरणयोः स्थानिवत्वादेतद प्राप्त्या संयोगांत लोपएव पदांते झलिपरत स्त्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राचां ष्फ (४।१।१७) यञ इति वर्तते, अत इति च। यञो योऽकार इति चार्थः। तेन 'वतण्डी' इत्यत्रोदीचां मते सावकाशं शार्ङ्गरवादिङीनं बाधित्वा आबट्यायनी इत्यादाविव सर्वत्रग्रहणात्प्राचां मते प्राप्तोऽपिष्फोन। अत्र हि 'वतण्डाच्च' (४।१।१०८) इति यञो 'लुक् स्त्रियाम्' (४।१।१०९) इति लुक्, वर्णाश्रयत्वाच्च न प्रत्ययलक्षणम्।

षः प्र (१।३।६)। 'आदिर्ञिटुडवः' (१।३।५) इति सूत्राद् आदिरित्यनुवर्त्तते। प्रत्यस्येति किम? षोडश। 'षष उत्वम्' (का०वा०) इत्यत्र षष्शब्दस्य निपातनादुपदेशस्थोऽयं षकारः। वस्तुत उपदेशे इत्यस्य स्वरित्वमेव नेति पूर्वं निरूपितम्। आदिरिति तूत्तरत्रावश्यकमुपरञ्जकतयाऽत्रापि सम्बन्धितम्।

आयने (७।१।२)। आयनो नस्य नेत्त्वम्, फिनो नित्करणात्। तत्साहचर्यादीनोऽपि नस्य नेत्त्वम्। आदिग्रहणं किम्? उरुदघ्नम्। प्रत्ययेति किम्? फक्कति, खनति। खच्घञादौ 'घिण्ण्यतोः' 'खित्यनव्ययस्य' (६।३।६६) इत्यादिलिङ्गादित्सञ्ज्ञैव नादेशाः। उणादीनां बहुलवचनान्नादेशाः। घचश्चित्वसामर्थ्यदिते प्रत्ययसम्बन्ध्यादेशा उपदेशसन्नियतोगशिष्टकार्यादपि पूर्वमेव। तेनान्तोदात्तत्वाय चित्त्वं सफलम्। अन्यथाऽऽद्युदात्तत्वेनैव सिद्धौ तद्वैयर्थ्यं स्पष्टमेव। ननु स्त्रियामेव ष्फविधानाद् 'उक्तार्थानामप्रयोगः' इति ङीष् न स्यादत् आह-षित्वसामर्थ्यादिति।

ष्फेणोक्तेऽपीति। द्योतितेऽपीत्यर्थः। द्विर्बद्धं सुबद्धं भवति' इति न्यायेन क्वचित्समुच्चस्य दृष्टत्वात्। षित्वमपि तदाश्रयणे ज्ञापकम्।

सर्वत्र (४।१।१८)। सर्वेषां मते इत्यर्थस्तदाह-नित्यमिति। प्राचामित्यस्य

जव्यवहित स्यहल् समुदायस्य शास्त्र बोधितस्यासाधुत्वबोधनात्सुट्तिथोरित्य-त्रेकारोच्चारणेने त्यस्य योग एवेति बोध्यम्। ननुभूयास्तामित्यादौ प्रत्ययस्य सङेभावादेकस्य सस्य लोपानापत्तिरिति चेदिष्टापत्तिरित्याह।

भूसत्तायामित्यादाविति। व्यंजन पर स्येतिन्यायेनेति। व्यंजन परंयस्य तस्य व्यंजनात् परस्यवा व्यंजनस्य सजातीय स्यैक स्यानेकस्य वोच्चारणे विशेषाभाव इतिन्यायेनेत्यर्थः। ननु झलादौ प्रत्यय इत्यस्य सङीति वार्तिकस्य च प्रत्याख्याने घनाघनः क्षोभण इत्यादौ लोपापत्तिरत आह्। प्रत्याख्यानमिति। विधान

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निवृत्त्यानित्यत्वे सिद्धेऽपि 'प्राचांष्फ' (४।१।१७) इत्यस्य सर्वत्रग्रहणापकर्षेण बाधकविषयेऽपि प्रवृत्यर्थं तत्। तेन 'आवट्यायनी' इत्यत्र 'आवट्याच्च' (४।१।७५) इति चापं बाधित्वा प्राचां मते ष्फ एव। अवटो गर्गादिः। चाप्तु उदीचां मते प्राप्तङीब्बाधनेन चरितार्थः। सर्वत्रग्रहणात्तद्बाधकत्वमेव चापो न तु अनन्तरष्फबाधकत्वम्। चापि कृते तु न ष्फप्राप्तिरत इत्यधिकारात्। लोहितादिर्गर्गाद्यन्तर्गणः। यद्यपि तत्र कतशकलकण्वेति पाठात् शकलस्य लोहितादिकण्वादिबहिर्भूतत्वात् ष्फाणौ न ततः प्राप्नुतस्तथापि कतन्तेभ्यः कण्वादिभ्य इत्युभयत्रापि षष्ठीतत्पुरुषबहुव्रीह्योरेकशेषेण न दोषः। कतन्तशब्दे शकन्ध्वादित्वात्पररूपम्। तेन 'शाकल्यायनी' शाकल्यस्य छात्राः 'शाकला;' इति च सिद्धम्। टापङीषोरिति। कौरव्यशब्दे योपधप्रतिषेधाट्टाब्, माण्डूकशब्दे जातित्वान्ङीषिति भावः टाबङीपोरपवाद इति पाठस्तु प्रामादिकः।

वयसि (४।१।२०)। प्राणिनां कालकृतावस्थाविशेषो वयः। वयसीत्यस्य वयोरूपे प्रवृत्तिनिमित्त इत्यर्थस्तदाह–प्रथमवयोवाचिन इति। तेन उत्तानशया' इत्यादौ न। प्रकरणादिना वयःप्रतीतावपि नायं तद्वाचकः याऽपि व्याध्यादिवशादुत्ताना शेते तस्या अपि प्रतीतेः। 'द्विवर्षा' इत्यादिरपि' न वयोवाची शालादावपि प्रयोगात्। कौमारयौवनवृद्धत्वभेदात् त्रीणि वयांसि, आयुषश्चतुर्भिभर्गैश्चत्वारि वा। त्र्यनीका समाहारे 'तद्धितार्थ' (२।१।५१) इति द्विगुः। अकारान्तोत्तरपदत्वात् स्त्रीत्वम्।

अपरिमाण (४।१।२२)। अत्र परिमाणशब्देन 'परिमाणन्तु सर्वतः' इति पारिभाषिकमेव गृह्यते। 'सुवर्णविस्तौ हेम्नोऽक्षे कम्बल्यमूर्णापलशतम्' इति कोशवलेनोन्मानभूतबिस्तकम्बल्यग्रहणन्तु उन्मानस्य चेद्बिस्तकम्बल्योरेवेति नियमार्थम्। तेन

सामर्थ्यादिति। क्विन्विधा न सामर्थ्यादित्यर्थः। नस्याप्या पत्तेरिति। तस्य निर्दिश्य मानावयवत्वादित्यर्थः।। ननुतस्मा न्नुडचीत्यत्र तस्य नुगचीत्येवास्तु तस्य लुप्त नकारस्य नओ नुगजादा वुत्तर, पदइत्यर्थः। न चलोपापत्तिः।। नुकोबहि रंगत्वाद सिद्धत्वा विधान सामर्थ्याच्चेत्यर्थः।। एवं च मितेरितिन्यासेप्य नेष्व इत्यादौन दोष इति चेन्न।। अनेषित्यादौङ्मुडापत्तेः।। नच सन्निपात परिभाषयाङ्मुडभावः। यदागमपरिभाषयाऽशा स्त्रीयस्याप्यति देशादजाद्युत्तर पदानंतर्यरूप सन्निपातस्य सत्त्वात्।। अत एवसाम आकमिति ससुट्क निर्देशः संगच्छते न अः अनस्तमा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्विनिष्की सिद्धा। द्वे वर्षे भूता, द्वाभ्यां शताभ्यां क्रीतेत्यर्थे द्विवर्षा, द्विशता, तिर्यङ्माने द्विहस्ता भित्तिरित्यादौ च निषेधः सिद्धः। 'काण्डान्तात्' (४।१।२३) इति तु क्षेत्रे एवेति नियमार्थम्। तेन द्विकाण्डी रज्जुरित्यत्र। द्वौ बिस्तौ पचतीति। पचेर्द्रवीभावानुकूलो व्यापारोऽप्यर्थः। अत्रोन्मानत्वाठ्ठको लुक् 'आचितः शाकटो भारः' इत्युक्तेराचितः परिमाणमित्येके। 'आचितो दश भाराः' स्युः 'इत्युक्तेरुन्मानमेतदिति एतदपि नियमार्थमित्यन्ये।

प्रमाणे इति। षोडशहस्तप्रमाणदण्डवाचककाण्डशब्दस्याऽऽयाममात्रपरिच्छेदकत्वेन प्रमाणत्वमिति भावः।

पुरुषात्प्रमाणे (४।१।२४)

पुरुषस्योर्ध्वाधरदिगवस्थितवस्तुमात्रपरिच्छेदकत्वेनोन्मानत्वाद् उन्मानस्य चेद् बिस्तादेरेवेति नियमान्निषेधा प्राप्त्या नित्यं ङीपि प्राप्ते विकल्पार्थमिदम्। अत्र प्रमाणशब्दः परिच्छेदकमात्रपरो न त्वायामपरिच्छेदकवाची। अत एव तस्य पुरुषविशेषणता नासङ्गता। जातिवचनस्यापि पुरुषशब्दस्य 'पञ्चारत्निः पुरुषः' इति शुल्बसूत्रादत्र प्रमाणे इति विशेषणाल्लोकव्यवहाराच्च परिच्छेदकवाचित्वमपि। द्विपुरुषीति। द्वौ पुरुषौ प्रामाणमस्या इत्यर्थे 'तदस्य परिमाणम्' (५।१।५७) इति प्रत्यस्य 'अद्ध्यर्द्ध' (५।१।२८) इति लुकि उदाहरणम्। तत्र हि परिमाणशब्देन उत्तरसूत्रानुरोधात्परिच्छेदकमात्रस्य ग्रहणमिति सिद्धान्तः।

ऊधसो (५।४।१३१)। समासान्तोऽयम्। तत्र स्त्रियामित्युपसङ्ख्या नादाह – स्त्रियामिति। 'बहुव्रीहौ सक्थ्यक्ष्णोः' (५।४।११३) इत्यतो बहुव्रीहावित्यनुवतर्त्ते। ङित्वाच्चास्याऽऽदेशत्वम्। डाब्ङीब्निषेधेष्विति। समासान्तानामलौकिके वाक्ये एव प्रवृत्त्या पूर्वमनङ्येषां प्राप्तिः। 'अन उपधालोपिनः' (४।१।२८) इत्यत्रास्यानुवृत्त्या ङीपोऽपि बाधः।

सन्निपातविधाताभावादेव। अतएव मकरान्तर प्रश्लेषा भावादेव अतएव सन्निपातविभाषया–

चेष्टा इतिणिजंवात् क्विपिटि णिलोपे अन्मित्रं यस्यान्मित्र इत्यादौ न ञोजरमरेति स्वरापत्तेश्चेतिदिक्।। भाष्ये ध्वनि तमिति। तत्रहि तदोरिति सूत्रेतवर्गानिर्देशे एतत्प्रयोजनमिह मामूदनेषः करोतीत्युक्तम्।। नन्वकारष्यविवक्षितत्वेऽतो गुण इत्येकस्यैव शास्त्रस्यप्रवृत्तिः। अविवक्षितत्वे इत्संज्ञा लोपविधायक शास्त्र द्वय स्थेत्युच्चारणार्थत्वे एव गौरवमत आह्। इत्संज्ञा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतेन मध्येऽपवादन्यायाड्डाब्निषेधयोरिदं बाधकमित्यपास्तमिति भावः। ङीषिति। ङीपि तु कुण्डोधन्शब्दे पूर्वपदप्रकृतिस्वरूपेण धकाराकारस्यानुदात्तनिवृत्तिस्वराप्राप्त्याऽन्तोदात्तत्वान्न सिद्ध्येत्। कुण्डमिवोधो यस्या इति विग्रहः। बहुब्रीहेः किम्? ऊधः प्राप्ता प्राप्तोधाः 'प्राप्तापन्ने च' (२।२।४) इति समासः। अव्ययग्रहणानुवृत्तेरिति। 'अस्वरितत्वादिति भावः। निषेधावपीति। अपिना 'अन उपधा' (४।१।२८) इति ङीप्। अन्यग्रहणेऽनर्थकस्यापि ग्रहणात्। द्विहायनी बालेति। 'द्विहायनी द्विवर्षा गौः' (अ० को०) इति प्रायोवाद इत्येके।

'बाला' इत्यस्य गौरित्यर्थ इत्यन्ये।

नित्यं सञ्ज्ञा (४।,१।२६)। ननु सञ्ज्ञाशब्दा नियतानुपूर्वीका अनादयः, छन्दसि च दृष्टस्यैव विधानमिति ङीबभावविशिष्टस्य तत्र प्रयोगसम्भवाद् 'अन उपधा' (४।१।२८) इत्येव सिद्धे इदं व्यर्थमिति चेदुत्तरार्थत्वात्। योगविभागस्तु व्यर्थ एव। तद् ध्वनयन् लक्षणान्तरसिद्धमुदाहरति – वेदे पञ्चदाम्नीति। केचित्तु 'शतमूर्ध्नी' इति पाठः।

केवलमामक (४।१।३०)। अस्मच्छब्दादणि 'तवकममकावेकवचने' (४।३।३) इति ममकादेशः। भागशब्दात्पुल्लिङ्गात्स्वार्थेऽभिधेये स्वार्थिकेषु लिङ्गातिवृत्तेरपि सत्त्वास्त्रीत्वम्। पापशब्दोऽर्शआद्यचा तद्वति वर्त्तमानः स्त्रियाम्। अपरः पवर्गमध्यो घृतादित्वादन्तोदात्तः। 'उतापरं यक्षिदेवान्' इत्यादौ 'उतापरीभ्यो मधवा' इत्यादौ चान्तोदात्तपाठात्। 'पूर्वमनयन्नापरम्' इत्यादौ पठ्यमानमाद्युदात्तत्वमपि वृषादित्वात्। 'अपराः पूर्वामयेति' इत्यादावजादिपाठाट्टाबपि। आर्येण कृतेति प्राक् सुबुत्पत्तेः समासेऽदन्तत्वम्। भेषजशब्दोऽव्युत्पन्न औषधे रूढः भिषज इदमित्यणि भैषज शब्दोऽपि तत्र। सुमङ्गलीरियं

लोपयोस्त्विति। न प्रयोग साधुत्व ज्ञाने गौरवमिति। अनंत प्रयोगेषु पररूप कल्पनापेक्षया सूत्रे शास्त्र द्वय प्रवृत्तौ गौरवं नेत्यर्थः। किन्तु ततो लाघवमिति भावः।। ननुणिजंतात् क्विपि युष्मदस्मदिति प्रातिपदिकयोस्त्वाद्या-देशेऽकारोच्चारणस्य क्वचिद्विभत्तयुदा त्तत्वार्थत्वं क्वचिच्छ्वणार्थत्वं चेति कथमुच्चारणार्थ त्वमत् आह्। णिजंतातात्क्विपीति। व्याख्यानाद भाष्य प्रामाण्य रूपाद्वैत दाह्।। भाष्यप्रामाण्याच्चेति। चोहेतौ युष्म दस्मदोरेव विशेषण मिति श्रुतानुमिते योरिति परिभाषयेति भावः। अंतरंगत्वादिति। अकच्यपिसुबं तस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बधूरिति तु मत्वर्थीये ईप्रत्यये बोद्धयम्।

प्रकृति भागाविति। नुक्सन्नियोगेनेति भावः। मतुविति। वत्वन्तु 'मादुपधाया' (८।२।९) इति सिद्धम्।

यज्ञेन सम्बन्ध इति। स्त्रिया इत्यर्थः। संयोगपदं सम्बन्धोपलक्षणम्, सम्बन्धश्च यज्ञफलप्रतियोगिकैश्वर्यवत्त्वं तदाह–तत्कर्त्तृकेति।

विभाषा (४।१।३४) सहशब्दो विद्यमानवाची, पूर्वशब्दोऽवयववाची, व्याख्यानात्। तत्र केवलंपतिशब्दस्य विद्यमानपूर्वावयत्वासम्भवादव्यभिचाराच्च पतिशब्देन तदन्तं गृह्यते इत्याह-पतिशब्दान्तस्येत्यादि। न पत्युरिति। सपूर्वस्येत्यनेन पत्यन्तस्य गृह्यमाणत्वादिति भावः। बह्वो वृषलपतयो यस्या इति कर्मधारयोत्तरपदबहुब्रीहौ वारणायेहार्थोप्यनुपसर्जनपदसम्बन्ध इत्यन्ये। बहुब्रीहावित्युपसर्जनोपलक्षणम्। तेन पतिमति क्रान्ता 'अतिपत्नी' इत्यपि। व्यस्ते। 'विभाषा सपूर्ववस्य' (४।१।३४) इत्यत्र यज्ञसंयोग इति न सम्बद्धयते, भाष्ये 'कथं तुषजकस्य पत्नी' इति व्यस्ते एव प्रश्नात्। वृषलत्वेन यज्ञसंभोगाभावात्पूर्वेणाप्राप्तेः, सपूर्वत्वभावाच्चैतदप्राप्तेरिति भावः। उपचारादिति। पाणिग्रहणाश्रयणादिति भावः। यद्वेति। इदं प्रौढ्या, तत्प्रकृतिककर्त्तृक्विपि दृढमानाभावात्। पूर्वसूत्रे यज्ञसंयोग इति तु 'वृषलस्य पतिः स्त्री' इतिप्रयोगसाधनार्थम्। सपूर्वस्य किमिति। अवयववाची पूर्वशब्दः किमर्थ इति प्रश्नः। गवां पतिरिति। स्वामिनीत्यर्थः।

निपात्यते इति। तेन चोदात्तसादेशस्यैव प्रवृत्या सपत्नीशब्दस्याद्युदात्तत्वमपि सिद्धम्। किञ्च समानस्वामिकस्त्रीविशेषस्यैव रूढ्या बोधनार्थं ङीब्नकारविशिष्टोच्चारणम्। अत एव

प्रकृतविषये उद्देश्यत्वेन स्वार्थे परिपूर्ण मिति न्यायेन युवाद्यादेशात् पूर्वं कुत्सादि विवक्षाया अभावेन चादे शानांतरंगत्वादित्यर्थः। ननूक्त रीत्याकचो बहिरंगत्वेनात्राप्यादेशोत्तरमेव प्रवृत्या न दोष इत्यत आह्। ह्लंता आदेशा इति पक्षेत्वति। भाष्योक्तेरिति। आदि रंत्येनेत्यत्रेत्यर्थः। अतएव यदागमपरिभाषया पुंसिश्यप्राप्तेरेव। तस्या अंगसंबंधि कार्य विषयत्वादिति।।

तस्याः परिभाषायाः पुनः प्राप्तांग संबंधि कार्यविषयत्वादि त्यर्थः।। अतएव ज्यादा दीयस इतिसूत्रस्थ ज्ञापकपर भाष्येण न विरोधस्त दाह। सूत्रभाष्यस्वर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समानस्वामिकदासीभूभ्यादौ सपतिरित्येव। समानत्वं चैकस्यैव तत्तत्पत्नीसम्बन्धेन भेदमारोप्य बोद्धयम्। मुख्यसादृश्यवत्पतिकासु तु न तथा प्रयोग इष्यते।

त्रिसूत्रीति। व्याख्यानादिति भावः।

सन्नियोगशिष्ट इति। तेन तद्भावे ङीबपि नेति भावः।

नितान्तानामित्यत्राकार उच्चारणार्थः। नितान्तानामिति पाठे जश्त्वाभावः सौत्रः। त्रीण्येतानीति। अत्रैतशब्दस्योपसर्जनत्वेऽपि तदन्तमनुपसर्जनमेव। अनुपसर्जनादिति चात्र तदन्तविशेषणम्। अत एव गृह्यवृत्तिकृता नारायणेनात्र बहुव्रीहिं कृत्वाऽनेन ङीबित्युक्तं, तदनुसारेण चेदम्।

परे तु 'उपमानानि' (२।१।५५) इतिसूत्रस्थभाष्यस्वरसात् 'टिड्ढाणञ्' (४।१।१५) इत्यादौ गृह्यमाणविशेषणत्वस्य क्लृप्तत्वाच्चात्रापि तथैवोचितम्। तत्र हि 'शस्त्रीश्यामा' इत्यादौ श्यामाशब्दः शस्त्र्यामेव, उपमेयन्तु समासवाच्यमिति पक्षे 'शस्त्रीश्यामो देवदत्तः' इत्यत्र ह्रस्वत्वन्न सिद्ध्यति। यद्युपसर्जनस्येति ह्रस्वं, तदा 'कुम्भकपाललोहिनी' इत्यत्रानुपसर्जनलक्षण ईकारो न प्राप्नोति' इत्युक्तम्। 'त्र्येण्या' इत्यस्य त्रिषु स्थानेषु एन्येत्यर्थो बोद्धय इत्याहुः। आर्षमत्र णत्वम्। वर्णात्किम? प्रकृता। 'गतिरनन्तरः' (६।२।४९) इत्याद्युदात्तः। अन्तोदात्त इति। 'श्वेतो बाजी जायते' इत्यादौ तथा पाठादिति भावः। छन्दसि क्रम्' (का०वा०) इति नादेशापवादः। तेन 'उत्सर्गसमानदेशा अपवादाः' इति न्यायात् तत्स्थानिकत्वं ङीप्सन्नियोगशिष्टत्वञ्चास्य बोद्धयम्। विशुद्धिवाचीति पाठे तत्प्रवृत्तिनिमित्तक इत्यर्थः।

सोपीति। ज्ञापक साजात्या तादृशविषय एव तत्र तत्र भाष्ये संचाराच्चेत्यर्थः।। त्वमावेक वचने। प्रत्ययोत्तर पदयो स्त्वमावेकवचन इत्येकेन सूत्रे णैवसिद्धे योग विभागो व्यर्थ इति न वाच्यम्। एक सूत्रत्वे उत्तरपद साहचर्यात्प्रत्ययस्यापि वृत्तिघटकस्यैव ग्रहणापत्त्या विभक्तावादेशानापत्तेः। व्याख्यानादिति। भाष्येऽमादेशनिषेधकमिदं कुतोनेति शंकाकरण रुपादित्यर्थः।। अत्र यद्वक्तव्यं तदुक्त मिति।। अभ्यमित्येवेत्यारभ्य संगच्छत इत्यंते नेति भावः। सामः। स्थानित्वोत्तयेति। आमिसाम्त्वारोपेणेत्यर्थः। साम्त्वमेवेति सकारोच्चारण सामर्थ्या

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्यतो (४।१।४०)। सन्निधानाद् व्याख्यानाच्च तोपधस्यैव प्रतियोगित्वेनान्वय इत्याह-तोपधभिन्नादिति। वर्णात्किम्? खट्वा, आद्युदात्तः।

नर्तकीति। 'शिल्पिनि ष्वन्'। (३।१।१४५) गौरशब्दो वर्णवाच्यप्यन्तोदात्त इतीह पाठः। अनड्वाहीति। 'आमनडुहः स्त्रियां वा' (क्वा०वा० इति वचनात्पक्षे आम्।

सूर्येति। स चेद्य इति। सूर्यादीनामङ्गानामुपधाया इति व्याख्याने तु 'सौरी बलाका' इति न सिद्ध्येत्। सूर्येणैकदिगित्यण्णन्तान् ङीपिअण्णन्तमङ्गं न सूर्यशब्द इति तदसिद्धिः। वचनं तु 'सूरी कुन्ती' इत्यत्र चरितार्थम् अणो लोपेऽप्याभीयत्वेन सोऽसिद्धः, अण्निमित्तकाल्लोपस्तु व्याश्रंयत्वान्नासिद्ध इति यस्योपधत्वम्, उपधाग्रहणादेव भाधिकारमभिव्याप्याभीयासिद्धत्वमिति बोद्धयम्। यग्रहणन्तूत्तरार्थम्। ङ्यामिति निर्देशात्सप्तम्येकवचनस्याग्रहणम्। नक्षत्राणीति। नक्षत्रवाचकाद् योऽण् तत्रेत्यर्थः।तेन तिष्येण युक्तं तैषमहः, तिष्ये भवस्तैषः इत्यादि सिद्धम्। मातरिषिच्चेति। पितामहीसिद्ध्यर्थमिदम्। दंष्ट्रेति। दंशेः 'दाम्नीशस' (३।२।१८२) इति करणे ष्ट्रन्। अयमजादिषु पठ्यते। गौरादिषु मातामहीशब्दपाठोऽनार्ष इत्यन्ये।

जानपदीति। जनपदे भवेत्यर्तः। उत्सादित्वादञ्। ङीप्याद्युदात्तत्वे प्राप्तेऽन्तोदात्तार्थ वचनम्। वृत्तिः जीविका। अप्रत्यय इति। तथा च क्रियाशब्दोऽयमिति भावः। अमत्रे-कमण्डलुरूपे।

कुण्डी कमण्डलौ, जारात् पतिवत्नीसुते पुमान्।

इति मेदिनीकोशात्स तत्र 'नित्यस्त्रीलिङ्ग इति भावः। यदि तु 'पिठरे तु न ना कुण्डम्'

दित्यर्थः। अतएव गौण मुख्य साधारण्ये नामि साम् त्वारोपेण सामःस्थानिवत्वेनोक्तत्वादेव। ननु सुटः प्राधान्य एव प्रवृत्त्या गौणे आरोपे न मानमत आह्। प्रत्ययोत्तर पदयोरितीति। आम्त्वाभावाच्चेति। सकारोच्चारणसामर्थ्येन स्थानिवद्भावे नाप्यामृत्वा भावादित्यर्थः। तत्रैवायमिति। तत्रैवामि साम्त्वारोपेणा कमित्यर्थः।। ननु सामर्थ्ये नाशास्त्रीयस्याप्यति देशेनभावि साम्त्वस्यसंभ वोऽतआह्। भाष्यविरुद्ध कल्पनेति। प्रत्ययोत्तरपदयोश्चेति सूत्रस्थ भाष्य सामिति। सामिति शब्दरूपस्येत्यर्थः।। सर्वथा दुरुपपादत्वादिति भाविसाम्त्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति विश्वकोषे तस्य नपुंसकत्वमप्युक्तं पिठरामत्रशब्दौ च पर्यायौ, 'पिठरं स्थाल्युखा कुण्डम्' इत्यमरे नपुंसकत्वमात्रोक्तिस्त्ववयुत्याऽनुवाद इत्युच्यते, तदाऽनेकविधसंस्थानेषु अमत्रेषु कुण्डव्यवहारे कुण्डत्वे जातित्वाभावादप्राप्तौ ङीषिति बोद्धव्यम्। स्त्रीविषयत्वादित्युपलक्षणमिति बहवः। कमण्डलुसंस्थानस्यानुगतत्वात्तद्रूपामत्रवाचिनो जातित्वमप्यस्ति। सूत्रं तु नियमार्थमेव। अमृते जारजाथां कुण्डेत्येवेत्यपरे। आवपने च नित्यस्त्रीत्वादप्राप्तस्य ङीषो विधिः। आवपनमिति सामान्ये नपुंसकम्।

गुणयोगादिति। गौणत्वेऽप्यपदकार्यत्वात्प्रवृत्तिरिति भावः। विधित्वानुरोधाद् गौण एवास्य प्रवृत्तिः। वर्णश्चेदिति। तद्विशिष्टश्चेदित्यर्थः। अन्यथा 'गुणे शुक्लादयः पुंसि' इत्युक्त्याऽसङ्गतं स्यादिति बोद्धव्यम्। सूत्रे वर्णशब्दोऽर्शआद्यजन्तः। कालाऽन्येति। क्रौर्यगुणयुक्तेत्यर्थः।

नील्या अनिति। वृत्त्यनुसारेणेदम्। प्रतिपदोक्तत्वाद् अन्प्रकृतिङीषन्तप्रविष्टनीलशब्दस्यैवात्र ग्रहणं, न त्वस्य लाक्षणिकत्वात्। अनाच्छादने इति नीलवर्णवती शाटीत्यर्थे 'नीली' इति वारणाय चरितार्थम्। नील्या रक्ता गौरित्यर्थे नीलेत्येवोचितमिति परे। मैथुनेच्छाशब्दोऽर्शआद्यजन्तस्तद्वतीत्यर्थः। अन्येति। मैथुनादन्यद् या इच्छति। कमेः 'लषपत' (३।२।१५४) अन्येति। मैथुनादन्यद् या इच्छति। कमेः 'लषपत' (३।२।१५४) इत्युकञ्। शोणशब्दो वर्णवाची 'वर्णानां तण' (२।३।३) इत्याद्युदात्तः। अन्यत इति सिद्धे विकल्पार्थमिदम्।

वोतो (४।१।४४)। अत्र गुणवचनशब्देन समस्त-कृदन्ततद्धितान्त-सर्वनाम-जाति-सङ्ख्या-सञ्ज्ञाशब्दातिरिक्तशब्दो गृह्यते; आकडारसूत्र भाष्यपर्यालोचनया तादृशानामेव

स्थाशास्त्रीयकार्यत्वाभावेन स्थानिव त्वस्यातिदेशाल्लभ्यत्वात् सर्वप्रकारेण दुरुपपादत्वादित्यर्थः।। विरुद्ध कल्पनयेत्यर्थः।। ननु होढ इत्यत्र वाक्य भेदायांते पदानुवृत्तेरवयव षष्ठेयवेत्यत् आह्।। आदाविति। आदिनामोनो धातोरित्यादेः संग्रहः।।

अन्यथेति। स्थानषष्ठ्यं गीकार इत्यर्थ।। नस्यादिति।। मत्वंतपदस्यस्थाने मवर्णा वर्णांतान्मवर्णावर्णेपधात्त्व परस्य निर्दिश्य मानस्य वो भवतीत्यर्थे वृक्षवंतावित्यादौ न स्यादुक्षवानित्यादा वेव स्यादिति भावः।। अतएवपद स्येत्यस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्सञ्ज्ञालाभात्। तत्र हि प्रातिपदिकमात्रस्य गुणवचनसञ्ज्ञामुक्त्वाऽग्रे तद्बाधकत्वेनैताः क्रमेण पठिताः। गुणवचनेत्यन्वर्थसञ्ज्ञया गुणोपसर्जनगुणिवाचकानामेव तादृशानां सा सञ्ज्ञेति न रूपादीनां ग्रहणं, जातिपदेनाऽऽकृतिग्रहणद्रव्यवृत्तिजातिवाचकानामेव तत्र ग्रहणात्। कठादिशाखातदध्येतृणांच तद्धितान्तत्वादेव व्यावृत्तिः। एतत्सूत्र भाष्योक्तम् –

सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः।।

इति गुणलक्षणंत्वेकदेश्युक्तिर्बहुविशेषणानां वैयर्थ्यात् भाष्यकृताऽव्याख्यानाच्च। तस्मादाकडारसूत्रोक्तमेव भाष्यसम्मतमिति भाष्यप्रदीपोद्द्योते निरूपितम् शुचिरिति। शुचेरौणादिकः किम्। उत इत्यस्याभावेऽपि 'स्वरुसंयोगोपधान्न' (का०वा०) इत्येतत्समामर्थ्येनात इत्यस्यात्रासम्बन्धः उणादीनामव्युत्पन्नत्वात्' 'कृदिकारात्' (ग०सू०) इत्यस्यात्रा प्रवृत्तिरित्यभिमानः। शुक्लेति तु प्रत्युदाहरणमुचितम्। तपरः किम्? अत एवेन्द्रत्वादिकं न जातिः। पञ्चेन्द्रोपाख्यानादिभिरनेकेषां समकालिकत्वेऽपि सर्वेषां संस्थानस्यैकत्वे मानाभावात्। 'दुर्गा' 'अपर्णा' इत्यादौ स्त्रीविषयत्वादपि न ङीष्। तटीति। अनुगतसंस्थानव्यङ्ग्यमेतत्। जलसमीपदेशविशेषो हि तटम्।

नन्वेवं वृषलत्वादीनां जातित्वं न स्यात्। अवयवसंस्थानस्य ब्राह्मणादिसाधारण्येन तस्या आकृतिग्रहणत्वाभावात्, किन्तु साक्षादुपदेशगम्या सेत्यत आह – लिङ्गानामिति। इयमपि जातिरित्यर्थः। लिङ्गानामिति कर्मणि षष्ठी। सर्वाणि लिङ्गानि न भजति इति सर्वशब्दस्य लिङ्गापेक्षत्वेऽपि भाष्यप्रामाण्यात् भजो ण्विः, समासश्च। आख्यातम् आख्यानम्, उपदेशः।

क्वचिद्वैयधिकरण्य स्वीकारादेव। भाष्य इति। एतेन नांत ग्रहण सामर्थ्यान्मुरव्यप्रातिपदिकान्त एव न लोप प्रवृत्तिर्न तुव्यपदेशिवद् भावलब्धांते। अतएव नः संख्याया इति निर्देश संगतिरित्यपास्तम्।। ननु सर्वग्रहणं किमर्थ मित्याशंकायामाहसर्वग्रहणंत्विति।। नन्वपादादाविति पर्युदासेन पादादि भिन्नस्य पादघटकस्यै वग्रहणं स्यान्नतु वाक्यस्थस्यायीत्यत आह्। अपादादादिशब्देनेति।। छंदो ही नेति।। जगत्यादि छंदोही ने त्यर्थः। ननु संधौस त्यक्तपरिमाणे एकदेशविकृत न्यायाभावान्नेतेनव्यायेना स्मच्छब्दत्वमतआह्। आदेशे सतीति।। अन्येइति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कथनात्-उपदेशात्। एकत्र 'इन्द्रः' इत्युपदिष्टे अन्यत्र तद्ग्रहे मानाभावान्नेन्द्रत्वादि तथ.। ब्राह्मणत्वन्तु एकत्रोपदिष्टे तत्तत्पित्रादिषु सुग्रहम्। वृषलत्वं तदपत्यतत्सहोदरादौ सुग्रहम्। अत्राकृतिग्रहणेति नित्यानित्यसाधारणमिति युवत्वादिकमपि जातिरेतन्मते। अपर आहेत्यादिना यावद्द्रव्यभावित्वमित्यनित्यव्यावृत्तं लक्षणान्तरं भाष्ये दर्शितम्। एवञ्च भिन्न-ऋषिकर्तृकलक्षणद्वयप्रामाण्येन कुमारादिशब्दे जातिकार्यविकल्पः। अत एव 'युवजानिः' इत्यत्र पुंवत्त्वं, युवतितरा' इत्यत्र तद्भावश्च भाष्ये उदाहृतः।)

नन्वेताभ्यामपि 'औपगवी' 'कठी' इत्यादेरसङ्ग्रहोऽनुगतसंस्थानव्यङ्ग्यत्वाभावात्सर्वलिङ्गत्वाच्चेत्यत् आह– गोत्रश्चेति। शास्त्रीयमत्रगोत्रम्। अत एव गोत्राद्यूनि प्रत्ययो भवति, 'स्त्रियां लुक्' इति न्यासे 'औपगवी माणविका' इत्यत्राण् योऽनुपसर्जनमित्यनुपसर्जनलक्षण ईकारो न प्राप्नोति, मा भूदेवम् अण्णन्तादनुपसर्जनादित्येवं भविष्यति' इति प्रौढ्या पूर्वपक्षिणोक्ते तदङ्गीकृत्यैव 'इह तर्ह्यौपगवीभार्यः, जातिलक्षणः पुंवत्त्व प्रतिषेधो न प्राप्नोति, मा भूदेवं वृद्धिनिमित्तस्येत्येवं भविष्यति। एवन्तर्हि ग्लुचुकायनीभार्ये दोषः' इति 'एको गोत्रेः' (४।१।६३) इति सूत्रस्थ भाष्ये युवापत्यस्य जातित्वाभावकथनं सङ्गच्छते। अन्यथा जातिलक्षणङीप एव परत्वाद्वक्तुं युक्तत्वं, पुंवत्त्वप्रतिषेधो न प्राप्नोतीत्यसङ्गतिश्च। ग्लुचुकायनीभार्ये दोषस्तु ङीष्पुंवत्त्वप्रतिषेधयोरसिद्धिरूपो बोद्धयः। 'सर्वतोऽक्तिन्नार्थात्' इति ङीषि तु पुंवत्त्वप्रतिषेधासिद्धिरेव दोषः। अत एव 'ब्राह्मोऽजातौ' (६।४।१७१) इति सूत्रेऽपत्ये जातौ नेत्यर्थः सङ्गच्छते। तव त्वपत्यस्य जातित्वाव्यभिचारात्तदसङ्गतिः, 'ब्राह्मो नारदः' इत्यसिद्धिः। अतः सामर्थ्येनात्र शास्त्रीयगोत्रस्यैव ग्रहीतुमौचित्यम्। अनन्तरापत्यप्रत्ययान्ते

भाष्यतत्त्वविद इत्यर्थः।। परेइति। केचिदित्यतः।। अत्रारुचि बीजं तुव्यपवर्गा भावान्नोभयत आश्रय प्रवृत्तिरिति।।

इत्यर्थकमिति।। इतिप्रयोजनमित्यर्थः। इत्येतन्मात्रस्य वाक्यत्वमिति। एवं च देवदत्तः चतीत्यस्य कर्म धारयत्वे वाक्यत्वं न स्यादेक ग्रहण वैयर्थं च स्यादिति भावः।। तत्प्रवृत्तेरिति। युष्मस्मदोः षष्ठीतिसूत्रे स्थ ग्रहणादत्र पदाधिकारे नैकार्थीभाव कल्पनेति भावः। स्वार्थे इति।। चार्थसमुच्चयास्त्रय हरिहरान्वयि स्वामित्वान्व यीत्यादित्यर्थः।। नन्वनालोचनार्थै रितिपर्युदासेन बहिरिंद्रियजन्य ज्ञानार्थक धातु योग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'अवन्ती' इत्यत्र जातिप्रयुक्तो ङीषिति 'अनुपसर्जनात्' (४।१।१४) इति सूत्र भाष्यं त्वनन्तरेऽश्वत्थाम्नि द्रौणायनिवद्गोत्रत्वारोप इत्यभिप्रायेण। यूनि तु न शास्त्री यगोत्रत्वारोपः, तत्र युवैव न गोत्रमिति नियमेन तत्संज्ञानिषेधात्, तदाह अपत्यप्रत्ययान्त इति। 'अपत्यं पौत्रप्रभृति' (४।१।१६२) इति परिभाषित इति शेषः। शाखाध्येत्रिति षष्ठीतत्पुरुषः, शाखायामस्त्रीविषयत्वाभावात्। जातिकार्यं लभते इति। अनेनास्यादिदेशत्वं बोधयति कठेन प्रोक्तमधीते इति वैशम्पायनान्तेवासित्वात्प्रोक्तार्थणिनेः 'कठचरकात्' (४।३।१०७) इति लुक्। अध्येत्रणः प्रोक्ताल्लुक्। वहव्य ऋचोऽध्येतव्या यस्या इति विग्रहे 'ऋक्पूः' (५।४।७४) इत्यप् समासान्तः। स्त्रिया अध्ययानाभावेऽपि तद्वंश्यत्वात्ताच्छब्द्यम्, यथाऽनधीयाने माणवके। 'ब्राह्मणी' इत्यत्रापत्येऽणि 'ब्राह्मोऽजातौः (६।४।१६१) इत्युक्तेष्टिलोपाभावः।

परे तु आकृतिग्रहणेत्येव लक्षणम्। आकृतिपदमुपदेशोपलक्षणम्। आकृतिद्वारा साक्षाद्वोषदेशेओन ग्राह्या जातिरित्यर्थः। तत्रेदृशाकारो गौरित्याकृत्युपदेशग्राह्या गोत्वादिजाति;, 'अयं ब्राह्मणः' इतिसाक्षादुपदेशग्राह्या ब्राह्मणत्यादिजातिः यद्वा, आकृतिग्रहणं जातिग्राहकोपदेशस्याप्युपलक्षणम्। 'लिङ्गानाञ्च न सर्वभाक्' इति तत्स्व रूपानुवादकम्। तेन शुल्कादिगुणानामेकत्वेऽपि जातित्वाभावो बोधितः। अत एव 'विशेषणानाञ्च' (१।२।५२) इति सूत्रे जातेराविष्टलिङ्गत्वं भाष्ये उक्तम्। आविष्टलिङ्गत्वं नियतेलिङ्गत्वमिति कैयटः। तच्च प्रायिकमिति केचित्। 'भाष्यप्रामाण्याज्जातेरेकशब्दवाच्यायाया न त्रिलिङ्गता, 'तटं त्रिषु' इत्यादिकोशकृतां प्रमादः' इत्यन्ये। 'सकृदाख्यातनिर्ग्राह्या' इत्यनेनैकत्वमनेकानुगतत्वञ्च बोधितम्। सकृदेकवारं

एवेदं सूत्रं प्रवर्तत इति चेत्तथैव युक्त मत आह्। अनालोचना थैंरित्येवेति। अतएव युक्त ग्रहणा भावेपि साक्षात्संबंध एव प्रवर्तनादेव। ननु प्राति पतिकार्थेति सूत्रेण प्रथमायां कर्तव्यायां प्रातिपदि को क्तत्वस्याव्यार्त्तक त्वेपि संबोधने चेत्यतप्रवृत्तौ व्यावर्तकत्वं स्यादेवेत्यत आह्।। तिङिति।। ननु भोइत्यस्य विभाषा भवसिद्ध भो इत्यनेनार्थतः प्रतिरूपकतक्वा न्निपातत्वांगी कारस्य भाष्ये कृतत्वान्न संबोधने द्योतकत्वं किन्तु वाचकत्वमत आह्।। देवदत्तस्यैवेति।। नन्वनंत रस्येतिन्यायेनाष्टमिक सूत्रेण विहित कार्ये एवाविद्य मानत्व प्रवृत्या षाष्ठाद्युदात्तो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्वचिद्व्यक्तौ साक्षादाकृतिद्वारा वोपदिष्टा व्यक्त्यन्तरे ग्रहीतुं शक्येति तदर्थः। गोत्रञ्चेत्यादि प्राग्वदेव। अत एव प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः।

असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः।।

इति लक्षणान्तरं भाष्ये उक्तम्। सत्त्वस्य द्रव्यस्य प्रदुर्भावविनाशाभ्यां या तौ प्राप्नोति सा जातिरिति लक्षणम्। यावद्द्रव्यभाविनीति तदर्थः। अनेन गोत्वब्राह्मणत्वाद्योरुभयोरपि सङ्ग्रहः। गुणैर्युगपद् द्रव्येण सम्बध्यते। यथा निर्गुणस्य द्रव्यस्य नोपलम्भ तथा जातिरहितस्यापीत्यर्थ इति कैयटः। इदं स्वरूपकथनमेव। अत्र लक्षणे असर्वलिङ्गमित्येतत् मदुक्तार्थकमेव, न तु लक्षणान्तरम् अनुपयोगात्। बह्वर्थाम्। सर्वव्यक्तिव्यापिनीमित्यर्थः। एतदेकवाक्यतया पूर्वलक्षणेऽपि मदुक्तव्याख्यैवोचिता।

अत एव 'कः पुनरेतयोर्जातिलक्षणयोर्विशेषः। यथा पूर्वलक्षणं तथा कुमारीभार्य इति भवितव्यं, यथोत्तरं तथा कुमारभार्यः' इति भाष्ये लक्षणमित्येकवचनमेव प्रयुक्तम्। अत एवाकडारसूत्रशेषे 'आकृतिग्रहणा जातिः' इत्येवोक्तं भाष्ये इत्याहुः।

बलाकेति। अयञ्च बिसकन्ठिकापदवाच्यजातिविशेषवाची। स च बकत्वव्याप्योऽन्यो वेत्यन्यदेतत्। अस्त्रीविषयादित्यस्य प्रवृत्तिनिमित्तैक्ये लिङ्गान्तररहितभिन्नादित्यर्थः। एतेन बलां कायतीति यौगिकस्य सर्वलिङ्गत्वात्।

बलाका बकपङ्क्तिः स्याद् बलाका बिसकण्ठिका।
बलाका कामुकी प्रोक्ता बलाकश्च बको मतः।।

इति कोशे पुँल्लिस्याप्यभिधानाच्च नेदं युक्तमित्यपास्तम्। अत एव 'पाककर्ण

भविष्यत्येव पूर्व ग्रहण भावेपीति शंकते। पूर्वं किमिति।।

आमंत्रित स्वर इति।। आमंत्रित निघात इत्यर्थः।। नामंत्रितेसमानाधिकरणे सामान्य वचनं समानाधिकरणे किं देवदत्तभोः नन्वत्र भो इत्यस्य विशेषण त्वाद्देव दत्तेत्यस्य विशेष्यत्वात्सामानाधिक रण्यमस्त्येवेति चेन्न। समानाधिकरण ग्रहण सामर्थ्या दत्यंत समानार्थक रूप सामानाधिकरण्य विवक्षित त्वात्।। अत्र तु भो इत्यस्य लिंगवाचकत्वाभावाद्देव दत्तेत्यस्य पुंस्त्ववाचकत्वादत्यंत सामानाधिक रण्या भावान्निषेधाप्राप्त्या देव दत्तेत्यस्या विद्यमानवत्वं भवत्येव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(४।१।६४) इति सूत्रे चरितार्थम्। तद्धिस्त्रीविषयार्थम्। अन्यथा तेषामपि यौगिकेऽर्थे लिङ्गान्तरसम्भवेन पूर्वेण सिद्धे तद्वैयर्थ्यं स्पष्टमेव।

पाककर्ण (४।१।६४)। जातिवाचिनः किम्? बहुपुष्पा शाखा। स्त्रीविषयादपीति। अजात्यर्थन्तु न, प्राक्पुष्पादिषु जातिवचनेषु नित्यस्त्रीलिङ्गेषु 'सदच्काण्ड' (का०वा०) इत्यादिनिषेधात्। योपधादपीति। पुनर्जातिग्रहणादिति भावः। अस्त्रीविषयादिति तु पूर्वसूत्रेण विच्छिन्नम्। तित्तिरिरिति।

स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः।

इत्यमरादयं स्त्रियामपीति भावः। इतः किम्? दरत्। 'द्व्यञ्मगध' (४।१।७०) इत्यणः 'अतश्च' (४।१।१७७) इति लुक्।

ऊङुतः (४।१।६६)। ङकारो 'नोङ्धात्वोः' (६।१।१७५) इति विशेषणार्थः। अन्यथा 'यवाग्वा' इत्यादवपि निषेधः स्यात्। दीर्घोच्चारणं प्रश्लेषेणोकारद्वयविधानद्वारा 'ब्रह्मबन्धूः' इत्यादिबहुव्रीहौ परकब्निवृत्त्यर्थं, रूपाणां सवर्णदीर्घेण सिद्धेरिति भाष्ये स्पष्टम्। श्वश्रूरिति तु 'श्वशुरः श्वश्र्वा' (१।२।७१) इति निर्देशात्सिद्धम्। कुरूरिति। एकावधूः, कासूः। 'वधूः स्नुषा नवोढा स्त्री' 'कासूर्विकलवाचि स्याद्' इतिकोशबलेन नवोढात्वस्य विकलवाक्त्वस्य च प्रवृत्तिनिमित्त्वेन खरुशब्दवद् गुणवचनत्वात्। पतिवरेति। पतिलाभोत्कण्ठावतीत्यर्थः।

बह्वादि (४।१।४५)। बहुशब्दस्योक्तरीत्या गुणवचनत्वाभावेन ग्रहणम्। 'कृदिकाराद्' (ग०सू०) इति 'सर्वत्' (ग०सू०) इति च गणसूत्रे। अकृतोपीत्यर्थः। 'व्यवस्थितविभाषाश्रयणात्क्वचिन्न। 'सुगन्धिः, प्रियकतिर्वेश्या' इत्यादिः इति वृत्तिः

देवकरो षीतिकरोषी षीत्यस्यण्वुलर्थोपदर्शकत्वेन लिंगादि विशिष्ट विशेष वार्थकत्वादितिवदिति। अनंत्यविकारेति परिभाषयेति भावः। अंचतेरिति। नत्वच् प्रत्याहारस्य नाच् गतावित्यस्य नाप्यचपप्रत्ययस्येत्यर्थः।। व्याख्यानादिति।। द्युप्रागप्रागुदक्प्रती चोयदितिनिर्देशादित्यर्तः।। नेदं वर्ग ग्रहणं व्याख्यानादिति च जोरिति निर्देशादि तिभावः।। अनभि धानमिति।। हल इति सूत्रस्थ भाष्य प्रमाणादित्यर्थः।। तदेव कैयटेन स्पष्टीकृतं तदाह। एवं चेत्यारभ्याकरे स्पष्टमित्यंतेन। स एवक्विबादिरेव। अन्यथा यथा श्रुनार्थांगीकारे। नन्व पूर्वपरिभाषास्वीकारे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुराणशब्दोऽत्र पठ्यते। स यद्यपि 'अयं पन्था अनुवित्तः पुराणः' इत्यादावन्तोदात्तदर्शनेन घृतादिपाठादन्तोदात्त इत्युदात्तनिवृत्तिस्वरेण ततो ङीब्ङीषोः स्वरे विशेषाभावस्तथाप्यत्र पाठसामर्थ्यात्पक्षे टाबेवेति बोद्धयम्। अजननिरिति। 'आक्रोशे नञ्यनिः' (३।३।११२) इति जनेरनिः। अहन्शब्दोऽत्र पठ्यते। सामर्थ्यादनुपसर्जनाधिकारबाधः। 'दीर्घाह्नी प्रावड्' इति ङीष्यन्तोदात्तम्। बह्वादिराकृतिगण इति गणरत्नकृत्।

पुंयोगादा (४।१।४८)। हेतौ पञ्चमी। आख्यायामिति पञ्चम्यर्थे सप्तमी। आख्याशब्दो बोधकपरः। आख्याचोपस्थिततत्वात्पुंस एव न स्त्रियाः स्त्रियां वर्त्तमानस्य स्त्र्याख्यत्वाव्यभिचारादाख्यापदवैयर्थ्यापत्तेः। पुंस्येव यः प्रसिद्धः शब्द इत्यर्थः। पुंयोगाद्धेतोः प्रवृत्तिनिमित्तारोपेण स्त्रियां वर्त्तमानात्पुंबाधकाच्छब्दान्ङीवित्यर्थः। योगः सम्बन्धः, पुंयोगात्किम्? देवदत्ता। आख्यायां किम्? प्रसूता। तद्भावे हि स्त्रियां वर्त्तमानं यत्प्रातिपदिकं पुंयोगहेतुकप्रवृत्तिनिमित्तकमित्यर्यर्थोऽपि सम्भाव्येत्। अस्ति हि तत्प्रवृत्तिनिमित्ते प्रसवे पुंयोगहेतुकत्वम्। उक्तपुमाख्या तु नैषेति भावः। पुंयोगोऽत्र दाम्पत्यरूप एवेति भाष्यस्वरसः 'यथेयं भर्तृपापकृतान् बन्धादीन् लभते, एवं तच्छब्दमपि' इति भाष्योक्तेः। 'देवकी' इत्यादि तु गौरादिषु बोद्धयमिति केचित्।

गोपालिकेति। गाः पालयतीति गोपालः, स एव गोपालकस्तस्य स्त्रीत्यर्थः ण्वुलन्तस्य तु कारककष्ठ्या समासनिषेधाच्छेषष्ठ्या समासे आपः सुपः परत्वादित्वं दुर्लभम्। वस्तुतः शेषषष्ठ्या अप्यत्र कारकत्वात्सुबुत्पत्तेः पूर्वमेव तत्रापि समासः। यथाकथञ्चित्कारकग्रहणेऽपि कथञ्चित्कारकत्वमादाय 'गतिकारकोपपदानाम्' इत्यस्य प्रवृते रत्रत्य भाष्यात् 'उपपदमतिङ्' (२।२।१६) इतिसूत्र भाष्याच्च लाभात्। यद्वा, तन्निषेधस्यानित्यत्वादप्रवृत्तौ कारकषष्ठ्या

गौरवमत आह्। किंचेति। ननु भत्वेनानवकाशत्वादेव पदत्वस्यबाधोस्त्वित्यत आह्। राज्ञ इत्यादाविति। बाधायोगादिति।।

न लोपैक वाक्यतापन्न पदसंज्ञासूत्रस्याल्लो पैकवाक्यतापन्न भसंज्ञासूत्र दृष्ट्याऽसिद्ध त्वेनेतिभावः। ननु कार्यकाल पक्षेपि परि भाषा शास्त्रवत्संज्ञा शास्त्रस्यापि स्वदेशत्यागा योगस्य युक्ति सिद्धत्वमदसोमादिति सूत्रस्थमयादिभ्यः परैव प्रगृह्य संज्ञेति भाष्यस्यत्वयमर्थः।। परैव प्रगृह्यत्व संज्ञा उत्कृष्टैव परगृह्य संज्ञेति। अन्यथा प्रगृह्यसंज्ञाया अंतरंगत्वादप्रगृह्यादस इत्येव सिद्धे संज्ञा विधान

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुबुत्पत्तेः पूर्वं समासेन तत्रापीत्वं सुलभम्। सूर्येति। सर्त्तेः क्यप्याद्युदात्तसूर्यशब्दाच्चाप्यन्तोदात्तमिदम्। एतेन ङीप्निषेधेन टापैव सिद्धिरित्यपास्तम्। सूरीति। सूर्यस्य स्त्री या कुन्ती इयं मानुषी, न देवतेत्यर्थः।

महत्त्वे इति। तद्योगे एवैषां स्त्रीत्वमिति भावः। यवनाल्लिप्यामिति। लिप्यर्थकोऽत्र ङीष् 'तस्येदम्' (४।३।१२०) इत्यण्बाधक इति बहवः। लिपिः अक्षरविन्यासः।

मातुलेति। मातुलान्नित्ये प्राप्ते उपाध्यायादप्राप्ते विभाषेयम्। या तु स्वयमेवेति। 'अपादाने स्त्रियां घञ उपसङ्ख्यानं, तदन्ताच्च वा ङीष् (का०वा०) इति तृतीये 'इङश्च' (३।३।२१) इति सूत्रे वार्त्तिकादिति भावः। उपेत्याधीयते यस्या इति विग्रहः। अर्येति ह्रस्वादिस्तदाह-स्वामिनीति। 'अर्यः स्वामिवैश्ययोः' (३।१।१०३) इत्युक्तेः। आर्येति पाठस्तु कैयटाद्यसम्मतः। स्वार्थ इति। अत एव भाष्ये 'अर्याणी, अर्या' इत्येवोक्तम्। पुंयोग एव प्रवृत्तौ तु उपाध्यायीतिवद् अर्यीति पक्षे ङीषमेवोदाहरेत्। कर्मण्यण् इति सूत्रंतु 'इन्द्री' इत्यादिव्याव्यावृत्यर्थमिति भावः।

क्रीतात् (४।१।५०)। करणादिति वक्तव्ये पूर्वग्रहणादनुवृत्तप्रातिपदिकरूपान्यपदार्थेऽवयववाचिपूर्वशब्देन बहुव्रीहिः। तेन 'वस्त्रेण क्रीता' इति वाक्ये न। अत इति चानुवर्तते। करणे किम्? सुक्रीता। धनक्रीतेति। 'कर्तृकरणे' (२।१।३२) इत्य बहुलग्रहणेन 'गतिकारकोपपदानाम्' इत्यस्यानित्यत्वादत्र सुबुत्पत्त्यन्तरमेव समास इति भावः। इदम् 'उपपदम् तिङ्' (२।२।१६) इति सूत्रे कैयटे स्पष्टम्। अयमजादिष्वित्यन्ये। एवञ्च 'गति' इत्यादेरनित्यत्वे न मानमिति तदाशयः। अत एवैतत् 'कर्तृकरणे' (२।१।३२) इति सूत्रे बहुलग्रहणफलत्वेन भाष्ये नोक्तम्। 'अम्बाम्ब'

सामर्थ्येनापवादत्वात्तत्प्रयुक्त कार्य स्यापवादत्वाच्चायादीनां बहिरंगत्वात्साव काशत्वाच्च विप्रतिषेधायाह्या तदसंगतिः स्पष्टैव। एवं च कार्यकाल पक्षे यजादि रचादि परोयो नित्याद्यर्थस्य लाभेन परिभाषाना रंभेण च लाघवमत आह्। य जादि प्रत्ययस्येति चेति। चेन कार्यकाल पक्षेपि संज्ञा। शास्त्रस्यवाक्यैक व्राक्यतया विधि नान्वयाद्य चीत्यादेरावृत्यैवत्तद्वि धावन्वये न गौरवाद दमुयङित्यादि सिद्ध्यर्थं परिभाषाया आवश्यकत्वाच्चेति बोध्यम्। अतएव परिभाषानारंभे गौरवादारं भस्यावश्य कत्वाच्चैव।। एवं सर्वफलानामिति। अदूमुयङि त्यादि व्यतिरिक्त

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(८।३।६७) इति सूत्रं गवादिग्रहणन्तु नियमार्थम्। तेन 'हृदिस्थः' इत्यादौ षत्वं नेति दिक्।

अब्भ्रलिप्तातिः। 'कृद्ग्रहणे गतिकारकपूर्वस्थापि' (प०भा०) इति विशिष्टस्य क्तान्तत्वम्। अल्पाख्यायामिति समुदायोपाधिः। अल्पत्वं करणगतं, क्रियागतं वा। क्रान्तादिति। क्तान्तान्तादित्यर्थः। प्रत्ययग्रहणपरिभाषालब्धक्तान्तेन प्रातिपदिकस्य विशेषणात्। ऊरुभिन्नीति। 'जातिकालसुखादिभ्यः परा निष्ठा' (६।२।१७०) इति भिन्नशब्दस्य परनिपातः। पाणिगृहीतीति। अग्निसाक्षिकतया गृहीतपाणिकेत्यर्थः। भाष्ये तु 'पाणिगृहीत्यादीनां विशेषे' इत्युक्तम्।

अस्वाङ्गपूर्व (४।१।५३)। न स्वाङ्गम् अस्वाङं, पूर्वञ्च तत्पदं पूर्वपदं, पुनः कर्मधारयः। अस्वाङ्गभूतात्पूर्वपदात्परं यत् क्तान्तं तदन्तबहुव्रीहेरित्यर्थः।' उत्तरसूत्रे भाष्ये 'कल्याणपाणिपादा' इत्यादौ तत्प्रवृत्तिवारणाय तत्रैतदनुवर्त्य कर्मधारयस्याश्रयणेनात्रापि तथैवौचित्यात्। तत्र 'यदुपसर्जनं 'पाणिपादम्' इति समुदायो, न स स्वाङ्गम् स्वाङ्गसमुदायश्च न स्वाङ्गशब्देन गृह्यते। यच्च स्वाङ्गं पादेति, न तदस्वाङ्गरूपपूर्वपदात्परम्' इत्युक्तम्। एवञ्च 'करमुखी' इत्याद्यसाध्येव। जातिपूर्वादितीहापि सम्बध्यते। दुर्वारत्वात्, तदाह-नित्ये प्राप्ते इति। वस्त्रच्छन्नेति। बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरे शेषनिघाते चानुदात्तान्तोऽयम्। 'पुत्रादिनी' इत्यादौ 'सुप्यजातौ' इति णिनिदर्शनेनाऽऽकृतिग्रहणवाद्यभावेन च पुत्रशब्दस्य जातिवचनत्वाभावेऽपि 'पुत्रहती' इत्यादौ गौरादिङीषिति बोद्धयम्। अस्वाङ्गादित्येव सिद्धे पूर्वपदग्रहणं स्पष्टार्थम्। किञ्च तदभावेऽस्वाङ्गादिति प्राधान्याद् बहुव्रीहिविशेषणं स्यादिति।

स्वाङ्गाच्चौ (३।१।५४) तदन्तादित्युपसर्जनग्रहणलब्धम्। बहुव्रीहेरित्यनुवर्त्तमाने उपसर्जनग्रहणफलमाह-अतिकेशीति। 'एकविभक्ति' (१।२।४४) इति

सर्वफलान मित्यर्थः।। तस्माद दमुयङित्यादरेसिद्धेरनारंमे गौर वाच।। यानीति।। अन्यथा सिद्धानि ष्यङ इत्यत्रोक्ता न्यन्य थासिद्धानद मुयङित्यादीनि चेत्यर्थः।। अतएव। अंत्यसदेशस्यान्येनव्यवधानादेव।। तत्र मानमाह।। सूत्रं सार्थकमिति'' ननु परिभाषा स्वीकारे न संप्रसारणे इति सूत्रस्थ भाष्य विरोधोऽत आह।। नैतस्या इति।। अत्वविषये इति।।

अकारस्याकारस्य च विषये इत्यर्थः।। अतएव। अदभुयङित्यस्य न्याय युक्तत्वादेव।। तत्रासंमतिरिति।। अदह्यङ् शब्देऽसंमतिरित्यर्थः।। इत्युक्तया च तत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केशानामुपसर्जनत्वमप्रधानत्वञ्च। शिखेति। इदमेव प्रत्युदाहरणम्। शोभनेत्यादि सुशिखान्तं प्रक्षिप्तं विशिष्टेऽदन्तत्वाभावेनाप्राप्तेः। यद्यपि भाष्ये अशिखेति प्रत्युदाहृतं तस्याप्येकदेश एव तात्पर्यम्। नञ्पूर्वेत् 'सहनञ्' इति निषेधेन प्राप्त्यभावात्। एतेन क्रीडादिषु शिखाशब्दपाठ इत्यपास्तम्।

ननु स्वमङ्गं स्वाङ्गञ्चेत् 'सुमुखा शाला' इत्यत्रापि स्यात्, मुखस्य शालाङ्गत्वान् 'सुकेशी रथ्या' इत्यत्र च न स्यात्, केशानां तदङ्गत्वाभावात्, अत आह – अद्रवमिति। स्पर्शवद्द्रव्यपरिमाणं मूर्तिः। रथ्येति। इदानीं प्राणिस्थत्वाभावात्पूर्वलक्षणेनासिद्धिः। एवञ्चेदं 'पूर्वलक्षणे प्राणिस्थत्वमुपलक्षणम्' इत्यत्र तात्पर्यग्राहकमिति भावः। प्रतिमादिगतस्तनस्य प्राणिनि कदाप्यदृष्टत्वादाह– तेन चेदिति। अप्राणिनोऽपि स्वाङ्गं (यदि) तेन तज्जातीयेन वस्तुना प्राणी यथा सम्बद्धस्तदाऽप्राणी सम्बद्धश्चेदित्यर्थः।

अत एव 'तस्य चेत्तत्था युतम्' इत्यस्य 'अप्राणिनोऽपि स्वाङ्गम्' इति शेषो भाष्ये दर्शितः।

पुरस्तादिति। स ह्यनन्तरस्यैव बाधकः। मद्धये इति। स हि पूर्वस्यैव बाधकः। प्रामाणिका इति। एवञ्च 'सुगात्री' इत्यादयोऽपप्रयोगा एवैति भावः।

उरः क्रोडेति। टाबन्तोऽयं स्वभावतो विशेषविषयः।

शूर्पणखेति। 'पूर्वपदात्सञ्ज्ञायाम्' (८।४।३) इति णत्म्। केवलयौगिकत्वे तु 'शूर्पनखी' इत्येव।

न ङीबिति। अस्वरितत्वादिति भावः।

शब्देऽप्रयुक्तत त्वमिति चो भिन्न क्रमः।। इत्युक्तयातत्रशब्दे अदह्यङ् अदमुयङ्शब्देऽप्रयुक्तत्वं च सूचित मित्यर्थः।। परिभाषा ज्ञान कृत गौरवापत्तेरिति।। साकचः सम आदेशार्थं समिग्रहणं तु न समोद्योतकत्वेन कुत्साविशिष्टार्थ वाचकत्वा भावेनाक च एवाप्राप्तेरिति भावः।। अस्यालोप इति।। अस्य लोपोलोपः।। नालोपोयस्मिन्निति तुन विग्रहोनुऽपत्तेरिति भावः। अलुप्ताकारेतीति'' तेन न लोपेटयदोष इति भावः। तिन्निषेधादिति।। नपदांतेति पूर्वत्रासिद्धेनेति वा तन्निषेधादित्यर्थः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति शब्द इति। एवञ्च भाषायामिति व्यर्थम्। छन्दसीत्यस्य 'दिक्पूर्वपदात्' (४।१।६०) इत्यत्रासम्बन्धेनास्वरितत्वाद्सम्बन्धसिद्धेः। परे तु दिगिति सूत्रे 'वाहः' (४।१।६१) इत्यत्र च छन्दसीति वर्त्तते। लोके त्वन्तोदात्तमेव 'प्राङ्मुखी' इति। एवञ्च तन्निवृत्तिबोधनाय भाषाग्रहणम्। इतिश्चार्थे, तेन छन्दस्यपि। अत एव 'ङेराम्' (७।४।११६) इति सूत्रे कैयटे – 'सख्यशिश्वी च भाषायाम्' इति पाठो दृश्यते इत्याहुः।

क्वचिदिति। सर्वविधीनां छन्दसि वैकल्पिकत्वेन 'सखा सप्तपदी भव' इति सिद्धम्। न विद्यते शिशुरस्या इत्यशिश्वी। क्वचिदस्याद्युदात्तत्वन्तु छान्दसत्त्वात्।

जातिशब्देन अर्थे कार्यासम्भवात्तद्वाचकग्रहणमित्याह – जातिवाचीति। अनन्यभावे विषयशब्द इत्याह – न च स्त्रियां नियतमिति। भिन्नेष्वभिन्नाभिधानप्रत्ययमिमित्तं जातिः, नित्यमेकमनेकानुगतं सामान्यमित्यस्य च शुक्लादिगुणस्यैकत्वनित्यत्वपक्षे तत्रातिव्याप्तिः। 'जननेन प्राप्यते सा जातिः' इति च युवत्वादावव्याप्तमत आह – आकृतितीति। ग्रहणमीति करणे ल्युट्। सामान्यं नपुंसकम्। आकृतिरवयवसन्निवेशः। आकृतिग्रहणं यस्या इति विग्रहस्तदाह – अनुगतेति। ईदृशाकारो गौरित्याकृत्युपदेशादिव्यङ्ग्या इत्यर्थः। न च बाल्याद्यवस्थाभेदभिन्नानेकदेहवृत्तिदेवदत्तत्वादेराकृतिव्यङ्ग्यत्वेन तत्रातिव्याप्तमिदमिति वाच्यम्, समानकालिकानेकव्यक्तिवृत्त्यनुगतसंस्थानव्यङ्ग्येत्यर्थाद्, अवस्थाभेदेऽपि तद्भेदाप्रतीतेश्च, स एवायमिति प्रतीतेश्च, तज्जातीयोऽयमित्यप्रतीतेश्च। अत एवेन्द्रत्वादिकं न जातिः पञ्चेन्द्रोपाख्यानादिभिरनेकेषां समकालिकत्वेऽपि सर्वेषां संस्थानस्यैकत्वे मानाभावात्। 'दुर्गा' 'अपर्णा' इत्यादौ स्त्रीविषयत्वादपि न ङीष्। तटीति। अनुगतसंस्थानव्यङ्ग्यमेतत्। जल- समीपदेशविशेषो हि तटम्।

यद्यपि वेत स्वानित्यत्र न पदांतेति निषेधवारणाय पदेऽत इति समासाश्रयणा परभाष्य प्रामाण्येन पूर्वमेत्यत्र पूर्वत्रासिद्ध शब्देन पदचरमा वयव विधायकातिरिक्त स्यैव पूर्वत्रासिद्धस्यग्रहणे नाम वार्तिकस्यापि प्रवृत्तेरिति भावः।। स्पष्टमिति। एतेनांचु गतावचि पूजायामित्येव सिद्धे नांचेः पूजायामित्यंचेः पूजायामिति सूत्रद्वयं व्यर्थमित्यपास्तम्।।

ननु प्राच इत्यादौपूजास त्वान्नलोपो नस्यादत आह्।। प्राच इत्यादीति रूढ़ स्येति।। एवं च पूजायागम्य मानत्वाभावान्नलोप सिद्धिरितिभावः तेनेति।। प्राच

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नन्वेवं वृषलत्वादीनां जातित्वं न स्यात्। अवयवसंस्थानस्य ब्राह्मणादिसाधारण्येन तस्या आकृतिग्रहणत्वाभावात्, किन्तु साक्षादुपदेशगम्या सेत्यत आह– (२) लिङ्गानामिति। इयमपि जातिरित्यर्थः। लिङ्गानामिति कर्मणि षष्ठी। सर्वाणि लिङ्गानि न भजति इति सर्वशब्दस्य लिङ्गापेक्षत्वेऽपि भाष्यप्रामाण्यात् भजो ण्विः, समासश्च। आख्यातम् आख्यानम्, उपदेशः। कथनात्-उपदेशात्। एकत्र 'इन्द्रः' इत्युपदिष्टे अन्यत्र तद्ग्रहे मानाभावान्नेन्द्रत्वादि तथा। ब्राह्मणत्वन्तु एकत्रोपदिष्टे (१) तत्तत्पित्रादिषु सुग्रहम्। वृषलत्वं (२) तदपत्यतत्सहोदरादौ। सुग्रहम्। अन्नाकृतिग्रहणेति नित्यानित्यसाधारणमिति (३) युवत्वादिकमपि जातिरेतन्मते। अपर आहेत्यादिना (४) यावद्द्रव्यभावित्वमित्यनित्यव्यावृत्तं लक्षणान्तरं भाष्ये दर्शितम्। एवञ्च भिन्न-ऋषिकर्तृकलक्षणद्वयप्रामाण्येन कुमारादिशब्दे जातिकार्यविकल्पः। अत एव 'युवजानिः' इत्यत्र पुंवत्त्वं, युवतितरा' इत्यत्र तदभावश्च भाष्ये उदाहृतः।

नन्वेताभ्यामपि 'औपगवी' 'कठी' इत्यादेरसङ्ग्रहोऽनुगतसंस्थानव्यङ्ग्यत्वाभावात्सर्वलिङ्गत्वाच्चेत्यत आह–(५) गोत्रञ्चेति। (६) शास्त्रीयमत्र गोत्रम्। अत एव गोत्राद्यूनि प्रत्ययो भवति, (७) 'स्त्रियां लुक्' इति न्यासे 'औपगवी माणविका' इत्यत्राण् योऽनुपसर्जनमित्यनुपसर्जनलक्षण (८) ईकारो न प्राप्नोति, मा भूदेवम् (९) अण्णन्तादनुपसर्जनादित्येवं भविष्यति' इति प्रौढ्या पूर्वपक्षिणोक्ते तदङ्गीकृत्यैव 'इह तर्ह्यौपगवीभार्यः, जातिलक्षणः पुंवत्त्व प्रतिषेधो न प्राप्नोति, मा भूदेवं वृद्धिनिमित्तस्येत्येवं भविष्यति। एवन्तर्हि ग्लुचुकायनीभार्ये दोषः' इति 'एको गोत्रेः' (४।१।९३) इति सूत्रस्थभाष्ये युवापत्यस्य जातित्वाभावकथनं सङ्गच्छते। अन्यथा जातिलक्षणङीष एव

इत्यादौ नलोपासंपादनेनेतिभावः।। ञोवधत्वेति।। तत्फलं तु कुञ्च्यादित्यादौ ञश्रवणं न लोपाभावस्तु क्विन् संतियोगेनैवस्यादिति भावः।। भाष्य इति।। तत्रहि कुञ्चेत्यत्र चोः कुरिति कुत्वमाशंक्म ऋत्विगादिसूत्रे कुञ्चामिति निपातनान्चेति समाहितं तेन ञोपधत्वं स्पष्ट मितिभावः।। ननु ञोपधत्व स्वीकारे कुत्वस्यनकार जावित्यभियुक्तवचनस्य चाभावकल्पने गौरवं निलोपाभावनि पातनेतु तन्मात्रस्या भावकल्पने लाघवमत आह्।। सङतिवचनादिति।। पयःस्थितिरित्यादौ झलोझलीत्यादे र्निवृत्यर्थन्तत्रकृता दत्रानुवर्तमानादित्यर्थः।। एवंच तत्रैव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परत्वाद्वक्तुं युक्तत्वं, पुंवत्त्वप्रतिषेधो न प्राप्नोतीत्यसङ्गतिश्च। ग्लुचुकायनीभार्ये दोषस्तु ङीषुंवत्त्वप्रतिषेधयोरसिद्धिरूपो बोद्धयः। 'सर्वतोऽक्तिन्नर्थात्' इति ङीषि तु पुंवत्त्वप्रतिषेधासिद्धिरेव दोषः। अत एव 'ब्राह्मोऽजातौ' (६।४।१७१) इति सूत्रेऽपत्ये जातौ नेत्यर्थः सङ्गच्छते। तव त्वपत्यस्य जातित्वाव्यभिचारात्तदसङ्गतिः, 'ब्राह्मो नारदः' इत्यसिद्धिः। अतः सामर्थ्येनात्र शास्त्रीयगोत्रस्यैव ग्रहीतुमौचित्यम्। अनन्तरापत्यप्रत्ययान्ते (१) 'अवन्ती' इत्यत्र जातिप्रयुक्तो ङीषिति 'अनुपसर्जनात्' (४।१।१४) इति सूत्र भाष्यं त्वनन्तरेऽश्वत्थाम्नि द्रौणायनिवद्गोत्रत्वारोप इत्यभिप्रायेण। यूनि तु न शास्त्रीयगोत्रत्वारोपः, तत्र युवैव न गोत्रमिति नियमेन तत्संज्ञानिषेधात्, तदाह–अपत्यप्रत्ययान्त इति। 'अपत्यं पौत्रप्रभृति' (४।१।१६२) इति परिभाषित इति शेषः। शाखाध्येत्रिति षष्ठीतत्पुरुषः, शाखायामस्त्रीवि षयत्वाभावात्। जातिकार्य लभते इति। अनेनास्यातिदेशत्वं बोधयाति कठेन प्रोक्तमधीते इति वैशम्पायनान्तेवासित्वात्प्रोक्तार्थणिनेः 'कठचरकात्' (४।३।१०७) इति लुक्। अध्येत्रणः प्रोक्ताल्लुक्। बह्व्य ऋचोऽध्येतव्या यस्या इति विग्रहे 'ऋक्पूः' (५।४।७४) इत्यप् समासान्तः। स्त्रिया अध्ययनाभावेऽपि तद्वंश्यत्वात्ताच्छब्द्यम्, यथाऽनधीयाने माणवके। 'ब्राह्मणी' इत्यत्रापत्येऽणि 'ब्राह्मोऽजातौ' (६।४।१६१) इत्युक्तेष्टिलोपाभावः।

(१) परे तु आकृतिग्रहणेत्येव लक्षणम्। आकृतिपदमुपदेशोपलक्षणम्। आकृति द्वारा साक्षाद्वोपदेशेन ग्राह्या जातिरित्यर्थः। तत्रेदृशाकारो गौरित्या कृत्युपदेशग्राह्या गोत्वादिजातिः, 'अयं ब्राह्मणः इतिसाक्षादुपदेशग्राह्य ब्राह्मणत्वादिजातिः (२) यद्वा, आकृतिग्रहणं (३) जातिग्राहकोपदेशस्याप्युपलक्षणम्। 'लिङ्गानाञ्च न सर्वभाक्' इति तत्स्व (४)

साक्षाच्छास्त्रबाध कल्पने गौरवं कुञ्च्यादि लक्ष्यासिद्धिश्चेतिभावः।। अल्लोपाकरण पूर्वकमिति।। अल्लोपकरणेत्वल्लोपवन्नलोपस्या प्यविवक्षा स्यादितिभावः।। न स्थानिवदिति।। दीर्घ विधौन स्थानिवदित्यर्थः।। क्वौलुघत्वादिति। नपदांतेति सूत्रस्थ दीर्घ ग्रहण प्रत्याख्यात वादि नये इदंसिद्धांति मतेतु दीर्घविधित्वादित्यपि बोध्यम्।। ननुझसहितस्य झेर्जुसित्यर्थे ऽतादेशोत्तरं न जुस् प्राप्तिरत आह्। किंचेति।। एकादेशे सनकारस्य शव कारेणै कादेशे। एकादेश इति।।

पूर्वोक्तैकादेश इत्यर्थः।। पूर्वसमुदाये प्रवृत्तसंज्ञाया इति।। अस्य भविष्यति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रूपानुवादकम्। तेन शुल्कादिगुणानामेकत्वेऽपि जातित्वाभावो बोधितः। (५) अत एव 'विशेषणानाञ्च' (१।२।५२) इति सूत्रे जातेराविष्टलिङ्गत्वं भाष्ये उक्तम्। आविष्टलिङ्गत्वं नियतलिङ्गत्वमिति कैयटः। (१) तच्च प्रायिकमिति केचित्। (२) भाष्यप्रामाण्याज्जातेरेकशब्दवाच्याया न त्रिलिङ्गता, 'तटं त्रिषु' इत्यादिकोशकृतां प्रमादः' इत्यन्ये। 'सकृदाख्यातनिर्ग्राह्या' इत्यनेनैकत्वमनेकानुगतत्वञ्च बोधितम्। सकृदेकवारं क्वचिद्व्यक्तौ साक्षादाकृतिद्वारा वोपदिष्टा व्यक्त्यन्तरे ग्रहीतुं शक्येति तदर्थः। गोत्रञ्चेत्यादि प्राग्वदेव। (३) अत एव–

प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः।

असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः।।

इति (४) लक्षणान्तरं भाष्ये उक्तम्। सत्त्वस्य द्रव्यस्य प्रदुर्भावविनाशाभ्यां या तौ प्राप्नोति सा जातिरिति लक्षणम्। (५) यावद्द्रव्यभाविनीति तदर्थः। (६) अनेन गोत्वब्राह्मणत्वाद्योरुभयोरपि सङ्ग्रहः। (७) गुणैर्युगपद् द्रव्येण सम्बध्यते। (८) यथा निर्गुणस्य द्रव्यस्य नोपलम्भतथा जातिरहितस्यापीत्यर्थ इति कैयटः। इदं स्वरूपकथनमेव। अत्र लक्षणे असर्वलिङ्गमित्येतत् भदुक्तार्थकमेव, न तु लक्षणान्तरम् अनुपयोगात्। बह्वर्थाम्। सर्वव्यक्तिव्यापिनीमित्यर्थः। एतदेकवाक्यतया (९) पूर्वलक्षणेऽपि मदुक्तव्याख्यैवोचिता।

(१०) अत एव 'कः पुनरेतयोर्जातिलक्षणयोर्विशेषः। यथा पूर्वलक्षणं तथा कुमारीभार्य इति भवितव्यं, यथोत्तरं तथा कुमारभार्यः' इति भाष्ये लक्षणमित्येकवचनमेव प्रयुक्तम्। अत एवाकडारसूत्रशेषे 'आकृतिग्रहणा जातिः' इत्येवोक्तं भाष्ये इत्याहुः।

किंचिदनेन प्रयोजनमित्यमिसंधि मात्रेणेत्यादिः।। स्थानिवद्भावेनेति।। एकदेशवि कृतन्यायेन स्थानिसदृशभावेनेत्यर्थः।। ननु यथोद्देशपक्षेपि कार्यैक वाक्यतायाएव भाष्यादितोलाभात् पूर्वं फलाभावे नैर्त्सन्नित्यत्राभ्यस्त संज्ञाया एवाभावेन पंचीसमासानाश्रयणेपिन दोषोऽत आह। (अतएवेति।। पंचमी समासाश्र यणादेवेत्यर्थः।। उदकस्पर्श इति।। अनुदकेनिषेध सामर्थ्यादत्र क्विप्नेति भावः।। तन्निषेधादिति।। क्वौलुप्तमितिपूर्व त्रासिद्ध इति वा तन्निषेधादित्यर्थः।। अधिकार इति।। एवंचादेश प्रत्ययोरित्येव षत्वं नुमादिव्यवधाने इतिभावः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बलाकेति। अयञ्च बिसकन्ठिकापदवाच्यजातिविशेषवाची। स च बकत्वव्याप्योऽन्यो वेत्यन्यदेतत्। (११) अस्त्रीविषयादित्यस्य प्रवृत्तिनिमित्तैक्ये लङ्गान्तररहितभिन्नादित्यर्थः। (१) एतेन बलां कायतीति यौगिकस्य सर्वलिङ्गत्वात्।

बलाकां बकपङ्क्तिः स्याद् बलाका बिसकण्ठिका।

बलाका कामुकी प्रोक्ता बलाकश्च बको मतः।।

इति कोशे पुंल्लिस्याप्यभिधानाच्च नेदं युक्तमित्यपास्तम्। (२) अत एव 'पाककर्ण' (४।१।६४) इति सूत्रे चरितार्थम्। तद्धिस्त्रीविषयार्थम्। (३) अन्यथा तेपामपि यगिकेऽर्थे लिङ्गान्तरसम्भवेन पूर्वेण सिद्धे तद्वैयर्थ्थ स्पष्टमेव।

पाककर्ण (४।१।६४)। जातिवाचिनः किम्? बहुपुष्पा शाखा। स्त्रीविषयादपीति। अजात्यर्थन्तु न, प्राक्पुष्पादिषु जातिवचनेषु नित्य-स्त्रीलिङ्गेषु 'सदच्काण्ड' (का०वा०) इत्यादिनिषेधात्। योपधादपीति।

पुनर्जातिग्रहणादिति भावः। अस्त्रीविषयादिति तु पूर्वसूत्रेण विच्छिन्नम्। तित्तिरिरिति।

(४) स्त्रीपुंसयोरपत्यान्ता (५) द्विचतुःषट्पदोरगाः।

मरादयं स्त्रियामपीति भावः। इतः किम्? दरत्। 'व्यच्मगध' (४।१।७०) 'अतश्च' (४।१।१७७) इति लुक्।

ङुतः (४।१।६६)। ङकारो 'नोङ्धात्वोः' (६।१।१७५) इति अन्यथा 'यवाग्ज' इत्यादवपि निषेधः स्यात्। दीर्घोच्चारणं प्रश्लेषेणो धानद्वारा (६) 'ब्रह्मबन्धूः' इत्यादिबहुव्रीहौ

अव्यवधानेपीति।। रामेष्वित्यादावित्यर्थः।। योग्यतायां त्रिपादीस्थस्याप्रवृत्तेरिति वाचिकादि सिद्ध्यर्थं पूर्वत्रेत्यस्य विषय सप्तमीत्वादितिभावः।। वसोः संप्रसारणम्।। वसुरत्र प्रत्यय एवं नतु वसुस्तंम इति धातु र्विदेःशतु रित्यादावष्टाध्याय्यांवा व्यवहृतत्वेन प्रत्ययस्य प्रतिपदोक्तत्वात् तदेतदाह। प्रत्ययग्रहणे इति।। नतु लिडादेश क्वसोरिति।। उकारोच्चारण सामर्थ्येन तुन निर्वाहः।। वसते रप्यष्टाध्यायां वस तिक्षुधोरित्या दौव्यवहृतत्वेन ग्रहणापत्तेरितिभावः। शीघ्रोपस्थिति कत्वात्सं प्रसारण इति।। वस्वेकेतीट्तुन शीघ्रोपस्थि तिकत्वं तस्यनियमार्थत्वेनान्यसं धानस्यावश्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(७) परकञ्निवृत्त्यर्थ, रूपाणां सवर्णदीर्घेण सिद्धेरिति भाष्ये स्पष्टम्। (८) श्वश्रूरिति तु 'श्वशुरः श्वश्रवा' (१।२।७१) इति निर्देशात्सिद्धम्। कुरूरिति। एकादेशस्य

देशस्य पूर्वान्तवत्त्वात्स्वादयः। अर्ध्वर्युरिति। अध्वर्युशाखाध्यायिवंशोद्भवेत्यर्थः। रज्ज्वादीति। उत इति तु नेह सम्बध्यते 'अलाबूः' इति भाष्योदाहरणादिति भावः। 'कृकवाकुः' इत्यत्र मनुष्यजातित्वाभावात्पूर्वेणापि न।

पङ्गोश्च (४।१।६८)। पङ्गुशब्दो गुणावाचीति पूर्वेणाप्राप्तिः। श्वशुरस्येति। 'श्वश्र्वा' इति निर्देशादन्त्याकारस्य लोपः। तन्निर्देशसिद्धमेवैतत्। भाष्ये त्विदं न दृश्यते। ङ्याब् (४।१।१) इति सूत्रस्थ भाष्यस्वरसस्त्वयमनूङन्तोऽव्युत्पन्नं प्रातिपदिकमिति।

ऊरूत्त (४।१।६९)। उपमीयतेऽनयेत्युपमा उपमानं, तद्भाव औपम्यम् उपमानत्वम्। एवञ्च तद्बोधकोरूत्तरपदादित्यर्थः। उत्तरपदाक्षिप्तं पूर्वपदं प्रत्यासत्त्योपमानवाच्येव। अतः 'करभोपमोरुः' इत्यत्र न, तदाह– उपमानवाचीति। करभेति मणिबन्धादाकनिष्ठं करबहिर्भागः करभस्तद्वदूरू यस्या इत्यर्थः।

उपचारादिति। शफशब्दप्रवृत्तिनिमित्तस्योरुपदार्थे आरोपादित्यर्थः। एवञ्च समासस्योपमानोपमेयभावाबोधकत्वेन न पूर्वसूत्रप्राप्तिः। तदारोपे च स निमित्तमित्यन्यदिति भावः।

ननु सहशब्दग्रहणं व्यर्थं सर्वस्योरुमत्त्वेन सहशब्दप्रयोगस्य तत्सममभिव्याहारे व्यर्थत्वेन 'सहोरूः' इति प्रयोगस्यैवाभावादत आह – सहेते इति। रतिश्रममिति शेशषः। सह विद्यमानावूरू यस्या इत्यर्थ इति कैयटः। अतिरमणीयावित्यर्थ इति तदाशयः 'कमलानि

कत्वेन विलंबो पस्थिति कत्वाद्वलादित्वाभावादिति वस्वेकेत्यत्रापि वलादे रित्यनुवर्त्तत इत्यर्थः।। इदं वृत्युक्तं माधवोक्तंच।। असावित्यत्र टिलोपेकृत इति।। ओकारमात्रादेशेकर्तव्ये डित्वकरण सामर्थ्येन सर्वतो बलवत्वात्पूर्वं टिलोपे कृत इत्यर्थः।।

सत्वंबाधित्वेति।। अनंत्ययोरित्यस्य भाष्ये प्रत्याख्याततत्वाट्टिलोपोत्तरं सत्व प्राप्तिरितिभाव्रः।। तत्सत्वेत्वसिद्धिः सुतराम्। नमुने मुग्रहण फलंतुशविषये परंव्याप्ति न्यायात् यत्वित्रकंचित्पूर्वं प्रति असिद्धत्वं नेत्यर्थे पटा इउच्छ मिमुनेत्यादौ छेचेति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कमलानि' इतिवत्।

कद्रूरिति। नागमातुः सञ्ज्ञा। अच्छन्दोऽर्थमिति। छन्दसि 'कद्रुकमण्डल्वोश्छन्दसि' (४।१।७१) इत्यनेनैव सिद्धिरिति भावः।

अञो य इति। शार्ङ्गरवादीति लुप्तपञ्चम्यन्तम्, अञ इति च षष्ठी। अनुपसर्जनादिति विभक्तिविपरिणामेनास्य विशेषणम्। एवं 'टिड्ढा' (४।१।१५) इत्यत्रापि सुवचम्। तद्वदत्र पञ्चम्यन्तत्वमपि सुवचम्। अञ्योऽकार इत्यपि पाठः क्वचित्। शार्ङ्गरव्यां जातिलक्षणे ङीषि प्राप्ते वचनम्। अणि आदिवृद्ध्योर्गुणौ। पुत्रशब्दोऽत्र पठ्यते तस्य पाठसामर्थ्याज्जातित्वाभावेऽपि ङीन्।

नृनरयोरिति। यद्यपि 'नारी' इति नृशब्देन सिद्धं, 'नरी' इति तु पुंयोगङीषा दुर्वारं, जातिग्रहणानुवृत्त्या तत्रास्याप्रवृत्तेरिति नरग्रहणं व्यर्थं, तथाऽपि नरत्वजातिमात्रप्रतिपिपादयिषायां 'नरी' इति व्यावृत्त्यर्थं तद्ग्रहणम्। अत्राद्याकारस्यैव वृद्धिर्लक्ष्यानुसारिव्याख्यानात्। वस्तुत इदं गणसूत्रमनार्षम्। 'नुर्नरस्य च धर्म्या नारी' इति 'ऋतोऽञ्' (४।४।४६) इति सूत्रेण 'नरस्य चेति वक्तव्यम्' (का०वा०) इति वार्तिकेन चाद्युदात्तनार्याः सिद्धेः। रूढ्या योग्यतया तद्धर्म्या नरत्वजातिविशिष्टैव बुद्ध्यते। अत एव 'वसेस्तव्यत् कर्त्तरि णिच्च' इति वचनं वास्तुनि भवो 'वास्तव्यः' इति दिगादित्वात्संसाद्ध्य प्रत्याख्यातं भाष्ये। नित्यानां शब्दानां यथाकथञ्चिदन्वाख्यानं कार्यमिति कैयटः। रूढ्या सर्वदोषपरिहार इति तदाशयः।

यङश्चाप् (४।१।७४)। पकारो 'याडापः' (७।३।११३) इत्यत्र सामान्यग्रहणार्थः।

तुक्युकारस्यन सिद्धत्वं मुग्रहणस्याप्येत देवफलंबोध्यम्।। समाहार द्वंद इति।।

मकार साहचर्या दुकारोपि मकार विधायक सूत्रविधेय एव गृह्यत इति भावः।। इतिहलंताः पुलिंगाः।।

हलन्त स्त्रीलिंग : न प्रत्ययो व्याख्यानादिति।। अद्भिः संस्कृत मितिनि र्देशादित्यर्थः।। इतिहलन्ताः स्त्रीलिंगाः।। हलन्त नपुंसक लिगः तत्प्रयुक्त इति।। पदत्व प्रयुक्त इत्यर्थः, पदत्वस्य फलंतु वहुपरिव्राज केत्यादा वसुप इतिनिषेध स्यप्रत्यय लक्षणेन सिद्धिः।। असुपइत्यस्य तुन वैमर्थ्यं बहु परिव्राज कैः क्रीतेत्यर्थे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चकारस्य द्वनुवन्धकत्वसम्पादनद्वारासामान्यग्रहणाविघातकत्वेन चारितार्थ्येऽपि 'आम्बष्ट्या' 'आवट्या' इत्यादौ परत्वाच्चित्स्वरः पित्स्वरं बाधते इति बोद्ध्यम्। षाद्यञ इति। एवञ्च गौकक्ष्यशब्दस्य गर्गादियञन्तस्योदीचां मतेऽनेनैव चापः सिद्धेः स क्रौड्यादिषु न पाठ्यः। सम्प्रसारणन्तु तस्य नेष्टमिति स्पष्टं भाष्ये।।

यूनस्तिः (४।१।७७)। 'ऋन्नेभ्यः' (४।१।५) इति ङीपोऽपवादः। उत्तरार्थ इति। इह करणं तदनित्यत्वज्ञापनार्थमिति केचित्।

इति स्त्रीप्रत्ययाः।

'स्वौजसमौड्' (४।१।२) इतिविहितस्वादीनामर्थविशेषव्यवस्थां दर्शयितुमाह- प्रातिपदिकार्थेति। इदमपि सूत्रं क्रियायोगे एव प्रवर्तते अन्ततोऽस्तिक्रियायाः सर्वत्र सत्त्वात्। आख्यातार्थकर्त्रादिनाऽभेदान्वयेन तद्द्वारकः क्रियायोगो बोद्धयः। प्रथमान्तार्थस्यापि क्रिया जनकत्वादस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः। ननु कृष्णादिशब्दलिङ्गस्यापि प्रातिपदिकार्थत्वाल्लिङ्गग्रहणनर्थकमत आह– नियतेति यस्मिन्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स इति तदर्थः।

अन्वयानुपपत्तिपूर्विका लक्षणा पदे एव। प्रत्योत्पत्तिः सर्वत्र शक्यार्थे एव। शक्यतावच्छेदकारोप एव च लक्षणेति न लक्ष्यासङ्ग्रहो दोषः। तटादिशब्दानां तत्तत्प्रत्ययसमभिव्याहारे सकललिङ्गबोधकतया न किमपि लिङ्गं ततो नियतोपस्थितिकमिति न तद्बोद्ध्यलिङ्गस्यात्र प्रातिपदिकार्थशब्देन ग्रहणमिति लिङ्गग्रहणमिति भावः।

लिङ्गमात्रेति। लिङ्गस्यैवाधिक्ये इति क्रमेणार्थः। यद्यपि विशेष्यविशेषणभावोऽप्यधिको

ठकोलुकि टापि बहुपरिव्राजिके त्यादौ सार्थक्यात्।। उत्तरस्येति निषेधस्यतु न प्राप्तिः।। सुचर्मेत्यादौन लोपादि सिद्धयर्थं प्रत्यासत्योत्तर पदप्रकृतिके लुकालु प्ते सुपि प्रत्यय लक्षणंनेति तदर्थादितिभावः।। इत्यर्थ इति।। फलितार्थ इत्यर्थः।। पर्युदासस्यौचित्यात्। अनभिधानमिति।। अपदादि विधावित्येतत्सामर्थ्यादित्यर्थः।। अन्यथात्वेतदर्थं सात्पदाद्योरित्यत्र पदादिति पंचमी समासस्यावश्य कत्वेन निरुपपदाद्विचि दध्नः सेचाविति षष्ठी समासेपि षत्वनिषेधस्यसिद्ध त्वात्तद्वैयर्थं स्पष्ट मेवेति भावः।। कैयट इति।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भासते तथापि तस्य वाक्यार्थत्वेन बहिरङ्गतया न स्वार्थमात्रनिमित्तकप्रथमप्रवृत्तसंस्कारबाधकत्वमिति बोद्धयम् अभेदेन संसर्गेणेति। इतरसम्बन्धानवच्छिन्नविशेषणविशेष्यभावसंसर्गेणेत्यर्थः। अभेदस्तु न संसर्ग इत्यन्यत्र प्रपञ्चितम्।

इहोक्तार्थत्वादिति। उक्तार्थानामप्रयोगात् प्रातिपदिकप्रतिपादितसङ्ख्याविशिष्टे सङ्ख्यान्तराभावाच्च तदप्राप्तिः। अनन्वितार्थकविभक्त्यपेक्षयाऽनुवादकविभक्तेरेव न्याय्यत्वान्न द्व्यादिभ्यः सर्वविभक्त्यापत्तिरिति भावः। लिङ्गविशिष्टपरिभाषया 'इन्द्राणी' इत्यादौ प्रथमासिद्धिः। परिमाणशब्दश्च परिच्छेदकपर इत्युन्मानादिष्वपि प्रथमासिद्धिरिति बोद्धयम्।

परे त्वत्र सूत्रे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्तं तदाश्रयश्च। स च मुख्य इवाऽऽरोपिततदाश्रयोऽपि। अत एव 'गोपी' इत्यादौ स्वादिप्रकृतेर्लाक्षणिकत्वेऽपि न दोषः। अत एव लिङ्गग्रहणं सार्थकम्। अन्यथा 'स्वमोर्नपुंसकात्' (७।१।२३) इत्यादिशास्त्रप्रामाण्येन लिङ्गस्यापि प्रातिपदिकार्थतया तद्वैयर्थ्यं स्पष्टमेव। अत एव 'स्त्रियाम्' (४।१।३) इति सूत्रे स्त्रीत्वे द्योत्ये इत्यर्थ इति भाष्ये सिद्धान्तितम्। 'तस्माच्छसः' (६।१।३) इत्यत्र पुंसीत्यस्य पुंशब्दस्य प्रकृतित्वे इत्येवार्थः। 'अभिहिते प्रथमा' इति वार्त्तिकस्य तत्प्रातिपदिकार्थगतकारकशक्तावन्येनाभिहितायां स्वार्थे प्रातिपदिकात्प्रथमेत्यर्थ इति न तद्विरोधः। एतेन तन्नये कारकस्य प्रत्ययार्थत्वं, तव तु तन्नेति विरोध इत्यपास्तम्।

तटादिशब्दानामपि लिङ्गं वाच्यमेव। द्योतकास्तु विसर्गादयः। पूर्वं तत्तल्लिङ्गं बुद्धिस्थीकृत्वैव तस्य तस्य विसर्गादिः साधुत्वान्वाख्यान्। 'नियमांशनिवेशे तु न मानम्।

अत्रारुचिबीजंतु सुस्नातो दधिसेक इत्यादीनां गति कारक घटितानां बहुल लक्ष्याणां संग्रहाय वार्तिक प्रत्याख्याने दधि सेचावित्यादौ निरूपपद के षष्ठी समासे पिनिषेधाय च पंचमी समासस्यावश्य कत्वाद्नमिधाने न मानस्ति। अपदादि विधावितितु बहुसे चावित्याद्यर्थं। सात्पदाद्योरित्यत्र षष्ठी समासस्यावश्यक त्वात्ततत्पक्षे उपायांतर परं बोध्यमिति भावः।। विचोऽसार्वत्रिकत्वादाह।। सेचयतेः क्विबिति।। ननु कर्णो वर्णलक्षणादित्या देर्वर्ण लक्षण वाचकात्परस्योत्तरस्य पदसंज्ञक स्यादिरुदात्त इत्याद्यर्थादुत्तरपदादिरिति शब्दोच्चारणेपि पदादीत्येतन्मात्र रूप

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदमेवाभिप्रेत्य वृत्तौ 'प्रातिपदिकार्थः सत्ता' इत्युक्तम्। सत्तेति प्रवृत्तिनिमित्तोपलक्षणम्। आश्रयस्तु तदाक्षिप्तत्वान्न पृथगुक्तः। एवञ्च प्रातिपदिकार्थ इत्यस्याऽलिङ्ग लिङ्गप्रवृत्तिनिमित्तकाश्चाव्यय पुमादय उदाहरणम्। लिङ्गविशिष्टपरिभाषया स्त्रीशब्दोऽप्यस्यैवोदाहरणम्। अन्ये सर्वे लिङ्गाधिक्ये इत्यस्य।

द्रोणत्वादिप्रवृत्तिनिमित्तकानां द्रोणादिशब्दानां परिमाणत्वेन परिमाणपि लिङ्गवद्विशेष्यान्वय्यर्थः। एवञ्च तस्य लिङ्गवत्प्रातिपदिकार्थत्वाभावात्परिमाणग्रहणम्। द्रोणः परिमाणमित्येष तु 'द्वौ ब्राह्मणौ' इतिवत्प्रयोगः, द्रोणशब्दस्यानेकार्थत्वाद्वा। मूलोक्तं तु न युक्तम्। 'द्रोणो व्रीहिमानय' इत्यस्याप्यापत्तेः। किञ्च 'तिङ्समानाधिकरणे प्रथमा' इतिवार्त्तिकैकवाक्यतया भेदान्वये 'द्रोणो व्रीहिः' इत्यनिष्टम्। न च– 'यदा मेये द्रोणादीनां वृत्तिस्तदा तस्यानेकत्वेन परिमाणमात्रपरत्वे तदबोधेन च व्यभिचारान्मेयस्य नियतोपस्थितिकत्वाभावेनाप्रातिपदिकार्थत्वादसिद्धौ कर्मव्युत्पत्त्या प्रमेयार्थकं परिमाणग्रहणम्' इति कैयटोक्तं युक्तमिति वाच्यम्। 'सिंहो माणवकः' इत्यस्या सिद्ध्यापत्तेः तद्वदस्यापि सिद्धेश्च नियमांशनिवेशे मानाभावाच्च।

'एकः' 'द्वौ' इत्यादिसिद्ध्ये तु वचनग्रहणम्। अन्यथैतत्सूत्रोपस्थित 'अनभिहित' इत्यस्य्आत्र फलाभावादेतदेकवाक्यतापन्नसङ्ख्यावाक्यान्वयित्वेन तदप्राप्तेः। 'रामौ' इत्यादौ सङ्ख्याधिक्ये प्रथमा तु 'द्व्येकयोः' (१।४।२२) इत्यादेकवाक्यतयेति बोद्ध्यम्। मात्रग्रहणाभावे तु यथा 'कर्मणि' द्वितीया' (२।३।२) इति नियमेन कर्मत्वाज्ञानसमानकालिकार्थान्तरस्यैव व्यावृत्तिः, न तु तज्ज्ञानसमानकालिकार्थान्तरस्य। अत एव 'गां दोग्धि पयः' इत्यादाव पादान्त्वादिबोधेऽपि द्वितीया। एवञ्च 'कर्मणि सत्येव

प्रतिपदोक्तत्वस्याभावाच्छुक्लः कर्ण इत्यादौ समासे प्रत्ययलक्षण प्रतिषेधादतआह्।

उत्तरपदादिरिति।। कार्यित्व एवेति।। अपदादिविधायिविति पर्युदासादिति भावः ''मध्यमपदेति'' मध्यमपदं च प्रत्याख्यानैक वाक्यतयोत्तर पदाव्यवहित मेव तेन पंच गवधन इत्यादौ टचाव्यवहित गोशब्दादेः प्रत्यये लक्षण प्रतिषेधात् पद त्वाभावेनावङादिनेति भावः।। भाष्य प्रामाण्याच्चेति।।

नलोपवारणायैत ज्ज्ञापक पर भाष्य प्रामाण्याच्चेतिभावः।। भाष्येण रुत्र बाध को भविष्यतीति भाष्येण पूर्व में व बोध्य इति।। एवं च तव रा ज्ञेत्यत्र त्येन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'द्वितीया, न तु तदसत्त्वे इति नियमाकारः। तथाऽनेनापि प्रातिपदिकार्थसत्त्वे एव प्रथमा, न तु तदसत्त्वे' इत्येव नियमः स्यात्। एवञ्चानर्थकनिपातेभ्यः प्रथमा नैव स्यात्। एवञ्च तत्समभिव्याहारे 'सपूर्वायाः प्रथमा' (८।२।२६) इत्यादिशास्त्रप्रवृत्तिर्न स्यात्। तत्सत्त्वे कर्मादियोग्यार्थकप्रातिपदिकाच्चेत्तद्रहितस्वार्थे इत्यर्थान्न दोषः। इदमेव मात्रग्रहणं 'कर्मणि द्वितीया' (२।३।२) इत्यादेर्मदुक्ताकारनियमत्वे मानम्। मात्रग्रहणाच्च सूत्रकारस्य प्रत्ययनियमपक्ष एवाभिमत इति गम्यते। तदकरणलाघवेन तु 'कर्मणि द्वितीयैव' इत्यर्थनियम उक्तो भाष्यादौ। स्पष्टञ्चेदं सर्वं भाष्ये इति भाष्यप्रदीपोद्द्योते निरूपितमित्याहुः।।

सम्बोधने च (२।३।४७)। तत्र वर्त्तमानादित्यर्थः। सम्बोधनमभिमुखीकरण्। तत्फलं प्रवृत्तिनिवृत्ती। सम्बोध्यतावच्छेदकरूपेण सम्बोध्यस्य सिद्धिं विना तत्वासम्भवादनुवाद्ये एवैषा विभक्तिः। अत एव विधेयभूतक्रियायामेवैतदर्थान्वय उद्देश्यतया। अत एव 'राजा भव, युद्ध्यस्व' राजन् युद्धस्व इत्यनयोर्व्यवस्थयैव प्रयोगः। 'राम मां पाहि' इत्यादौ चाभिमुखीभवद्रामाद्युद्देश्यकप्रवर्त्तनाविषयो रक्षणमिति बोधः। 'व्रजानि-देवदत्त' इत्यादावपि जानीहि इत्यादिः शेषो बोद्धृयः। तत्र व्रजनस्य कर्मत्वाद्देवतस्योद्देश्यत्वादुभयोः समानवाक्यस्थत्वम्। 'एकतिङ् वाक्यम्' इत्यस्य च श्रूयमाणैकतिङित्यर्थ इति न दोषः। उद्देश्य विधेयभावो वाक्यार्थः। अभिमुखीभवनानुकूलव्यापारश्च सम्बोधनविभक्त्यन्तशब्दप्रयोगरूपः। व्रजानीतिप्राप्तकाले लोट्। अत एव गच्छेत्याद्यध्याहारे 'धिक् मूर्ख' इत्यादौ प्रथमा, अनध्याहारे तु द्वितीयैवेति दिक्। इति प्रथमा।।

कारके (१।४।२३)। कारकत्वं क्रियाजनकत्वम्। भाष्ये 'करोति-क्रियां निर्वर्त्तयति' इतिव्युत्पत्तिप्रदर्शनात्। ब्राह्मणस्य पुत्रं पन्थानंपृच्छति' इत्यादौ ब्राह्मणस्य न कारकत्वम्।

ग्रंथेन न विरोध इतिभावः।। वस्तुतस्तु प्रत्यय लोप विधायकशास्त्रैः प्रत्ययानुत्पत्तेरेवा न्वाख्यानेनात्रत्य ग्रंथ एव युक्त इति बोध्यम्।। अनर्थक स्यापि ग्रहणादिति। इन्हन्नित्यत्रेत्यर्थः ''दीर्घ इति'' सर्व नास्थाने चेति सूत्रेण तु न सिद्धिः।। स्त्रग्विणावित्यादौ दीर्घवारणायानर्थकस्यायी नस्तत्र पर्युदासादिति भावः।। अत्रेति बहुवृत्रहाणीत्यत्रणत्व विषय इत्यर्थः, तदुक्तमिति।। अत्पूर्वस्येत्यत्रेत्यर्थः ''अनेनेति'' इद मुपलक्षणम्।। उपपट् काम्यतीति काम्यच् सूत्रस्थ भाष्य प्रयोगस्यापि।। अनव्ययपूर्वपद इति।। अव्ययपूर्व पदभिन्ने सृजि यजिचेत्यर्थः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुत्रेणान्यथासिद्ध्या तत्वाभावात्। अत एवैषां क्रियायामेवान्वयः। क्रियाजनकमिति ज्ञाते का साक्रियेत्याकाङ्क्षोदयेन, क्रियाया जनकाकाङ्क्षया च तत्रैवान्वयस्यौचित्यात्। सर्वेषां च कारकाणां स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वं बोद्धयम्। असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकत्वेन स्वज्ञानपूर्वकालकत्वेनैव जनकत्वम्। एवं 'स्तोकं पचति' इत्यादौ फलस्यापि। घटं करोति स्मरति इत्यादौ बौद्धघटादेः पूर्वकालत्वेन स्मृत्यादिनिष्पादकत्वं बोद्धयम्।

कर्तुरीप्सित (१।४।४६) ईप्सितशब्दोऽत्र क्रियापरो, नाभिप्रेतपरो रूढः। स्पष्टञ्चेदं 'वारणार्थानाम्' (१।४।२७) इत्यत्र भाष्यकैयटयोः। कर्तुरिति 'क्तस्य च वर्त्तमाने' (२।३।६७) इति कर्तरि षष्ठी। आप्नोतेः सन्नन्तात्। 'मतिबुद्धि' (३।२।१८८) इति वर्त्तमाने कर्मणि क्तः। 'मतिः-इच्छा' ति तत्राऽऽकरः। एवञ्च कर्त्राऽऽप्तुमिष्यमाणं कर्मेत्यर्थः। आप्तिश्चात्र सम्बन्धः। स च कर्तृपदार्थविशेषणीभूतव्यापारद्वारक एव। उपस्थितपरित्यागेनानुपस्थितकल्पने मानाभावात्। एवञ्च कर्त्रा स्वनिष्ठव्यापारप्रयोज्यफलेन सम्बन्धुमिष्यमाणमित्यर्थः। यथा –'तण्डुलं पचति' इत्यादौ। फलसम्बन्धित्वात्कर्मत्वम्। अत एत तत्समानाधिकरणे 'स्तोकं पचति' इत्यादौ कर्मत्वसिद्धिः। क्तप्रत्योपात्त वर्तमानत्वन्तु न विवक्षितम्। तेन कटं कृतवान् करिष्यतीत्यादिसिद्धिः।

कारकं कर्मसञ्ज्ञं स्यादिति। 'कारके' इति प्रथमार्थे सौत्री सप्तमी। तेन कारकं सत् कर्मसञ्ज्ञमित्यर्थः। सञ्ज्ञिनः क्रियाजनकत्वन्तु महासञ्ज्ञयाऽऽक्षिप्तम्। यद्वा सप्तमी यथाश्रुतैव। कारकपदञ्च क्रियापरम्। करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः। जनकमित्यध्याहारः। विषयत्वं सप्तम्यर्थः। कारकग्रहणे च स्वरितत्वप्रतिज्ञया तदधिकारोक्तकर्त्रादिषट्कमेव, तेन

अतएवाव्ययपूर्वपद भिन्नत्वादेस्त्वस्य कुत्वा पवादत्वादेवोपपट् काम्यतीत्यत्रो पेत्यस्य पृथक् भावाद्यजे ख्यय पूर्वपद भिन्नत्वम् बोध्यम्। निपातनादेवेतीति।। पक्षद्वयेपीत्यर्थः।। इदमेवन्याय्यमिति। अपवादत्वपक्षे ऽसृगित्यत्र कुत्वानापत्तेरुधिरेऽसृक् शब्दस्य रूढत्वेन नञर्थ सृजर्थयोर प्रतीतेश्चेत्यर्थः।। अनुवृत्तिसामर्थ्यादिति।। अस्य वाक्यभेदे त्यनेनान्वयः।। इकइत्येत्साह चर्यादिति। अस्य सर्वनामस्थाने इति सप्तम्या षष्ठी प्रकल्प्ये त्यनेनान्वयः।। चेति। समुच्चये।। च शब्द इति भावस्तत्फलितमाहाअजंतस्येति। क्लीवस्येतिशेषः।। तत्र सर्वनामस्थाने

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नटश्रवणमित्यादौ न कृदुत्तरपदप्रकतिस्वरः। ग्रामेवासः इत्यादौ च तत्स्वरसिद्धिरित्यन्यत्र विस्तरः।

कर्तुः किमिति। तदभावेऽपि केनाऽऽप्तुमित्याकाङ्क्षायां कारकाधिकारद्यापारलाभ इति प्रश्नः। माषेष्विति। माषेषु प्रसक्तमश्वं माषनाशो मा भूदित्यन्यत्र बध्नातीत्यर्थः तदाह-कर्मण इति। तमब्ग्रहणं किमिति। अवयवद्वारा समुदायस्य प्रश्नः कर्तुरुद्देश्यं कर्मेत्येवास्तित्वति भावः। पयसौदनमिति। यदा कृतभोजनोऽपि पयोलाभेनौदनभोजने प्रवर्त्तते तदेदं प्रत्युदाहरणम्। तत्क्रियायाः पयउदेदेश्यकत्वात्। ईप्सिततमशब्दस्य तु क्रियाशब्दत्वात्पयस्तदा फलाश्रयत्वेना विवक्षणान्न दोष इति भावः। तमस्य फलं तु 'अग्रेर्माणवकं वारयति' इति। तद्भावे हि 'वारणार्थानाम्' (१।४।२७) इति सूत्रम स्यापवादः स्यात्। एवञ्च माणवकस्य कर्मत्वं न स्यात्। न चाग्रौ तच्चरितार्थम् तस्यापि तदुपस्थाप्यसंयोगरूपफलाश्रयत्वात्। वारयतेश्च संयोगाद्यनुकूलव्यापाराभावानुकूलव्यापारोऽर्थः। एष एव प्रवृत्तिविधातः। ईप्सितशब्द उभयत्रापि क्रियाशब्द एव। न च संयोगो न तत्कर्तृव्यापारजन्य इति तत्र कर्मत्वाप्राप्तिरिति वाच्यम्। कर्तृव्यापारवाचकधातूपात्तफलाश्रयत्वमित्यर्थस्यैव तेन लाभात्। तमब्ग्रहणे त्वीप्सितमात्रे सावकाशस्य परत्वादीप्सिततमेऽनेन बाधः। ईप्सिततमत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्। तच्च नाग्न्यादौ। फलव्यापारयोः प्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्। तच्च नाग्न्यादौ। फलव्यापारयोः प्रकृतधात्वर्थत्वन्तु प्रत्यासत्तिलभ्यम्। तेन यदा पुष्ट्यर्थं माषभक्षणाय माषक्षेत्रे एवाश्वबन्धनं तदा 'माषेष्वश्वं बध्नाति' इत्यादौ माषाणं न कर्मत्वम्। बन्धनप्रयोज्यभ क्षणफलाश्रयत्वेऽपि भक्षणस्य बध्नात्यर्थत्वाभावात्। प्रयोज्यत्वनिवेशाद् 'गां पयो 'दोग्धि' इत्यादौ

स्पष्टंचेद मिति क्वौलुप्तमित्यस्यासार्वत्रिकत्व मित्यर्थः।।

युजेरिति सूत्रे सर्व नामस्थान इत्यस्य सुटीति व्याख्यातृमतेप्याह। सोर्लुकेति।। तत्र तथा व्याख्याने पूर्वत्रोगिदचामित्य त्रोत्तरत्र न पुंसकस्य झलित्यत्रापि तथौचित्यादिति भावः।। स्वमतेतु सर्वनामस्थानत्वाभावादित्यपि बोध्यं।। व्यपवर्गाभावेनेति एतस्योभयत आश्रयणेतादिवत्वाभावाभावे हेतुत्वं बोध्यं चेति। चेन स्थानिभूतादचः पूर्वस्य परस्यवाकार्याभावेनाचः परस्मि न्नित्यस्याप्रवृत्तेरित्यपि बोध्यम्।। बाधकाभावेनेति।। अत्रार्थेऽधिकारादेवार्थ द्वय लाभेसिद्ध मेतयोरिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विभागानुकूलव्यापारानुकूलव्यापारार्थकदुहियोगे पयसः कर्मत्वसिद्धिरिति स्पष्टं भाष्ये।

कर्मेत्यनुवृत्ताविति। 'अधिशीङ्स्थासाम्' (१।४।४६) इति सूत्रात्। आधारेति। कर्तृकर्मद्वारा क्रियाश्रयो हि सः। तदाह – गेह मित्यादि। अनुक्ते कर्मणीति। कर्मपदेनैतच्छास्त्रबोधितकर्मसंज्ञकं कर्मत्वशक्तिमद् गृह्यते। सर्वकर्मविहितद्वितीयादीनां कर्मत्व शक्तिमानर्थः। क्रियाकारकभावः सम्बन्धश्च तदर्तः। 'राज्ञः पुरुष इत्यत्र राजपुरुषयोः सम्बन्धस्य षष्ठी वाचिका, कष्टं श्रित इत्यत्र क्रियाकारकयोः सम्बन्धस्य द्वितीया वाचिका' इतिसमर्थसूत्रस्थभाष्यात्। एवञ्च 'हरिं भजति' इत्यादौ हरिकर्मकं भजनमिति बोधः।

अभिहिते त्विति। अनभिहिताधिकारादिति भावः। पञ्चकं प्रातिपदिकार्थ इति पक्षे 'कर्मणि द्वितीया' (२।३।२) इत्यादेः 'द्व्येकयोः' (१।४।२२) इत्यादेश्च नियमत्वम्। एतदभावेऽपि स्वादिसूत्रेण 'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे' इति कर्मादौ सङ्ख्यायाञ्च स्वादीनां सिद्धेः। तत्र यदा कर्मणीत्यादेद्व्येकयोरित्यादेश्चैकवाक्यतायामेकस्मिन् कर्मणीत्यन्वयेन सूत्रजबोधे कर्माद्यर्थस्य प्राधान्यं तदा नार्थोऽनेन। सूत्रजबोधविषयप्रधानविषयेण 'उक्तार्थानाम्' इति न्यायेन सिद्धेः। यद्यपि 'द्विर्बद्धं सुबद्धम्' इति न्यायेन 'द्वौ ब्राह्मणौ' 'व्यतिलुनीते' इत्यादौ द्योतकवाचकयोर्द्योतकयोश्च समुच्चयो दृष्टस्तथपि प्रकृते लक्ष्यानुसारादुक्तार्थानामिति न्यायानुसरणस्यैव वक्तुं शक्यत्वात्। एवञ्च कर्मादीनां द्योत्यत्वमेव। यदा तु कर्मगते एकत्वे इत्यन्वयेन सङ्ख्यायास्तत्वं तदा सूत्रमारब्धव्यम्। भाष्ये एषु विभक्त्यर्थत्वव्यवहारो द्योत्यतयैव, न त्वेतावता तच्छक्यत्वमेषां भ्रमितव्यं, नियमत्वानुपपत्तेरिति स्पष्टं 'बहुषु' (१।४।२१) इति सूत्रे भाष्यादिषु। द्योतकविषयेऽप्युक्तार्थानामिति न्यायो 'अधिपरी' (१।४।९३) इति सूत्रे भाष्ये दृश्यते। तत्र

बाधकबाधनार्थं तेन बैल्बं बिल्वमयमिति सिद्धमिति मयड्वैतयोरिति सूत्रस्थं भाष्यं तत्सूत्रस्थमेतयोरिति च प्रमाणमपि बोध्यम्।। पुनःप्रसंग विज्ञान पक्षेप्याह।। किंचेति।। ननु मिदचोंऽत्यादि त्यस्यांत्या दचः परोमित् भवतीत्येवार्थो न तुप्रयोग पर्यंतमत आह्।। किंचेति।। इदं सर्वं बहूर्जिनुम् प्रतिषेध इति वार्तिक मते तत्प्रत्याख्यान कर्तृ भाष्यकार मतेतुनित्यत्वाढुगिल्ल क्षणे पूर्वं नुमि नपुंसकस्येत्यस्य प्राप्तिरेव नेति बोध्यम्।। इति हलन्तानपुंसकलिंगाः।।

अव्यय प्रकरणारम्भः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हि अध्यागच्छतीत्यादावागच्छतीत्यतोऽनधिकार्थयोरधिपर्योः प्रयोगस्योक्तार्थानामितिन्यायेनाभावमाशङ्क्य 'अपूणौ द्वौ' इत्यादावुक्तार्थानां प्रयोगदर्शनिनसमाधानं कृतम्। तत्र हि द्विशब्दापूपशब्दयोर्वाचकयोः प्रकृतिप्रत्यययोर्वाचकद्योतकयोर्द्वावित्यत्र तयोर्वाचकानुवादकयोश्च समुच्चयः। अत एव द्विदशा इत्यादौ समासेन सुजर्थस्योक्तत्वान्न सुजिति भाष्ये उक्तम्। तत्र हि समासः सुच्चेत्युभयमपि द्योतकम्। सुजर्थश्च कर्म जन्मेति तत्रैव वक्ष्यते। तथा तद्धितद्विर्वचनयोर्द्योतकयोस्तद्धितेनोक्तत्वाद्वीप्सायां न द्विर्वचनं माषश इत्यादाविति 'सर्वस्य 'द्वे' (८।१।१) इति सूत्रे भाष्ये उक्तम्। एवं च धातोरपि क्रियात्वक्रियाकालकारकसङ्ख्यारूपं पञ्चकमर्थः। अत एव तद्विषयेऽपि 'द्व्येकयोः' (१।४।२२) इत्यादेः 'भावकर्मणोः' (१।३।१३) इत्यादेश्च नियमत्वं भाष्यसम्मतं सङ्गच्छते। अत एव दधि अजर्घा अवेत् इत्यादौ प्रातिपदिकधातुभ्यामेव सर्वबोधः। अत एव 'भावकर्मणोः' (१।३।१३) इत्यस्य तद्वृत्ताद्धातोरित्यर्थः 'स्नुक्रमोः' (७।२।३६) इतिसूत्रे भाष्ये दर्शितः। द्योत्यत्वादेवोभयत्रापि प्रत्ययार्थस्य विशेषणत्वमेवेत्यन्यत्र विस्तरः।

प्रथमैवेति। सा हि प्रातिपदिकार्थस्य तेनोक्तत्वेऽपि भवत्येवेति भावः। अत एव 'अभिहिते प्रथमा' इति वार्त्तिकं सङ्गच्छते। तिङ्कृदित्यादि परिगणनादेव 'कटं भीष्मं कुरु' इत्यादौ विशेष्यादुत्पन्नद्वितीयया गतार्थत्वेऽपि विशेषणात् सा। यदा तु प्रक्रियादशायां कटोऽपि कर्म भीष्मादयोऽपि इत्याश्रयणात् कटत्वविशिष्टकटनिष्ठकर्मत्वोक्तावपि भीष्मत्वादिगुणविशिष्टनिष्ठस्य तस्य बोधार्थं ततोऽपि सा। बोधस्तु परस्परं तयोर्विशेष्यविशेषणभावेनैव। कारकाणां भावनाऽन्वयव्युत्पत्तिः साक्षात्स्वाश्रयद्वारा

भाष्य प्रामाण्यादिति तत्रहि चिरशब्द स्य द्युद्युल सन्नियोगे न मांतत्वं निपात्यत इत्युक्तम्। चिरमित्यस्याव्ययत्वेतत्राव्ययत्वादेव प्रत्यय सिद्धेः।। सूत्रे चिरं ग्रहणस्य भाष्यस्य संगतिस्पष्टैव सायं ग्रहणं तु भाष्ये प्रत्याख्यात् मेव नचचिर शब्दस्य कालाद्वञ् बाधनार्थं ग्रहणं चिरपरुदितिल प्रत्यये न ठो बाधादिति तत्त्वम्।। ननु प्रतानित्यस्यार्थ भेदेन सार्थक्यमत आह्। पदांताच्चेति। रुत्वादिवदिति। अपदां तत्वादित्यर्थः।। आदिना विसर्ग जस्त्वे। ननुशानते जने इत्यस्य प्रशानित्येव गणेपठ्यत इत्यत आह्। कृन्मेजंत इतीति। भाष्यस्वरसोप्येवमेवेति।। तत्र हिकृदंतं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाऽन्वयविषयेति, तदा परिगणनं भाष्ये प्रत्याख्यातम्। तिङ्कृतौ स्वप्रकृत्यर्थं प्रति यस्य कर्मता तस्य सर्वस्यापि कर्मतामाहतुरिति 'कृतः कटः सुन्दरः' इत्यादौ न क्वापि द्वितीयेति दिक्।

शत्य इति। (१) अत्र वदन्ति–कर्मादिपद इवात्रापि न विभक्तिवाच्यतावच्छेदकरूपेण कमदिर्भानम्। अत औपगवश्चित्रगुरिति युक्तं प्रत्युदाहर्तुम्। तत्र च सम्बन्धस्य येन रूपेण षष्ठ्या भानं तेनैव तद्धितान्तादिभिस्समुदायशक्त्या। एतदधिकाराभावे च घट इत्यादौ षष्ठ्यवाच्यत्वेन दृष्टानामेव प्रातिपदिकार्थपदेन ग्रहणं स्यात्, तद्भिन्नस्यैव च षष्ठी विधायके शेषपदेन ग्रहणं स्यादित्यत्रत्यसम्बन्धस्य षष्ठीवाच्यत्वेन दृष्टतया प्राप्तां षष्ठीं वारयितुं सः।

(२) वस्तुतस्तु 'कटं भीष्मम्' इति परिगणनफलमुक्त्वा तत्प्रत्याख्यानाय (३) 'अशेषत्वान्नात्र शेषलक्षणा षष्ठी, अन्यानभिहितकर्मादीनामभावाच्च नान्या' इत्याशङ्क्य 'न केवला प्रकृतिः इति समयः कृतः न चान्योत्पद्यमाना एतमभिसम्बन्धमुत्सहते वक्तुमिति कृत्वा द्वितीया' इत्युक्तं भाष्ये। तेनौपगवादावपि षष्ठी। वारितैवेति तयोरप्यप्रत्युदाहरणत्वमेव। (१) तदुक्तम् 'अनेकम्' (२।२।२४) इत्यत्र भाष्येऽपि 'चित्रगुरित्यत्र षष्ठ्यर्थस्य नियमेन भानात् षष्ठी प्राप्नोति' इत्याशङ्क्य 'अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्न इति प्रथमा' इत्युक्तम्। अनेनाशेषत्वरूपं षष्ठ्यप्राप्तिबीजमुक्तम्। अन्तर्भूत इत्यनेन चित्रग्वादौ सम्बन्धस्यैव प्रवृत्तिनिमित्तत्वेन प्राति पदिकार्थपदेन ग्रहणयोग्यतोक्तेति बोद्धयम्।

(२) परे तु–'शत्यः' इत्यादौ कारकान्वययोग्यतावच्छेदकसाध्यत्वेन न क्रियादेर्भानम्। अत एव न तत्रेतरकारकाणामन्वयः। इदञ्च 'कर्तृकर्मणोः' (२।३।६५) इत्यत्र निरूपयिष्यते।

मांत मित्यर्थे प्रतामौ प्रताम इत्यादावतिव्याप्तिमाशंक्य यदयं स्वरादिषु प्रशान् शब्दं पठति तत्तू ज्ञापयत्याचार्यो न प्रत्यय लक्षणेन कृदंत्तत्वमादायाव्यवहितत्त्वं भवतीति समाहितमि ति भावः। अप्रामाणिक इति।। चादिषुपाठादिति भावः।। ननु नञश्चादिषु पाठेऽव्यये नञ् कुनिपातानामित्यत्र नञ् ग्रहणं व्यर्थमत आह्। अव्यय इति ''प्रक्षिप्त इति।। नञ् माङोर्द्योतकत्वेन चादिष्वे वयुक्तः पाठ इतिभावः। विभक्तयंतेति।। युवामितीत्यर्थः।। एवं चार्थतः सादृश्यमेवमुख्यं।। शब्दतस्तु सति सम्भव इति भावः।। अतएव भोस इत्यस्य विभाषाभव विति वार्तिके निष्पन्न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं 'प्राप्तानन्दः' इत्यादौ यत्कर्मकप्राप्ति कर्त्ताऽऽनन्द इति विग्रहतो बोधे समासतश्चानन्दकर्तृकप्राप्तिकर्मेति बोधे 'विशेष्यविशेषणभावव्यत्यासेनैकार्थीभावः कल्प्यः स्याद्, (३) वृत्तिविग्रहयोः समानार्थत्वभङ्गश्च। किं च तथा सति बहुव्रीह्युपजीव्यस्यैकधर्मिबोधकत्व रूपसामानाधिकरण्यस्य हानिः। किं चैवं प्राप्ता भार्या यं स 'प्राप्तभार्यः' इत्यादौ पुंवत्त्वानापत्तिः। पूर्वोत्तरपदयोरेकविशेष्यकप्रतीतिजनकत्वरूपवक्ष्यमाणसामानाधिकरण्याभावात्। तस्मात् 'कालाः परिमाणिना' (२।२५) इत्यादिसूत्रभाष्योक्तस्य वृत्तिविग्रहयोः समानार्थत्वस्य निर्वाहार्थ वृत्तिविग्रहयोः (१) प्राप्तिकर्त्रानन्दकर्मेत्येव बोधः। विशेष्ये तन्निरूपकत्वबाधेन तु विशेषणभूतप्राप्तौ तत्पर्यवसानं 'स्वर्गी ध्वस्तः' इतिवत्। शाब्दबोधस्तु विशिष्टे तदारोपेणोपपाद्यः।

एवञ्चात्र शब्दात्कमदिः क्रियाजनकत्वेन विभक्तिवाच्यतावच्छेदको द्भूतशक्तिमत्त्वेन च न भानम्, अतो न विभक्तिप्रसक्तिः। अत एव 'गतिकारकोपपदात्' (६।२।१३९) इति सूत्रे 'गतिकारकोपपदादिति किमर्थं परमं कारकं परमकारकम्' इति प्रतीकमुपादाय 'यथा सम्प्रदानादयः शब्दा न कारकरूपतां प्रतिपादयन्ति, तथा कारकशब्दोऽपीति। कृदन्ता हि क्रियायोग्यताविशिष्टद्रव्यवाचिनो न तूद्भूतां कारकशक्तिं प्रतिपादयन्ति' इति कैयटे नोक्तम्। अत एव तस्य कर्मत्वस्य न क्रियान्वयनियमः। अन्यथा कारकशक्तेः क्रियाविशेषणत्वनियमेन कर्मादिप्राधान्यानापत्तिः। एवं कर्मादिपदैरिव पक्कादिपदैरपि न विभक्तिप्रयोजकरूपेण कर्मादीनां भानम्।

'तिङ्कृत्तद्धितसमासैरभिधाने' इत्यस्यायमर्थः। यत्तैरभिधाने तत्तच्छक्त्यावेशेन न भानमिति विभक्त्यप्रसक्तिः। अत्रैव 'अनभिहिते' (२।३।१) इतितात्पर्यग्राहकम्।

भोरित्यनेन प्रति रुपकत्वान्निपात त्वमि तिभाष्योक्तं संगच्छते। असंभवादिति।। स्वर ग्रहणसामर्थ्यात्तत्र शब्दतः प्रतिरूपकत्वं गृह्यते एवं चोपसर्गविभक्तयंतयोर्विषयेऽर्थतः स्वरांशे शब्दत इति व्यस्थेतिभावः।। एतेनार्थतः प्रतिरूपकस्य विभक्तयं तांशे स्वीकारेण शब्द तोपि सम्भवादाह।। लुप्तेति।। वस्तुतस्तदसंभवेपिन क्षतिरितिबोध्यम्।। अतएव तदित्यव्ययस्य सत्वादेव।

नैकशेष इति। त्यदादि गणेषु साहचर्यादनव्यस्यैव ग्रहणमितिभावः।। ननु गौण मुख्यन्यायेन च्यंते स्वरादि निपातमित्यस्य प्रवृत्ति नैंव स्यादत आह्।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ध्वनितञ्चेदं 'सुष आत्मनः' (३।१।८) इति सूत्रे भाष्ये। तत्र हि इष्टः पुत्र इष्यते पुत्र इत्यर्थे क्यचमाशङ्क्य 'स्वशब्देनोक्तत्वान्न' इति समाहितम्। इष्टशब्दसामानाधिकरण्यात्पुत्रार्थे कर्मत्वावगतावपि पुत्र इति सुबन्तं न कर्मवाचीति न ततः क्यजिति तद्भावः। स्वं कर्मत्वं तद्वाचकशब्देन पुत्रगतं कर्मत्वमुक्तं, न तु पुत्रशब्दस्य तत्र वृत्तिरित्यक्षरार्थः। 'सुप आत्मनः' (३।१।८) इति सूत्रस्य कर्मत्वविशिष्टबोधकसुबन्तादित्यर्थ इति तदाशयः। वस्तुतः कर्मत्वविशिष्टो योऽर्थस्तद्बोधकादित्यर्थे 'इह भवन्त' इत्यादिना समाध्यन्तरमुक्तम्। वाक्ये फलं विशेष्यं, वृत्तौ व्यापार इति समानार्थत्वाभावात्तत्रार्थे वृत्तिर्नेतीत्याहुः।

प्राचीनानुसारेणोक्तस्य प्रायेणेत्यस्य फलमाह—क्वचिदिति। परे त्वत्र तुमुनः साधुत्वायेष्यते इत्यध्याहार आवश्यकः। अन्यथा क्रियार्थक्रियोपपदत्वाभावाच्छकादियोगाभावाच्च स दुर्लभः, स्यात्। अध्याहारे तु इच्छार्थेषु तुमुनिति सुलभः। विषवृक्षोऽपि सम्बर्द्ध्य छेत्तुमिष्यते इति यत् तदसाम्प्रतम्-अन्याय्यमित्यर्थः। एवञ्चाध्याहृततिङाऽभिधानान्न द्वितीया। तादृशेच्छाया अन्याय्यत्वञ्च तद्विषयस्यान्याय्यत्वेन। एवम् 'अमुं नारद इत्यबोधि सः' इत्यादौ 'नारद इति' इति श्रीकृष्णीयज्ञानाकारानुकरणम्। नारद इत्येतच्छब्दाभिलप्यमानाकारो बोध इत्यर्थ इति प्रथमान्तस्या (१) प्रातिपदिकत्वान्न तत्र द्वितीया। अत एव 'अधिहरि' इत्यादौ समासः। तद्वचनसामर्थ्येन ह्यस्य परिगणनत्वकल्पनैव युक्ता। अत एव 'अभ्र आँ अपः' इत्यादौ सप्तमी। (२) किञ्च निपातेनाभिधानेऽपि प्रातिपदिकादुद्भूतत्तच्छक्तिमत्त्वेनैव भानमिति तत्र विभक्तिः सुलभा। शब्दशक्तिस्वभावादस्यैवार्थस्य द्योतकोऽधिर्निपातः। अत एव परिगणनप्रत्याख्यानेऽपि न दोष इत्याहुः।

स्वरादिनिपात मित्यत्रेति।। अनित्यत्वादिति।। अव्ययत्वस्य पदकार्यात्वाभावेन प्रकृतेऽसमर्थ त्वादिति भावोछ।। अन्यथा पदकार्येपि न्यायप्रवृत्तौ।। प्रगृह्यत्वमेवेति।। प्रगृह्यत्व पदकार्य मिवेत्यर्थः।। ननुविहितानां नियम इति पक्षेऽस्य सूत्रस्योपपत्तिरत आह्।।

किंचेति। अत्रास्यामाशंकायाम् नन्वेवमपि कर्माद्यभावात् कथमव्ययेभ्य एक वचनस्यापि प्राप्तिरत आह्। द्वित्वबहुत्वयोरिति। अतएवाव्ययेभ्यः सर्वविभक्तयेक वचनस्य सत्त्वादेव। नन्वव्ययेभ्योपि प्रथमायाः प्राप्तौ प्रापणाभावो ऽतआह।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथायुक्तम् (१।४।५०)। (१) तत्त्वञ्च समभिव्याहृतधात्वर्थप्रधानव्यापारप्रयोज्यतद्धात्वर्थ (२) फलाश्रयत्वरूपम्। पराधीनतया विषं भुञ्जानेऽपि भुजिक्रियाफलाश्रयत्वेनोद्देश्यत्वात्पूर्वसूत्रेणैव सिद्धम्। तदुक्तं भाष्ये 'आतश्च विषमीप्सितं यत्तद्भक्षयति' इति। (३) तस्मात् 'चोरान् पश्यति' इति (४) द्वेष्योदाहरणम्। विषयेन्द्रियसम्बन्धाद् दृश्यमाना अपि ते न दर्शनोद्देश्याः, अपि तु अनिष्टदर्शना एवेति स्पष्टं भाष्य कैयटयोः। एवञ्च तत्र पूर्वेणाप्राप्तौ वचनम्। अनीप्सितम्-अनुद्देश्यम्। तच्च द्वेष्यम् (५) उदासीनञ्च। तृणमिति। यथा स्पृश्यमानस्य गङ्गादेः स्पर्शादिजन्य संयोगादिफलाधारत्वं तथैव तृणादेरपीति भावः। (६) अनीप्सितपदाभावे ईप्सितस्य (७) प्रकर्षहीनस्याप्यनेन संज्ञाप्राप्तौ वारणार्थानामित्यनवकाशं स्यात्। (१) तथायुक्तमिति किम्? 'विषेणौदनं भुङ्क्ते' इत्यादौ करणत्वमात्रविवक्षायां (२) विषस्य मा भूत। (३) 'प्रयागात्काशीं गच्छति' इत्यत्र प्रयागस्य च मा भूत्। तत्सत्त्वे तु प्रकृतधात्वर्थफलाश्रयत्वरूपतत्त्वाभावान्न दोषः।

अपादानादिविशेषैरिति। (४) तत्तद्रूपेणाभासमानमित्यर्थः। अकथितशब्दोऽत्रासङ्कीर्तितपरो नाप्रधानपर इति भावः। (१) एवञ्च पूर्वविधिविषयप्रसक्तिपूर्वकं तदविवक्षायां, सर्वथा पूर्वविधेरप्रसक्तौ चैतत्प्रवृत्ति रिति बोद्धयम्। अपादानत्वादिविवक्षायां पञ्चम्याद्येव। केन रूपेण विवक्षेति चेत्-कर्मत्वेनेति गृहाण। कारकत्वव्याप्यसञ्ज्ञानां स्वबोद्धयार्थे कर्मत्वादिशक्तिमत्त्वबोधकत्वात्। बोधोऽपि तथैव।

तत्तच्छास्त्राभावे सर्वत्र षष्ठीप्राप्त्या सर्वासां तदपवादत्वेन तदपवादत्वमात्रेण सम्बन्धार्थकत्वं न युक्तम्। अत एव 'कर्मणि द्वितीया' (२।३।२) इत्यस्य न वैरूप्यम्। (१)

प्रथमापीति। ननु पचतिकल्पमित्यादावनेनसर्व विभक्तयेक वन्वनापत्तिरत आह्। पचतिकल्पमित्यादौत्विति। नचाव्ययेषु कर्माद्यभानात् कर्म विद्वितीयेत्यादेरनुपस्थित्या न तत्प्राथम्यम त्रोपयुक्त मत आह्। निजामिति ननुनिजांत्रयाणा मिन्यनेनात्र शास्त्रे बहुवचन लभ्य बहुत्व विषय एवैत न्यायाप्रवृत्तिरित्येव ज्ञाप्यते तेन प्लुत प्रगृह्यता इत्यादौ द्युदुभ्य इत्यादौ च न त्रयाण मेव ग्रहणां न च तत्र वृत्करण सामर्थ्यान्नायं बाधः।। वृत्करणेनापि एतदर्थस्यैव ज्ञापनात्।। एवंच प्रकृते न दोषोऽत आह्। आद्युदात्तश्चेति सूत्रे इति चेति।। चेना व्ययादिति सूत्रे प्रत्याहारस्य तृतीया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत एवैतत्सूत्रशेषे भाष्येऽनेनैव सिद्धे (२) आद्यसूत्रद्वय (३) वैयर्थ्यमाशङ्क्येप्सितमात्रस्याप्यनेन सञ्ज्ञायां (४) 'वारणार्थानाम्' (१।४।२७) इति सूत्रस्यानवकाशत्वे माणवकादपि पञ्चमी स्यादिति ईप्सिततममित्याद्यारब्धव्यमित्यु (५) त्तरितम्। एतेन दुहादीनां व्यापारद्वया र्थकत्वे कर्तुरिति कर्मत्वे तत्त्वेनाविवक्षायामप्यनेन कर्मत्वमिति परास्तम्। वदतो व्याघातात्। अत एव कर्तुरित्यनेन सिद्धिमाश्रित्यास्य वैयर्थ्यं भाष्ये (१) नाशङ्कितम्।

कारकमिति। क्रियाजनकमित्यर्थः। नन्वेवं 'नटस्य श्रृणोति' इत्यादावतिप्रसङ्गः। सर्वथा तत्र तदप्राप्तेः। गीतद्वारा च तस्य क्रियाजनकत्वम्। न च तस्य कर्मयुक्त्वाभावः। तदंशस्यापि परिगणनलभ्यत्वात्। नटस्यापादानत्वविवक्षा तु न कदापि। 'आख्यात' (१।४।२९) इइ सूत्रे उपयोगग्रहणेनानुपयोगे आख्यातुरपादानत्वाविवक्षाया बोधनात्; अतः परिगणनमाह– दुह्याजिति। कर्मयुगिति। कर्मयुक्त्वं धात्वर्थव्यापारा त्प्राक् तदनन्तरं वा तत्सम्बद्धत्वम्। तत्र ब्रुविशास्यरितिक्ते धात्वर्थव्यापारात्प्रागेव तत्सम्बद्धत्वं, तद्विषये तु तदनन्तरं तत्सम्बद्धत्वं बोद्धयम्। तत्र सति सम्भवे प्राक् तत्सम्बद्धत्वमेव ग्राह्यम्। एतेन स्थाल्यादेरपि तव्द्यापारादनन्तरं पयः सम्बद्धत्वेन कर्मत्वं तेषां दुर्वारमित्यपास्तम्। तेन 'गां पयो दोग्धि स्थाल्याम्' इत्यादौ स्थाल्यादेरधिकरणत्वाविवक्षायामपि नानेन कर्त्वम्। एवञ्चापादानादीत्यादिशब्देनापादानसम्प्रदानाधिकरणान्येव। करणन्तु न गृह्यते। हस्तादेः करणस्य पयआदिकर्मयुक्त्वाभावात्।

यदपि–'गां दोग्धि' इत्यादौ गौः पयस्त्यजति, गवा पयस्त्याजयतीत्याद्यर्थप्रतीत्या 'कर्तुरीप्सिततमम्' (१।४।४९) इत्येव सिद्धम्। प्रधानकर्मत्वञ्च गवादीनामिति तत्रैव

सप्तम्योर्वहुलमिति सूत्रे तृतीया सप्तम्योश्च ग्रहणादित्यपि बोध्यम्। अत्र चेति। आसिविधायके छंदसीत्यनुवृत्तौ चेत्यर्थः।। इष्टसिद्धिरितीति।।

कुत्सादि विशेषणस्य न ह्युपाधेरुपाधिर्भवतीति न्यायेनानुप्रयुज्यमान प्रधाने एवान्वये नाकचोः प्राप्तेर्न तदर्थमपि कारयामित्याद्यामंतेऽ व्ययत्वमुपयुक्त मिति भावः।। लवमाचक्षाणोलौरिति ऋदोरबित्यप् प्रत्ययांत लव शब्दाण्णिचि क्विप्यल्लोपणिलोपयोर्वउठयेत्येधत्पूठिति वृद्धया सिद्धम् लौरित्यर्थः।।

कृत्त ए जंतत्वेनेति।। एजोदशेकृते पंच मीसमासेन स्थानिवत्वात् पुनः कृदति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लादिसिद्धिः। प्रधानकर्मत्वञ्च कर्तृप्रत्ययसमभिव्याहारे कर्तृनिष्ठप्रधानव्यापारविशेषणफलाश्रयत्वम्। ण्यन्तविषये ईदृशप्राधान्यस्यैव ग्रहात्। प्रकृते च पयोनिष्ठविभागानुकूलो यो गोनिष्ठव्यापार स्तदनुकूलव्यापारस्य (२) शब्दतः प्राधान्यात्। 'गर्गाः शतं दण्ड्यन्ताम्' इत्यत्र गर्गाणामेव तत्त्वम्। उद्देश्यत्वरूपमार्थं प्राधान्यं तु शतस्येत्यनुद्देश्यत्वेनाप्रधान गर्गानुरोधान्न शतावृत्तिरिति न वृद्धिसूत्रस्थभाष्यविरोधः। एवमेव (३) शकारमसि चोदित' इत्याद्युपपत्तिः।

(१) अत एव–

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।।

इत्युक्त्वोत्तरार्धोपात्तारिरिक्ता द्विकर्मकाः के? इति प्रश्ने–

नीवह्योर्हरतेश्चापि गत्यार्थानां तथैव च।
द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः।।

इत्युक्तम्। तत्र न्यादिग्रहणं तव कृषिवन्ममम व्यापारद्वयार्थकधातू (२) पलक्षणम्। एवञ्चेदं सूत्रं व्यर्थं, तथापि यदा पयोनिष्ठविभागानुकूलव्यापारादिरेव धात्वर्थस्तदाऽपादानत्वाद्यविवक्षायामन्येनासिद्धकर्मत्वार्थमिदमावश्यकम्। तदा च 'अप्रधाने दुहादीनाम्' इत्युक्तेरप्रधाने गवादावेव लादयः। अप्रधानकर्मत्वञ्चोक्तप्रधानकर्मभिन्नकर्मत्वम्। तच्चोक्तार्थे गवादीनामस्त्येव, (३) फलानाश्रयत्वात्।

ङ्ङित्यस्यप्रवृत्याकृत्व मितिभावः।। एतेन सन्निपात परिभाषयाव्ययत्वाभावेन। अक जादिति।। आदिना अव्ययानां भमात्र इत्यस्य नलोकेत्यस्य च संग्रहः।। कृन्मे जंत इति सूत्रस्थ भाष्योक्त कुम्भ कारेभ्य इत्यादौ लुकोऽप्राप्तेराह।। अंग संज्ञायामिति। नन्वत्रांग पदाभावा देतादृशार्थालाभोऽत आह्।। आबिति। ननूच्चैरावि त्यादौ लुग्वारणाय तत्फलमस्तीत्यत आह्। उच्चैरौ उच्चै राभ्यामिति।। अशब्दादौ विभक्ति रिदंशब्दाद्वाव त्रेत्यर्थः।। अतएव।। तदनभिधानादेव'' तत्रोक्तमिति।। अंगाक्षेपो विहित विशेषणं वेत्यर्थः।। इदं सर्वं प्रत्यय ग्रहणेचापंचम्या इत्यनेन तदंतत्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गां दोग्धीति। अन्तःस्थितद्रवद्द्रव्यनिष्ठविभागानुकूलव्यापारो दुहेरर्थः। तत्र गोरपादानत्वाविवक्षायामनेन कर्मत्वम्। तद्विवक्षायां पञ्चमी। गोः पयस्यन्वये षष्ठी। द्विकर्मकेषु गवादीनां कर्मत्वाविवक्षया क्रियाऽन्वये षष्ठी न अनभिधानात्। षठ्यन्तस्य स्वान्वययोग्यनामसमभिव्याहारे तत्रैवान्वयस्योत्सर्गतो व्युत्पत्तेश्च। अत एव 'तण्डुलानामोदनं पचति' इत्यत्र 'व्यर्थश्चैव पचिर्विकारयोगे षष्ठी' इत्येव कर्तुरिति सूत्रे भाष्ये उक्तमिति दिक्।

बलिं याचते इति। यदा परस्वत्वनिवृत्ति–स्वस्वत्वोत्पत्त्युभयानुकूलो व्यापारो याचेरर्थः, स्वत्वे बलेर्निरूपकतयाऽन्वयः, तदाऽनेन कर्मत्वम्। पूर्वविषयस्य कस्याप्यभावात्। न चात्रापादानत्वप्रसक्तिः। विभागस्य धात्वर्थत्वाभावात्। 'न हि याचनादेवापायो भवति, याचितो यदि ददाति तदाऽपायेन युज्यते' इति भाष्योक्तेः। 'असङ्कीर्तितपर्यायाकथितग्रहणे 'गां दोग्धि' गोर्दोग्धि' इति च, याचिपृच्छिभिक्षियोगे कर्मसञ्ज्ञैवेत्येषा व्यवस्था' इति च सिद्धान्ते कैयटोक्तेश्च। व्यापारद्वयार्थत्वे तु कर्तुरिति कर्मत्वं बोद्धयम्। वसुधायाः स्वामित्वसम्बन्धात् कर्मयुक्त्वम्।

अविनीतमिति। याचेः स्वीकारानुकूलव्यापारोऽर्थः। स्वीकारश्च 'इदमवश्यं करिष्यामि' इतिशब्दप्रयोगजनको ज्ञानविशेषः। विनयेन च तद्विषयज्ञानवत्त्वं सम्बन्धः।

तण्डुलानिति। तण्डुलान् विक्लेदयन्नोदनं निर्वर्त्तयतीत्यर्थस्य कर्त्तुरितिसूत्रस्थभाष्यकैयटसम्मत्वेन कर्तुरित्येव कर्मत्वसिद्धेरस्यैतदुदाहरणत्वं चिन्त्यम्। एवं स्वसम्प्रदानकदानानुकूलव्यापारानुकूलशासनरूपव्यापारार्थ दण्ड्यादियोगेऽपि तेनैव सिद्धम्। एवं व्यापारद्वयार्थत्वेन सति प्रयोगे बहूनां द्विकर्मकत्वं बोद्धयम्।

निषेधेतदादेरित्यस्यानुपस्थितिरिति मतेन। वस्तुतस्तु। तदंतत्वनिषेधेपिनदाद्यंतांशानु पस्थितौं न मानमत एवहेकतरदित्या दावेङ्ह्रस्वादिनेति सिद्धांति मतेऽव्ययाद्यस्मात्प्रत्यय विधिस्तदादेः परस्यापः सुपश्चलुगित्यर्थादत्युच्चैसावित्यादावे तदप्राप्योच्चैरामित्या देरभिधानेपि न दोष इत्यलम्। अंत्येक प्रत्यय इति। देवविशमित्यत्रेत्यर्थः।। इत्य व्ययानि।। इति लघु शब्देंदु शेखर व्याख्यायां पण्डित श्रीधर विरचितायां श्रैधर्यां षड्किंग प्रकरणं समाप्तिमगात् लिखितकिदं वैष्णवे न आपाशर्मणा काशीस्थेन अशी संगमे श्री संगमेश्वर सन्नि धौ।। (मातृ का पृष्ठ सं०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्रजमिति। निर्गमप्रतिबन्धपूर्वकयत्किञ्चिदधिकरणकचिरस्थित्यनुकूलव्यापारो रुधेरर्थः। व्रजे गौस्तिष्ठति, तत्र तां निर्गमप्रतिबन्धपूर्वकं चिरं स्थापयतीति सम्प्रत्ययात्। अधिकरणत्वाविवक्षायामनेन कर्मत्वम्। व्यापारद्वयार्थत्वे कर्तुरिति कर्मत्वम्।

पन्थनिमिति। जिज्ञासाविषयार्थज्ञानानुकूलः 'केन पथा गन्तव्यम्' इत्यभिलापादिरूपो व्यापारः पृच्छेरर्थः। ज्ञानविषयत्वेन पथः कर्मत्वम्। माणवकेन च तज्ज्ञानाश्रयत्वं सम्बन्धः। अपादानत्वं तु नात्र। 'न प्रश्नादेवापायो भवति पृष्ठोऽसौ यद्याचष्टे तदाऽपायेन युज्यते' इति भाष्योक्तेः सम्प्रदानत्त्वमपि न। कर्मसम्बन्धवत्वेनेच्छाविषयत्वाभावात्। व्यापारद्वयार्थत्वे तु कर्तुरिति कर्मत्वम्।

वृक्षमिति। विभागपूर्वकोऽऽदाने चिञ्। वृक्षात्फलान्यादत्ते इत्यर्थात्। अपादानत्वाविवक्षायामनेन कर्मत्वम्।

धर्मं ब्रूते इत्यादि। ज्ञानानुकूलः शब्दप्रयोरूपो व्यापारो ब्रूञर्थः। प्रवृत्तिपर्यवसायी स शासेः। स च 'धर्मं कुरु' इत्यादिविधिघटितोपदेशरूपः। विषयता च फलतावच्छेदकः सम्बन्धः। वचनादिकर्मणा धर्मेण माणवकस्याभिप्रेयमाणत्वात्तस्य सम्प्रदानत्वम्। तदविवक्षायाञ्चानेन कर्मत्वम्। अत्र कर्तृव्यापारानन्तरं तज्ज्ञानाश्रयत्वरूपो माणवकस्य धर्मेण सम्बन्धः। नयतेः संयोगानुकूलव्यापारानुकूलव्यापारोऽर्थः। स एव स्कन्धग्रहणादिपूर्वो वहेरर्थः। गत्यनुकूलव्यापारविशेषः कृषेः। बलाद्ग्रहणपूर्वकं देशान्तरप्रापणं हरतेः। एषु 'कर्तुः' (१।४।४९) इति कर्मत्वं बोद्धयम्। एवञ्च भाष्यानुक्तानामत्र ग्रहणं प्राचामनुरोधेनेति तत्त्वम्। भाष्योक्ता हि 'दुहियाचिरुधिप्रच्छिभिक्षिचिञ्बुविशासयः'

---

८६ पर)

श्री गणेशाय नमः। अजाद्यतष्टाप् अजादीति लुप्तषष्ठीकं पृथक् पदमत इति पंचम्यंतं बोध्यम्। अत इति, वर्णग्रहणदिति। उगिद्वर्ण ग्रहम वर्जमित्युक्तेः समास प्रत्यय विधाविततिनिषेधाप्राप्तेः।। प्रातिपदिक विशेषणात्तदंत विधिरितिभावः।। अदंतात्प्रातिपदिकात् स्त्रीत्वेद्योत्ये टाप् इत्यर्थे प्रत्यासत्या कारांतवाच्ये इतिफलति तदाह।। आकारांतस्यचेति।। तदावाच्यार्थगतमिति, स्त्रीत्व शब्दाट्टाप् वारणायेद मितिभावः।। दारशब्देऽति प्रसंगवारणायाह तद्वाच्यमिति विशेष्यत्वापत्तिरिति।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्थनिबन्धनेयमिति। इदमपि कैयटानुरोधेन। वस्तुतस्तु येषामेतदर्थानां द्विकर्मकत्वमिष्टं तेषां व्यापारद्वयार्थत्वेन कर्तुरित्येव सिद्धम्। (१) अन्यथा 'आख्यातोपयोगे' इतिसूत्र भाष्योक्त परिगणनभङ्गापत्तिः। किञ्च भाष्ये भिक्षिग्रहणवैयर्थ्यापत्तिः। उभयार्थकयाचिग्रहणेनैव सिद्धेरित्यन्ये।

अकर्मक धातुभिरिति। तेषां स्वकरणकव्यापने वृत्त्या व्याप्तिरूपफलाश्रयत्वेन कर्तुरिति कर्मत्वम्। 'मासमास्ते' इत्यादेर्मासमासनेन व्याप्नोतीत्यादिक्रमेणार्थ इति भावः। यत्त्विदमेव कर्मसञ्ज्ञाविधायकमिति। तन्न, भाष्ये तादृशवचनानुपलम्भात्। 'अकथितञ्च' (१।४।५१) इति सूत्रे अकर्मकप्रकृतिकण्यन्तानां कथं द्विकर्मकत्वमिति शङ्कायां 'कालाभावाध्व गन्तव्याः कर्मसञ्ज्ञा ह्यकर्मणां देशश्च' इति भाष्ये उक्तम्। तच्च न विधायकं, हिशब्दघटितत्वात्। किं च 'कालाध्वनोः' (२।३।५) इति सूत्रे 'कालाध्वानौ कर्मवदिति वक्तव्यम्' इतिवार्त्तिकप्रत्याख्याने 'प्राकृतमेवैतत्कर्म, यथा कटं करोति' इत्युक्तम्। अस्य वचनत्वे 'उक्तं वा' प्राकृतं वा' इति वदेत्। तस्मादु (२) क्तरीत्या कालादीनां तद्योगे कर्मतया द्विकर्मकत्वमित्येव तत्तात्पर्यम्। (३) अत एव 'समां समां विजायते' (५।२।१२) इति सूत्रे 'समायां समायां विजायते' इति (४) विग्रहकथनपरं भाष्यं सङ्गच्छते। (५) अन्यथा अनेन द्वितीयाया एव तत्र साधुत्वेन तदसङ्गतिः स्पष्टैव। अत एवोक्तभाष्यार्थानुवादिका हरे कारिका–

कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते।। इति।

प्रकृति प्रत्ययौ सहार्थंब्रूतस्तयो प्रत्ययार्थ प्राधान्य मिति व्युत्पत्तेरित्यर्थः।। पचतीत्यादौ तिबादयोपि द्योतका एवेति भावः।। ननुस्त्रीत्वस्य विशेष्यत्वा संभवादेव व्युत्पत्तिबाधः स्यादत आह्।। वागादिष्विति।। अतएव टावादीनां द्योतकत्वादेव। ननुद्योतक विषयेऽप्युक्तार्थानामितिन्याय प्रवृत्या समावेशो दुर्लभोऽतआह्।। व्यतीति। समुच्चयस्येति। द्योतकानामित्यर्थः।। व्याख्यानादिति अजादिभिः स्त्रियं विशेषयिष्यामः।। अजादीनांयास्त्रीति भाष्यादावित्यर्थः या स्त्रीत्यस्ययत्स्त्री त्वमित्यर्थः।। एतत् अजादीत्येत त्षष्ठयंतमिति लुप्तषष्ठयंतमित्यर्थः व्याख्यानादेवेति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सकर्मकविषयेऽप्यनेन प्रकारेण कालादिकर्मणा सकर्मकत्वम्। तुल्यन्यायात्। तेन 'मासमोदनं पचति' इति भवति। तत्र कालादिकर्म अप्रधानं, द्रव्यकर्म तु प्रधानम्। कालस्याधारत्वेन द्रव्यद्वारा क्रियासम्बन्धात्। किञ्च कठिनपाक्यस्य महापरिमाणस्य बहुसङ्ख्यस्य च चिरेण पाकोऽन्यस्या चिरेणेति द्रव्यधर्मं पर्यालोच्य क्रियासु कालयोग इति स बहिरङ्गः। अपि च साधनसम्बन्धे जाते क्रियायाः परिच्छेदकबाह्यकालाकाङ्क्षेति स बहिरङ्गः। अकर्मकव्यवहारस्तु धातूनां द्रव्यकर्माभावनिमित्त एव। अत्र बीजं वक्ष्यते। तदुक्तम्–

अतस्तैः कर्मभिर्युक्तो धातुर्द्रव्यैरकर्मकः।

लस्य कर्मणि भावे च निमित्तत्वाय कल्पते।। इति।

गतिबुद्धिप्र (१।४।५२)।। शब्द कर्म कारकं येषामित्यर्थो (१) व्याख्यानात्। तेन ह्वाययतिक्रन्दयत्योर्न। अणाविति। णिच्यनुत्पन्ने इत्यर्थः। अत्र णिज् हेतुमण्णिजेव। णावित्यत्रापि स एव। व्याख्यानात्। अत एव भक्षेर्निषेधश्चरितार्थः। स हि नित्यण्यन्तश्चुरादिरिति बोद्धयम्। (१) अन्यानधीनत्वलक्षणाऽर्थप्राधान्य (२) शाब्दप्राधान्ययोः प्रयोजकव्यापारे सत्त्वेन तदनुरोधिकर्मत्वस्यान्तरङ्गादपि कर्तृत्वात् बलवत्त्वेन कर्तुरित्येव सिद्धे णिजर्थेनाप्यमानस्य चेद् गत्यर्थादीनामेवेति नियमार्थमिदम्। तेन पाचयत्यादियोगेनेति 'हेतुमति च' (३।१।२६) इति सूत्रे भाष्यकृतः। 'प्रधानकार्यं सर्वतो बलवत्' इति आकडारसूत्रे कैयटे स्पष्टम्। तेन गत्यादियोगे प्रयोज्यस्य कर्मत्वशक्तिमत्त्वं, पाचयत्यादियोगे कर्तृत्वशक्तिमत्त्वमेवेति बोद्धयम्। गमयति देवदत्तेनेति। यज्ञदत्तकर्मकगमनानुकूलदेवदत्तकर्तृकव्यापारानुकूलो विष्णुमित्रकर्तृको व्यापार इति बोधः। (३) अत्र देवदत्तस्य न कर्मत्वम्।

अनुपसर्नाधिकार सामर्थ्यादिवेत्यर्थः।। सामर्थ्येनेति अजादीत्यस्य लुप्तषष्ठ्यंतत्व सामर्थ्येनेत्यर्तः।। अत्रेति। अजादि गणेत्यर्थः।। मातृ जातिवृत्तित्वादिति।। मातृ जातेर्वृत्तिराचरणं येषां तेषांभावादित्यर्थः।। अतएवानुलोम संकरेषु मातृ जात्यारोपादेव।। केचिदिति।। अत्रारुचिबीजेतु छागीति प्रयोगानापत्तेर्भाष्याद्य नुक्तत्वाच्च सोसाधुरेवेति।। वर्जमित्युक्तेरिति।। अनुपसर्जनाधिकारेण तदंत विधेर्ज्ञापितत्वाच्चेति बोध्यम।। अंतादिति।। अत शब्द आदिर्येषांतद्विषयः तेन पूर्व शब्दे संग्रह इत्यर्थः।। एवेति।। येनविधिरितितदंत विधि विषये तु न प्रवर्तते।। स्वस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नियन्त्रिति। नियन्तृकर्तृकण्यन्तप्रकृतिभूतस्येत्यर्थः। प्रापणार्थवहेर्गत्यर्थत्वाभावेऽपि 'ग्रामं प्राप्तः' इत्यादौ तत्प्राप्तेर्गतिं विनाऽसम्भवादा (४) क्षिप्तगत्याऽपि (५) गत्यर्थत्वमित्यभिमानेन वार्तिकारम्भः। 'सुखं प्राप्तः' इत्यादौ न तदाक्षेपः, तत्र कर्तरि क्त आदिकर्मणि बोद्धव्यः। अत एव ग्रामं प्रापयति देवदत्तेनेत्येवेति ध्वनितं 'न गति' (१।३।१५) इति, 'न वा' (१।१।४४) इति सूत्रे च भाष्ये। नयतेस्तु 'या प्रापणे' इत्यादेरिव गत्युपसर्जनं प्रापणं वाच्यमिति तस्य गत्यर्थत्वमेवेति बोद्धयम्। (१) अदिखाद्योरिति। प्रत्यवसानार्थत्वात्प्राप्तिः। प्रत्यवसानं भक्षणम्। भक्षयति बलीवर्दानिति। हिंसाङ्गे भक्षणे भक्षेर्वृत्तिः। परकीयसस्यभक्षणे परोहिंसितो भवतीति तस्वामिनोऽत्र हिंसा द्रष्टव्या।

जल्पयतीति। पुत्रो धर्मं जल्पति-तद्बोधकवाक्यानि कथयति, देवदत्तो जल्पयति धर्मं पुत्रमित्यर्तः। शब्दाययतीति। शब्दं करोतीत्यर्थे 'शब्दवैर' (३।१।१७) इत्यादिक्यङन्ताण्णिच्। परे तु शब्दक्रियाणामित्यर्थे ह्वाययतिशब्दाययतिक्रन्दयतीनां प्रतिषेध उक्तो भाष्ये, न तु शब्दकर्मकाणामिति पक्षे। एवञ्च तत्र पक्षे भाष्ये शब्दाययतौ प्रतिषेधानुक्त्याऽकर्मकशब्दायतिसत्त्वे न मानम्। शब्दस्य धात्वर्थसंङ्गृहीतत्वेऽपि बहिर्भूतपुत्रादिकर्मणोऽभावे मानाभावाद् ह्वयताविवेति चिन्त्योऽयं निषेध इत्याहुः।

येषामिति। अयं भावः– गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' (१।४।५२) इति सूत्रं (२) नियमस्य सजातीयापेक्षत्वा तत्सकर्मकाणाञ्चेदेषामेवेतिनियमपरम्। एवं सिद्धेऽकर्मकग्रहणे सामर्थ्यद्दिश कालादिभिन्नकर्माभाववतोऽकर्मकग्रहणेन ग्रहणार्थम्। तच्च सामान्यापेक्षं ज्ञापकम्। शास्त्रेऽकर्मकपदेन ईदृशानामेव ग्रहणमिति। तेन 'मासमास्यते' इत्यादौ भावे लो भवति। न

चेत्यनेन बाधादितिभावः।। निर्यवमतीत्यादौ न दोष इति। ननु उगि दंतादित्यर्थे नापि न दोष इति चेन्नाव्यपदेशिवद् भावेनेयदिति प्रत्ययस्योगिदंतत्वस्यापि सत्त्वादेतस्यापि प्रत्ययाप्रत्यय साधारण्येनात्रापितत्परिभाषा प्रवृत्तेरिति भावः।। विषयोनेतीति।। तत्परिभाषायाः अन्यतरानुबंधोच्चारणे एवप्रवृत्तेरितिभावः।। एतत्सिद्ध्यर्थमिति।। एतस्यापिसिद्ध्यर्थमित्यर्थः।। एवं चावाचेत्यादि सिद्धमितिभावः। ननुर्ङन पोपवाद इत्यस्य ङीपःपरत्वात् बाधक इत्यर्थोस्तु।। एवं च न भाष्य विरोधोऽत आह्। अतऐवति।। टापोऽबाधकत्वादे वेत्यर्थः।। नन्वेतावतापि सूत्रकारमते कथं सिद्धिरत

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्विति। तदविवक्षा हि द्वेधा–तदन्वययोग्य धात्वर्थत्यागात्, सत्येव तस्मिन्नर्थे तत्र सम्बन्धित्वेनान्वयविवक्षणाद्वेति भावः। इदं कैयटानुरोधेन।

(१) परे त्वविवक्षितकर्मणामप्यकर्मकपदेन ग्रहणम्। क्तादीनामविवक्षितकर्मकेभ्यः 'कृतपूर्वी कटम्' इत्यादौ भाष्यकृता कैयटेन चाङ्गीकारात्। लुनातेर्निवृत्तप्रेषणाण्णिचि 'लावयति केदारं देवदत्तः' इत्यादौ केदारस्य कर्मद्वतीयान्तस्य 'णेरणौ' ओणृ (१।३।६१) इत्यत्र कैयटेन प्रयोगाच्च। न चात्रार्थान्तरे वृत्त्याऽकर्मकत्त्वं, न त्वविवक्षयेति वाच्यम्। तत्त्वप्रत्यभिज्ञयाऽर्थान्तरत्वाभावात्। तदुदाहरणं तु स्यदन्ते इत्याद्यर्थकं 'नदी वहति' इत्याद्याकरे स्पष्टम्। 'अधीगर्थ' (२।३।५२) इति सूत्रे कर्मणः शेषत्वविक्षयाऽकर्मकत्वे 'मातुः स्मर्यते' इत्यत्र भावे लस्य भाष्ये उदाहृतत्वाच्च।

यत्तु प्रकृतसूत्रे भाष्ये 'कालकर्मणामुपसङ्ख्यानं कर्त्तव्यम्। न कर्त्तव्यम्। न च केचित्कालभावाध्वभिरकर्मकाः, त एवं विज्ञास्यामः–क्वचिद्ये ऽकर्मका इति' इत्युक्तम्। क्वचिदित्यस्य कालादेः कर्मज्ञाप्रयोजकव्याप्त्यादिरहितेऽर्थे इत्यर्थः। तस्यायं भावः–उक्तरीत्याऽकर्मकपदसामर्थ्यादत्र शास्त्रेऽकर्मकपदस्यावस्थान्तरे कर्मरहिताः इत्यर्थ इति। तादृशत्वञ्च सर्वथा द्रव्यकर्माभावात्तदविवक्षणाद्वेत्युभयविधमपि कृतपूर्वीत्यादिभाष्याद्ग्राह्यं, विनिगमनाविरहाच्च। अत एवाकर्मकाधिकारे श्रुदृश्यादिभ्य आत्मनेपदविधानं सङ्गच्छते। अकर्मकशब्दे च धातुरेवान्यपदार्थः। (१) अर्थभेदेन च शब्दभेदः। कर्मत्वेन कालाद्यतिरिक्तकर्मानन्वय्यर्थकत्वञ्च। तत्त्वमिति बोद्धयम्। 'न च केचित्' इति भाष्येण धातुमात्रस्य कालकर्मकार्थवृत्तित्वमिति दर्शितम्। यद्वा 'यत्कर्म भवति न च भवति तेनाकर्मकाणां, न चैतत्कर्म क्वचिदपि न भवति' इति भाष्योक्त पक्षान्तरेण तत्सामर्थ्याद्

आह्। एवंचेति।। भाष्यमतेरूपत्रयस्यसि हदत्वे चेत्यर्थः।। एक पदात्रृ गित्यस्य सिद्धये इति। त्रृगनपेक्षत्वेनांतरंगत्वात्स्त्री सामान्य विवक्षायां ङीबंत प्रयोगस्व गर्वाचकस्यान्यतरस्यांग्रहणानुवृत्तिं बिनापिसिद्धिरिति भावः।। इष्टस्य उक्तरीत्यासिद्धत्वेनेष्टस्य।। ननु पादयतेः क्विपि स्त्रियां संभवोऽत आह। त्रृचिचेति। अत्रतदंत्विधिरिति।। अत्रतदंतस्यैव विधिरित्यर्थः।। बलात् अनुरोधात्।।

भूतपूर्व षट्त्वाश्रयो निषेध इति ङीन्निषेधाय भूतं जातं पूर्व यत्षट्त्वं स्थानिवद्भावे नैकेन विकल्पेन नान लोपे आश्रयोयस्य सनिषेध इत्यर्थः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यभिचारिद्रव्यकर्मरहितेत्यर्थो बोधितः। एवञ्च मासादिप्रयोगेऽपि तदवस्थायामेवाकर्मकत्वं बोद्धयम्। एतेनात्र सूत्रे 'न च केचित्' इति प्रतीकमुपादाय 'कालादेरविवक्षया तैरकर्मकत्वसम्भवोऽस्त्येव' इत्याशङ्क्य 'अत्यन्ताविद्यमानकर्मकाणामेवात्र शास्त्रेऽकर्मकपदेन ग्रहणम्, अन्यथा पचादीनामविवक्षितकर्मत्वे लादयः स्युः' इति कैयटेनोक्तं, तत्परास्तम्। अतिप्रसङ्गस्त्वनभिधानाद्वारणीय इति वदन्ति।

हृक्रोरन्य (१।४।५३) तत्राभ्यवपूर्वस्य हरतेर्भक्षणार्थत्वाद्विकारार्थ करोतेश्चाकर्मकत्वात्प्राप्ते, अर्थान्तरे चाप्राप्ते उभयत्र विभाषेयम्।

(२) (अभिवादिदृ)। हेतुमण्ण्यन्तस्याभिवादेः (३) दृशिप्रकृतिक ण्यन्तस्य चेत्यर्थः।

अधिशीङ् (१।४।४६)। आधार इत्यनुवर्त्तते। तस्यैव कर्मत्वशक्तिमत्ताऽनेन बोध्यते।

अभिनिविश (१।४।४७)। (१) व्याख्यानाद् 'अभिनि' इति द्वन्द्वे तत्पूर्वो विशिति समासः। अभिनिवेशः–आग्रहः। सन्मार्गविषयकाऽऽग्रहवानित्यर्थः। व्यवस्थितेति। 'परिक्रयण' (१।४।४४) इत्यतोऽन्यतरस्याङ्ग्रहणानुवृत्तेरस्य (२) वैकल्पिकत्वम्। (३) अतिप्रसङ्गस्त्वनभिधानाद्वारणीयः। एतच्च 'एष्वर्थेष्वभिनिविष्टानाम्' इति प्रतीके समर्थसूत्रे कैयटे।

परे त्वेतद्भाष्यप्रयोगाद् (४) 'अभिनिविश्' इत्यानुपूर्व्या अविकृताया यत्र श्रवणं तत्रैवैततसूत्रप्रवृत्तिः, अन्यतरस्याङ्ग्रहणानुवृत्तौ व्यवस्थितविभाषाश्रयणे च न मानमित्याहुः।

उपानु (१।४।४८)। अलुग्विकरणत्वाद् भ्वादेरेव ग्रहणमित्याह– वसतेरिति। भाष्ये 'अश्यर्थस्य न' इत्युक्तम्। 'मशकार्थो धूमः' इतिवदशिनिवृत्त्यर्थस्येति तदर्थः,

---

बहुव्रीहैवैतिवार्तिककार मते आह्।। वचन सामर्थ्यादिति।। वार्तिक प्रत्याख्यान कर्तृमते आह्।। भाष्येत्विति।। ननु गृह्यमाणस्यानोन्नंत बहुव्रीहावनु पसर्जनत्वात् संभवेप्यन्नतं बहुव्रीह्यंतादुवधालोपिनः प्रातिपदिकादित्यर्थादिति बहुदामा ब्राह्मणीत्यादावनो बहुव्रीहेरिति निषेधवदनेन ङीब् वारण्यय बहुव्रीहि विशेषणमे वानु पसर्जना दितिस्यादत आह्। ध्वनितमिति। एवं चात्रप्राति पदिकादि त्यस्य विशेषणत्व मेवेति तदंत विधेरेवाप्रादयाऽति बहुदामे व्यादौ न दोष इति भावः।। इत्यनंतरमिति। एवंच डावुभाभ्या मित्यत्रत्यमन्यतरस्यां ग्रहणं भाष्यमतेपि स्पष्टार्थमेवेति बोध्यम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्फलितमाह–अभुक्त्यर्थस्य नेति। 'उपोष्य रजनीमेकाम्' इत्यादौ 'कालाध्वनोः' (२।३।५) इति द्वितीया। 'ग्रामे उपवसति' इत्यत्र 'ग्रामे वसन् त्रिरात्रमुपवसति' इत्यर्थ इतीदं न कार्यमिति भाष्ये स्पष्टम्।

उपपदविभक्तिमाह– उभेति। उपपदविभक्तीनां सम्बन्धोऽर्थः। विशिष्यानुक्तेः 'षष्ठयपवादत्वाच्च। उभसर्वयोस्तसाविति विग्रहः। उभांशे उभयशब्दनिष्ठं प्रकृतित्वमुभशब्दे आरोप्य तत्प्रकृतिकत्वं षष्ठयर्थः। उभयशब्दसर्वशब्दप्रकृतिकतसन्तयोगे इत्यर्थः। आम्रेडिन्तान्तेष्वित। कृतद्विर्वचनेष्वित्यर्थः। धिक् कृष्णेति। (१) धिगर्थो निन्दा। कृष्णा भक्तसम्बन्धिनी निन्देत्यर्थः। उपर्यादीनां समीपोर्ध्वदिशादिवृत्तित्वमर्थः। अभितः परित इत्यत्र 'पर्यभिभ्यां च' (५।३।६) इति तसिल्। तत्राद्यस्योभयत इत्यर्थोऽन्त्यस्य सर्वत इत्यर्थ इति 'पर्यभिभ्याञ्च' (५।३।६) इत्यत्र भाष्ये।

(२) अन्तराऽन्तरेण (२।३।४)।। अन्तरेणेत्यटाबन्तसाहचर्यादन्त रेत्यटाबन्तम्, अन्तरेत्यतृतीयान्तसाहचर्यादन्तरेणेत्यतृतीयान्तम्। साहचर्यं सादृश्यम्। 'तद्यथा अस्य गोर्द्वितीयेनार्थ इति गौरेवानीयते नाश्वो न गर्दभः' इति दृष्टान्तपरभाष्येण सदृशानामेव प्रयोगे सहायतेत्यर्थस्य प्रतिपादनात्। तेन 'किमनयोरन्तरेण ज्ञातेन' इति (३) सिद्धम्। अन्तरेण– विशेषेणेत्यर्थः। एवञ्चैतयोरव्ययोरेव ग्रहणम्। यद्वा अन्तराशब्दस्य प्रथमैकवचनान्तस्यानभिधानाद् 'अन्तरा इत्यानुपूर्वीकमव्ययमेव प्रयोगेषु दृश्यते इति तत्साहचर्यादन्तरेणेत्यव्ययमेव। तदुक्तं भाष्ये 'अन्तराशब्दोऽयमदृष्टा पचारो निपात एवेति' इति बोद्धयम्। अवधित्वरूपः सम्बन्धो मध्यत्वान्वयी मद्धयार्थान्तराशब्दयोगे द्वितीयार्थः। तस्यैव (१) सम्बन्धत्वेन बोधे षष्ठी। हर्यादिपदात्तु न द्वितीया, 'उपपदविभक्तेः' (प० भा०)

अन्यतरस्यांग्रहणंत्विति।। उपधालोपिनोवेत्यत्र वाग्रहणं त्वित्यर्तः।।

समुदायवादी शंकते।। नचेति।। इत्येव ज्ञाप्यते इति।। अपूर्वत्व विधायक वचन कल्पने गौरवमिति भावः।। ननुतवापि कादित्यत्रक शब्दे इत्संज्ञालोपयोः कशब्दस्य ककारमात्रे लक्षणयावा स्वीकारे गौरवमत आह्।। तावतापीति।। एवंच तवापूर्ववचन कल्पनेऽति गौरवमिति भावः।। इत्वाप्राप्तिरिति।। एवंच तवमतेन यासयोरिति ज्ञापकाब्दप्यरकांगा वयवकानव यवककारात्पूर्वस्यात इत्वमितिवचनं कल्प्यते लक्षणा श्रयणं तुतवसूत्रे ममज्ञाप्य कोटि प्रविष्टमिति भावः। अतएवलक्ष्ये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति न्यायेन तत्र प्रथमाया एव प्राप्तेः। (२) युक्तग्रहणन्तु स्पष्टार्थम्।

अधिकृत्येति। 'बिभाषा कृञि' (१।४।९८) इत्यन्तमिति बोद्धयम्। महासञ्ज्ञाकरणन्त्वन्वर्थत्वाय। कर्म-क्रियां प्रोक्तवन्तः कर्मप्रवचनीयाः। बाहुलकात् कर्तरि भूते अनीयः। तेन सम्प्रति (३) क्रियां न द्योतयन्ति किन्तु क्रियानिरूपितं सम्बन्धविशेषं (४) द्योतयन्ति। क्वचित्सम्बन्धविशेषाद्योतकेऽपि वचनसामर्थ्यात्संज्ञा, यथा–'अधिपरी अनर्थकौ' सुः पूजायाम्' इति च। (५) निपातसञ्ज्ञासमावेशस्त्वस्या अप्युक्तः।

लक्षणे इति। तत्सम्बन्धे लक्ष्यलक्षणभावरूपेऽनुना द्योत्ये इत्यर्थः। अपवाद इति। (६) तद्द्योत्यसम्बन्धस्य क्रयान्वयात्तयोः प्राप्तिः। तेन प्रकृते 'गतिर्गतौ' (८।१।७०) इति निघातो न। द्वितीयार्थो लक्ष्यलक्षणभावः सम्बन्धो, हेतुश्च अनुना द्योत्यते। लक्षणत्वञ्च ज्ञानजनकज्ञानविषयत्वम्। (७) जपज्ञानेन हि कालविशेषविशिष्टा वृष्टिर्ज्ञाप्यते। जपाभिन्नहेतुज्ञानजन्य ज्ञानविषयो वर्षणमिति बोध इत्याह– हेतुभृतेति। पराऽपीति। (1) कर्मप्रवचनीयसञ्ज्ञावकाशो हेतुत्वाविवक्षायां, हेतुतृतीयावकाशो 'धनेन कुलम्' इति, प्रकृते च हेतुत्वविवक्षायां परत्वात्तृतीयाप्राप्तिरिति भावः। पुनःसञ्ज्ञेति। 'लक्षणेत्थंभूत' (१।४।९०) इत्येव सिद्धे पुनःसञ्ज्ञाकरणबोधितपुनर्द्वितीयाविधानसामर्थ्यादित्यर्थः। एतेन सञ्ज्ञाया विजातीयत्वाद्विभक्तिबाधः कर्तुमशक्य इति परास्तम् (२) स्पष्टञ्चेदं भाष्ये।

तृतीयार्थे (१।४।८५)। तृतीयाशब्देन तन्निमित्तशब्दः 'सहयुक्ते' (२।३।१९) इत्यत्रोपात्तो (३) ऽनन्तरत्वात् सहशब्दो लक्ष्यते। तदर्थे (४) साहित्ये द्योत्ये इत्यर्थः। साहित्यरूपः सम्बन्धोऽनुद्योत्यो द्वितीयार्थस्त दाह–नद्येति। क्त इति। कर्तरीति भावः।

लक्षणस्येति सकृदेवप्रवर्तनादेव सार्थक्यमिति। एवं च वर्ण ग्रहण पक्षे नापूर्व वचन कल्पनेतिभावः।। प्रत्ययस्याभावादिति।। समुदाय ग्रहण पक्षेकारिकेत्यादि सिद्धयेऽर्थवत्परिभाषा बाधाय स्थग्रहणमावश्य कमित्यपिगौ रवमितिबोध्यम्।। इत्वभूतनिर्देशेनेति कंठ व्यापार मात्रेण कारोच्चारणे कर्तव्य कंठतालूभयव्यापारेणेच्चारितेत्व भूतनिर्देशेनेत्य गौरवमिति भावः।। भाष्यकृति इति। त्यकंनः प्रतिषेधो नवक्तव्यः यदयं मृदस्ति कन्रितीत्व भूत निर्देशं करोति तज्ज्ञापयत्याचार्यो नैवं जातीय कस्येत्वं भव तीतितैरुक्तम्। तत्र कैयटः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपोऽधिके च (१।४।८७)। चाद्वीने। सप्तमीति। 'यस्मादधिकम्' (२।३।६) (१) इत्यनेनेति भावः। (२) उपखार्यां द्रोण इति यथा। (३) खार्यपेक्षयाऽधिकत्ववान् द्रोण इत्यर्थः। (४) तेनोभयमस्तीति फलति।

इत्थंभूतः–कञ्चित्प्रकारं प्राप्तः, स आख्यायतेऽनेनेति इत्थंभूताख्यानंप्रकारविशेषनिरूपकम्। भागशब्देनार्थाद्यजन्तेन तत्स्वामी उच्यते। वीप्साया द्विरचनविशिष्टवृक्षशब८दबोद्ध्यत्वादाह–विषयभूतेष्विति। वृक्षं प्रतीति। वृक्षस्य व्यापकतासम्बन्धेनान्वयो यद्यपि द्विर्वचनबलादेव, तथापि प्रत्यादिसत्त्वे सोऽपि तन्निर्णायक इति सम्बन्धपरिच्छेदकत्वं बोद्ध्यम्। (५) वृक्षादीनां सेचने कर्मत्वेऽपि तत्वेनाविवक्षायामनेन द्वितीया। (६) किञ्चयद्यत्र कर्मणि द्वितीया स्यात्तदा प्रतिना सामर्थ्याभावात्प्रतिवृक्षमितिसमासमाना पत्तिः। (७) किञ्च प्रत्यादेः (८) क्रियाविशेषकत्वेऽन्वर्थतया कर्मप्रवचनीयसञ्ज्ञाया एवानापत्तिः। (९) अत एव भाष्ये 'किमर्थं पुनरिदमुच्यते? न चोपसर्गसञ्ज्ञाबाधनार्थं, क्रियायोगाभावात्' इत्युक्त्वा 'द्वितीयार्थम्' इति सिद्धान्तितम्। (१०) अत एव 'प्रत्यर्थं शब्दनिवेशः' इत्यादावर्थस्य निवेशन क्रियानिरूपिताधिकरणत्वेऽपि 'अर्थमर्थं प्रति' इति विग्रहो भाष्ये दर्शितः।

वृत्तिविषये प्रतिरेव वीप्साया अपि द्योतक इत्यन्यदित्यास्ताम्। फलान्तरमप्याह–अत्रेति।

यदत्रेति। यद्वस्तु मम भागः स्यादित्यर्थः।

कुतोऽधीति। कुत इत्यपादाने पञ्चमी। द्वितीया तु न। कर्मप्रवचनीयद्योत्यसम्बन्धप्रतियोगित्वरूपस्य कर्मप्रवचनीययुक्तत्वस्याभावात्।

अनेकाचोव्यं जनादेः संज्ञाविषयस्य प्रत्ययस्य नेत्वमित्यर्थः।। प्रक्रियागौरवापेक्षया व्यापाराधिक्येनोच्चारणेऽधिकं शूद्रकिकेत्यत्र निषेधवारणायानेकाच इति कारिकेत्यत्रतद्वारणाय व्यंजनादेरिति पुत्र काम्यिकेत्यत्र तद्वारणाय संज्ञाविषयस्येतिभावः।। अत्रत्यकनिकर्तव्येति।। प्रक्रियालाघवायेत्यादि अत्रय कारोच्चार णायापितालु व्यापारस्यावश्यक त्वेन ने कारोच्चारणे तस्याधिक्य मिति भावः।। स्थानिवत्वं चेति।

स्वानिवदादेश इति स्थानिवत्वं चेत्यर्थः।। अचः पर स्मिन्निति तुं पंचेद्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गतिसञ्ज्ञाबाधादिति। धात्वर्थमात्रद्योतकत्वेन क्रियायोगाद्गतित्वं प्राप्तं, विशेषद्योतकत्वाभावात्त्वनर्थकत्वव्यवहारोऽपीति भावः।

सुसिक्तमिति। सेकगतपूज्यत्वद्योतकः सुः। क्रियापूज्यत्वकृते तत्तत्क्रियाकर्तुः पूज्यत्वे गम्ये एवैषा सञ्ज्ञा। अत एव (१) सुषिक्तं किं तव' इत्यत्र न।

अतिक्रमणम्–उचितादधिकानुष्ठानम्। चात् पूजायामित्यनुकृष्यते अतिदेवानिति। देवेभ्योऽधिको देवपूज्य इति वाऽर्थः। द्वितीये 'कुगति' (२।२।१८) इति समासस्याभावस्तु अनभिधानात्। आद्ये तु प्राप्तिरेव न, 'स्वती पूजायामेव' इत्युक्तेः।।

अपिः पदार्थ (१।४।९६)। पदस्य-अप्रयुज्यमानपदान्तरस्य अर्थःपदार्थः। सर्पिषोऽपीति। अत्र बिन्दुरित्यादेः पदस्यार्थोऽपि द्योत्यः तदुक्तं वृत्तिकृता–'मात्रा बिन्दुः स्तोकमित्यस्यार्थेऽपिर्वर्तते' इति। सम्भावनायां लिङिति। 'उपसंवादाशङ्कयोश्च' (३।४।८) इतिसूत्र भाष्ये पठितेन 'उपसंवादाशङ्कयोर्लिङ' इत्यनेन। तच्च लोकसाधारणमित्यपि तत्रैव भाष्ये स्पष्टम्। तत्राऽऽशङ्का–उत्प्रेक्षा। सम्भावनाऽप्युत्कटकोटिका शङ्कैवेति भावः। कर्मप्रवचनी यत्वात्तद्द्योत्यसम्बन्धमाह–तस्या एवेति। सम्भावनाया एवेत्यर्तः। कर्तृदौर्लभ्यमिति षष्ठीतत्पुरुषः। कर्तृपदं प्रकृताभिप्रायम्। सर्पिषोऽपि पिबेदित्यादौ कर्मदौर्लभ्येत्यादि बोद्ध्यम्। तत्र बिन्दोस्तद्दौर्लभ्यप्रयुक्तदौर्लभ्यसम्बन्धस्य द्योतकोऽपिः सम्बध्यत इति। स्यात्पदवाच्यक्रियायामपिद्योत्यबिन्दोः कर्तृतया, द्योत्योक्तसम्बन्धेन चान्वयादिति भावः। तदाह–अपिशब्दवलेने त्यादि। एवञ्च सर्पिरवयवबिन्दुदौर्लभ्यप्रयुक्तदौर्लभ्यवती तत्कर्तृका (२) सम्भवनाविषयः सत्तेति बोधः। विशिष्टसत्तायाः सम्भवनाविषयत्वबोधे दौर्लभ्यस्यापि सम्भावनाविषयत्वमनुभवसिद्धम्।

इत्यादावावश्यकेन लुकिन स्थानिवतदित्यनेनापि निषिद्धम्।। वार्तिकमते न लुमतेत्युभयोर्निषेधकं भाष्यमतेतु प्रत्यय लक्षणसूत्रस्य नियमार्थ त्वान्नस्थानिवत्वप्राप्तिस्तदाह।। अत एवेति।। प्रत्ययलक्षण सूत्रस्य विधायकत्वादेवेत्यर्थः।। मुख्य वाचीत्रिलिं गइति। देव वाचीतु पुलिंग इति भावः।। घारवंतयकोरित्यत्र समीपे अवयवत्वारोपेण बहुव्रीहिस्तत्फलितमाह्।। धात्वंतयका रेति।। ननु नञ्पूर्वाणामपीति ग्रहणसामर्थ्याद त्रतदंतविधिरेवन। एवंच न ञ्पूर्वाणमपि नाकेवलानांच संग्रहो न त्वन्यपूर्वाणामपि कुतोनेत्यत आह्।। येन विधिरितीति।। ननु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नन्वेवं कर्मप्रवचनीयद्योत्येऽर्थे सर्पिषोऽन्वयेन तस्य कर्मप्रवचनीययुक्त त्वाद् द्वितीया स्यादत आह–द्वितीया त्विति। न त्वपिनेति। बिन्दुना योगेऽप्यपिद्योत्यसम्बन्धे नानन्वय इत्यर्थः। कर्मप्रवचनीयद्योत्यसम्बन्ध प्रतियोगित्वमेव तद्युक्तत्वम्, प्रकृते चापिद्योत्यस्योक्तसम्बन्धस्य विन्दुः प्रतियोगी, न सर्पिरिति भावः। यदा स्पष्टप्रतिपत्तयेऽपिद्योत्यस्यापि बिन्दोः प्रयोगस्तदापि द्वितीयां बाधित्वोपपदविभक्तेरिति (१) प्रथमैव। तत्र कारक विभक्तित्वे क्रियाजनकत्वार्थकविभक्तित्वमिति दिक्।

सञ्ज्ञाफलमाह– अनुपसर्गत्वादिति। अपि स्तुयादिति। पूर्ववल्लिङ्। (२) क्रियाविषयं शक्यत्वादिना सम्भावनमपिद्योत्वम्। प्रकृतेऽवाङ्मनसगोचरं विष्णुमपि स्तुयादिति शक्त्युत्कर्षाविष्करणम्। अत्युक्तिरस म्भाव्यार्थसम्भावनम्। सम्भावनपदस्येदृशार्थकत्वे व्याख्यानमेव शरणम्। विष्णुविषयायाः शक्यत्वसम्भावने चान्यविषया निश्चयेन शक्या कर्तुमिति फलति। शक्त्युत्कर्षमित्यौचित्योत्कषदिरप्युपलक्षणम्। 'अपि वेदान्तपारगं हन्यात' इत्यादौ हननक्रियायां सम्भावनाविषयौचित्योत्कर्षद्योतनात्। सम्भावितौचित्यस्य चानुष्ठानमयुक्तमिति अस्य स्वार्थे तात्पर्याभावो धर्मशास्त्रोक्तः सङ्गच्छते। कामचारः– इच्छया प्रवृत्तिः। स्तुहि, मा वा; यथेष्टं कुर्विति यावत्। 'प्रैषातिसर्ग' (३।३।१६३) इति लिङ्। अपि स्तुयात् वृषलमिति। 'उपसंवाद' (३।४।८) इतिसूत्रपठितवार्तिकेन परेणान्तरङ्गेण च 'गर्हायां लडपि' (३।३।१४२) इति बाधित्वा सम्भावने लिङ्। क्रियागतं गर्ह्यत्वमपिद्योत्यं वृषलपदसमभिव्याहारात् स्तुतेर्गर्ह्यत्वेन तत्कर्तुर्गर्ह्यत्वं फलति। तदेव धिगित्यादिनाऽनूद्यते। अपि सिञ्चेतयादि। अपिद्वयेन मिलितेन समुच्चयद्योतनात्प्रत्येकं सञ्ज्ञायामुभयत्रापि षत्वाभावः।

द्वदशब्दात्स्त्री संज्ञाभूतादपि के ह्रस्वेकांतादपि द्वेदिकेत्यत्र संज्ञाभूतेद्विशब्दाण्णिचिवृद्धौ आयादेशे क्विपिणिलोपेक्विलोपे द्वाशब्दा के ह्रस्वेकांता पिद्विकेत्य त्रोपसर्जनीभूतेच द्विशब्दे तत्संभवोऽत आह्। एषेति निर्देशादिति।। एतच्छब्द सहचरित द्वेतिनिर्देशादित्यर्थः। एतच्छशब्देऽसंभवात्तत्साहचर्येण द्विशब्दयोरपि संज्ञोप सर्जनी भूतयोरग्रहणमि तिभावः।। कांतेपि नित्यमेवेति।। अत्यंत स्वार्थिकानांस्त्री प्रत्ययात्प्रागेवोत्पत्तेरितिभावः।। दोषः स्यादेवेति।। विहित विशेषण्यश्रयणेभानंतु भ्रस्त्रेति सूत्रे भ्रस्त्राग्रहण मेवेतिबोध्यम्।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कालाध्वनो (२।३।५)। अत्यन्तसंयोगो–निरन्तरं सम्बन्धः। स च गुणक्रियाद्रव्यैरभावेन च। तेन मासं भोजनाभावः इत्यादेः संग्रहः। गुणादिभिः कालाध्वनोरत्यन्तसंयोगे प्रत्यासत्त्या कालाध्ववृत्तिभ्यां द्वितीयेत्यर्थः। (३) मासमधीत इति। (१) बुद्धिस्थयावदवयवसम्बन्धरूपा व्याप्तिर्द्वितीयार्थः। 'एकादश्यां रात्रौ जागृयात्' इत्यादावधिकरणत्वविवक्षणान्न द्वितीया।

इति द्वितीया।।

स्वतन्त्रः कर्ता (१।४।५४)।। कारकाधिकारात् (२) क्रियाजनने (३) स्वतन्त्र इत्यर्थस्तदाह–क्रियायामिति। (४) स्वातन्त्र्यञ्च (५) कर्तृप्रत्ययसमभिव्याहारे प्राधानीभूतधात्वर्थाश्रयत्वम्। 'पक्वस्तण्डुलो देवदत्तेन' इत्यत्र फलस्य प्राधान्येऽपि देवदत्तस्य कर्तृत्वसिद्धये 'कर्तृप्रत्ययसमभिव्याहारे' इति। (६) णिचस्तु वाचकत्वमेव, अतस्तत्र ण्यन्तधातु-तत्प्रकृतिधातु एतदुभयवाच्यव्यापारयोस्स्वस्वार्थं प्रति प्राधान्याद् 'देवदत्तेन यज्ञदत्तः पाचयति' इत्यादौ (१) प्रयोज्यव्यापाराश्रयस्यापि कर्तृत्वसिद्धिः। द्योतकत्वे तु नैतत् सिध्येत्। 'कारके' (१।४।२३) इतिसूत्रभाष्यात्स्वक्रियाकारकप्रवर्तकत्वं स्वातन्त्र्यमिति लभ्यते, प्रकृतसूत्रभाष्याच्चेति मञ्जूषायां निरूपितम्।

प्रकृष्टेति। यद्व्यापाराव्यवधानेन क्रयानिष्पत्तिस्तत्प्रकृष्टम्। (१) तमब्ग्रहणं किमिति। कारकाधिकारात्करणल्युडन्तकरणेतिमहासञ्ज्ञया च साधकत्वे लब्धे साधकग्रहणमेव साधकतमार्थं भविष्यतीति प्रश्नः। (२) गङ्गायामिति। अधिकरणमित्यधिकरणल्युडन्तमहासञ्ज्ञयैव सिद्धे आधारग्रहणसामर्थ्यात्सर्वावयवव्याप्त्या य आधारः सोऽधिकरणमित्यर्तः स्यात्। एवञ्चेदं सूत्रं 'तिलेषु तैलम्' इत्यादावेव प्रवर्तेत। न हि

अनभिधान मेवेति।। पत्यादि शब्दानामित्यर्थः।। प्रोक्ताण इति। इञश्चेति विहितस्ये त्यर्थः।। अतएव।। प्रोक्ताणोध्येत्रर्थगत स्त्रीत्वे वर्तमानत्वाभावादेव।। अत्र च तदंत विधिं विनेति।। ज्ञाप्यतदंत विधिं विनेत्यर्थः।। ढांतादि साहचर्यादितः प्रातिपदि कस्यैवात्र ग्रहणत्तद्विषयेणि ग्रहणवतेति निषेध प्रवृत्तेर्ज्ञापकं विना तदंतविधिर्दुलभ इतिभाव.। ननुश्रुतानु मितयोरिति परिभाषाया गृह्यमाण विशेषणतैव युक्तेत्यत आह्। एतदारंभाच्चेति।। अतऐवति।। स्त्रियामित्यस्यङीप् प्रकृति विशेषणत्वादेव।। ननुस्त्री प्रत्ययाधिकारेश्रुतानु मितयेरितयस्य बाधात्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गङ्गा तीरं वा सर्वावयवैर्व्याप्ते। तीरधर्मस्य घोषाधारत्वस्यात्यन्तसामीप्यात्प्रवाहे आरोपोऽत्र बोद्धयः। यदा तु व्यवहितो गङ्गातो घोषः, तदा गङ्गाशब्दस्य तत्तीरे लक्षणा। तमब्ग्रहणेन 'शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयते' इति ज्ञाप्यते इति गौणाधारस्याप्यधिकरणसञ्ज्ञा सिद्ध्यति। एवञ्च गङ्गायां गाव इत्यप्युदाहरणम्। सर्वावयवव्याप्त्यभावेन मुख्याधारत्वाभावात्। गौणमप्याधारत्वादि सप्तम्यादिशक्यमेवेति बोद्ध्यम्। इदं प्रकृतसूत्रे भाष्ये स्पष्टम्।

(१) यदि तु महासञ्ज्ञया तदाक्षेपकरणासमर्थं प्रति आधारादिपदं चरितार्थं, साधकशब्दस्य यद्व्यापारानन्तरमव्यवधानेन फलोत्पादस्तत्र शक्तिः। आधारशब्दस्य चाध्रियते यस्मिन्निति व्युत्पत्त्या कर्तृकर्मणोर्धारणक्रियां

प्रति सर्वावयवव्याप्त्या य आधारस्तत्र शक्तिरित्युच्यते, तदोक्तप्रयोगादि साधनाय कारकप्रकरणे उद्देश्यवाचके पदे स्वरितत्वप्रतिज्ञया गौणाधारादेर्ग्रहणं वाच्यम्। स्वरितेनाधिकं कार्यमित्यर्थात्। तमपा तु प्रकृते तदभावो बोद्धयते एवञ्च व्यवधानेन फलोत्पाद के करणकत्वोपचारेण तृतीयान्तप्रयोगस्यासाधुत्वबोधनं तमप्फलम्। एतत्तमब्वशादेवान्यत्र स्वरितत्वमिति ज्ञायते इति दिक्। स्पष्टञ्चेदं 'स्वरितेन' (१।३।११) इति सूत्रे भाष्ये।

रामेणेति। (१) कर्तृतृतीयायाः कर्तृत्वादिशक्तिमान्, कर्तृक्रिया भावसम्बन्धश्चार्थः। करणतृतीयायाः करणत्वशक्तिमान्, क्रियाकरणभावः सम्बन्धश्चार्यः। तच्छक्तिमत्त्वञ्च व्यापारवत्येव। (२) रामकर्तृकबाणकरणक प्राणवियोगाश्रयो वालीति बोधः।

प्रकृत्यादिभ्य इति। इदं यथायोगं (३) सर्वविभक्त्यपवादः।।

स्त्रियामितीवानुपसर्जनादित्यपि स्त्रीप्रत्यय प्रकृति विशेषणमेव स्यादत् आह्।। अनुपसर्जनादिति चेति।। सामर्थ्यादिति।। तदंत विशेषणत्वे बहुकुरुचरेत्यादौ अपि तदंतस्यानु व सर्जनत्वात् ङीबादिस्यादेवेति व्यावर्त्या लाभादितिभावः अन्यथाज्ञाप कामावे अनन्वयापत्तेरिति एवं च तत्र ग्रहणवतेत्यस्याप्रवृत्तेरितिभावः अन्य थातदंतविध्यभावे कृन्मात्रेति स्पष्टञ्चेदमत्रैव भाष्येतेन पुष्प सुहारीत्यादौणिनीति पूर्वपदाद्युत्तत्वं पुष्प शब्दस्य नेतिभावः।। ननु तद्धितार्थेत्युत्तरपदे समास विधानं तेनसूत्रेणै वोत्तर पदेपरतः समासे कर्तव्ये निष्कृष्यैकार्थी भावाभावेपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(१) दिवः कर्म च (१।४।४३)। चेन सञ्ज्ञयोः समावेशः। तेन दिवः साधकतमस्य शक्तिद्वययोगो बोद्ध्यते। तेन 'अक्षैर्देवयते' इत्यत्र (२) तृतीया परत्वात्, (३) कर्मत्वाच्चाकर्मत्वप्रयुक्तपरस्मैपदाभावः। अत्र विप्रतिषेधशास्त्रबलात्तृतीयैव शक्तिद्वयबोधिका। (४) यदाऽक्षाणां फलाश्रयत्वसमानाधिकरणकर्मत्वविवक्षा तदा अक्षान्दीव्यति' इत्यादि (५) साधु। '(६) अक्षाणां देविता' इत्यादौ तृतीयातः परत्वात्कृद्योगलक्षणाषष्ठी। (७) मनसा देवः' इत्यादौ (८) हेतुतृतीयान्तेन पचाद्यजन्तदेवशब्दस्य (९) समासः। न च शक्तिद्वयस्त्रीकारे (१०) ऽत्र कर्मणि लकारे करणत्वशक्तेरनुक्तत्वेन तृतीयापत्तिरिति वाच्यम्। 'अपादानमुत्तराणि' इत्यस्योदाहरणे 'गां दोग्धि' इत्यादौ तत्र कर्मणि लकारे पञ्चम्यापत्तिवारणायैकद्रव्यगतानेकशक्तिमद्ध्ये एकस्या अभिहितत्वे परस्या अपि तद्वत् प्रकाशेनाक्षतेः। एकैव शक्तिः सञ्ज्ञाद्वयोपयोगिनीति तु चिन्त्यम्। कर्मादिपदानां कर्मत्वादितत्तच्छक्तिरूपेण बोधकतया तयो (११) र्भेदस्यैवौचित्यादिति मञ्जूषायां विस्तरः।

फलप्राप्तिरिति। तस्याञ्च सत्यां प्रयोजनाभावादेव न क्रियाप्रवृत्तिरिति फलप्राप्तिशब्देन तत्पूर्वकस्त्याग उच्यते। त्यागस्य च फलप्राप्तिर्व्यङ्ग्येत्यन्यत्र विस्तरः। नायात इति। अनेन फलाप्राप्तिरेव स्फुटमुच्यते।।

(१) सहयुक्ते (२।३।१९)। 'पृथग्विनानानाभिः' (२।३।३२) इतिवत् 'सहेन' इत्येव सिद्धे युक्तग्रहणं शब्दविशेषानादरेणार्थयोगे भवत्वित्यर्थमित्याह– सहोर्थेनेति। अत एव क्वचित् शब्दयोगं विनापि भवति। तदाह–विनापीति। न्यायसिद्धेऽर्थे लिङ्गमप्याह–वृद्ध इति। सहार्थः साहित्यं, तच्च स्वसमभिव्याहृतक्रियादिसमानकालिकतत्क्रियादिमत्त्वं,

---

ज्ञापकमित्येवास्तु अन्यथा तवाप्यनिर्वाहे अकृते अतआह्।। निचेति व्यपदेशिवद्भावेनेति ससहायेपि तस्य निजौचत्वार एकाच इति भाष्यात् प्रवृत्तिरिति तदाशयः।। केवलादपीति।। स्त्रीभ्य इतिसूत्रे फलाभावात्प्रातिदिकस्यासंबंध इति भावः।। एतदधिकारादेवेति। अत्रसूत्रे एतदधिकारादेवेत्यर्थः।। वहुकुरुचरापि शक्तेत्यादेत्यादेस्तु टिदित्यादीनां षष्ठ्यंतस्य स्वीकारेण विशेष्याभावेन तदंत विधेरेवाभावात् प्राति पदिकान्नङीप् टिदाद्यर्थगते तद्बाच्ये स्त्रीत्वे द्योत्येतच्च प्रातिपदिकं प्रत्यासत्या ठिदाद्यवयवा कारांत इत्यर्थे नगृह्यमाण विशेषणतयापि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्वचित्समानदेश क्रियावत्त्वम्। अत एव माषवापोत्तरं तत्रैव क्षेत्रे तिलवापे 'तिलैः सह माषान्वपति' इति भवति। यद्यपि 'पुत्रेण सहागतः' इत्यादौ आगमनक्रियाकर्तृत्वादेव पुत्रात्तृतीया सिद्धा; तथापि 'पुत्रेण सह स्थूलः' इत्यादि अस्य मुख्यमुदा हरणमिति भाष्ये स्पष्टम्।

(१) अङ्गेन– अवयवेन। इदं सन्निधानलब्धम्। अङ्गिनः–अवयविनः। सूत्रे अङ्गशब्दोऽर्शाद्यजन्तो व्याख्यानादिति भावः। अक्ष्णा काण इति। यद्यप्यक्ष्येव काणं तथाप्यवयवधर्मस्य समुदाये आरोपाच्छरीरे तदवच्छिन्ने च व्यवहारो निरूढ इति ध्येयम्। यद्यपि काणशब्दोऽक्षिगतविकारवाचक एव तथापि 'द्वौ विप्रौ' इतिवदक्ष्णेति प्रयोगस्य साधुत्वम्। इद्वशरीत्येद्वशानां साधुत्वे चेदमेव मानम्। षष्ठ्यपवादोऽयमित्याह– अक्षिसम्बन्धीति। अङ्गविकारः किमिति। अङ्गग्रहणप्रयोजनप्रश्नः। अक्षि काणमिति। प्रथमां बाधित्वाऽ (२) त्रैव स्यात्। लेशतोऽपि दर्शनसामर्थ्यहीनत्वं काणत्वम्।

इत्थंशब्दः प्रकारमात्रपरः। प्राप्त्यर्थाद् भुवः कर्तरि क्तः। कर्मविभक्यन्तेत्थंशब्देन भूतशब्दस्य समासः। लक्षणशब्दः करणसाधनः। तस्य कर्मषष्ठयन्तेनेत्थम्भूतशब्देन समास (३) इत्याह– कञ्चिदित्यादि। जटा भिरिति। यद्यपि ताभिस्तापसो ज्ञात इत्यर्थे ज्ञानक्रियायां करणत्वादिदं सिद्धं, तथापि करणत्वाविवक्षायां लक्ष्यलक्षणभावमात्रविवक्षायां तृतीयार्थ मिदम्। (१) इत्थम्भूतस्य यत्र लक्षणवाचकात्पृथगुपस्थितिरेव तत्रैवानेन तृतीया। तेन 'कमण्डलुपाणि छात्रमद्राक्षीत्' इत्यादौ कमण्डलुपदान्न तृतीया। न चोत्पन्नायास्तृतीयायाः 'सुपो धातु' (२।४।७१) इति लुगिति वाच्यम्। कृते समासे तस्या उत्पत्त्या समासरूपप्रातिपदिकानवयवत्वादिति कैयटे स्पष्टम्। कमण्डलुः पाणौ यस्येति बहुव्रीहिः।

सिद्धेरिति भावः।। ज्ञापकादिति।। एतस्य च समाधानत्रयेपि अन्वयोबोध्यः।।

अतएवार्थवत्सूत्रोक्तार्थवत्वलक्षणस्यैतत्सूत्र स्थभाष्येणन विरोध इति भावः।। असहाये एवेति। अतएवव्यपदेशिवदेकस्मिन्निति भाष्ये पठ्यते निजौचत्वार इतित्वेकदेशिवचनमिति भावः।। अदोषाच्वेरिति चेनसमुदायात् ङीप्यवयव कारा शब्दस्य स्त्रीभ्यइत्यत्रप्रातिपदिकादित्यस्यासंबंधे भानाभावेन तत्संबंधादप्राति पदिकत्त्वाददोष इत्यपि बोध्यम्।। अन्यथाकारी शब्दात्तूढगुत्पत्तौ तद्वैयर्थमिति'' अत्रानुपसर्जनाधिकार वैयर्थमित्यर्थः।। पूर्वोक्त समाधाने भाष्यसमतिमाह।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परे तु–कमण्डलुपाणिशब्दादत्र तृतीयापत्तिः, कमण्डलुयुक्तपाणिरूपस्य कमण्डलुपाणित्वस्य लक्षणत्वेन तस्यैव तद्वाचकत्वात्। तदुक्तम् 'अनुर्लक्षणे' (१।४।८५) इति सूत्रे भाष्ये 'सकृदसौ कमण्डलुपाणिश्छात्रो दृष्टस्तस्य तदेव लक्षणं भवति' इति। देवेत्यस्य कमण्डलुपाणित्वमेवेत्यर्तः। कमण्डलोर्लक्षणत्वे हि स एवेति वदेत्। किञ्च तन्मद्ध्यपतितन्यायेन तद्विशिष्टस्य प्रातिपदिकत्वेन तस्य तदनवयवत्वोक्तेरनौचित्येन लुको दुर्वारत्वम्। अत एव 'नरम्मन्यः' इत्यादौ इजन्तस्योत्तरपदपरत्वाय पूर्वं सुपो लुकि उत्पन्नस्यामः 'सुपो धातु' (१।४।७१) इदि लुक् अम्विधिसामर्थ्येन वारित 'इच एकाचोऽम्' (६।३।८६) इति सूत्रे भाष्ये (१) इत्याहुः।।

सञ्ज्ञोऽन्यतर (२।३।२२)।। दैवादिकस्य जनेर्न ग्रहणं तस्याकर्मकत्वात् तदाह–जानातेरिति। कर्मत्वशक्तिरेवात्र तृतीयाऽर्थः।।

हेतौ (२।३।२३)।। हेतुरिह कारणं न शास्त्रीयः। तस्य कर्तृसञ्ज्ञाया अपि सत्त्वेन कर्तृतृतीययैव सिद्धेः। ननु लौकिकहेतुरपि करणमित्यत आह–द्रव्यादीति। आदिना गुणक्रिये। साधारणमिति। तज्जनकेऽपि वर्तते इत्यर्थः। करणं तु क्रियाजनकमेवेति भावः वैषम्यान्तरमाह– निर्व्यापारेति। करणन्तु व्यापारवदेवेति भावः। (२) एवञ्च करणत्वशक्तेर्भिन्नैव हेतुत्वशक्तिरत्र तृतीयार्थ इति तात्पर्यम्। स्फुटप्रतिपत्तये करणे वैलक्षण्यमाह– करणत्वन्त्विति। हेतुहेतुमद्भाव एव तृतीयार्थः। दण्डे व्यापारसत्त्वेऽपि क्रियाजनकत्वाभावान्न करणत्वम्। पुण्ये क्रियाजनकत्वेऽपि निर्व्यापारत्वान्न तत्त्वम्। फलमपीहेति। इह–एतत्सूत्रोदाहणे। क्वचित्फलमपि हेतुत्वेन विवक्ष्यत इत्यर्थः। तस्यापि स्वज्ञानद्वाराजनकत्वात्। एतच्च 'प्रत्ययः' (३।१।१) इत्यादिसूत्रेषु कैयटे स्पष्टम्।

एतदवेति। अवयवात् कारशब्दात् उत्पत्तौ ङीबुत्पत्तौ ननुतद्धितार्थेत्युत्तरपदे समासविधानस्य विशेषायेक्षत्वेनापि कौंभकारेयस्यैव सिद्धौवत्रानुपसर्जनाधिकारो व्यर्थ एवेत्यत आह्।। येनविधिरिति सूत्रेचेति। ननुसर्वादिसूत्रेभाष्येऽनुप सर्जनाधिकारः प्रत्याख्यात एवेत्यत आह्।। यत्त्विति।। नन्वेवमपि पाक्षिकोवक्ष्यमाणेत्यत्र दोष एवेत्यत आह्।। उतऔदितीति ङिच्चपिन्नेति ब्रूतादित्यत्रेभावस्तेनेति भावः।। पिच्चङिन्नेति तेना ब्रवीदित्यत्र गुण इति भावः।। नङिदादेशानामिति।। लकारोयोङित्तदादेशा नामित्यर्थः।। तेन (मायामित्यादौ न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ननु 'अलं श्रमेण' इत्यादौ क्रियावाचकपदाभावात्क्रियाया अप्रतीत्या कथं करणत्वमत आह– गम्यमानापीति। श्रमेणेत्यादिपदजबोधविषयापीत्यर्थः। न तूच्चार्यमाणतद्वाचकपदजबोधविषयैवेति भावः। अलंशब्दो निषेधार्थस्तदाह– साद्वयं नास्तीति। ननु साद्वयमित्यर्थज्ञानेऽपि तस्य श्रमेणेति नामार्थत्वेन न क्रियात्वमत आह– इहेति। (१) स्ववाच्यक्रियां प्रति स्वस्य करणत्वमित्यर्थः। स्पष्टं चेदम् 'इग्यणः' (१।१।४५) इति सूत्रे 'प्रविश' 'पिण्डीम्' इति 'वाक्यार्थे वाक्यैकदेशप्रयोगः' इत्यादिना भाष्ये इति मञ्जूषायां विस्तरः।

अशिष्टेति। अशिष्टानां सङ्कीर्णाचाराणां यो व्यवहारः क्रिया तद्बोधकपदप्रयोगे प्रत्यासत्त्या यत्सम्बन्धेन व्यवहारस्य सङ्कीर्णाचारत्वं तद्वाचकाच्चतुर्थ्यर्थे तृतीयेत्यर्थः। दास्येति। दासीसम्प्रदानकं रतिफलकं दानमि (२) ति बोधः।

इति तृतीया।।

दानस्येति। (१) दाधात्वर्थस्येत्यर्थः। इदमुपलक्षणं (२) क्रियामात्रस्य। कर्मणेति। सम्बन्धुमिति शेषः। अभिप्रैति– इच्छति। कर्मणा सम्बन्धश्च स्वत्वादिरूपः। सम्प्रदानत्वशक्तिमान् सम्प्रदानचतुर्थ्यर्थः। स एवोद्देश्य इत्युच्यते। क्रियाकारकभावः सम्बन्धश्च तदर्थः। विप्रसम्प्रदानकं दानमिति बोधः। कर्मणेति किम्? तदभावे हि कर्मणोऽप्युद्देश्यतयाऽन्तरङ्गत्वात्तस्यैव सञ्ज्ञा स्यात्। (३) कर्मसञ्ज्ञया तु पर्यायो भविष्यति। यं संग्रहणं किम्? तदभावे क्रियाकर्मणा योऽभिप्रैति ब्राह्मणादिस्तस्यैव स्यात्। कर्तृसञ्ज्ञा त्वकर्मकविषये सावकाशा। न च कर्तुः कर्तृत्वाभावे कथं गोः कर्मत्वम्। कर्मसञ्ज्ञायां

दोष इति भावः।। सानु बंधकादेशानामिति। सानुबंधकस्थानि का देशानामित्यर्थः।। इत्यादिनेति।। आदिनाचिनवमित्यादौ दूषणसंग्रहः।। गाङादेशस्यङकारस्तु गाङ्कुटेत्यत्र विशेषणार्थ मिति ज्ञापकामावश्च लिङ्सिचाविति झलादिलिङं कित्वंतु सृजिदृशोरित्यमभावायेति न ज्ञापकमुक्तेर्थे इति तत्त्वम्।। नन्वेवं गर्हिषीष्टौषीष्टेत्यादौ स्थानिवद् भावेनङि त्वात् गुणो नस्यादिति चेन्न।

उश्चेति झलादिलिङः कित्वविधान सामर्थ्याद्यदागमपरिभाषया अनित्यत्वात्व ज्ञापनेन ङित्वस्य सीयुड्विशिष्टेऽ भावेन निषेधाप्रवृत्तेरदोषात्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्तृग्रहणस्य (४) स्वतन्त्रोपलक्षणत्वात्। अत एव 'सार्थाद्धीयते' इत्यक्ष कर्तुरपादानत्वेऽपि कर्मणि लकारः सिद्धः। ननु कर्म णेत्युक्तावकर्मकक्रियोद्देश्यस्य सम्प्रदानत्वं न स्यादत आह– क्रिययेति। कर्मरहितक्रिययेत्यर्थः। सकर्मकेषु कर्मसञ्ज्ञा अस्या बाधिकेत्याशयेनाह– (१) पत्ये शेते इति। न च दानादीनां तदर्थत्वात्तादर्थ्यचतुर्थ्यैव सिद्धे किमनया सञ्ज्ञयेति वाच्यम्। (२) 'दाशग्रोघ्नौ सम्प्रदाने' (३।४।७३) इत्यर्थत्वात्, (३) तत्सम्प्रदानकं दानमिति बोधार्थं तदावश्यकत्वाच्च। अत एव तादर्थ्यचतुर्थ्यां दानकर्मणो गवादेः सम्प्रदानार्थत्वेऽपि दानक्रियायास्तदर्थ त्वाभावेन चतुर्थ्यन्तार्थस्य (४) दानक्रियान्वयानायत्तिरिरिति हेलाराजः। (५) तादर्थ्यचतुर्थ्यैव सिद्धे 'चतुर्थी सम्प्रदाने' (२।३।१३) इति सूत्रं 'रुच्यर्थानाम्' (१।४।३३) इत्यादिविषये चतुर्थ्यर्थमिति भाष्ये स्पष्टम्। पशुनेति। कर्म तृतीयाऽर्थः। सम्प्रदानं द्वितीयाऽर्थः। एतच्च दानार्थकयजधातुविषयम्। पूजार्थत्वे तु पशोः करणत्वं न्यायसिद्धम्। इदं छान्दसमिति कैयटः।

अन्यकर्तृक इति। अभिलष्यतिकर्त्रपेक्षयाऽन्यदभिलष्यतिकर्म, तत्कर्तृक इत्यर्थः। (१) यत्किञ्चिद्विषयकप्रीत्यनुकूलव्यापाराश्रयोऽभिलष्यतिकर्ता। हरिर्भक्तिमभिलष्यतीति प्रत्ययात्। यत्किञ्चिन्निष्ठप्रीत्यनुकूलः प्रीतिव्यधिकरणो यो व्यापारस्तदाश्रयो रोचतेः कर्ता, इति अभिलषते रुच्यर्थ त्वाभावान्न तद्योगे सम्प्रदानत्वमिति भावः। तदाह– हरिनिष्ठेति। पथीति। न च प्रीयमाणपदाभावे सूत्रस्य क्रियाजनकत्वमात्रविवक्षायां सञ्ज्ञान्तराप्राप्तिविषये चारितार्थ्येन परत्वादधिकरणसञ्ज्ञया बाधसिद्धधेः कथमेतदिति वाच्यम्। (२) 'देवदत्तं रोचते इत्यस्याप्यापत्तेरित्याशयात्। तत्सत्त्वे त्वस्य कर्मसञ्ज्ञापवादत्वान्न दोषः।

गोपी स्मरादिति। श्लाघादेः (१) स्तुत्यादिना बोधनमर्थः। स्मरादिति हेतौ पञ्चमी।

स्पष्टंचेदमिति।। निरनुबंधकस्य ढस्यस्त्रियामसंभवात् सानुबंधकस्य ग्रहणमित्यर्थः पुनरत्रग्रहणमिति।। ननु बाव्हादिष्वनयोः पाठेन ङिषोविकल्पात् पक्षे वयसीत्यनेन ङीप् सिद्धौ अत्र तयोर्ग्रहणं व्यर्थ मितिचेन्न।। पुंयोग विवक्षायामपि पक्षे ङीबर्थ तद्ग्रहणसार्थक्यादितिभावः।। नन्वन पत्याधिकाराभावाद्नपत्याधिकारस्था दित्ययुक्तमत आह्।। अपत्येति।। उपरंजकत येति प्रत्यय षकारस्य मध्यमस्थासंभवा दनुवादक तयेत्यर्थः।। तत्साहचर्यात्।। तद्विधायक सूत्रोपात्तत्वात्।। नेत्वमिति।। फिनो नित्करण सामर्थ्यात्तदादेश विधायक सूत्रोपात्त ...नामित्संज्ञानेति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

स्तुत्याऽऽत्मानुरागं कृष्णं बोधयतीत्यर्थः। स्तुतिश्च कृष्णस्यैव। एवं ह्नुत्या स्वानुरागं कृष्णं बोधयतीत्यर्थः। गोपी स्मरादिति श्लावादेः स्तुलदिना बोधकमर्थः स्मरदिति हेतौ पञ्चमी स्तुव्याऽऽत्मानुरागं बोधयतीत्यर्थः। एवं हनुत्या स्वानुरागं कृष्णं बोधयतीत्यर्थ ह्नुतिः सजत्वदिभ्य तुतिः कृष्णस्यैव। एवं स्थित्या शपथेन च कृष्णं स्वानुरागं बोधयतीत्यर्तः। यद्वा, स्तुत्या ह्नुत्या च कृष्णं स्वसखीजनं बोधयति, स्थित्या शपथेन च कृष्णं तं बोधयतीत्यर्थः। ज्ञीप्स्यमानपदे) ण्यर्थकर्मणः प्रकृत्यर्थकर्मणश्च ग्रहणादित्यन्यत्र विस्तरः। स्तुत्यादिमात्रार्थत्वे 'कृष्णं श्लाघते' कृष्णं ह्नुते' इत्येव। ज्ञीप्स्यमान इति ज्ञापनवचनाज्ज्ञपेः सन्नन्तात्कर्मणि शानच्।

धारेरु (१।४।३५)। 'धृङ् अवस्थाने' इति ण्यन्तस्य ग्रहणं व्याख्यानात्। भक्तायेति। ध्रियमाणं स्वरूपेणावतिष्ठमानं मोक्षं हरिः प्रयुङ्क्ते इत्यर्तः। प्रेरणाया भक्तासत्त्वेऽभावात्तस्यापि प्रेरणाजनकत्वेन कारकत्वं बोद्धयम्। (३) अवश्यदेयत्वेन मोक्षेऽपि ऋणत्वं बोद्धयम्।

प्रकर्षविवक्षायान्त्विति। फलाश्रयत्वेन विवक्षायामित्यर्थः। परत्वादिति। इदं सूत्रं विषयतया क्रियाजनकत्वमात्रविवक्षायां चरितार्थमिति भावः। पुष्पसम्प्रदानिकेच्छेति चतुर्थीसभभिव्याहारे बोधः।

कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च।

इत्यत्र क्रियासम्बन्धित्वमात्रविवक्षया षष्ठी। अन्ये तु 'भोगाय' इत्यध्याहृत्य कान्तायेति विभक्तिविपरिणामेन वा व्याख्येयमित्याहुः। स्पृहधातुरिच्छामात्रवाची (१)

सामान्यापेक्ष ज्ञापनादिति भावः।।

नन्वेतल्लिंगादादेशैरित्संज्ञा न बाध्यते लोपस्तु वाध्यतएवेति दोष एवेत्यत आह्।। आदिति।। आदिनात्रकृते रीयङित्यस्यसंग्रहः तत्रहि यङित्येवसिद्धेरियङ् करणं धातु प्रकृतिक प्रत्ययानां नैते आदेशा इति ज्ञापनादितिभावः।। नन्वेतद्ज्ञापकात्पाणि न्युच्चरित प्रत्ययानां नादेशा इत्येवस्यादत आह्। उणादिनामिति।। अन्यथाऽदेशानामुपदेश सन्नियोगशिष्ट कार्यात् पूर्वं प्रवृत्यभावे तद्वाधकत्वमेव ङीप्बाधकत्वमेव।। नन्वत इत्यस्य चाब्विधायकेऽनुवृत्तेर नंतर ष्फस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

फलावच्छिन्नेच्छावाची च। आद्ये सम्प्रदानत्वम्, अन्त्ये कर्मत्वम्। ईप्सितत्वं धात्वर्थजन्यफलाश्रयत्वं, न तु फलस्य धात्वर्थत्वपर्यन्तमाग्रहः। कर्मसञ्ज्ञायान्तु यथा तल्लाभस्तथोक्तम्।

(२) भार्यामीर्ष्यतीति। नात्र भार्यां प्रति कोपः, किं तु परैर्दृश्यमानां तां न सहते इत्येव। एवञ्चात्र न कोपजन्येर्ष्या किन्त्वन्यपुरुषदर्शनजन्येति भावः। हरेः १) क्रोधद्रोहाभ्यामिच्छाविषयत्वाभावात् 'क्रिययायम्' (का० वा०) इत्यनेन न सिद्धिः। 'न ह्यकुपितः क्रुद्ध्यति' इति भाष्येण (२) प्ररूढकोप एव क्रोध इति कुपेस्तदर्थत्वाभावेन न तद्योगे इदम्। 'कुप्यति कस्मैचित्' इत्याद्यसाध्वेव।

उपसृष्टयोरित्यस्यार्थमाह–सोपसर्गयोरिति। वैयाकरणनिकाये एष एतदर्थकत्वेन प्रसिद्धः। पूर्वसूत्रापवादोऽयम्।

यदीय इति। यदीयशुभाशुभसम्बन्धीत्यर्तः। राधीक्ष्योः प्रश्नविषयार्थपर्यालोचनमर्थः। कर्मणः प्रश्नविषयस्य धात्वर्थेनोपसङ्ग्रहादकर्मकावेतौ। अत एव श्यन्। 'राधोऽकर्मकादेव' इत्युक्तेः। कृष्णसम्प्रदानकं शुभाशुभपर्यालोचनमर्थः।

प्रत्याङ्भ्याम् (१।४।४०) व्याख्यानात्प्रत्येकं निमित्तत्वमित्याशयेनोदाहरति–गां प्रतिशृणेतीति। अनयोः प्रवर्तनापूर्वकाभ्युपगमोऽर्थः। तत्र विप्रस्य कर्तृप्रयोजकत्वेन हेतुत्वे प्राप्ते वचनम्।।

अनुप्रति (१।४।४१)। अनुप्रतीति भिन्नं पदं लुप्तपञ्चम्यन्तम्। गृण इति श्नान्तानुकरणात् षष्ठी। शंसितुः शंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनमनयोरर्थः।

चापवादत्वाद्बाधेपरत्वान् ङीपोपितेन वाधेङीप् विधायकेऽत इत्यधिकारात् च्चाबंतात् ङीपो प्राप्तेः ष्फस्य निखकाशत्वेन बाधा च्चावंतात् स्फोन भविष्यतीति सर्वत्रग्रहणं व्यर्थमेवस्या दत आह्।। अपितु कृत इति प्रामादिक इति। परत्वात् ङीपोङीषा बाधादिति भावः।।

त्रीणि वयांसीति पितारक्षति कौमारे भर्तारक्षति यौवने पुत्रस्तु स्थविरेभावेन स्त्रीस्वातंत्र्यमर्ह तीत्युक्तेरिति भावः।। चत्वारिवेति, आद्येवयसिनाधीतं द्वितीयेनार्जितं धनं, तृतीये नतपस्तप्तं चतुर्थेकिं करिष्यतीत्युक्तेरिति भावः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्व्यव्यापारस्येति। शंसनस्येत्यर्थः। प्रोत्साहयतीति। ओथामेत्यादिशब्दैरिति शेषः। शतायेति। करणस्यैव सम्प्रदानत्वेन भानमत्र। शतव्यापारश्च दानरूप एवेति बोद्धयम्।

तादर्थ्ये। (३) तादर्थ्यमुपकार्योपकारकभावरूपः सम्बन्धः। यदा तादर्थ्यस्य सम्बन्धत्वेन भानं तदा षष्ठी–गुरोरिदं गुवर्थमिति अत्र भाष्ये स्पष्टम्। क्लृपीति सप्तमी। अर्थग्रहणञ्चात्र। सम्पत्तिः-उत्पत्तिः क्लृप्त्यर्थकधातुयोगे उत्पद्यमानेऽर्थे वर्तमानाच्चतुर्थीत्यर्थः। हितयोगे च। चात्सुखयोगेऽपि।

(१) क्रियार्थोप (२।३।१४)।। क्रिया अर्थः फलं यस्य तत् क्रियार्थम्। तेन स्ववाचकं लक्ष्यते। क्रियाफलकार्थवाचकमुपपदं यस्येत्यर्थः। सोऽर्थश्च प्रत्यासत्त्या क्रियारूप एव। स्थानिशब्दश्च अप्रयुज्यमानवाची वैयाकरणानां निकाये प्रसिद्धः। क्रियार्थक्रियोपपदत्वञ्च तुमुनादेरेवेत्याह– क्रियार्था क्रियेति। 'फलेभ्यो याति' इत्यादौ फलकर्मकाऽऽहरणफलकं यानमिति बोधः। यथा वाक्यार्थे वाक्यैकदेशप्रयोगस्थले 'प्रविश पिण्डीम्' इत्यादौ तस्यैव पदस्य सम्पूर्णवाक्यार्थशक्तया तथाऽस्य समुदायस्याहरणघटितोक्तार्थे शक्तिरेतच्छास्त्रबलात्। स्थानिन इत्युक्तेस्तत्प्रयोगे नेति बोद्धयम्। अयमेवार्थाद्ध्याहारः।

नमस्कुर्मो नृसिंहायेति। 'नमःस्वस्ति' (२।३।१६) इत्यनेन तु न सिद्धिः, उपपदविभक्तेरिति न्यायेन द्वितीयापत्तेः। पिण्डीमित्यादावप्रयुज्वमानभक्षणक्रियाकर्मणि चतुर्थीवारणाय (२) क्रियार्थोपपदस्येति।

तुमर्थात् (२।३।१५)। 'तुम्' शब्देन तदर्थो लक्ष्यते, सोऽर्थो यस्येत्यर्तः। इति सूत्रेणेति। भावे ये प्रत्यया वक्ष्यन्ते ते क्रियार्थक्रियायामुपपदे भविष्यंति स्युरिति तदर्थः। यागायेति। (३)

आदेशत्वमिति।। ननुप्रत्ययत्वमित्यर्थः।। नन्वनोऽनर्थकत्वात्कथमन उपधेव्यस्य प्रवृत्तिरत आह्।। अन्ग्रहणमिति।। भैषजशदे पितत्रेति। औषध इत्यर्थः।। सपूर्वायाः प्रथमायाः प्रत्ययस्थाद्यक पूर्वाया इत्यादौ पूर्वशब्दस्य पूर्ववृत्तिवाचिनोपि दर्शनादाह्। अवयव वाचीति।। व्यारव्यानादिति। पूर्वशब्दस्यप्रथमावये रूढे भाष्ये कथंतुषजकस्य पत्नीति व्यस्ते प्रश्नादत एवपूर्वोभ्यासः सपूर्वा इत्यत्रावयववाचित्वं सपूर्वाया इत्यादौत्वसंभवात् पूर्ववृत्तिवाचित्वं पूर्वशब्दस्येतिभावः।। ननुव्यप देशिवद् भावेन संभवोऽत आह् अव्यभिचाराच्चेति।। एवं चात्र सपूर्वग्रहण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यागफलकं यानमित्यर्थः।

उपपदविभक्तेरिति। वाचनिकमेवेदं भाष्ये पठितमिति केचित्। क्रियाकारकयोः सम्बन्धोऽन्तरङ्गः, उपपदार्थेन तु यत्किञ्चित्क्रिया कारकभावमूलकः सम्बन्धे इति तन्निमित्ता विभक्तिर्बहिरङ्गेति 'अन्तराऽन्तरेण' (२।३।४) इति सूत्रे कैयटः। अत्राहुः–एवं सति 'नमस्यति देवान्' इत्यादौ नमःपदार्थे क्रियाकारकभावेनैवान्वये परत्वाच्चतुर्थीमाशङ्क्यानेन वारणस्य (१) भाष्योक्तस्यासङ्गतिः। (२) एतेन प्रधानत्वात् क्रियायास्तत्सम्बन्ध निमित्तकत्वेन बलवत्त्वमित्यपि (३) परास्तम्। कारकविभक्तित्वं च क्रिया जनकत्वसमानाधिकरणकर्त्रादिषट्कान्यतमार्थत्वम्। अन्याभिहितानुद्भूतकर्त्रा द्यन्यतमार्थत्वं प्रथमाया अपि। 'अभिहिते प्रथमा' (का० वा०) इतिवार्तिकस्वारस्यात्। अतः प्रथमापि कारकविभक्तिरिति बोद्धयम्। द्वावित्यादौ द्वित्वादेरिव 'देवदत्तः पचति' इत्यादौ उभाभ्यामेकस्यैव कर्तृत्वस्य वोध इति न तद्बोधावृत्तिः।

नमस्करोति देवानिति। उत्कृष्टनिष्ठो यः (१) स्वनिष्ठापकृष्टत्वबोधः तदनुकूलव्यापाररूप–(२) नमस्कारफलस्य तादृशबोधस्याश्रयतया देवानां कर्मत्वम्। स्वशब्देन प्रयोक्ता। नमःशब्दस्य साक्षात्प्रभृतिषु ऊर्यादिषु वा पाठेन गतित्वात्सत्वम्। (३) एकस्या एवोपपदविभक्तित्वे कारकविभक्तित्वे चायं न्याय इति तु न युक्तम्। 'नमस्यति देवान्' इत्यत्रैतत्परिभाषोपन्या सपरभाष्यविरोधात्, सहयुक्ते' (२।३।१९) इत्यादिसूत्रस्थभाष्यविरोधाच्च।

अलमितीति। अलमित्यनेन पर्याप्त्यर्थानां ग्रहणे व्याख्यानादित्यर्तः। तत्र ज्ञापकमप्याह–तस्मै प्रेति। षठ्या अपि साधुत्वं बीजं–स एषामिति।

सामर्थ्याद व्यपदेशिवद्भावा प्रवृत्तिरितिभावः। प्रौढ्येति।। अनुपसर्जनाधि कारेकचारीबंत प्रकृतिक कर्तृक्विपोऽनभिधानादिति भावः।। ननुतज्ज्ञापकात्स्त्री प्रत्यय प्रवृत्ति योग्यानांतादृशानामनभिधानेप्यस्याभि धानेन बाधकमत आह्। दृढ़मानाभावादिति।। तादृ शविशेषाणेक्षत्वे मानाभावादितयर्थः।। अतएव भाष्ये तुषजकस्यपत्नीत्यत्रोप चारमुक्तं नत्वेतदितिभावः।। ननुप्रातिपदिकादित्यनुवृत्तस्य षष्ठय् ततयाविपरिणामेन पतिशब्दस्य तद्विशेषण त्वातदंतविधावटयनुपसर्जना दिति गृह्यमाण पतिशब्द विशेषण मेव स्यादितिदृढ़ पत्नीत्यादौनादेशोनस्यादिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आशीर्विवक्षायामिति। (४) आशीर्विषयत्वविवक्षायामित्यर्थः। स्वस्त्यर्थः कुशलं मङ्गलं वा। स्वस्तियोगे चतुर्थ्या अवकाशः-स्वस्ति जाल्मायास्तीति तत्त्वकथनम्। कुशलार्थैराशिषीत्यस्यावकाशः स्वस्तिभिन्नाः कुशलार्थाः। स्वस्तिशब्दो (५)ऽनव्ययमपि।

प्रतिगृह्णामि ते धेनुं कुटुम्बार्थे विशेषतः।

स्वस्तिर्भवतु मे नित्यं सुखञ्चानुत्तमं तथा।।

इति भविष्योत्तरे प्रयोगात्।

मन्यकर्मणि (२।३।१७)। तिरस्कार इति। अनादरो न आदराभावमात्रम्, अपि तु नञोऽधर्मादाविव प्रतिपक्षवाचित्वात्तिरस्कार इति भावः। तत्रानादर इति मन्यकर्मविशेषणं तद्द्योतकं यत्कर्मेत्यर्थः। तेन युष्मच्छब्दाच्चतुर्थी न। तिरस्कारश्च व्याख्यानादपकृष्टनिरूपितोपमेयत्व स्याप्यभावरूप उपमेयेऽत्र गृह्यते न त्वपकृष्टसादृश्यरूपः। तत्प्रतीतिश्च नञ्समभिव्याहारे एव। तृणतुल्यमपि न मन्ये इत्यर्थः। 'तृणाय मत्त्वा रघुनन्दनोऽपि' इत्यादौ नञोऽध्याहारः, तदाद–न त्वां तृणमिति। कर्माऽत्र चतुर्थ्यर्थः। श्यनेति। न तु यका, व्याख्यानादिति भावः। श्यंस्तूपलक्षणम्। तेन लिडादावपि भवति। तत् ध्वनयन्नाह– तानादिकयोगे नेति। नौकाकेति। भाष्ये येषु प्राणिषु नेष्यते ते नावादयो भविष्यन्तीति येष्विति बहुवचनेन वृत्त्युदाहरणबलेन चैष्वेवानिष्टनिर्णय इति भावः।

गत्यर्थकर्म (२।३।१२)। कर्मात्रापि चतुर्थ्यर्थः। गत्यर्थेति किम्? ओदनं पचति। कर्मणीति किम्? अश्वेन गच्छति। चेष्टायां किमिति। धात्वर्थस्य क्रियारूपत्वात् प्रश्नः। शरीरक्रियाया एव ग्रहणमित्युत्तरम्। पन्थानमिति। अध्वशब्दोऽर्थपरो व्याख्यानादिति भावः।

स्वपूर्वस्येतिकिमितीति प्रश्नोनुचितोऽत आह्। अवयववाचीति।। प्रश्न इति सपूर्वायाइत्यादाविवपूर्व वृत्ति वाच्येवास्त्विति भावः।। गवां प्रतिरिति।। विद्यमानपूर्व वृत्तिक पतिशब्दांत प्रातिपदिकस्यानुपसर्जनस्य नादेश इत्यर्थे ऽत्रापि गवामित्यस्य पूर्वस्य सत्वात् प्रतिशब्दस्य व्यपदेशिवद् भावेन पतिशब्दांत प्रातिपदिकत्वाच्चनादेशप्रसंगः स्यादिति भावः।। तेनचेति।। निपातेनेत्यर्थः।। ननुनित्यंसपत्न्यादिष्वित्येवार्द्ध मात्रालाघवेन सिद्धेनङ्कारङीष्विशिष्टोच्चारणं व्यर्थमत आह्।। किंचेति। अतएव विशिष्टोच्चारणेन रूढ्यर्थकस्यैव नादेशविधानादेव।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अधिष्ठित इति। शब्दप्रयोगसमकालिकगन्तृव्यापारजन्यफलाश्रय इत्यर्थः। अध्वपदेन गन्तृव्याप्तोऽर्थ उच्यते, तेन गन्तृयुक्तस्त्रियां 'स्त्रियं गच्छति' इत्यादौ न। स्पष्टञ्चेदं भाष्ये उत्पथादिति। उत्पथं सन्त्यज्येत्यर्थः। इष्यत इति। न त्वाक्रान्त इत्यर्थः। उत्पथेनेति। गन्तुमशक्त इति शेषः।

इति चतुर्थी।।

(१) ध्रुवमपायेऽपा (१।४।२४)।। ध्रुवं स्थिरम्। अपायो विभाग जनको व्यापारः, तदनाश्रयमिति यावत्। विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव, किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिकल्पितोऽपि। 'माथुराः पाटलिपुत्रकेभ्य आढयतराः' इत्यादौ बुद्धिकल्पितापायाश्रयेणैव भाष्ये पञ्चमीसाधनात्। कर्तृवारणाय ध्रुवमिति। अन्यथा कर्तृसञ्ज्ञाया इयमपवादः स्यात्। अपायविषये यत् कारकं तद्रूपक्रियाजनकं तदपादानमि त्यर्थसम्भवात्। कर्तृसञ्ज्ञा तु पचत्यादियोगे चरितार्था। हरिरप्याह– अपाये यदुदासीनञ्चलं वा यदि वाऽचलम्।

ध्रुवमेवातदावेशात्तदपादानमुच्यते।। इति।

स्पष्टञ्चेदं कैयटादौ। भाष्यानुसारिणस्तु एवं हि 'त्रस्तादश्वात्पतितः'– 'धावतः पतितः' इत्यादौ ध्रुवत्वाभावादपादानत्वं न स्यादित्याशङ्क्य 'अध्रौव्यस्याविवक्षितत्वमत्र, यतः सतोऽप्यविवक्षा भवति' इति समाहितं भाष्ये, तदसङ्गतं स्यात्। त्वदुक्ताध्रुवत्वस्य पतधात्वर्थव्यापाराश्रयत्व स्यात्रासत्त्वेन सतोऽध्रौव्यस्याविवक्षेत्यस्यासङ्गतेः। सिद्धान्तेऽपिं त्वदुक्तध्रुव पदार्थकथनमेवोचितमिति तदसङ्गतिश्च। लोकसिद्धातिरिक्तार्थे ध्रुवपदस्य

सपतिरित्येव विशिष्टोच्चारणेन रुढिविशेष एव सपत्नीशब्द स्यसाधुत्वबाधनात् पूर्वसूत्रेव्यत्र ना देशो नेति भावः।। न तथा प्रयोग इष्यत इति।। विशिष्टोच्चारणेरूढ़ि विशेष एव सपत्नीशब्दस्य साधुत्वान्वाख्याना दितिभावः।। सौमइति।। एवं चतथाणाठोन युक्त इति भावः।।

बोध्यमिति।। एवं चासंभव एवापवादत्वमितिवार्तितक मतेसत्यपि संभवे बाधकत्वमिति भाष्यमतेतु ङीप्रकारयोरत्रा प्यनुवृत्तिर्बोध्या सन्निधानाद्व्याख्यानाच्चेति। अभेदान्वयः।। चोहेतौ।। उत्तरार्थमिति।। सौरिति।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शक्तिकल्पने गौरवञ्च। अतदावेशादित्यस्य हरिकारिकायां तदावेशाविवक्षणादित्यर्तः। (१) तस्मादपाये गतिविशेषे सति यद् ध्रुव (२) मवधिभावोपगमाश्रयत्वे सति (३) तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयं तदपादानमिति सूत्रार्थः। त्रासादेरवधित्वोपयोगित्वाश्रयणेन शङ्का, 'वृक्षात्पर्णम्' इत्यादौ तस्यासत्त्वान्न तदुपयोगित्वं तस्य, प्रकृते विद्यमानस्यापि तस्याविवक्षिततत्वान्न तदुपयोगित्वं तस्येस्युत्तरम्। 'ध्रुवमपाये' (१।४।२४) इति तु 'वृक्षस्य पर्णं पतति, इत्यादौ वस्तुतस्तस्य पर्णद्वारा पातजनकत्वात्प्राप्तापादानत्ववारणाय। एवञ्चापाये इति कारके इत्यस्य क्रियाजनकत्वेन विवक्षिते इत्यर्थे तात्पर्यग्राहकं बोद्धयम्। ध्रुवग्रहणन्तु कारकान्तराणामिवापादानस्यावधिभावो पगमातिरिक्तव्यापाराभावबोधनाय (४) इत्याहुः।

अपादानत्वशक्तिश्च प्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणेति अपादानसमभिव्याहारे विभागोऽपि धात्वर्थ इति बोद्धयम्। एवञ्च 'वृक्षात्पतति' इत्यादौ तदपादानकविभागपूर्वकः संयोगः पर्णवृत्तिरिति बोधः। 'वृक्षाद् भूमि पतति' इत्यादौ वृक्षापादनकविभागपूर्वकसंयोगानुकूलो व्यापार इति बोधः 'परस्परस्मान्मेषावपसरतः' इत्यादौ मेषपदोपात्तयोरेव क्रियाश्रयत्वात्कर्तृत्वं परस्परपदोपात्तयोरेव विभागाश्रयत्वादपादानत्वम्। मेषपदोपात्ते तदविवक्षणात्। प्रयोगानुसारित्वाद्विवक्षाया;। विभागपूर्वकं पृष्ठतो गमनमपसरणम्। 'आत्मानमात्मना' इत्यादावन्तः करणाद्युपाधिकृतभेदवत् शब्दरूपोपाधिकृतभेदाग्रहणे मानाभावात्। शब्दरूपोपाधि कृतभेदाग्रहणे मानाभावात्। शब्दालिङ्गितार्थभानस्यैव सत्त्वाच्चेत्यन्यत्र विस्तरः।

यत्त्वपसरत इति सृधातुना गतिद्वयस्याप्युपादानादेकनिष्ठाङ्गतिं प्रति

ङ्याताच्छैसोरीय इत्यादौ रेफलोपाभावार्थं तु न।। अणोलोपस्थानिवत्वेन रेफस्योपधात्वाभावादिति भावः।। ङ्यमिति निर्देशादिति।। अन्यथा मात्रालाघवेन ङावित्येव वदेदिति भावः।। नक्षेत्रेति नक्षत्र ग्रहणफलंतु तिष्य पुष्यशब्दाभ्यां माणवक वाचका भ्यां भावार्थेणि तैष्यः पौष्य इत्येवेति बोध्यम्।।

नीलेत्येवेति। लाक्षणिकत्वादस्य न ङीषीतिभावः।। न रूपादीनां ग्रहणमिति। तेन विस्पष्ट रूपमित्यादौवि स्पष्टादीनि गुणवचनेष्विति पूर्व पद प्रकृति स्वरोनेतिभावः।। ननु जातिवाचकत्वादेव रूपादीनां व्यावृत्तिरत आह्।। जाति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इतरस्यापादानत्वमविरुद्धमिति, तन्न। वस्तुतस्तन्निष्ठव्यापारयोर्भेदेऽपि सृधातुना निवृत्तभेदस्यैवापायस्योपादानादुभयोरपि तत्क्रियाश्रयत्वेन परत्वात्कर्तृत्वापत्तेश्च। अत एवैकशेषसूत्रे भाष्ये उक्तं 'न वै तिङन्तान्येकशेषारम्भं प्रयोजयन्ति क्रियाया एकत्वात्' इति। 'धनुषा विद्धयति' इत्यत्र निःसरच्छरजन्यवेधार्थत्वाव्द्यधेरपादानत्वकरणत्वोभयप्राप्तौ परत्वात् करणत्वं बोद्धयम्।

ग्रामादायातीति। आयातेर्विभागपूर्वकोत्तरसंयोगानुकूलो व्यापारोऽर्थः। 'वृक्षं त्यजति' इत्यादौ व्यापारव्यधिकरणविभागस्यैव धात्वर्थत्वेन कर्मसञ्ज्ञयाऽपादानत्वस्य बाधः। स्पन्देस्तु न विभागोऽर्थ इति 'वृक्षे स्पन्दते' इत्येव। चलतेस्त्वासनाच्चलित इति प्रयोगादस्त्येव विभागार्थत्वम्। 'सार्थाद्हीयते' इत्यत्र सार्थस्य धात्वर्थप्रधानव्यापाराश्रयत्वेऽपि 'अपादाने चाहीयरुहोः' (५।४।४५) इति ज्ञापकात्कर्मप्रत्ययान्तहीधातुप्रयोगेऽपादानत्वम्। कर्मसञ्ज्ञायाञ्च कर्तृपदं स्वतन्त्रोपलक्षणमिति कर्मणि लकारः। सार्थेन त्यज्यते देवदत्त इत्यर्थः।

धावत इति। क्रियाविशिष्टस्याप्यश्वस्य प्रकृतधातू पात्तगत्यनावेशात्, धावनस्याविवक्षणाद्वा ध्रुवत्वं बोद्धयम्।

जुगुप्सेत्यादि। (१) जुगुप्सादीनां यद्विषयकत्वेन विवक्षा तदुपादानम्। तस्यैव विषयस्य क्रियाजनकत्वरूपकारकत्वेनाविवक्षायां सम्बन्धित्वेन च विवक्षायां 'पापस्य जुगुप्सते' इति षष्ठी भवत्येव सत्यभिधाने। एवमुत्तरसूत्रेषवपि बोद्धयम्। एषां धातूनां स्वार्थपूर्वकबौद्धविश्लेषजनकनिवृत्तिलक्षणया सूत्रेणैव सिद्धयेदं वार्त्तिकमुत्तरसूत्राणि च प्रत्याख्येयानीति (१) स्पष्टं भाष्ये।

शब्देनेति। एवं तत्र ग्रहणादिति।। गुणवचन पर्युदासे इत्यर्थः।। तेन शुक्लादीनां गुणवचन शब्दे न ग्रहणाच्छुक्लत्वमित्यादौत्वत लोरित्यादौतु पुंवत्वं विस्पष्ट शुक्ल इत्यादौ पूर्वपद प्रकृतिस्वरश्च न भवतीति भावः।। नन्वेवं कठादिशब्दानांगुणवचन संज्ञास्यात्।। एवंच कटीत्वमित्यादौ पुंवत्वाद्यापत्तिरत आह्।।

कठादिति बहुविशेषणानां वैयर्थादिति सत्वे निविशते पैतीत्यनेन पृथग्जातिषु दृश्यत इत्यने नैव वा जातेर्वारणे सिद्ददेऽन्यतरवैयर्थ्यम्।। किंच क्रियावारकेणैव जातेर्वारणे सिद्धे उभयोरपि वैयर्थ्यम्। अपिच गुण जातित्वमित्येव सिद्धे इतर सर्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(२) भयं भी (३) त्राणन्त्रास्तदाह– भयार्थानामिति। हेतुतृतीयाऽपवादोऽयम्। अरण्ये इति। भयाद्यर्थानां योगे कारक्रमपादानमित्यर्थेऽविशेषात्सर्वसञ्ज्ञापवादः स्यादिति भावः।।

(४) पराजे (१।४।२६)। असोढो ग्लानिविषयः। एवञ्च पराजेर कर्मकत्वे उदाहरणत्वम्, तदाह– ग्लायतीत्यर्थे इति। अभिभवतीति। तिरस्कारानुकूलो व्यापारो धात्वर्थ इति भावः।

प्रवृत्तिविघात इति। (५) भक्षणसंयोगादिजनकव्यापाराभावा नुकूलो व्यापार इत्यर्थः। ईप्सित इति। वारणार्थधात्वर्थफलाश्रय इत्यर्थः। उदाहरणे च तद्धात्वर्थव्यापारजन्यसंयोगादिरूप फलाश्रयत्वाद्यवानामपादानत्वम्। ईप्सित इत्यनेन प्रधानाप्रधानान्यतरव्यापाराश्रयमात्रस्याक्षेपः, कर्मलक्षणे तु तमब्ग्रहणात् (६) प्रकृतधात्वर्थप्रधानभूतव्यापारप्रयोज्य प्रकृतधात्वर्थफलाश्रयस्य ग्रहणमिति भावः।

अन्तर्धौ (१।४।२८)। अन्तर्द्धिरन्यकर्तृकस्वकर्मकदर्शनाभावानुकूलो व्यवहितदेशस्थितिरूपस्तद्घटकं यत्कर्तृकदर्शनाभावमिच्छति। तदपादानमित्यर्थस्तत्फलितमाह– व्यवधाने सतीति। येनेत्यत्र 'कर्तृकर्मणोः' (२।३।६५) इति षष्ठी न, सौत्रत्वात्। आत्मन इति प्रत्यासत्तिलब्धम्। 'मातुर्निलीयते' इत्यादावाक्षेपलभ्येच्छा बोद्धया। चोराननिति। चोरकर्मकदर्श नेच्छाऽभाव इति शाब्दोऽर्थः। स च चोरकर्तृकस्वदर्शनाभावायेति प्राप्ति;। इच्छामात्रस्याक्षेपलभ्यत्वे इव विशिष्टस्याक्षेपलभ्यत्वेऽपि स्यादिति भाः। प्रकृते नान्तर्द्धिरिति न दोषः। येनेत्यस्याभावे हि स्वकर्मकदर्शनाभावं य इच्छति। इत्यर्थे कतुरिव स्यादतस्तत्। इच्छतिग्रहणं किमिति। अन्तर्धौ सति यत्कर्तृकदर्शनस्याभावस्तदपादानमित्यर्थोऽस्त्विति भावः। सत्यपीति। अदर्शनेच्छया

वैयर्थ्यं चेत्यलम्।। ननु यावदपेक्षितं तावदेवास्तु इतरस्य सर्वस्य प्रवंचार्थत्वात् संख्या शब्दस्य गुणवचन त्वमिष्ट मेवेत्यत आह्। भाष्य कृतेति अभिमान इति।। सूर्वतोक्तिन्नर्थत्वादित्यस्य प्राप्तेरिदं प्रत्युदाहरणं न युक्तमिति भावस्तदाह्।। शुक्लेति।। नन्वत्र संयोगोपधत्वादेव ङीषभावे सिद्धेऽत आह्।। आदिति।। आदिनाश्वेतादि संग्रहः।। ङीबितित्युद्युलंतत्वात्प्राप्तेत्यादिः ''पुंस्येवेति'' नतुस्त्रियामित्यर्थः प्रसिद्ध इति। वाचकत्वेन स्थित इत्यर्थः। केचिदिति। भाष्यतत्त्वविद इत्यर्थः।। ननु तादृश पालकशब्दस्यानर्थक्यमत आह्।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदनुकूलव्यापारकरणे दैववशाद्दर्शने सत्यपीत्यर्थः। अन्यथा यत्र दर्शनाभाव एव तत्रैव स्यादिति भावः।

नियमेति। उपयोगशब्दस्य तत्रैव रूढेः। नियमो ब्रह्मचर्यादिः। नटस्येति। नटजन्यं श्रवणमिति बोधात् कारकत्वम्। नियमपूर्वकविद्या वक्तृत्वाभावन्नेत्युत्तरम्।

जनिक (१।४।३०)। प्रकृतिरुपादानकारणं, ब्रह्म च मायाशवलञ्ज गदुपादानकारणम्। वृत्तौ हेतुपदमप्युपादानकारणपरमेवेति बोद्धयम्। (१) विभाषेत्येव सिद्धे इदमपादानत्वेन बोधनार्थम्। तत्र हि 'गुणेऽस्त्रियाम्' इति प्रायिकम्, बाहुलकं प्रकृतेस्तनुदृष्टेरिति (१) वार्त्तिकप्रयोगात्।

(२) भुवः। (१।४।३१)। प्रभवनं प्रथमप्रकाशः प्रग्रहणात्। तदधिकरणमपादानमित्यर्थः। 'प्रभवो जलमूले स्यात् जन्महेतौ पराक्रमे। ज्ञानस्य चादिमस्थाने' इति विश्वः। प्रकाशत इत्यस्य योगे तु न, प्रथम प्रकाशार्थत्वाभावात्। तदाह– तत्र प्रकाशते इत्यर्थे इति।

ल्यब्लोप इति। ल्यबन्तशब्दाज्ञाने इत्यर्थः। कर्मणीति। प्रत्यासत्त्या ल्यबन्तधात्वर्थस्येति भावः। प्रासादादिति। 'फलेभ्यो याति' इत्यत्रेव बोधप्रक्रिया। 'आजघ्ने विषमविलोचनस्य वक्षः' इत्यत्र कर्मणः शेषत्वविवक्षया षष्ठी। वक्ष इत्यस्य प्राप्येति शेषः। गम्यमानाऽपीति। विशिष्य तद्वाचकपदानुपात्ताऽपीत्यर्थः। 'कस्मात् 'त्वम्' इत्यादौ 'फलेभ्यो याति' इत्यत्रेव बोधप्रक्रिया।

अन्येत्यर्थेति। तदर्थश्च भेदवान्। अत एव 'घटात् भिन्नः' इत्यादिसिद्धिः।

वस्तुत इति अत्रत्यभाष्यादिति। गोपालिकेत्युदाहरण परभाष्यादित्यर्थः। उपदमतिङिति सूत्रभाष्याच्चेति।। तत्रहि कुम्भकार इत्यत्र सष्ठी समासादुपपदसमासो विप्रतिषेधेनेत्युक्तम्। नन्वेतद्भाष्येण यथा कथंचित्कारकत्वमादाय प्रवृत्तौ न मानं नकच्छे पिवतीत्यर्थकस्यकच्छस्यपिवतीतिकच्छपीत्यस्याधिकरणस्य शेषत्वविवक्षयोपपदोदाहरणत्वपरभाष्यविरोधश्चेत्यत आह। यद्वेति। अनित्यत्वादिति। गोपालिकेति प्रकृत सूत्रस्थ भाष्याच्च जनिकर्तुरितिनिर्देशाच्चेत्यर्थः। तद्योग एवेति।। महत्त्व दोष लिपियोगे एवलक्षणतयातत्तद्वाचत्वे एवेत्यर्थः।। एषां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परे तु 'ध्रुवम्' (१।४।२४) इति सूत्रे अपायशब्देन भेदस्यापि ग्रहणम्। 'पञ्चमी विभक्ते' (२।३।४२) इत्यत्र विभागार्थकविभक्तपदेन भेदस्य व्याख्यानात्। 'भिदिर् विदारणे' (धा० सू०) इत्यत्र भेदज्ञानविषयत्वमपि विदारणम्। एकत्वेन गृहीतस्य तथा बोधे बुद्धिविदारणस्य तत्रापि सत्त्वात्। अत एव 'घटात् भेदः' इति सिद्धं, तद्योगेऽप्यपादानत्वात् तस्यैव सम्बन्धत्वेन विवक्षायाङ्घटीयो भेद त्यपि। अन्यशब्दार्थस्याक्रियात्वात् तद्योगे एतद्विधानम्। अत एव घटः पटो नेत्यादौ न पञ्चमी। नञो भेदवदर्थकत्वेऽपि अक्रियात्वात्। घटादेक इत्याद्यसाध्वेव। अत एवेतरग्रहणञ्चरितार्थम्। अत एव भाष्येऽर्थग्रहणं नोक्तमि (३) त्याहुः।

आराद् दूरसमीपयोः। एतद्योगे 'दूरान्तिकार्थैः' (२।३।३४) इति प्राप्तम्। नन्वयं देशवाची न दिक्शब्दः, अत आह–दिशि दृष्ट इति। शब्दग्रहणादिति भावः। ते च रूढ्या दिग्विशेषवाचकाः पूर्वादय एव गृह्यन्ते, न ऐन्द्रीककुबादयो व्याख्यानात्। अवयववाचीति। तद्वाचिपूर्वादियोगेऽवयविवाचकान्नेत्यर्थः। ज्ञापकस्य सजातीयापेक्षत्वात्। अत एवास्मादयं पूर्वो भागः कायस्येति सिद्धम्। अवयवे पूर्वत्वम् अवयवान्तरापेक्षया प्रथमकालोत्पत्तिकत्वेन बोद्धयम्। अञ्चूत्तरपदस्येति। दिक्शब्दसाहचर्येण तस्य दिग्वाचकस्यैव ग्रहणं, तेन 'सध्र्यङ्' इत्याद्यर्थं तन्नेति भावः। बाधितुमिति। परत्वात् प्राप्तमित्यादिः। यदि तु 'षष्ठ्यतसर्थः' (२।३।३०) इत्यत्र प्रत्ययग्रहणात्तस्य श्रूयमाणप्रत्यय एव प्रवृत्तिस्तदेदं माऽस्त्विति तत्त्वमिति भाष्ये स्पष्टम्। दक्षिणा ग्रामादिति। दक्षिणस्यां दिशीत्यर्थे दक्षिणादाच्' (५।३।३६) 'आहि च दूरे' (५।३।३७) इत्याजाही। षष्ट्यतसर्थे त्यस्यापवादः।

प्रभृतियोग इति। प्रभृत्यर्थयोग इत्यर्थः। 'अपादाने पञ्चमी' (२।३।२८) इति सूत्रे

हिमारण्य यवनानाम् वहवइति। लक्षणया यवन संबंधिलिप्यर्थकाद् यवनशब्दात् स्त्रीत्वेद्योत्येङीषित्यन्ये। हिमारण्य यवेभ्यस्तु महत्व दोषविशिष्टार्थकेभ्यः स्त्रीत्वे द्योत्येङीषितिविशेषः। नियमार्थमिति पूर्वपदात्परस्थस्थयदि षत्वं तर्हिगवादिभ्यः परस्यैवेति नियमार्थमित्यर्थः। विशेषश्च तत्रैवदर्शितः। पाणिगृहीतीभार्या चेत् यस्याहि यथाकथं चित् पाणिर्गृह्यते पाणि गृहीता साभवतीति आदिना कर गृहीती त्यादि संग्रहः।। नन्वावश्यकेतिणिनिनापि पुत्रादिनी त्यस्य सिद्धिरत आह्। अकृतीति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'यतश्चाध्वकलनिर्माणं ततः पञ्चमी, कार्तिक्या आग्रहायणी मासे' इति वार्त्तिकप्रत्याख्यानाय 'इदमत्र योगक्तव्यं सन्न प्रयुज्यते कार्तिक्याः प्रभृत्याग्रहायणी मासे' इति भाष्येण 'प्रभृतिशब्दाभावेऽपि तदर्थसत्तामात्रेण पञ्चमी' इत्यर्थेकेन 'प्रभृत्यर्थयोगे पञ्चमी' इतिवचनसत्वस्य भगवता बोधितत्वात्। अन्यथा प्रभृतिपदाभावे पञ्चम्यर्थ वचनस्यावश्यकत्वेन तत्प्रत्याख्यानासङ्गतिरिति भावः। एवञ्च तदर्थकारभ्यशब्दयोगेऽपि पञ्चमी। यथा 'अवीचिमारभ्य मेरुपृष्ठपर्यन्तं भूलोको मेरुपृष्ठादारभ्य ध्रुवपर्यन्तङ्ग्रहनक्षत्रतारागणचित्रितोऽन्तरिक्षलोकः' इति पातञ्जलभाष्य प्रयोगे। प्रभृतीत्यस्य चावधिमादायेत्यर्थः। आरभ्येत्यस्यैतदर्थकताऽपि। अवधौ पञ्चम्यन्तार्थस्याभेदेनान्वयः। तद्विशेषणत्वेऽपि न द्वितीया। प्रभृत्यर्थयोगे पञ्चमीति भाष्यकृद्बोधितवचनात्। आरभ्येत्यस्य गृहीत्वेत्यर्थेन 'अवीचिमारभ्ये'त्यादौ द्वितीया।

वस्तुतोऽवधित्वं तस्य समभिव्याहृतपदार्थनिरूपितं गम्यमानक्रियापेक्ष मित्यपादानत्वादेवात्र पञ्चमी सिद्धा। (१) कार्तिकीतो विभक्ते–अत एव कार्तिक्यवधिके आग्रहायणीघटिते मासे कार्तिकीमादाय गते आग्रहायणीति बोधः। भवात्प्रभृति आरभ्य वेत्यत्र भवकालाद्विभक्ते-अत एव भवावधिके मरणान्ते काले भवकालमादाय 'हरिः सेव्यः' इति बोधः। एवमन्यत्राप्यूह्यमित्यलं विस्तरेण।

ज्ञापकादिति। पञ्चम्यन्तेन समासविधानाज्ज्ञापकादित्यर्तः। अयं भावः– परस्परसाहचर्यात्तत्रापपरी वर्जनार्थौ कर्मप्रवचनीयावेव। तद्योगे 'षञ्चम्यपाङ्परिभिः' (२।३।१०) इति वचनात्, लक्षणप्रतिपदोक्तपरिभाषयाऽप परिनिमित्तकसुबन्तस्यैव ग्रहणाच्च पञ्चम्यैव सिद्धः समासः–तत्साहचर्यादुक्त परिभाषया चाञ्वूत्तरपदेनापि

स्पष्टार्थ मिति। अनिष्टवारण रूपस्येष्टोर्थो यस्यतदित्यर्थः।। किं तदनिष्ठमिति शंकते। किंचेति उत्तरमाह्।। तदभाव इति।। स्वांगात्।। ननूत्तरत्रोष्ठादेः संयोगोपधेनियमार्थ त्वादत्रासंयोगोपधादिति व्यर्थमितिचेन्न। मयुपधविषयक नियमस्यापि संभवेन सुजिह्वेत्यादावतिव्याप्तेः।। सुमुखी त्यादावव्याप्तेश्च। तदंतादितीति।। तदंतादेवेतीत्यर्थः।। उपसर्जनेतीति। कृत्रिमोपसर्जनेत्यर्थः। इदमेवेति। इदमस्वांगपूर्व पदादित्यस्य प्रसज्य प्रतिषेधपक्षे। पर्युदासेतु सुभुजेति प्रत्युदाहरणं बोध्यम्। तत्राहि भुजेर्घञर्थेकेसुशब्देन गति समास इतिभावः।। एतेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तन्निमित्तपञ्चम्यैव सिद्धः समासः इति व्यर्थ तत् बहिःशब्देन पञ्चम्यन्तेन समासविधानद्वारा तद्योगे पञ्चम्या अपि (२) ज्ञापनार्थमिति। इदम् 'अपपरिबहिः (२।१।१२) इति सूत्रे भाष्ये स्पष्टम्। पञ्चमीति। (३) सापीत्यर्थः। तेन करस्य करभो बहिरिति सिद्धम्।

प्रतिनिधि (१।४।९२)। यस्मादिति पञ्चम्यर्थः सम्बन्धः। अस्मादेव निपातनात् षष्ठ्यर्थे पञ्चमी। प्रतिनिधिप्रतिदानशब्दौ कर्मकि-भावल्युडन्तौ। प्रतिनिधिप्रतिदाने यत्सम्बन्धिनी ततः कर्मप्रवचनीययुक्तात्पञ्चमीत्यर्थः। प्रतिनिधिः सदृशः, प्रतिदानम् दत्ततुल्यमूल्यस्य वस्तुनः प्रत्यर्पणम्। कर्तृवर्जितमिति। कर्तृसञ्ज्ञारहितमित्यर्थः। ऋणत्वं वस्तुसन्निमित्तं न तु तृतीयावाच्यकोटिनिविष्टम्। हेतुभूतमिति। तेन करणत्वविवक्षायान्तृतीयैवेति भावः।

विभाषा गुणे (२।३।२५)। योगविभागादिति। 'बाहुलकं प्रकृतेस्तनुदृष्टेः' इत्युक्तवार्तिकप्रयोगाद् 'गुणेऽस्त्रियाम्; इति प्रायिकमित्यन्ये। धूमादिति। (४) धूमपदं स्वज्ञानेऽग्निमत्पदं स्वज्ञानविषये लाक्षणिकं बोद्ध्यम्। समुच्चयार्थमिति। स्पष्टञ्चेदं भाष्ये। एतेनान्यतरस्य आमङ्गीकार इत्यर्थकं (१) पदद्वयमेतदित्यपास्तम्। विकल्पविषयेऽप्यर्थासङ्गतेश्च।

परे तु द्वितीयासमुच्चयो न फलम्। विना वातं विना वर्षमित्यादौ ऋतेशब्दयोग इव 'ततोऽन्यत्रापि दृश्यते' (का० वा०) इत्यनेन द्वितीयासिद्धेः। अत एव भाष्ये द्वितीयासमुच्चयो नोक्तः। 'पञ्चम्या अधिकारे द्वितीयाषष्ठीविषये (२) प्रतिषेधो वक्तव्यः, दक्षिणेन ग्रामं दक्षिणतो ग्रामस्य' इति प्रकृतसूत्रस्थ भाष्येण 'एनपा द्वितीया' (२।३।३१) इति सूत्रं 'षष्ठ्यतसर्थ' (२।३।३०) इत्यतः प्रागिति च सूचितम्। अन्यथा (३) सौत्रक्रमत्यागे, (४) न्यायविपरीतपूर्वनिपातकरणे च बीजानापत्तिः। (५) अत एव 'करणे च' (२।३।३३) इति

भाष्य विरोधेन। ननु तेनावय वेनतत्प्राणि रूपंवस्तु तथा यथा प्रसिद्धं युतं चेत्त देव स्वांगं न तु वैपरीत्येन योगे। तेन पृष्ठक रायांग विसुकरीति प्रयोगोनेत्येव रूपं नियमार्थ मेवेदं किनेत्यत आह्। अतएवेति। अप्राण्यत्त्मत्व एतस्य स्वांगत्व विधायक त्वदिवेत्यर्थः।। एवं च गवि सुकरीतीष्यतएवेतिभावः।। भाष्ये तस्येत्यनेन तज्जातीय वस्तुनोग्रहणं साहित्यस्य संबंधत्वेन विवक्षायां तस्येतिषष्ठीति बोध्यं अतएव भाष्यामितीत्यस्य भाषायां चेत्ये तदर्थक स्यावश्यकत्वादेव।। उपदेशादिति।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूत्रे द्वितीयासमुच्चयो (६) नेत्याहुः।

करणे च (२।३।३३)। करणे तृतीयायायाः सिद्धत्वेन पक्षे पञ्चम्यर्थं वचनमिदम्। चकारः तृतीयान्यतरस्यामित्यनुकर्षणार्थः। षष्ठी गापोष्टगितिवत्। अद्रव्येति। द्रव्यभिन्नवचनेभ्य् इत्यर्थः। द्रव्यपदेनात्र सर्वनामपरामर्शयोग्यं, लिङ्गनिरूपितविशेष्यं वा स्तोकशब्दो यद्धर्मविशाद् द्रव्ये स्तोकव्यवहारस्तद्धर्मपरः। स च धर्मोऽल्पादिशब्द प्रवृत्तिनिमित्तमेव। शुक्लादिवच्चैते धर्मवचना अपि। करणत्वञ्च परम्परया। ईद्दशार्थ एव च साधुत्वं सूत्रबलादिति स्पष्टम् 'अलुगुत्तरपदे' (६।३।१) इत्यत्र कैयटे। करणे किम्? स्तोकम्पचति। असत्त्वरूपफलसमानाधिकरणविशेषणत्वादत्र स्तोकशब्दस्यासत्त्ववचनत्वमिति दिक्।

दूरान्तिका (२।३।३५)। अत्र 'दूरान्तिकार्थैः षष्ठयन्यतरस्याम्' (२।३।३४) इत्यतः समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्त्यैवार्थाधिकारात्पञ्चम्याः सिद्धौ चकारो व्यवहिततृतीयासमुच्चयार्थो व्याख्यानादित्याह–चादित्यादि। प्रातिपदिकार्थमात्रे इति। व्याख्यानादिति भावः।

इति पञ्चमी।।

षष्ठी शेषे (२।३।५०)। शेष उक्तादन्यः। स च तत्तद्रूषेण स्वत्वादिः, सम्बन्धत्वेन रूपेण च। कारकविभक्तीनां क्रियाजनकत्वसमानाधिकरणकर्तृत्वादिशक्तिरूपेण बोधकत्वम्। तत्रापि तन्मूलके सम्बन्धे विवक्षिते षष्ठी। तदाह– कारकेति। स्वस्वामिभावादिरिति। स्वत्वस्वामित्वसमूहः सम्बन्ध इत्यन्यत्र विस्तरः। एवं सर्वत्र बोद्धयम्। षष्ठ्यर्थस्य (१) संसर्गविधयैव भानम्। कारकविभक्तिभ्योऽपि क्रियाकारकभावस्य संसर्गविधया

आदिनाऽवयव दर्शनस्य संग्रहः।। अतएवा समान कालिकत्वाभा वादेरेव।। अपीति। अपिना कल्प भेदेन दुर्गादिशरीर भेदेपिसमान कालिकत्वाभावेन समानकालिकशरीर भेदेपि सर्वशरीर संस्थानस्यैकत्वेमानाभेवन च जातिवाचकत्वा भावादित्यस्य संग्रहः।। अतएववयो वाचकस्य जाति विकल्पादेव। सर्वलिंगत्वाच्चेति स्त्री पुंसयोरपत्यांता इत्यपत्य विषये स्त्रीपुंसोरिति न पुंसकस्या प्युपलक्षणम्।। अतएव नाडायनमिति नपुंसकं दृश्यत इतिभावः।। चेति, चेन गोत्र चरणयोर्जाति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भानमित्युक्तम्। सम्बन्धमात्रविक्षायामिति। सम्बन्धत्वेन भाने इत्यर्थः। यद्वा क्रियाकरकभावमूलकसम्बन्धस्यैव विवक्षायां न तु तद्विवक्षायामित्यर्थः। कर्तुरपि तथा विवक्षा 'क्तस्य च वर्तमाने' (२।३।६७) इति सूत्रे 'छात्रस्य हसितम्' इत्यादौ भाष्ये स्पष्टा। संयोगसम्बन्धावच्छिन्नाधारस्य न तथा विवक्षा। अत एव 'घटवद् भूतलम्' इतिप्रयोगसाधकं मतुप्सूत्रे अस्मिन्निति चरितार्थमिति तत्रैव भाष्ये स्पष्टम्। 'लोहितोष्णीषाः' इत्यादावपि सप्तम्यर्थे बहुव्रीहिर्बोद्धव्यः।

एधो दकस्येति। एधः कर्तृ कर्ता वा। दकस्योदकस्येत्यर्थः। एधशब्दोऽदन्तः पुँल्लिङ्गः 'कारके' (१।४।२३) इति सूत्रे भाष्ये प्रयुक्तःएधाः पक्ष्यन्ते इति। सान्तः क्लीबोऽपि हेतौ द्योत्ये इति। हेताविति वर्तते। हेतुहेतुमद्भावेनेतरान्वये इत्यर्थः। तेन 'अन्नं हेतुं पश्य' इत्यादौ न। षष्ठीति। हेतुवाचकादित्यर्थः। निमित्तेत्यादि। निमित्तादिप्रयोगे तेभ्यस्तत्समानाधिकरणशब्देभ्यश्चेत्यर्तः। किन्निमित्तमिति। प्रथमान्तं द्वितीयान्तञ्च। प्रायग्रहणादिति। एवञ्च 'षष्ठी हेतुप्रयोगे' ओल२।३।२६) 'सर्वनाम्नस्तृतीया च' (२।३।२७) इति सूत्रे व्यर्थे इति बोद्धयम्।

षष्ठयत (२।३।३०)। दिक्शब्दात्पञ्चम्यां प्राप्तायामिदम्। (१) 'ततः पश्चात्' इत्यत्र तु सार्वविभक्तिकः षष्ठयन्तात्तसिः। षष्ठयपीति। स्पष्टञ्चेदं वृत्तौ। भाष्ये तु न दृश्यते। विपरीतं 'षष्ठ्यतसर्थ' (२।३।३०) इति सूत्रात्पूर्वम्। 'एनपा' (२।३।३१) इत्यस्य पाठ इति लभ्यते इति 'पृथग्विनाना' (२।३।३२) इति सूत्रे उक्तम्।

दूरान्तिकार्थैः (२।३।३४)।। यदपेक्षं दूरत्वादिकं ततः षष्ठीत्यर्थः। पञ्चमी चेति। (२) तस्था एव समुच्चयो, न द्वितीयातृतीययोरपीति भावः।

कार्यस्य नित्यत्वायास्य वचन स्यावश्यकत्वादित्यपि बोध्यम्। अतएव शास्त्रीय गोत्रस्य जाति लक्षणे ग्रहणदेव।। नन्ववयव दर्शनेन ग्राह्यत्वेजातित्वं न स्यादत आह्।। यद्वेति। अपीति।। अपिनाऽवयवदर्शन संग्रहः।। अतएव जातेरसर्वलिंगत्वादेव नियतलिंगत्वमिति नियमेनैकलिंगत्वं द्विलिंगत्वंवा नतुत्रिलिंगत्वं प्राग्वदेव।।

अप्राप्तप्राणार्थमेव। अतएव आकृतिग्रहणेत्यसय लिंगानां न सर्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ञोऽविदर्थ (२।३।५१)। अत्र सूत्रेऽविदर्थस्येति छेदो (३) व्याख्यानात्। सर्पिषो ज्ञानमिति। जानातेः प्रवृत्तिरर्थः। सर्पिःसम्बन्धिनी प्रवृत्तिरित्यर्थः।

अधीग (२।३।५२)। अधीगर्थः स्मृतिः। कर्मणि किम् मातुर्गुणस्मरणम्। करणे शेषेऽनेन षष्ठ्यभावे समासो भवत्येव। अत एवात्र सूत्रे भाष्ये शेष इति वर्तत इत्युक्तम्। 'प्रतिपदविधाना षष्ठी न समस्यते' इति (४) एतैः षष्ठीसमासनिषेधात्। एधो दकस्येति। एध इति पृथक्पदं, दकशब्द उदकवाची।

रुजार्थानाम्। (२।३।५४)।। रोगार्थानां (५) धातूनामित्यर्थो व्याख्यानात्। धातोर्भाववचनत्वाव्यभिचारेण सामर्थ्याद्वचन इति कर्तरि ल्युट्। भावशब्देन सिद्धरूपोऽर्थ उच्यते, ल्युट्प्रकृत्यर्थोऽ (६) विवक्षितस्तदाह–भावकर्तृकाणामिति। रोगकर्तृकमिति च। रोगोऽत्र क्षयादिः। भावकर्तृकाणां किम्? श्लेष्मणश्चौररुजा। श्लेष्माऽत्र न भावः। सर्पिषो नाथनमिति। सर्पिर्मे भूयादित्याशासनमित्यर्थः।

जासिनि। (२।३।५६)। जसु मोक्षणे इति दैवादिकस्य (१) न ग्रहणम्। जासीति निर्देशाद्, हिंशायामित्युक्तेश्च। निप्रोपसृष्टो हनो निप्रहणः। शब्दपरत्वेऽपि सौत्रत्वाद् 'हन्तेः' (८।४।२२) इति णत्वम्। चुरादिरिति। घटादेस्तु न ग्रहणं, दीर्घनिर्देशात्। 'क्राथनम्' इति घटादेः क्रथेः। क्रायेति सूत्रे निपातनाद् वृद्धिरिति वृत्तिः। परे तु एतत्सूत्रप्रामाण्यान्नटसा हचर्य्याच्चायमपि चुरादिर्बोद्धयस्तस्याकृतिगणत्वात्। निपातनस्य शेषष्ठीसन्नियोगशिष्टत्वे कर्मत्वेन विवक्षायां चोरस्य क्राथनमित्यस्यानापत्तिः। सामान्येंन निपातने चिण्णमुल्विषये क्रथं क्रथमित्यादेः क्रथयतीत्यादेश्चानापत्तिरित्याहुः।

समर्थयोरिति। समपर्यायसंशब्देन समासः, शकन्ध्वादित्वात् पररूपं वा।

भाक्सकृदाख्यात निर्ग्राह्येत्यस्य चैक वाक्य तया वाक्यार्थांगीकारादेव। भाष्योक्त लक्षणांतरार्थ कैयट आह्। सत्वस्येति। ताविति आविर्भाव तिरोभावावित्यर्थः। बह्वर्थ पदार्थमाह्। यावदिति। गुणैरिति सहार्थे तृतीया द्रव्येणेति। कर्तरितृतीया।। उपालंभः प्रत्यक्षे। इदंगुणैरित्यादिः। अतएवाकृति ग्रहणे त्यारम्य निर्ग्राह्येत्यंतस्यैक लक्षणत्वादेव। अतएव लिंगानामित्यादे र्जाति स्वरूपानुवादक त्वादेव। अतएव। स्त्रीविषयादित्यस्य पूर्वोक्तार्थांगीकारादेव स्त्रीविषयादपीतीति। सूत्रारंभसामर्थ्यादस्त्री

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्राह्मणपणनमिति। आयप्रत्ययो वैकल्पिकत्वान्न कृतः। उदाहरणे स्तुतावेवेति नियमादपि न।

दिवस्त (२।३।५८)। कर्मणि षष्ठी स्यादिति। शेष इति त्वत्र न सम्बध्यते (२) व्याख्यानात्। अत एव 'द्वितीया ब्राह्मणे' (२।३।६०) इति सूत्रं 'गामस्य तदहः सभायान्दीव्येषुः' इत्यत्र नित्यं षष्ठीप्राप्तौ द्वितीयार्थमिति भाष्ये उक्तम्। तद् ध्वनयन् तिङन्तमुदाहरति–शतस्य दीव्यतीति। यद्यपि पूर्वसूत्रे दिवंपठित्वा तदर्थस्येति त्यक्तुं शक्यते तथापि योगविभाग उत्तरार्थः, शेष इत्यस्यासम्बन्धार्थश्च।

विभाषोप (२।३।५९)। अत्रापि शेष इति (१) न सम्बद्धयते, तदर्थस्येति च वर्तते। तदाह–पूर्वयोगेति। अत एवेयं प्राप्तविभाषेति 'नवेति' (१।१।४४) इतिसूत्रे भाष्ये स्पष्टम्।

कृत्वोऽर्थप्रयो (२।३।६४)। शेषे किमिति। 'दिवस्तदर्थस्य' (२।३।५८) इत्यादिना विच्छेदादधिकरणकारक एव षष्ठीविधानं युक्तमिति प्रश्नः। द्विरहनीति। वृत्त्यादिप्रामाण्यान्मण्डूकानुवृत्तिः स्वीकार्येत्युत्तरम्। 'अधीगर्थ' (२।३।५२) इति सूत्रे 'कर्मादीनामविवक्षा शेषः' इति भाष्ये (२) बहुवचनेनात्रापि शेषपदसम्बन्धबोधनाच्च। वस्तुतस्तु 'कर्माश्रयषष्ठीविषये सूत्रोपात्तसकर्मकाणामकर्मकवद्वचनम्' इतिवार्तिकप्रत्याख्यानाय शेषे इति वर्तते इति भाष्यकृतोक्ते परेण 'शेषश्च कः' इति पृष्टे 'शेषे षष्ठी' (२।३।५०) इतिसूत्रोक्तं 'कर्मादीनामविवक्षा शेषः' इति सिद्धान्तिना स्मारितम्। नैतावता 'कृत्वोर्थ' (२।३।६४) इत्यत्र तत्सन्बन्धो लक्ष्यते। (३) किञ्चैतद्भाष्यबलात् 'दिव' (२।३।५८) इति सूत्रेऽपि शेषपदसम्बन्ध आवश्यकः। अन्यथा वार्तिकरीत्या 'शतस्य दीव्यते' इति भावे इष्टस्य प्रयोगस्यासिद्धिः। अत एव वार्तिकव्याख्यायाम् 'अधीगर्थादयः (१) प्रेष्यब्रू-पर्यन्ताः कर्माश्रयपदेनोच्यन्ते' इति कैयटः। एवञ्च शेष इत्यनुवृत्त्या

विषयाद्जाति वाचकान्ङीषित्येव कुतोने त्यत आह्। अजात्यर्थात्विति।। इत्यादि निषेधादिति।। इत्यादिना ङीष्निषेधादित्यर्थः।। ननुपुनर्जाति ग्रहणादस्त्री विषयादित्यस्यैवासंवं धोस्तुतेनावंतीत्यादेः सिद्धिरत आह्। अस्त्रीति पूर्वसूत्रेण्। पाककर्णेति सूत्रेण विक्लिन्नमिति।। एवंच तस्य स्वरितत्वमेवनेति भावः।। ननु तित्तिरितिः कुकुभोलाव इति साहचर्यात्पुंस्त्वेनास्य स्त्रीत्वाभावोऽतआह्।। स्त्रीपुंसयोरिति द्विचतुरिति।। द्विपचतुष्पदेपरोरगा जातिविशेष वाचिन इत्यर्थः।। पुनर्जातिग्रहणेनायोपधादितिवदत इत्यस्याप्यसंबंधादित इति व्यर्थमिति शंकते।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वार्तिकप्रत्याख्यानवत् एतत् (२) सूत्रद्वयप्रत्याख्याने एव भाष्यतात्पर्यम्। 'द्वितीया ब्राह्मणे' (२।३।६०) इतिसूत्रस्थ भाष्यं तु वार्तिकरीत्येत्याहुः।

किञ्च 'यदा कर्म विवक्षितं भवति तदा षष्ठी न भवति स्मराम्यहं मातरम्' इति भाष्ये उक्तम्। त्वद्रीत्या तु यदा कर्मादि विवक्षितं भवतीति वदेत्। (३) एवञ्च 'ज्ञोऽविदर्थस्य' (२।३।५१) इत्यत्रपि तदसम्बन्ध एव। एवञ्च तद्योगे न कदापि तृतीया। 'शतं दीव्यति' इत्यादि च सिद्ध्यति। 'अधीगर्थ' (२।३।५२) इत्यादौ च मण्डूकानुवृत्तिरिति सुधियो विभावयन्तु।

कर्तृकर्मणोः (२।३।६५)। अत्र शेष इति न सम्बद्ध्यते, सूत्रवैयर्थ्यापत्तेः। 'कृद्योगा षष्ठी समस्यते' इति वार्तिकेन तत्र समासस्येष्टत्वात्। कृतिरिति। भावे क्तिन्। कृष्णा कर्ता। जगत इति। कर्मेदम्। कर्तृसाहचर्यात्। कर्मापि धात्वर्थे भेदेनान्वय्येव गृह्यते। 'तेन स्तोकं पाकः' इत्यादौ (४) न क्रियाविशेषणात् षष्ठी किञ्च क्रियाविशेषणेन 'स्तोकम्पाचकः' इत्यादौ न समानाधिकरणसमासो, नापि सुप्सुपेत्यादिः। सुबन्तार्थविशेष्येणानन्वयेना (१)ऽसामर्थ्यात्। 'द्वितीयाश्रित' (२।१।२४) इत्यादेस्तु सामर्थ्या दवयवद्वारके सामर्थ्ये प्रवृत्तिः। द्वितीयाप्रकरणोक्तपरेतुमतरीत्या वा सामर्थ्यम्। अत एव 'पूजनात्पूजितम्' (८।१।६७) इति सूत्रे दारुणं यथा भवति तथाऽध्यापक इत्यर्थकस्य 'दारुणाध्यापकः' इत्यस्य सिद्ध्यर्थं (२) मलोपवचन मारब्धं भाष्ये। (३) अन्यथा समासेन सिद्धे (४) तद्व्यर्थं स्यात्। एतदेव भाष्यं ततः षष्ठ्यंभावेऽपि मानम्। अन्यथा षष्ठीसमासस्य 'तृजकाभ्यां कर्तरि' (२।२।१५) इत्यादिनिषेधैरुक्तसामर्थ्येऽपि प्रवृत्त्या तत्समासेनैव सिद्धौ मलोपवचनं व्यर्थमेव स्यादिति वोद्ध्यम्। न च (५) भिन्नपदत्वेऽपि तथाप्रयोगसाधुत्वार्थं–मलोपवचनमिति वाच्यम्। (६)

इतः किमिति।। परकप् निवृत्यर्थमिति।। परस्य कपोंऽत रंगत्वात्प्राप्तस्य निवृत्यर्थमित्यर्थः।। अतःपूर्व पदस्योपमान वाचित्वाभावेन तत्रोपमानत्वेन प्रतीत्यभावात्।। तदारोपेच। शफत्वारोपे च।। स उपमानोपमेय भावः।। ननुशार्ङ्गरवादी त्यस्य लुप्त पंचम्यंत त्वेऽनुपसर्जनादित्य स्यविभक्ति विपरिणामेन षष्ठयंतत्वे च गौरवमत आह्। तद्वदमेति। तत्र यथाण्योकार इति व्याख्यानमेवामाप्य ओकार इत्यञः पंचम्यंतत्वमपि सुवचं तदाह। अञ्योकार इत्यपीति। व्याख्यानादिति।। न शब्देऽलोंत्यस्येतीकोगुणेति परिभाषाभ्यांमच एव बृद्धि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथा सति वाक्ये मलोपश्च वक्तव्यः इति वदेत्। अत एव कैयटेन क्रियाविशेषणं दारुणादयस्तत्र वैयधिकरण्यात् समासाभावात् मलोपो विधीयते इत्युक्तम्। सुप्सुपेत्यादिसमासो (७) न सार्वत्रिक इति तदाशय इत्यलम्।

कृति किमिति। कर्तृकर्मभ्यां क्रिया सन्निधाप्यते। तद्वाची तु धातुरेव। कारकान्वययोग्यतावच्छेदकरूपेण साध्यत्वेन धातुभिरेव तदुपस्थितेः। 'शत्योऽश्वः, आब्भ्रिकः' इत्यादौ तद्धितान्न तेन रूपेणोपस्थितिरिति न तत्र कारकाणामन्वयः, एतद्भाष्यप्रामाण्यात्। अत एव हिरुगादियोगे न कर्मादिसञ्ज्ञा। एतेन 'देवदत्तेन शत्योऽश्वः' इत्यादौ षष्ठीनि वृत्त्यर्थं कृद्ग्रहणमित्यपास्तम्। अधिका खारी द्रोणेनेत्यत्र हेतौ तृतीया। क्रियायोगाभावात् कर्तुः कर्तृत्वाभावे जनकत्वरूपहेतुत्वसत्त्वात्। धातोश्च द्वये प्रत्ययास्तिङः कृतश्च। तत्र तिङ्योगे 'त लोक' (२।३।६९) इति निषेधात् कृद्योगे एव भविष्यतीति किं तेन। 'नलोक' (२।६।६९) इति सूत्रे कृदव्ययस्यैव ग्रहणं तु अव्ययार्थस्य ये कर्तृकर्मणी इति व्याख्यानेन सिद्धम्। 'उभयप्राप्तौ' (२।३।६६) इत्यत्र बहुव्रीहिस्तु 'एकाचो द्वेः' (६।१।१) इत्यादाविवान्यपदार्थस्याशाब्दत्वेपि व्याख्यानाद्भविष्यति। न च भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामित्यादौ गुणभूते णिच्प्रकृत्यरथकर्तरि षष्ठ-यर्थ करोतीति कृदिति कर्तृपरं तदिति वाच्यम्। तृतीयावत्तत्र षष्ठया अपि विनैव यत्नसिद्धेरिति प्रश्नः।

तद्धितइति। (१)तद्धितान्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रियायाः कर्त्तरि कर्मणि च मा भूदित्यर्तः। उदाहरणे सकर्मकप्रकृतिकभाव क्तांतस्येदृशवृत्तिमात्रविषयताया भाष्यसम्मतत्वेन तस्य केवलस्य क्वाप्यप्रयोगेण तद्धितान्तसमुदायशक्त्यैव क्रियोपस्थापकत्वात्। (२) कृद्ग्रहणात्कृ

प्राध्यातत्साहचर्यान्नरशब्देप्यच एववृद्धि विधानेनांत्यस्यनित्येन यस्येति लोपेन बाधाद्याकारस्यैव तत्पर्यवसानादित्यर्थः।।

अतएव रुढ्याविशिष्टार्थबोधादेवतस्य नेष्टमिति प्राचांष्फ इत्यत्रष्फडित्येव सिद्धे तद्धित ग्रहणं तुष्फडित्यत्रटित्वस्याणि सम्भावनया गार्ग्यायणीत्यादौङीप्यन्तो दात्ता पत्याफडिति वक्तुमशक्यत्वेनासुरायणीत्यत्र यस्येतिलोर्थमितिभावः।। तदनित्यत्वज्ञापनार्थमिति। स्त्रीप्रत्ययप्रकरणेऽनित्यत्वेन तदप्रवृत्तिज्ञापनार्थमित्यर्थः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दन्तशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियाकर्तृकर्मणोर्ग्रहणम्, न चात्र तथा। 'तण्डुलानां पाचकतरः' इत्यादौ च पाचकादेः पृथक्प्रयोगेण तच्छक्तिग्रहस्यापि सत्त्वेन कृदन्तशक्तिग्रहप्रयोज्योपस्थितिविषयत्वं क्रियाया अस्त्येवेति भवत्येव षष्ठी। अत एव तद्धिते माभूदित्येवोक्तं, न तु तद्धिताधिक्येऽपीति। भाष्येऽपि तद्धितस्य ये कर्तृकर्मणी तत्र मा भूत्कृतो ये कर्तृकर्मणी तत्रैव यथा स्यादित्येवोक्तम्।

कृतपूर्वीति। अत्र कर्मविशेषस्य तत्तद्रूपेण प्रागन्वयाविवक्षयाऽकर्मकत्वाद्भावे क्ते 'पूर्वादिनिः' (५।२।८६) इति तद्धितः तदन्तरं तु विशेष रूपेण कर्मयोगो भवत्येव। तत्रोक्तरीत्या षष्ठ्यभावेऽनभिहितत्वाद् द्वितीया। एवं रीत्या साधुत्वेऽत्रत्यभाष्यमेव मानम्। वृत्तेः पूर्वं कर्मान्वयाभावाच्च सापेक्षत्वाद् वृत्तिर्न स्यादिति न शङ्क्यम्। एवम् 'अधीती व्याकरणे' इत्यादावपि बोद्धयम्। तदुक्तं भाष्ये– यदा वाक्यं न तदा भावे प्रत्ययः, यदा प्रत्ययः सामान्येन तदा वृत्तिरिति। न तदा प्रत्ययः–न तदा भावे प्रत्ययः। धातोः सकर्मकत्वात्। यदा प्रत्ययः–भावे इति शेषः। तदा वृत्तिरेव सा च वृत्तिर्न कदापि कर्मक्तान्तेनेत्याह। सामान्येनेति। कर्मविशेषस्य तत्तद्रूपेण प्रागन्वयाविवक्षाविशिष्टो योऽर्थः तदर्थकधातुप्रकृतिकक्तान्तेनेत्यर्थः। इयमेव कर्मणोऽविक्षा नाम। अनेन तादृशक्तान्तस्य वाक्ये न प्रयोग इति स्पष्टमेवोक्तम्। प्रयोगानुरोधिनी हि विवक्षेति तद्भावः। न चाविवक्षितकर्मतया भावे क्तसाधनयत्नो व्यर्थः, नपुंसके भावे इत्यनेन सकर्मकेभ्योऽपि सिद्धेरिति वाच्यम्। तस्याप्यकर्मकेभ्य एवेष्टेः। अत्र चेदमेव भाष्यं मानम्।

ददैर्दुःखस्य माद्वग्भ्यो धायैरामोदमुत्तमम्।
लिम्पैरिव तनोर्वातैश्चेतयन् स्याज्ज्वलो न कः।।

तेन डाबंत दामाशब्देन द्विशब्दस्य बहुब्रीहौद्विदामेत्यादौ दामहायनांताच्चेति ङीप्रेतिभावः।। अतएव प्राचांष्क इत्यत्र षित्व सामर्थ्यादप्रातिपदिकत्वे पिङीष्सिद्धेस्तद्धित ग्रहणमन्य तोपिष्फार्थं तेनासुराय णीतिसिद्ध मितिभाष्ये स्पष्टोक्तं संगच्छते।। अन्यथा लिंगविशिष्ट परिभाषयैव सिद्दे तदसंगतिः।। केचिदिति। भाष्यतत्त्वविद इत्यर्थः।। इतिस्त्रीप्रत्ययाः।।

ननुघट इत्येतन्मात्रस्यापि प्रयोगात्कथं तत्र क्रियायोगोऽत आह्।। तत इति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति भट्टिपद्यम्। मादृग्भ्यो दुःख ददद्भिरुत्तमामोदं पुष्पादीनां गृहीत्वा मादृशां दत्तस्य दुःखस्य पोषकैर्मादृशां शरीरं लिम्पद्भिरिववातैः को मादृक् विरहाग्निव्याप्तश्चेतयन् ज्वलः ज्वलन्निव न स्यादिति तदर्थः। दाधातोः पोषणार्थाद्वाञश्च 'ददातिदधात्योः' (३।२।१३९) इति शणौ, लिम्पेः शः, ज्वलेर्ण इति। जयमङ्गलाश्लोकव्याख्याप्येतज्जातीयैव तत्रेति दिक्। तत्र धायैरामोदमुत्तममित्यत्र (१) गृहीत्वेत्यध्याहृत्य तद्योगे द्वितीया बोद्धया।

उभयोः प्राप्तिर्यस्मिन्निति। तेनैकनिमित्तत्वलाभादोदनस्य पाको ब्राह्मणानाञ्च प्रादुर्भाव इत्यादौ विभिन्नक्रियाकर्तृकर्मणोः षष्ठीप्राप्तौ नायं नियम इति भावः। प्राप्तिपदेन चो (२) भयोः प्रयोग एवायं निषेध इति ध्वनितम्। स्त्रीप्रत्यययोरिति। 'स्त्रियां क्तिन्' (३।३।९४) इत्यधिकार विहितयोरित्यर्थः। नायं नियम इति। तेनोभयत्रापि षष्ठी भवत्येवेति भावः। भेदिकेति। धात्वर्थनिर्देश ण्वुल्, सन्नन्ताद्भिदेः 'अ प्रत्ययात्' (३।३।१०२) इत्यकारप्रत्ययः। शेषे इति। नियमस्यायं विकल्पः। 'इत्येके' इत्येतल्लब्धमर्थं स्पष्टप्रतिपत्तये आह– केचिदिति। अकाराभिन्ने कृन्मात्रे इत्यर्थः। अनुशासनमिति। अनुशिष्यन्तेऽसाधुभ्यो विविच्य बोद्धयन्ते येनेति करणे ल्युट्।

मत इत्यादौ 'मतबुद्धि' (३।२।१८८) इति वर्तमाने क्तः।

इदमेषामिति। कर्तरि षष्ठी। सकर्मकेभ्यस्त्वधिकरणे क्ते कर्तृकर्मणोर्द्वयोरपि षष्ठी, इदमेषां भुक्तमोदनस्य। 'उभयोप्राप्तौ' (२।३।६६) इति तु मध्येऽपवादन्यायेन 'कर्तृकर्मणोः' (२।३।६५) इत्यस्यैव नियम इति बोध्यम्।

न लोका (२।३।६९)। लादेशा इति। लकारसम्बन्धिन इत्यर्थः, तेन (१) 'ददिर्गाः' इति

प्रथमांतादित्यर्थः। सर्वत्रेति।। कियांतरा नुपादान इत्यर्थः।। ननुत त्राख्यातार्थकर्त्रादेः क्रियायामन्वयेपिप्र थमांतार्थस्य घटादेः कथं क्रियायोगोऽत आह्। आख्यातार्थेति। ननुक्रिया जनकस्यक्रियान्वय नियमेप्रथमांतार्थस्य तत्सत्वेन मानमत आह्।। प्रथमांतार्थस्यापीति।। तत्र प्रमाणमाह। भाष्येव्यवहार इति।। सहयुक्त इति।। सूत्रे भाष्येऽप्रधान ग्रहण प्रत्याख्यायोपपदविभक्तेः कारकवि भक्तिरित्याश्रित्य प्रधाने कारक विभक्तेर्बलत्वात्प्रथमेति व्यवहार इत्यर्थः।। नियमोपस्थितिरिति समभिव्याहृत शब्दानपेक्षेयोपस्थिति रित्यर्थः। तेन हार्यादिशब्दानां नानार्थानां संग्रह

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिद्धम्। केवलस्य क्वापि प्रयोगाभादेवं व्याख्यातम्। कुर्वन्निति। तृन्प्रत्याहारघटकस्तु नायम्। तृशब्दस्य तद्घटकत्वेऽपि शतुस्तद्घटकत्वाभावात्। लिडादेशकस्वादियोगे लिट्सदृशकि किनोर्योगे च निषेधार्थं (२) तस्यावश्यकत्वाच्च। उ इति। उकारेण व्याख्यानात्तदन्तविधिः, व्यपदेशिवद्भावेनोकारस्यापि 'सनाशंस' (३।२।१६८) इति, 'अलंकृञ्' (३।२।१३६) इति च उइष्णुचौ। घातुक इति। 'लषपतपद' (३।२।१५४) इत्युकञ्, वृद्धिस्तत्वम्। कमेरिति। उकान्तस्येति शेषः। इदञ्च भाषायामेव। भाषायामिति भाष्योक्तेः। निष्ठेति। एतदपवादतया भाष्ये वार्तिकं पठ्यते-नपुसंके भावे क्तस्य योगे षष्ठया उपसङ्ख्यानं छात्रस्य हसितमिति। इदञ्च प्रतिपदोक्त्वात् 'नपुंसके भावे क्तः' (३।३।११४) इतिसूत्रविहितक्तान्तयोग एव। (३) अत एव 'भ्रान्तं देशम्' इत्यादौ 'गत्यर्थाकर्मक' (२।३।११२) इत्यनेन क्ते नानेन षष्ठी। नपुंसके भावे क्तस्तु नात्र। तस्याप्यकर्मकेभ्य एवेष्टेः। अविवक्षितकर्मतयाऽकर्मकत्वेन क्तस्तु 'कृतपूर्वी' इत्यादिवृत्तिविषये एवेत्युक्तम्। (४) एवञ्च इह 'अहः सुप्तम्' इत्यादौ (५) परत्वेन 'क्तोऽधिकरणे च' (३।४।७६) इत्यनेन भावे क्ते शेषत्वविवक्षयैव षष्ठीसाधनस्यावश्यकत्वेन इदं शेषत्वविवक्षया भाष्ये प्रत्याख्यातम्।

(१) वार्तिकेन चानेन कारकष्ठीनिषेधविषये शेषत्वविवक्षा नेति ज्ञाप्यते। शेषत्वविवक्षया भाष्योक्तत्प्रत्याख्याने तु अनभिधानात् क्तातिरिक्तविषये (२) न सा। (३) 'पूरणगुण' (२।२।११) इति सूत्रे भाष्ये ध्वनितमिदम्। तत्र हि 'सति किमुदाहरणं, ब्राह्मस्य कुर्वन्, नैतदस्ति कारकषष्ठीनिषेधात्, शेषषष्ठ्या तु ब्राह्मणस्य कटमित्यर्थेनासामर्थ्यात्' (४) इत्याद्यर्थकमुक्तमिति परे।

अधीयन्निति। 'इङ्धार्योः शत्रकृच्छिणि' (३।२।१३०) इति शता। द्विषन्निति। 'द्विषोऽमित्रे' (३।२।१३१) इति शता। शेषे षष्ठी त्विति। इदञ्चिन्त्यमि (५) त्युक्तं परैः।

इति भावः।। ननु सिंहो माणवकइत्यादौ माणवकादिशब्द समभिव्याहारेणैव सिंह शब्दादेः सिंहसदृश इत्याद्यर्थ बोधनात्तस्य प्राति पदिकार्थत्वाभावास्तत्र प्रथमा नस्या दत आह्।

अन्वयेति ननु गोपीत्यादौ प्रातिपदिकएव लक्षणायां सत्वात् प्रातिपदिकङीष् समभिव्याहारेणैव गोपसंबंध विशिष्ट बोधाच्च प्रथमानस्यादत आह्। शंक्यते इति।। ननु नीलमुत्पलमित्यादौ विशेषण विशेष्य भावस्य परस्पर समभि व्याहारेणैव बोधा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अकेनो (२।३।७०)। अत्र यथासंख्यं नेष्यते। अकस्याधमर्ण्येऽसम्भवादाह–भविष्यतद्यकस्येति। वर्षशतस्य पूरक इत्यादौ 'एतत्कर्म कयाजनकर्तारः' इत्यर्थके 'अङ्ग यजतां लप्स्यन्तेऽस्य याजकाः' इत्यादौ च षष्ठी भवत्येव। कर्तृमात्रार्थके 'ण्वुल्तृचौ' (३।१।१३३) इति ण्वुलि पदान्तरसम्बन्धेन भविष्यत्त्वप्रतीतावपि अकस्य तत्रावृत्तेः 'तुमुन्ण्वुला' (३।३।१०) इति ण्वुल् तु भविष्यतीत्यधिकृत्य विधानाद्भविष्यदर्थक एवेति भावः। व्रजङ्गमीति। 'गमेरिनिः' (उ०सू०) इत्यौणादिक इनिः। स च भविष्यति 'भविष्यति गम्यादयः' (३।३।३) इत्युक्तेः। गामीति पाठे बाहुलकाद् वृद्धिः। शतन्दायीति। 'आवश्यकाधमर्ण्ययोः' (३।३।१७०) इति णिनिः। आवश्यके णिनावप्ययं निषेधः। सूत्रे आधमर्ण्यपदेन तत्सूत्रोक्तार्थोपलक्षणात्। एत एव 'अंशं हारी' (५।२।६९) इति निर्देशः सङ्गच्छते। तत्र हि आवश्यके णिनिः। न च तत्र भविष्यदर्थकत्वेन सिद्धिः, भूतवर्त्तमानयोरावश्यकत्वबोधनस्य वैफल्येन भविष्यत एव ततो बोधादिति वाच्यम्। वस्तुतो भविष्यतो बोधेऽपि तत्त्वेनाबोधात्। णिनेस्तदर्थकत्वाभावाच्च। अत एवावश्यङ्कारी कटस्येति वृत्त्युदाहृतं सङ्गच्छते। तत्र हि नानेन णिनिः, (१) अवश्यम्पदोपादानात्। किन्तु 'सुप्यजातौ' (३।२।७८) इत्येवेति नव्याः।

कृत्यानाम् (२।३।७१)। 'कर्तृकर्मणोः' (२।३।६५) इति नित्ये प्राप्ते विभाषा। कर्मनिवृत्यर्थं कर्त्तृग्रहणम्। अनुवर्त्तत इति। निषेधोऽयं कर्त्तरि कर्मणि च। 'कर्तरि वा' इति त्वनुभयप्राप्तिविषयमिति वृत्तिकैयटादयः। व्रजमित्यत्र 'गुणकर्मणि वेष्यते' इति विकल्पस्तु न, कृत्यारिक्ते चरितार्थस्य तस्य 'दोग्धव्या गावः पयः कृष्णेन' इत्यादौ गुणकर्मण उक्तत्वात् प्रधाने चरितार्थेनानेन परत्वाद्बाधात्।

दुभयत्रापि प्रधमानस्यादत आह्।। यद्यपीति। विशेषण विशेष्य भावस्य संसर्गेणेति।। राज्ञः पुरुष इत्यादौद्विनिष्ठ त्वाद्विशेषण विशेष्य भावस्य संसर्गत्वेन दृष्टत्वादत्रापि संसर्गत्वेन व्यवहार इतिभावः।। न संसर्ग इति।। तस्यद्विनिष्ठत्वा भावान्नीलोत्पलत्वमित्यादौत्वांतादभेदस्य वोधापत्तेः।। राहोः शिर इत्यादौ भेदमारोप्य भाष्य कृतषष्ठी साधनाच्च न संसर्ग इत्यर्थः। अन्यत्र मंजूषादौ। नन्वे कादिशब्द प्रतिपादित संख्याया उक्तत्वेपित द्विशिष्टगते संख्यांतरे प्रथमाभविष्यतीति वचनग्रहणं व्यर्थमत आह्। प्रातिपदिकेति। अतएवारोपित प्रवृत्ति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तुल्यार्थैर्योग इति। तुल्यत्वार्थैरित्यर्थः। अत एवातुलोपमाभ्यामिति चरितार्थम्। अत एव पर्युदासादनव्ययोग एवेदं, तेन इवशब्दयोगे न।

चतुर्थी चाशिषि (२।३।७३)। आशीर्विषयक्रियान्वयर्थकात् प्रातिपदिकात्तद्द्वारके आयुष्यादियोगे चतुर्थीषष्ठयावित्यर्थः। अत एवैतदर्थकचतुर्थ्याद्यन्तेन सुखहितादिभिर्न समासः। उभयोरपि क्रियान्वयेन परस्परम सामर्थ्यात्, अत एव हि तेन चतुर्थीसमासविधानं तद्योगे चतुर्थीज्ञापकमित्या (२) करोक्तं सङ्गच्छते। यत्तु वृत्तावृद्देश्यविधेयभावेनानन्वयादाशीर्विषये च तथाऽन्वयान्न समास इति। तन्न, वृत्तावपि प्राप्तत्वादिपर्यालोचनेन 'लोहितोष्णीषाः' इत्यादौ (३)तथान्वयदर्शनात्। भाष्ये तथान्वये वृत्तेरसाधु ताया–अनुक्तेश्चेति समासवादे मञ्जूषायां विस्तरः। व्याख्यानादिति। सूत्रेऽर्थशब्दः पृथङ्निमित्तमिति भावः। भाष्ये तु नैतद् दृश्यते।

इति षष्ठी।।

आधारो (१।४।४५)। 'कारके' (१।४।२३) इत्यधिकारात्क्रिया जनके एतत्प्रवृत्तयोपस्थित्वादाधारः क्रियाया एव। तत्रेप्सिततम–स्वतन्त्रपदाभ्यां साक्षात्क्रियाधारयोः कर्मकर्तृसञ्ज्ञाभ्यां (१) बाधात्परम्परया तदाश्रयस्य ग्रहणम्। परम्परा च कर्तृकर्मद्वारिकैव व्याख्यानादित्याह–कर्तृकर्मद्वारेति। यद्यपि कालस्य साक्षात्क्रियापरिच्छेदकत्वं तथापि तदधिकरणं कर्तृकर्मद्वारैव। तथैवानुभवात्। साक्षात्तदाधारत्वेऽपि स्वरितत्वप्रतिज्ञानात्परम्पराधारस्य ग्रहणम्। 'किञ्च साक्षात्तदाधारत्वे कर्तृत्वमेव तस्य स्यात्। कालः पचति भूतानीतिवत्। एवञ्च क्रियान्वयोऽप्यस्य कर्त्राद्यन्वयद्वारैव। यस्य यद्द्वारा कारकत्वं तस्य तद्द्वारैव क्रियान्वय इति व्युत्पत्तेः। अत एव 'अक्षशौण्डः' इत्यादौ समासः।

निमितस्याश्रयस्यापि ग्रहणादेव। अतएव प्रवृत्तिनिमित्ततदाश्रयोरेव प्रातिपदिकपदेनग्रहणादेव।। अतएव। पंचकस्यापि प्रातिपदि कार्थत्वादेव।। इत्येवार्थ इति। ननुपुंसिविद्यमानस्य दारा शब्दस्यापि कुटुम्बवत्व समानाधिकरण भार्यात्व प्रवृत्ति निमित्त तदाश्रयापेक्षया पुंस्त्वस्याधिकस्य सत्वान्न प्राप्ति पदि कार्थत्वात्सिद्धिरिति भावः अनेकार्थत्वादिति द्रोणस्यात्कौरवाचार्ये द्रोणः काके द्रोणस्याच्च तुरुढके इतीरितः शस इत्यर्थ इत्यर्थः।। नन्वत्र द्विकस्यापि प्रातिपदिकार्थ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र आकसक्त्यादिक्रियान्तर्भाविण बोधाननुभवात् 'क्रियाद्वारा सामर्थ्यम्' इति (२) कैयटाद्युक्तं न युक्तम्। 'मूले वृक्षः कपिसंयोगी' इत्यादावस्तिक्रियामध्याहृत्य तस्याः स्वकर्तृकपिसंयोगिवृक्षद्वारा मूलवृत्तित्वादाधारत्वम्। (३) विशिष्टवृक्षस्य मूलवृत्तित्वबोधेऽन्यत्रावयवे (४) तद्विशिष्टवृक्षाभावप्रतीतेः। कपिसंयोगे तदवच्छेद्यत्वं फलतीति दिक्।

चकारादिति। प्रातिपदिकार्थे इति शेषः। त्रिधेति। तत्र सकलावयवव्याप्तौ व्यापकाधारत्वम्। यथा तिलेषु तैलम्। इतमेव मुख्यमधि करणमिति 'स्वरितेन' (१।३।११) इत्यत्र 'साधकतमम्' (१।४।४२) इत्यत्र च भाष्ये स्पष्टम्। उप-समीपे-श्लेषः, सम्बन्धस्तत्कृतमौपश्लेषिकम्, अत एव 'इको यणचि' (६।१।७७) इत्यादावौपश्लेषिके आधारे सप्तम्युक्ता 'संहितायाम्' (६।१।७२) इति सूत्रे भाष्ये। तत्राजादिसामी प्यमेवेगादीनाम्। 'यन्मासेऽतिक्रान्ते दीयते तस्य मास औपश्लेषिकमधि करणम्' इत्युक्तं 'तत्र च दीयते' (५।१।१६) इति सूत्रे भाष्ये। 'तदस्मिन्नधिकम्' (४।१।६७) इति सूत्रे च भाष्ये स्पष्टमिदम्। 'कटे आस्ते' इति तु नौपश्लेषिकोदाहरणं युक्तम्। उक्तभाष्यविरोधात्। यद्वा, एकदेशावच्छेदेन श्लेषेऽपि श्लेषस्य समीपमुपश्लेषं तत्कृतमिति व्युत्पत्त्यौपश्लेषिकत्व मित्यभिप्रायेण तदुदाहरणम्। तदेतत् सर्वं गौणमधिकरणं, 'गङ्गायाङ्गावः' इत्यादिकञ्चेति 'स्वरितेन' (१।३।११) इत्यादौ भाष्ये स्पष्टम्। गौणोऽप्याधारादिः सप्तम्यादिशक्य एवेति बोद्धयम्। एतदतिरिक्तं सर्वं वैषयिकम्। अधिकरणत्वशक्तिमांश्चाधिकरणविभक्त्यर्थः।

इन्विषयस्येति। इनो विषयस्येन्प्रकृतेः क्तान्तस्य कर्मणीत्यर्थः। तेन 'कृतपूर्वी कटम्' इत्यत्र न। उदाहरणे न कर्मणि क्तः, अभिहित्वेन सप्तम्यनापत्तेः। किन्तु भावे।

पदेन ग्रहणे वार्तिक विरोधोऽत आह्। अभिहित इति।। नियमांश निवेशेत्विति। नियमोंऽशोविशेषणं यस्मिन् तस्यनियतो पस्थितिकार्थस्य निवेशेऽत्र प्रातिपदिकार्थशब्देन स्वीकार इत्यर्थः। पुमादय इति। आदि नास्त्रीनपुंसकमिति।। अस्यैवेति।। प्रातिपदिकार्य इत्यस्यैवेत्यर्थः।। अन्येसर्वे इति। दारादय इत्यर्थः।। द्रोणोगिरिविशेषः स्याद्द्रोणः स्याच्चतु राढके इत्यनेकार्थ त्वादित्यर्थः।। ननु तादृशद्वितीयां तत्वे इष्टापत्तिरित्यत आह् किंचेति। कैयट मतंखण्डपति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इष्टादिभ्यश्चेति। तत्र हि श्राद्धमनेने त्यतोऽनेनेति वर्तते। अत्र कर्मशब्देन कालादिव्यातिरिक्तमेव गृह्यते व्याख्यानात्, तेन 'मासमधीते व्याकरणे' इत्यत्र नेति कैयटः।

साध्वसाधु (का० वा०)। शेषषष्ठ्यपवादोऽयम्। 'साधुनिपुणाभ्याम्' (२।३।४२) इत्येव सिद्धे अनर्चार्थमत्र साधुग्रहणम्। तेन तत्त्वकथनेऽपि भवति। सूत्रेऽर्चाग्रहणन्तु (१) निपुणार्थम्।

निमित्तादिति। निमित्तवाचकात् सप्तमी भवति, तस्य निमित्तस्य प्रत्यासत्या (२) स्वान्वयिक्रियाकर्मणा योगे इत्यर्थः। निमित्तश्चात्र क्रिया फलम्। एवञ्च फलं सप्तम्यर्थः। चर्मणीति। चर्मणः फलत्वञ्च हननस्यतल्लाभेच्छाधीनत्वात्। कर्मसम्बन्धश्च स्वरूपसन्नेव निमित्तम्। द्वीपिचर्मणोरण्डकोशमृगयोश्च समवायः, इतरयोः संयोगः। मुक्ताफलाय करिणं रघुवीरेत्यादौ 'क्रियार्थोपपदस्य' (२।३।१४) इति चतुर्थी। घ्नन्तीति शेषः। मुक्ताफलान्याहर्तुमित्यर्थः।।

यस्य च भा (२।३।३७)। भावः क्रिया। ततः–ज्ञापकक्रियाश्रयवाचकात्। तेन गोपद्दुह्यमानपदयोरुभयोरपि सप्तमी सिद्धा। क्रियाश्रयः कर्त्ता कर्म च। तत्र 'ब्राह्मणेष्वधीयानेषु गतः' इति कर्तर्युदाहरणम्। कर्मण्याह–गोष्विति। तत्र काचित् क्रिया स्वाधारकालेनान्यां क्रियां परिच्छिनत्ति यथा प्रकृते, काचित्तु स्वाधारकालाव्यवहितपूर्वकालेन यथा गोषु धोक्ष्यमाणास्वित्यादौ, काचित्स्वाधारकालानन्तरकालेन यथा गोषु दुग्धास्वित्यादौ। ज्ञापकत्वं सप्तम्यर्थस्तस्य च भावलक्षणमित्युक्तेः क्रियायामेवान्वयः। लक्ष्यलक्षणभावः शब्दबोद्धय एवैतच्छास्त्रप्रवृत्तौ निमित्तं न तु तस्य भूयोदर्शनादिरूपमानान्तरेण ग्रहणापेक्षेति बोद्धयम्। अन्यथोदिते आदित्ये तमो नष्टमित्यादावेव स्यान्न तु प्रकृते कदाचिद्धि गोषु

नचेति सिंह इत्यादौ पद एव लक्षणायाः सत्त्वान्न दोष इति चेत्प्रकृतेपितुल्यमित्याह। तद्वदितिनियमांशे निवेश इति। अत्र सूत्रे नियतोपस्थितिक प्राति यदि कार्थ स्वीकार इत्यर्थः।। ननूक्तार्थाना मिति न्यायस्यात्र सूत्रे न प्रवृत्तिः प्रातिपदिकार्थ प्रथमा विधाने न तस्यबाधात्। एवं चवचनग्रहणं व्यर्थमत आह्। अन्यथेति।। ननुरामावित्यादौ संख्याधिक्ये प्रथमाविधानेन वचन ग्रहणस्य सार्थक्यादनमिहिताधिकार वाधेन मानमत आह्। रामावित्यादाविति संख्याधिक्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुह्यमानास्वसौ गतः इदञ्च यत्र मानान्तरेण ज्ञातस्वरूपस्यार्थस्य कालविशेषादिज्ञापनार्थं शब्दप्रयोगस्ततैव प्रवर्तते भाष्यस्वरसात्। 'राहूपरागे स्नायाद्' इत्यत्र राहू परागपदेन तदाश्रयकाल उच्यते इति अधिकरणसप्तम्येव। विवाहे नान्दी मुखङ्कुर्यादित्यत्र विवाहपदेन तत्प्राक्काल उच्यते 'गवान्दोहे आगतः' इत्य त्राप्यधिकरणसप्तम्येवेत्यन्यत्र विस्तरः।

अर्हाणाम् (का० वा०)।। कर्तृत्वार्हाणाम्। तद्वैपरीत्ये– अर्हाणा णामकर्त्तृत्वं अनर्हाणां च कर्तृत्वे इत्यर्थः। वाक्यचतुष्टयमेतत्। कर्त्तृसमर्प कादकर्तृसमर्पकाच्च सप्तमीत्यर्थः। सप्तम्यां तदन्वयिक्रियावाचकाद्धातोरप्रथमा सामानाधिकरण्याच्छतृशानचावेव। लक्ष्यलक्षणभावाविवक्षार्थमिदम्।

सत्स्विति। सन्तो हि तरणक्रियाकर्त्तत्वार्हाः। तरणक्रियाकर्तृसत्सम्बन्धि असत्कर्तृकमासनमिति बोधः। स्वक्रियाधिकरणकालवृत्तित्वं सम्बन्धः।

असत्स्विति। तरणक्रियाकर्तृत्वानर्हाणां तदकर्त्तृत्वमत्र। यद्यपि स्थितिक्रियाकर्तृत्वार्हत्वेनेदं सिद्धं तथाप्यसतां तरणर्क्रियानर्हत्वादिकमपि बोधविषय इति भावः।

सत्स्विति। तरणक्रियाकर्तृत्वार्हाणां तदकर्तृत्वमत्र।

असत्स्विति। तरणकर्तृत्वानर्हाणां तत्कर्तृत्वमत्र।

षष्ठी चा (२।३।३८)। 'अनादरे' इति विषयसप्तमी, 'यस्य च भावेन' (२।३।३७) इत्याद्यनुवर्तते। अनादरे गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते ततःसप्तमी षष्ठी चेत्यर्थः। फलितमाह–अनादराधिक्य इति। लक्ष्यलक्षणभावः षष्ठ्यर्थः। अनादरविशिष्टं

इति। अस्यप्रातिपदिकार्थापेक्षयेत्यादिः।। इत्येवमपीति। अपिना तदाधिक्येत्यस्य संग्रहः।। लिंग ग्रहण सामर्थ्यादिति भावः।। एवं च नातिव्याप्तिः। किंत्वव्याप्ति रेवेति ध्वनयन्नाह्। एवंचेति। तत्सत्व इति। मात्रग्रहणसत्वेइत्यर्थः।। लिंगग्रहणादाधिक्यापि प्रवृत्तौ सिद्धायां मात्रग्रहण सामर्थ्यात् प्रथमाया अन्ययोगव्यवछेद एव कल्प्यते नतु प्रातिपदिकार्थायोगो व्यवछिद्यत इति भावस्तदाह्। इदमेव मात्र ग्रहण मिति।। तत्वासंभवादिति। प्रवृत्ति निवृत्योरमिमुखी करणस्यासंभवादित्यर्थः। अतएवामिमुखी करणस्य प्रवृत्ति निवृत्ति रूप फला भावादेव एवेति नतु व्रजानीत्यादि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रव्रजनं धात्वर्थः। तत्र षष्ठी तात्पर्यग्राहिका, (१) अनादरश्च प्रत्यासत्त्या पुत्रादिविषयक एवेति भावः।

स्वामीश्वरा (२।३।३९)। शब्दपरत्वाद् 'विरूपाणामपि' (का० वा०) इति नैकशेषः। पर्यायान्तरसङ्ग्रहापत्त्या स्वाम्यर्थ इति नोक्तम्। दीयते। इति व्युत्पत्त्या दीयमानांशरूपं दायमादत्ते इति सोपसर्गादप्यादन्तादत एव निपातनात्कः। गवादिकं च दीयमानेऽन्वेति। नित्यसाकाङ्क्षत्वाद् वृत्तिः। दायादशब्दः स्वामिपर्याय इत्यन्ये। षष्ठयामेवेति। 'शेषे षष्ठी' इत्यनेनेति भावः।

तात्पर्ये इति। आसेवापदस्य तत्र रूढेरिति भावः। तात्पर्यञ्च तदेकव्यापारता। आयुक्तयोगेऽधिकरणत्वविवक्षायां सप्तमीप्राप्तौ, सम्बन्धविवक्षायाम् (२) अत्र कुशलयोगे च षष्ठीप्राप्तौ वचनम्।

यतश्च (२।३।४१)। जातिगुणक्रियासंज्ञाभिरिति। विशिष्टस्येत्यध्याहारः। तद्विशिष्टस्य यतः स्वघटितसमुदायात्स्वेतरसमुदाय घटकव्यावृत्तधर्मकरणकं (३) पृथक्करणं तद्वाचकात् षष्ठीत्यर्थः। यत इति किम्? यस्य जात्यादिविशिष्टस्य स्वेतरव्यावृत्तधर्मवत्त्वबोधनं तत एव मा भूत्। षष्ठ्यपवादत्ववत् प्रथमापवादत्वस्यापि सम्भवात्। स्वघटितसमुदायावधिक-स्वतेरसमुदायघटकव्यावृत्तधर्मकरणकपृथक्करणरूप (१) निर्धारण-विष-यत्वरूपो (२) ऽवयवावयविभावरूपश्च सम्बन्धो विभक्त्यर्थः। नृसमुदायावधिक-द्विजेतरनरव्यावृत्तधर्मकरणकपृथक्करणरूपनिर्धारण-विषयो नृसमुदायावयवो द्विजः श्रेष्ठ इति बोधः। संसर्गघटककरणं च श्रेष्ठत्वादिरूपमेव प्रत्यासत्तेः। (३) अत एव 'न निर्धारणे' (२।२।१०) इति सूत्रबोधितं निर्धारणस्य (४) विभक्त्यर्थत्वं सङ्गच्छते।

क्रियांतर इत्यर्थः।। एतदर्थस्य रामेत्याद्यर्थस्यसंबोध्यस्य। अतएव संबोध्यतावच्छेदक रुपेण संबोध्यस्यानुवाद्यत्व एव संबोधनविभक्तेः साधुत्वादेव। ननुसंबोध्यस्योद्देश्य विधेयतया विधेयभूतक्रियायामेवान्वयेब्रजानिदेवदत्तेत्यादि सिद्धिर्न स्यादत आह्। ब्रजानीति।। ननुतत्र व्रजनस्यानन्वितत्वादेवदत्तस्य निघातोनस्यादत आह्।

तत्रेति। कर्मत्वादुद्देश्यत्वाच्चेति विधेय भूतज्ञानं प्रतीत्यर्थः।। नन्वेकतिङ् वाक्यमित्युक्तेर्व्रजानि देवदत्तेत्यस्य समानवाक्यत्वं न स्यादत आह्। एकतिङिति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उद्भूतावयवभेदविवक्षया नृणा मिति बहुवचनम्। तिरोहितावयवभेदाविवक्षया निर्धारणविषये एकवचनं त्वसाध्विति 'कारके' (१।४।१३) इति सूत्रे भाष्ये स्पष्टम्। तत्र हि निर्धारणे कारकेष्विति ब्रूयादित्युक्तम्। 'मिदचोऽन्त्यात्' (१।१।४७) इत्यादौ तु सौत्रो निर्देश इति (१)तदाशयः। द्वन्द्वः सामासिकस्य चेत्यत्र समाससमूहमद्वये इत्यर्थः। समूहेऽर्थे 'अचित्त' (४।२।४७) इति ठक्।

पञ्चमीवि (२।३।४२)। 'यतश्च निर्धारणम्' (२।३।४१) इत्यनुवर्तते विभागोऽत्र भेदः। तत्र निर्धारणे यथाकथञ्चिद्भेदस्य सत्त्वेन विभक्त ग्रहणसामर्थ्यात् यत्र भेद एव न तु केनाप्युपात्तरूपेण अभेदस्तत्रैव प्रवृत्ति रित्याह–भेद एवेति। अत्र पञ्चम्यर्थो निर्धारणविषयत्वरूप एव। पाटलि पुत्रकावधिकनिर्धारणाविषया माथुरा आढ्यतरा इति बोधः। एवञ्च त्रितयोपादान एव निर्धारणप्रतीतिरिति 'पुरुषोत्तमः' इत्यादौ सम्बन्धसामान्ये षष्ठी उत्तमनिरूपितेति (२)समाससिद्धिरिति तरप्सूत्रे कैयटः।

साधुनि (२।३।४२)। निपूर्वात् 'पुण कर्मणि शुमे' इत्यत इगुपधलक्षणः कः अर्चतेश्च भौवादिकाद् 'गुरोश्च हलः' (३।३।१०३) इत्यप्रत्ययः–अर्चा। चौरादिकात्तु 'ण्यासश्रन्थ' (३।३।१०७) इति युच् स्यात्। षष्ठ्यपवादोऽयम्। अप्रत्यादिभिरिति। 'लक्षणेत्थम्' (१।४।९०) इति सूत्रोपात्ताः प्रत्यादयः।

नक्षत्रे च (२।३।४५)। लुप्शब्देन लुप्सञ्ज्ञया लुप्तप्रत्ययार्थो लक्ष्यते इति बोध्यम्। अधिकरणे किम्? अद्य पुष्यः। (३) असत्यां तदनुवृत्तावन्त रङ्गत्वात्प्रातिपदिकार्थे एव स्यात्। मूलेनेति। 'नक्षत्रेण युक्तः कालः (४।२।३) इत्यणो 'लुबविशेषे' (४।२।४) इति लुप्। नक्षत्रे किम्? पञ्चालेषु तिष्ठन्ति। 'जनपदे लुप्' (४।२।८१) इति लुप्।

अतएव संबोध्यस्य क्रियायामन्वयादेव। इति प्रथमा।। अतएव क्रियाजनकत्वम्देव। एषां कारकाणां सर्वेषां कर्त्रतिरिक्तानाम्। नन्वेवमप्यसन्निहित संप्रदानस्य क्रियाजनकत्वाभावात्कारकत्वं न स्यादत आह। सन्निहितेति। स्वज्ञानस्येति।

संप्रदान विषयक दातृदानस्येत्यर्थः। एवंफलविषयक कर्तृज्ञानस्य पूर्व कालत्वेन क्रियाजनकत्वं। नन्वेमपि कारणस्य कार्याव्यवहित पूर्ववृत्तत्वनियमात् स्तोकमित्यादौ फलस्य घटंकरोतीत्यादौ घटादेश्च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तमीपञ्चम्यौ (२।३।७)। 'कालाध्वनोः' (२।३।५) इत्यतस्तदनुवर्त्तते। तच्च पञ्चम्या विपरिणम्यते। मध्यस्यावधिद्वयसापेक्षतया (१) द्विवचनान्तेन समासः। बोधस्तु शक्तित्वेन शक्तिद्वयस्य, न तु द्वित्वेनेति बोद्धयम्। ननु कर्तृरूपस्य कारकस्यैकत्वाद्भेदनिबन्धनमध्यव्यपदेशासम्भ वोऽत आह– शक्तिद्वयमध्ये याविति। कर्त्तृत्वादिशक्तिरेव कारकम्। सा च क्रियाभेदेन भिन्नेति भावः। यद्यप्यवध्यवधिमतोस्साजात्यनियमान्न कालाध्वानौ कारकमध्ये सम्भवतस्तथापि शक्तिशब्देन तदाधारकालादिग्रहणान्न दोषः षष्ठ्यपवादोऽयम्। स्वानन्तरकालवृत्तित्वादिकं विभक्त्यर्थः। शक्तिद्वयमध्यवर्त्तित्वन्तु (२) वस्तुसन्निमित्तम्।

अधिकशब्देनेति। कर्त्तरि क्तप्रत्ययान्ताध्यारूढशब्दार्थकाधिक शब्दयोगे लोकशब्दात् षष्ठ्यां प्राप्तायां ज्ञापकादिमे इष्येते इत्यर्थः। 'तदस्मिन्नधिकम् (४।२।६७) इति सूत्रे भाष्ये तु उपश्लिष्टपदाध्याहारेणौपश्लेषिकेऽधिकरणे सप्तमीत्युक्तम्। कर्मणि क्तप्रत्ययान्ताध्यारूढशब्दार्थकाधिक योगे तु अधिको लोको हरिणेति प्रथमैव। उपपरार्द्धे इति। 'उपोऽधिके च' (१।४।८७) इति कर्मप्रवचनीयत्वम्। ननु 'मामुद्दिश्य विनियोक्ष्यते' इत्यर्थादत्र कर्मणि द्वितीयैवेति किङ्कर्मप्रवचनीयत्वेनेत्यत आह–अगतित्वादिति। तिङि चेति। उदात्तवति तिङन्ते गतिर्निहन्यते इत्यर्थः। अत्र 'तिङ्ङतिङः' (८।१।२८) इति निघातस्य 'निपातैर्यद्यदि' (८।१।३०) इत्यादिना निषेधात् करिष्यतीति तिङन्तस्योदात्तवत्त्वमिति सर्वेष्टसिद्धिः।

इति विभक्त्यर्थाः।

व्यापारात्पूर्ववृत्तित्वाभावात्कारकत्वं नस्यादत आह्। बौद्ध घटादेरिति।। समाप्तः। एतत्यर्यंतमेवायंग्रन्थ उपलभ्यते आपावैष्णवेन लिखितः तल्लेखन सं० ८०८

पुस्तकमदोरानडे बालं भट्टस्यशब्दे १७७८ सम्वत् १६१३ वैशारवशु ।।३।। तद्दिनेत्लेखनं समाप्तम्। त्यादीति, तेभ्यः। तिङंतेभ्यः कौस्तुभोक्तं दूषयितुमुपन्यसति। नचेत्यादि-तेनन्यापेन-अंतरंगान पीतिन्यायेन-धर्मिग्राहक मानादिति धर्मिणो।

।।इतिलघुशब्देंदुशेखर टीका श्रैधरीसमाप्त।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection